महोपाध्यायश्रीयशोविजयगणिवरविरचितः

# श्री चक्षुरप्राप्यकारितावाद :

सटिप्पणको भावोद्घाटन सहितश्च



सम्पादयिंतार :

पूज्यपाद-सुविशाल गच्छाधिपति-प्रवचनप्रदीपाचार्यप्रवराः

श्रीमद्विजय-पुण्यपालसूरीश्वराः

महोपाध्याय-श्रीयशोविजयगणिवर-विरचित:

# श्री चक्षुरप्राप्यकारितावाद:

## सटिप्पणको भावोद्घाटनसहितश्च

संपादयितार:

पूज्यपाद-सुविशाल गच्छाधिपति-प्रवचनप्रदीपाचार्यप्रवरा:

श्रीमद्विजय-पुण्यपालसूरीश्वरा:

प्रकाशक:

पार्श्वाभ्युदय प्रकाशन

अमदावाद

પ્રથમ આવૃત્તિ : વિ.સં. ૨૦૬૯

નકલ : ૧૦૦૦

**ISNB : 978-81-92044-14-9**

**: પ્રાપ્તિસ્થાન :**

**પાર્શ્વાભ્યુદય પ્રકાશન**

**રમેશભાઈ એમ. જૈન**

બી/૩૧-૩૩, ઘનશ્યામ એવન્યુ, ચોથા માળે,

સી.યુ.શાહ કૉલેજની સામે, ઈન્કમટેક્સ, અમદાવાદ-૩૮૦.૦૧૪

ફોન : (૦૭૯) ૨૭૫૪૨૮૨૩, ૨૭૫૪૨૮૧૯

(મો.) ૯૮૨૫૦ ૧૮૨૬૪

Email : mail2pby@gmail.com

**દીપકભાઈ આર. શાહ**

૬, કુસુમઘર પ્લોટ, પ્રતિષ્ઠા ફ્લેટની બાજુમાં,

ગુજરાત સોસાયટી પાસે, પાલડી,

અમદાવાદ-૩૮૦ ૦૦૭

(મો.) ૯૩૨૮૦ ૬૨૨૧૧, ૯૪૨૬૦ ૬૨૨૧૧

**: મુદ્રક :**

કિરીટ ગ્રાફિક્સ : ૦૯૮૯૮૪૯૦૦૯૧

# પ્રકાશકીય

ન્યાયામ્ભોનિધિ-ન્યાયવિશારદ મહોપાધ્યાય શ્રી યશોવિજયજી ગણિવરનું નામ જિનશાસનના આકાશમાં સદાય ગુંજતું રહેશે. અનેક ગ્રંથોના રચયિતા તેઓશ્રી રચિત 'चक्षुरप्राप्यकारितावाद' નામક એક અપ્રગટ કૃતિનું પ્રકાશન કરતા અમારું ટ્રસ્ટ આજે અદ્વિતીય આનંદની લાગણી અનુભવી રહ્યું છે.

જિનશાસનનો અમૂલ્ય અને અલૌકિક જે શ્રુત-વારસો છે એમાંની જ આ અલભ્ય અને અપ્રગટ કૃતિ છે; ચક્ષુરપ્રાપ્યકારિતાવાદ નામની ! એના રચયિતા છે મહોપાધ્યાયજીના હુલામણા નામથી પ્રસિદ્ધ ઉપાધ્યાયશ્રી યશોવિજયજી ગણિવર ! આંખો એ પદાર્થને સ્પર્શ્યાવગર જ પદાર્થનો અવબોધ કરે છે એ સિદ્ધાન્તનું જિનશાસનમાન્ય તર્કબદ્ધમંડન અને આંખો પદાર્થને સ્પર્શીને જ પદાર્થનો અવબોધ કરે છે એવું માનતા અનેક પરવાદીઓની માન્યતાનું શાસ્ત્રસાપેક્ષ ખંડન એ આ ગ્રંથની વિષયવસ્તુ છે આ અંગેની બધી રજૂઆતો આ જ પુસ્તકની પ્રસ્તાવનામાં, તથા 'મારે કાંઈક કહેવું છે' એમાં જણાવાઈ હોવાથી અમે એનું પુનરાવર્તન કરતા નથી. જિજ્ઞાસુઓએ ત્યાંથી જાણી લેવું હિતકર રહેશે.

અમારી વિનંતિથી આ ગ્રંથનું પ્રકાશન કરવા માટે જે જે મહાત્માઓએ પુરુષાર્થ કર્યો છે તેમાં સૌ પ્રથમ સુવિશાલગચ્છના અધિપતિ-પ્રવચનપ્રદીપ-સિદ્ધાંતપ્રભાવક પૂ. આ.ભ. શ્રીમદ્‌વિજય પુણ્યપાલસૂરીશ્વરજી મહારાજા - તેઓશ્રીના શિષ્યરત્ન પૂ. આ. ભ. શ્રીમદ્‌વિજય ભુવનભૂષણ-સૂરીશ્વરજી મ.સા., તથા પૂ. મુનિશ્રી વિરતીન્દ્રવિજયજી મ.સા./પૂ. મુનિ શ્રી કીર્તીન્દ્રવિજયજી મ.સા. આદિ પૂજ્યોને અમે યાદ કર્યા વિના રહી શકતા નથી તેઓના મળેલા સહયોગે જ અમે આ પરિણામ આપી શક્યા છીએ.

પ્રસ્તુત ગ્રંથના પ્રકાશનમાં પોતાના પરમોપકારી પૂજ્ય ગુરુવર્યોના સદુપદેશથી સંઘના જ્ઞાન-નિધિમાંથી લાભ લઈને લાભાર્થી બનેલા **શ્રી ચિંતામણિ પાર્શ્વનાથ જૈન શ્વે.મૂ.પૂ. તપા. સંઘ-નાસિક**નો અમે હાર્દિક આભાર માનવા સાથે શ્રુત-સુરક્ષાના આ કાર્યમાં તેઓના આ યોગદાનને અમે ક્યારેય વિસરશું નહિ. ભવિષ્યમાં પણ આવી જ શ્રુતભક્તિ પ્રદર્શિત કરી સંઘના જ્ઞાનદ્રવ્યનો સદુપયોગ કરતા રહે એવી શુભેચ્છા રાખીએ છીએ.

અમારા ટ્રસ્ટ દ્વારા પ્રથમવાર જ પ્રકાશિત થઈ રહેલ પૂ. મહોપાધ્યાયશ્રીજીના આ ગ્રંથના પ્રકાશન દ્વારા સૌ સજ્જનો સમ્યગ્જ્ઞાન - સમ્યગ્દર્શન અને સમ્યગ્ચારિત્રની વિશુદ્ધ પરિણતિને પામી આત્માનું અનંતુ ઐશ્વર્ય પ્રાપ્ત કરે એ જ શુભેચ્છા !

**પાર્શ્વાભ્યુદય પ્રકાશન - અમદાવાદ**

# શ્રુતલાભ

દીક્ષાયુગપ્રવર્તક, બાલદીક્ષાસંરક્ષક, મહારાષ્ટ્રદેશોદ્ધારક

પૂ.આ.ભ.શ્રીમદ્ વિજય **રામચન્દ્રસૂરીશ્વરજી** મહારાજાના

**દીક્ષા શતાબ્દિ વર્ષ**ને પામીને

તથા

નાસિક સંઘોપકારી ગુરુવર્યો

વાત્સલ્યવારિધિ પૂ.આ.ભ.શ્રીમદ્ વિજય

**મહાબલસૂરીશ્વરજી** મહારાજા

સુવિશાલ ગચ્છાધિરાજ પૂ.આ.ભ.શ્રીમદ્ વિજય

**પુણ્યપાલસૂરીશ્વરજી** મહારાજાના

સદુપદેશને ઝીલીને

પ્રસ્તુત પ્રકાશનમાં જ્ઞાનનિધિમાંથી લાભાન્વિત બનેલા

**શ્રી ચિંતામણિ પાર્શ્વનાથ જૈન શ્વે.મૂ.પૂ. તપા. સંઘ-નાસિક**ની

શ્રુતભક્તિની

અમે હાર્દિક અનુમોદના કરીએ છીએ.

લિ.

**શ્રી પાર્શ્વાભ્યુદય પ્રકાશન ટ્રસ્ટ**

અમદાવાદ


પ.પૂ. ઉપાધ્યાયશ્રી યશોવિજયજી મહારાજ



જૈન શાસન શિરતાજ વ્યાખ્યાનવાચસ્પતિ
પૂજ્ય આચાર્ય શ્રી વિજય રામચંદ્રસૂરીશ્વરજી મહારાજા

## ॥ तुभ्यं समर्पयामि ॥

यै र्जिनाज्ञाजीविमहापुरुषैर्मां जिनाज्ञाया महत्त्वं बोधयित्वा प्रकटीचकार मद्धृदि जिनाज्ञाममत्वम्, यैः पुण्यपुरुषै र्न स्वकीयमतानुयाय्यपित्वहमकारि जिनाज्ञानुयायी,

यैश्च युगपुरुषै र्मार्गस्थदेशनापद्धते र्ज्ञानं वरदानञ्च मां दत्त्वा मे महदुपकृतम्, मातृ-पितृ-गुरुभ्योऽप्यधिकतरं मद्धृदये यैः स्थानं मानञ्च सम्प्राप्तमेतादृशामैदंयुगीनयुग-प्रधानकल्प-जैनशासनशिरोमणि-तपागच्छगगनदिनमणि-दीक्षायुगप्रवर्तक-परमाराध्यपादपद्मानां पूज्यवर्याणां-

**श्रीमद्विजय-रामचन्द्रसूरीश्वराणां**

बहुशास्त्रसंस्पर्शसम्पूतकरारविन्दे

तद्दीक्षाशताब्दीपर्वोत्सवे

**लघुहरिभद्र-न्यायविशारद-महामहोपाध्याय-**

**श्रीयशोविजयगणिवरविरचितं**

**'चक्षुरप्राप्यकारितावाद' संज्ञितं**

**ग्रन्थपुष्पमिदं**

परमोच्चश्रद्धापुरस्सरं समर्पयामि

—रामबाल-पुण्यपालः

# પ્રસ્તાવના

वादे वादे जायते तत्त्वबोधः । સંસ્કૃતની આ પંક્તિ કહે છે કે દરેક વાદથી તત્ત્વનો બોધ થાય છે. દરેક વિષયને ઉપર ઉપરથી તો આપણે જાણીએ છીએ પણ જ્યાં સુધી એ વિષયનો ઊંડાણથી બોધ ન થાય ત્યાં સુધી તે વિષય પૂરેપૂરો સમજાતો નથી. આ રીતે વિષયના ઊંડાણ સુધી પહોંચવાની ક્ષમતા દરેક મનુષ્યમાં હોતી નથી. માટે તે તે વિષયનો વાદ ચાલતો હોય ત્યારે તેને સાંભળવા માણસ દોડતો પહોંચી જાય. તે તે વિષયના અધિકૃત વિદ્વાનો તે તે વિષયને ઊંડાણથી ચર્ચતા હોય ત્યારે પરિણામરૂપે તત્ત્વજ્ઞાનનું ઝરણું તેમાંથી વહેતું હોય. સાંભળનારને આ તત્ત્વજ્ઞાન વિશેષ મહેનત વિના સહજતાથી જ પ્રાપ્ત થઈ જાય છે. આ જ કારણથી ભૂતકાળમાં આવા 'વાદ' મોટી સંખ્યામાં થતા, યોજાતા. રાજા અને રાજસભાઓ પણ આમાં આદરથી જોડાતી. વિદ્વાનો તો આગલી હરોળમાં બેઠા હોય પણ તત્ત્વપ્રેમી પ્રજા પણ મોટી સંખ્યામાં ભીડ જમાવતી. રાજકાજના પ્રશ્નોને બાજુએ રાખીને પણ વાદ દિવસો-મહિનાઓ સુધી ચાલતો. જે રાજસભામાં વાદ યોજાય તે રાજસભાનું ગૌરવ વધતું. લોકો પણ વાદને આદરની નજરે જોતા.

આજે કાળના પ્રવાહે અને પ્રભાવે વાદને જોવાની નજર બદલાઈ ગઈ છે. વાદ એટલે તત્ત્વજ્ઞાનનું સાધન : આ સમજના સ્થાને વાદ એટલે ચર્ચા. ચર્ચા એટલે મરચા ઉડે જ. અને એમાં ખર્ચામાં ઉતરવું પડે, તેય પાછા ખોટા ખર્ચા ! આવી ગેરસમજ આજના કાળમાં જનસમાજના માનસમાં ઉભી થઈ છે. એના કારણે વાદને સન્માનની નજરે જોવાને બદલે તિરસ્કાર-અણગમાની નજરે જોવાય છે. એને ઝઘડો-તકરાર માનવામાં આવે છે. તત્ત્વની ચર્ચા ઉપાડનારને વિવાદ કરનાર, ઝઘડાખોર અને જિદ્દી માની લેવામાં આવે છે. ચર્ચામાંથી સાર તરીકે તત્ત્વજ્ઞાન-તત્ત્વબોધ મેળવવાની જગ્યાએ ચર્ચાથી આઘા રહેવામાં મોટો ફાયદો સમજવામાં આવે છે. વાદ ચાલી રહ્યો છે કે વિવાદ થઈ રહ્યો છે તેની કોઈ સમજ હોતી નથી. વાદની તો સમજ જ નથી. કોઈપણ ચર્ચાને વિવાદ

માનીને આઘાં રહે છે. જો કે આજ માણસો જ પાછા પોતાના ઘર-ધંધાના પ્રશ્ને કલાકો સુધી બેઠકો કરે, ચર્ચા કરે. પ્રશ્નનું નિરાકરણ લાવવાની મહેનત કરે. નિરાકરણ આવી જાય તો પોતે ખુશ થાય અને બીજાની આગળ આ બનાવનું પ્રશંસાપૂર્વક વર્ણન કરે. એને વિવાદ કહીને કદી વગોવે નહિ. ઉગ્ર ચર્ચા થાય તો પણ તે કરીનેય પ્રશ્નનું નિરાકરણ તો આવવું જ જોઈએ તેવું માને. સંસારના ઘર કે ધંધાના પ્રશ્ન માટે આવું 'ઉદાર' વલણ અપનાવનારા તાત્ત્વિક ચર્ચા માટે અલગ વિચારે કે અલગ બબડાટ કરે તે સુજ્ઞ મનુષ્યોમાં આદરપાત્ર તો ન જ બને.

આ ભૂમિકા એટલા માટે સર્જવી પડે છે કે **'ચક્ષુ અપ્રાપ્યકારિતાવાદ'** નામના ગ્રંથનું પ્રકાશન થઈ રહ્યું છે અને આ ગ્રંથના કર્તા પણ પ્રકાંડ વિદ્વદ્વર્ય મહામહોપાધ્યાય **શ્રીયશોવિજયજી મહારાજા** જેવા મહાન શાસ્ત્રકાર છે. 'આંખ વિષયનો સંબંધ કર્યા વિના જ્ઞાન કરાવે છે' આ વાતની સિદ્ધિ માટે ૫૯ શ્લોકોનો આ ગ્રંથ પૂ. ઉપાધ્યાયજી મહારાજે સહજતાથી સર્જ્યો છે. આજના કાળના વિચારવાળા મુજબ તો એવો જ મત પ્રગટ થાય કે આટલી નાની વાતમાં શું વાદ-વિવાદ કરવા ? આંખ વિષય સાથે સ્પર્શીને જ્ઞાન કરાવે કે સ્પર્શ્યા વિના જ્ઞાન કરાવે એમાં ચર્ચા શી કરવી ? જે રીતે કરે તે રીતે. છેવટે જ્ઞાન તો કરાવે જ છે ને ? ભલા આદમી, ટપ ટપને છોડો ને ! આપણે તો રોટલા સાથે કામ છે. 'આંખને પદાર્થનો સ્પર્શ માનનારા અને નહિ માનનારા બન્ને 'આંખ જ્ઞાન કરાવે છે' તેની સ્વીકાર કરે છે પછી આપણે શું વાંધો ? નકામી ચર્ચામાં ઉતરવાથી નાહકનો ક્લેશ થાય અને વધે. ક્લેશ કરીએ તો ધર્મ ક્યાં રહ્યો. આવી તો કંઈકેટલી સમજ્યા વિનાની દલીલો કરવા માંડે. ચર્ચાની ના પાડનારો પોતે જ 'ચર્ચા ન કરવાની ચર્ચા' જોરશોરથી કરે !

ખરી વાત એ છે કે જિનશાસનનાં દરેક તત્ત્વો એકબીજાની સાથે સાંકળની કડીની જેમ જોડાયા છે. સાંકળની એક કડી તૂટે એટલે આખી સાંકળ તૂટી કહેવાય. મોટા હાથીને સાંકળથી બાંધ્યો હોય તે સાંકળની એક જ કડી તૂટે એટલે બાકીની બધી કડીઓ જોડાયેલી હોવા છતાં હાથી મુક્ત થઈ જાય છે. તેની જેમ જ બાકીનાં બધાં તત્ત્વો એકબીજા સાથે જોડાયેલાં રાખો, ફક્ત એક જ તત્ત્વને તેમાંથી જુદો પાડીને ન સ્વીકારો એટલે તત્ત્વોની સાંકળ તૂટી જાય. એક તત્ત્વ ખડી પડે એટલે બાકીનાં તત્ત્વોમાં બધે ગરબડ ઉભી થાય. એટલા માટે જ જિનશાસનમાં એકપણ તત્ત્વનો અપલાપ ન થાય, એકપણ તત્ત્વની વિપરીત પ્રરૂપણા ન થાય કારણ કે એક તત્ત્વની ગરબડના કારણે તત્ત્વનો આખો મહેલ તૂટી પડે. એટલા માટે જ એક તત્ત્વ માટે કોઈ અલગ વાત કરે એટલે તેની સાથે વાદ કરીને સિદ્ધ કરવું પડે કે આવી અલગ વાત સ્વીકારવામાં આવે તો કેટલી કેટલી વાતમાં પ્રશ્નો ઉભા થશે. એ પ્રશ્નોને સમાવવા હોય તો તત્ત્વને આ રીતે જ માનવું પડે તેમ દૃઢતાથી કહેવું પડે. ભગવાનના એક વચનને અમાન્ય કરનારો શાસનમાં રહી શકે નહિ.

પૂ. ઉપાધ્યાયજી મહારાજે ચક્ષુઅપ્રાપ્યકારિતાવાદ જાતે નથી ઉપાડ્યો. પ્રાચીન ગ્રંથકારો અને પૂર્વાચાર્યોએ આ વાતની સિદ્ધિ માટે અનેક ગ્રંથોમાં તેનું નિરૂપણ કર્યું છે. સામે આ વાતનો સ્વીકાર ન કરનારા અન્ય વિદ્વાનો પણ પોતે પકડેલી વાતની સિદ્ધિ માટે પોતાના ગ્રંથોમાં જોરદાર તર્કો લડાવે છે. આશ્ચર્યની વાત છે કે તે અન્ય અન્ય વિદ્વાનો અંદર અંદર પણ પાછા મતાંતરો ધરાવે છે. એક વિદ્વાનની વાતનો બીજો વિદ્વાન ઇન્કાર કરે છે. જૈનદર્શનની વાતનો સ્વીકાર ન કરવામાં એક હોવા છતાં એ બધા વિદ્વાનો પાછા પરસ્પર એકમત નથી ધરાવતા. પૂ. ઉપાધ્યાયજી મહારાજે આ ગ્રંથમાં એ બધા વિદ્વાનોને ક્રમસર બહુ આકર્ષક રીતે ગોઠવ્યા છે. શાલિકાચાર્ય, વર્ધમાન ઉપાધ્યાય, ઉદયનાચાર્ય, જયરામભટ્ટાચાર્ય વગેરેની રજૂઆતને પ્રગટ કરી તે બધા મતોનું નિરાકરણ શાસ્ત્ર અને તર્ક દ્વારા કર્યું છે. ગ્રંથની આખી શૈલી પ્રવાહી છે. ક્યાંય ખેંચતાણ કરીને ખંડન કરી રહ્યાનો ભાવ ઉપસતો નથી. વસ્તુતત્ત્વનું નિરૂપણ કરતા તે તે મતનો ઉલ્લેખ કરી 'તત્ત્વ ક્યાં રહ્યું છે' તેની અભિવ્યક્તિ થઈ છે અને એટલા માટે જ ગ્રંથ સમાપન સમયે પૂ. ઉપાધ્યાયજી મહારાજ લખે છે કે 'પોતે પ્રીતિપૂર્વક આ વાદને કર્યો છે. અહીં કડવાશની વાત નથી. પ્રીતિ હોય ત્યાં કડવાશ હોતી નથી. પ્રીતિ આનંદને સૂચવે છે. આનંદમાં આક્રોશ ન હોય. વાદ કેવી રીતે થાય તેનો આ સરસ નમૂનો છે. વાદ અંગે ભડકાવનારા દરેક મંતવ્યોનો આ સમાપન દ્વારા છેદ ઉડી જાય છે. ન તેમને કોઈ વાદી પ્રત્યે દ્વેષ છે, ન તેમને વાદ કરતી વખતે આક્રોશ છે. તેમના હૃદયમાં એક જ ભાવ છે, કરૂણા ! તત્ત્વ આટલું સ્પષ્ટ છે છતાં વિદ્વાનો કેમ ભૂલે છે ? તેમને સરળ માર્ગ બનાવીને ભ્રમણામાંથી બહાર લાવવાનો એક ભાવ છે કોઈ ભ્રમણામાંથી બહાર આવે તો પણ આનંદ છે કોઈ ભ્રમણામાંથી નીકળવા તૈયાર ન થાય તો પણ પ્રીતિભાવ નંદવાતો નથી. આક્રોશ પ્રગટતો નથી. પ્રશાંતિ ઝાકળની ભીનાશની જેમ પથરાઈ છે. મહાપુરુષોનો વાદ આવો હોય છે.

આ ગ્રંથમાં ગ્રંથરચનાનો સમય પૂ. ઉપાધ્યાયજી મહારાજે લખ્યો નથી. આ ગ્રંથની હસ્તપ્રત લખનારા શ્રીકીર્તિરત્ન મુનિવર વિ.સં. ૧૭૧૦ના મહાવદ ૧૧નો સમય લખે છે એટલે તેઓ પૂ. ઉપાધ્યાયજી મહારાજના સમયમાં જ આ ગ્રંથની નકલ બનાવી રહ્યા છે. પૂ. ઉપાધ્યાયજી મ.નો જન્મ પ્રાયઃ વિ.સં. ૧૬૮૦ની સાલનો માનવામાં આવે છે. તેઓશ્રીનો કાળધર્મ વિ.સં. ૧૭૪૩નો ઇતિહાસ પ્રસિદ્ધ છે. વિ.સં. ૧૭૧૦ની સાલમાં લખાયેલી આ પ્રતિ તેમના હયાતીકાળની હોવાથી ખૂબજ પ્રમાણભૂત માનવી પડે. આપણને આની બીજી પ્રતિઓ તે સમયની લખાયેલી મળી આવે તો કદાચ ગ્રંથરચનાનો ચોક્કસ સમય આપણે વિચારી શકીએ. કદાચ એવું પણ બને કે પૂ. ઉપાધ્યાયજી મહારાજે આ ગ્રંથ લખ્યો હોય તે પછીની પ્રથમાદર્શની જ આ નકલ હોય એવું પણ બને. નક્કર આધાર વિના આપણે તો આવાં અનુમાનો જ કરવાના રહ્યા. વધુ આધાર મળે તો આ વિષયમાં વિશેષ ઊહાપોહ પણ થઈ શકે.

પૂ. ઉપાધ્યાયજી મહારાજના અવધાનોની વાતો લઈએ તો વિ.સં. ૧૬૯૯માં તેઓશ્રીએ અષ્ટાવધાન કર્યા હતા અને વિ.સં. ૧૭૦૮માં તેઓશ્રીએ અષ્ટાદશાવધાન કર્યા હતા. આજે શતાવધાન-દ્વિશતાવધાનના પ્રયોગો થઈ રહ્યા છે. જનમાનસમાં એની છાપ અહોભાવ ભરી સ્થપાઈ રહી છે. ૧૦૦ કે ૨૦૦ અવધાનના પ્રયોગો આજે જે રીતે થઈ રહ્યા છે તે જ મુજબના પૂ. ઉપાધ્યાયજી ભગવંતના ૮ કે ૧૮ અવધાનને માનીએ તો એમ લાગે કે તેમાં પૂ. ઉપાધ્યાયજી મહારાજની વિશેષ પ્રતિભા ન જણાય. એવું અનુમાન થાય છે કે આજના સમયમાં ચાલતા અવધાનોની અપેક્ષાએ વિશેષ પ્રતિભાની અપેક્ષા રહે તેવા અવધાનો પૂ. ઉપાધ્યાયજી ભગવંતે કર્યા હશે. આવા અવધાનના પ્રયોગ બાદ આ ગ્રંથ રચાયો છે કે તેની પહેલા રચાયો છે તે સ્પષ્ટ જાણી શકાતું નથી.

ગ્રંથરચનાના ક્રમમાં જોઈએ તો આ ગ્રંથની રચના પહેલા ઘણા બધા પ્રૌઢશૈલીના ગ્રંથો તેઓશ્રીના હાથે રચાયા બાદ આ ગ્રંથ રચાયો હોઈ શકે. આજે તેઓશ્રીના ગ્રંથોના અંદાજિત રચનાસમય સાથેની સૂચિ જોવા મળે છે તેમાં તો આ ચક્ષુઅપ્રાપ્યકારિતા ગ્રંથનો ઉલ્લેખ વિ.સં. ૧૭૧૦ની સાલમાં કરવામાં આવે છે જે હકીકતમાં તો નકલ કર્યાની સાલ છે.

પૂ. ઉપાધ્યાયજી મહારાજની પ્રતિભા મધ્યાકાશે હતી તે સમયે આ ગ્રંથ રચાયાનું અનુમાન કરી શકાય છે. તેઓશ્રી કાશી અભ્યાસ માટે ગયા. ત્યાંના અભ્યાસ બાદ પરદેશી પંડિત સાથે વાદ કરીને તેને પરાજિત કર્યાની ઘટના અભૂતપૂર્વ કહી શકાય. કારણકે- તેઓશ્રી જે પંડિતજી પાસે અધ્યયન કરી રહ્યા હતા તે કાશીના મૂર્ધન્ય પંડિત હતા. પરદેશથી આવેલા નવા પંડિતે વાદમાં કાશીના આ મૂર્ધન્ય પંડિતને હરાવ્યા હતા. આવા મોટા ગજાના પરદેશી પંડિતને વાદમાં પરાજિત કરવાનું કોઈ વિદ્યાર્થી વિચારી પણ ન શકે તેને પૂ. ઉપાધ્યાયજી મહારાજે જગતના ચોગાનમાં પંડિતોની સભામાં કરી બતાવ્યું. પૂ. ઉપાધ્યાયજી મ.ની પ્રતિભા, જ્ઞાનનો ક્ષયોપશમ, તત્ત્વ પ્રત્યેનો વિશ્વાસ, કુદરતી આત્મવિશ્વાસ અને નમ્રતાભરી નિર્ભિક પ્રસ્તુતિ : આ બધાનો વિચાર કરીએ તો આપણી કલ્પનાના બધા સીમાડા પાર કરી જાય તેવી વિરાટ તેઓશ્રીની પ્રતિભાના દર્શન થાય. આ ગ્રંથની પ્રતિના લેખનની સાલ જોતા કાશીની આ ઘટના પછીનું એ સર્જન હોઈ શકે.

પૂ. ઉપાધ્યાયજી મહારાજે પોતાના ગ્રંથના અંતે દરેક વખતે સાલ લખી હોત તો આપણી રચના સમય શોધવાની મહેનત ઓછી થઈ જાય તેમ પહેલી નજરે આપણને લાગે. પણ તે સમયની વાસ્તવિક સ્થિતિનો વિચાર કરીએ તો બહુ કપરો કાળ હતો તેમ માન્યા વિના છૂટકો નથી. એવું આપણે સાંભળતા આવ્યા છીએ કે પૂ. ઉપાધ્યાયજી મહારાજ ગ્રંથ લખીને બહિર્ભૂમિએ જતા તો પાછા ફર્યા બાદ તેઓશ્રીનો ગ્રંથ ગૂમ થઈ ગયો હોય, ક્યાં તો તેના પર શાહી ઢોળાઈ ગઈ હોય, પાનાઓ ફાડી નાંખવામાં આવ્યા હોય. આવું કંઈક થતું જેનાથી તેઓશ્રીને નવેસરથી પાછું એ

કામ કરવું પડતું. ખુદ તેઓશ્રીના હસ્તાક્ષરે લખેલ પત્રમાં ઉલ્લેખ મળે છે કે બે લાખ શ્લોક પ્રમાણ ન્યાયશાસ્ત્રનું તેઓશ્રીએ સર્જન પૂર્ણ કર્યું હતું. આજે એ સર્જન ક્યાં છે તેનો કોઈ અંદાજ પણ આપણે લગાવી શકતા નથી. આવા કપરા સંજોગોમાં આપણા જેવા હોઈએ તો સર્જનયાત્રા અટકાવીને બેસી જઈએ જ્યારે તેઓશ્રી જરાય વિચલિત બન્યા વિના પોતાના ધ્યેયમાં આગળ વધતા જ રહ્યા, આ તેઓશ્રીની કર્તવ્યનિષ્ઠા પરમ વંદનીય છે. આવું અંધાધૂંધ વાતાવરણ હોય તેમાં આપણે 'આપણને ચોક્કસ સાલ મળતી નથી' તેની વ્યથા કેવી રીતે વ્યક્ત કરી શકીએ ?

નકલ કરનાર મહાત્મા સાથે સંબંધિત એક ઇતિહાસ મળી રહ્યો છે તે જાણવા જેવો છે. તપાગચ્છાધિપતિ પૂ.આ.શ્રી વિજય દેવસૂરીશ્વરજી મહારાજાના રાજ્યકાળની વાત છે. તે સમયે પાટણમાં પૂ. મલ્લવાદીક્ષમાશ્રમણ ભગવંતની કૃતિ નયચક્ર નામના ગ્રંથરત્નની શ્રીસિંહવાદી ગણિવરે રચેલ ૧૮૦૦૦ શ્લોક પ્રમાણ ગ્રંથની પ્રાપ્તિ થતા માત્ર પંદર દિવસમાં તેનો હસ્તાદર્શ કેટલાક મહાત્માઓએ ભેગા મળી લખ્યો હતો. આ ગીતાર્થ પૂજ્યોમાં મોટા મોટા નામો હતા. તેમાં આપણા ચક્ષુરપ્રાપ્યકારિતા ગ્રંથની પ્રતિ લખનારા શ્રી કીર્તિરત્ન ગણિવરનું પણ નામ સામેલ છે. પૂ. તત્ત્વ વિ.મ., પૂ. રવિ વિજય મ. પણ સાથે હતા. આ વિગત એ ગ્રંથની પુષ્પિકામાં મળે છે. માત્ર પંદર દિવસમાં ૧૮૦૦૦ શ્લોક પ્રમાણ ગ્રંથની નકલ થઈ વિ.સં. ૧૭૧૦ના પોષ વદ-૧૩ના દિવસે. આ કાળને એક મહિનો પણ પૂર્ણ થયો નથી ત્યાં જ વિ.સં. ૧૭૧૦ના મહા વદ-૧૧ના દિવસે શ્રી કીર્તિરત્ન ગણિવરે આ ગ્રંથની પણ નકલ કરી. પૂ. ઉપાધ્યાયજી મહારાજના દૃષ્ટિ તળેથી આ નકલ પસાર થઈ હોવી જોઈએ.

આ ગ્રંથના સંપાદકશ્રીજીએ આ ગ્રંથની બીજી નકલ મળી શકે તે માટે આજના પ્રસિદ્ધ લગભગ દરેક હસ્તલિખિત જ્ઞાનભંડારોમાં તપાસ કરાવી પણ ક્યાંયથી બીજી નકલ હાથમાં આવી નથી. આ ગ્રંથના સંપાદનમાં કેટલો શ્રમ લેવામાં આવ્યો છે તે તો આપ સૌ આ ગ્રંથનું અવલોકન કરશો એટલે આપને જણાઈ આવશે.

જેઓશ્રીની દીક્ષાશતાબ્દીનું વર્ષ પસાર થઈ રહ્યું છે તે સુવિહિત શ્રમણોના સર્જનહાર-દીક્ષાયુગપ્રવર્તક-વર્તમાનકાળની સર્વજ્ઞોમુખી વિરાટ પ્રતિભા સ્વરૂપ વ્યાખ્યાનવાચસ્પતિ પૂજ્યપાદ આચાર્યદેવેશ **શ્રીમદ્ વિજય રામચન્દ્રસૂરીશ્વરજી મહારાજા**ના સુવિશાળ સમુદાયના અધિપતિ પ્રવચન પ્રદીપ - સિદ્ધાંતપ્રભાવક - મહારાષ્ટ્રશાર્દુલ પૂજ્યપાદ આચાર્યદેવ **શ્રીમદ્ વિજયપુણ્યપાલ સૂરીશ્વરજી** મહારાજા આ ગ્રંથરત્નના સંપાદકશ્રી છે. તેઓશ્રી ધર્મતીર્થપ્રભાવક પૂજ્યપાદ આચાર્યદેવ **શ્રીમદ્ વિજય મિત્રાનંદસૂરીશ્વરજી મહારાજા**ના લાડીલા અને પિતા ગુરૂદેવ વાત્સલ્યનિધિ પૂજ્યપાદ આચાર્યદેવ **શ્રીમદ્ વિજય મહાબલસૂરીશ્વરજી મહારાજા**ના કૃપાપાત્ર પટ્ટધર છે. પૂ. ઉપાધ્યાયજી ભગવંતના ગ્રંથોના તેઓશ્રી પરમચાહક છે. તેઓશ્રીના પ્રવચનોમાં પૂ. ઉપાધ્યાયજી ભગવંતની

અમર પંક્તિઓ અને માર્મિક શ્લોકો વારંવાર સાંભળવા મળે છે. તેઓશ્રીના પરિચયમાં આવનારા શક્તિશાળી આત્માઓને તેઓશ્રી પૂ. ઉપાધ્યાયજી ભગવંતના ગ્રંથોના અધ્યયન અને વિસ્તરણ માટે ખાસ ભારપૂર્વક પ્રેરણા કરતા હોય છે. આવા પૂ. ઉપાધ્યાયજી ભગવંતના ઉપાસક પૂજ્ય સુવિશાલગચ્છનાયકશ્રીના અધિકૃત હસ્તે પૂ. ઉપાધ્યાયજી ભગવંતના ગ્રંથરત્નનું સંપાદન થઈ રહ્યું છે તે અતિ ગૌરવ અને આનંદનો વિષય બની રહે છે. તેઓશ્રીએ ગ્રંથસંપાદનમાં ગ્રંથના પદાર્થોને આવરી લેતી વિશાળ સામગ્રી મૂકી છે તેથી આ ગ્રંથના પદાર્થોને પ્રસ્તાવનામાં પ્રસ્તુત કરવાની પુનરુક્તિ હું કરતો નથી. પ્રસ્તાવના લખવાનો આદેશ કરીને પૂ. ગચ્છનાયકશ્રીજીએ મને પૂ. ઉપાધ્યાયજી ભગવંત અને તેઓશ્રીના આ ગ્રંથરત્નનું અવગાહન કરવાનો અવસર આપ્યો છે તે ઉપકાર મને જીવનભર યાદ રહેશે.

પદાર્થના મર્મ સુધી પહોંચવાની તાલીમ આપતા પૂ. ઉપાધ્યાયજી ભગવંતના આ ગ્રંથના અધ્યયન દ્વારા સૌના હૃદયમાં પ્રવચનરાગ પ્રગટે, તેથી સમ્યગ્દર્શન અને સંયમ દ્વારા સિદ્ધિગતિના સૌ સ્વામી બને તેવી શુભકામના.

**આચાર્ય વિજયજયદર્શનસૂરિ**

શ્રીપાલનગર, જૈન ઉપાશ્રય ,
વાલકેશ્વર, મુંબઈ-૬,
વિ.સં. ૨૦૬૮, અષાઢ વદ-૩
શુક્રવાર, તા. ૬-૭-૨૦૧૨

• • •

# સંપાદકીય

ન્યાયવિશારદ લઘુહરિભદ્ર મહામહોપાધ્યાય શ્રીયશોવિજયજી ગણિવર વિરચિત એક અપ્રગટ કૃતિ 'चक्षुरप्राप्यकारितावाद' નામક આજે પ્રકાશન પામી જિનશાસનના ગગનને અલંકૃત કરી રહી છે, એ આપણું પરમસૌભાગ્ય છે. આ કૃતિનું સંપાદન-સંશોધન કરવાનો પુણ્ય-લાભ મને જે મળ્યો અને એ દ્વારા શ્રુતસેવા અને સ્વાધ્યાય કરવાની જે અનુપમ તક પ્રાપ્ત થઈ એનો અવર્ણનીય આનંદ હું વ્યક્ત કરી શકું તેમ નથી.

જિનશાસનનો જે અદ્ભુત શ્રુત-વારસો છે, એમાં 'મહોપાધ્યાયજી'ના હુલામણા નામથી પ્રસિદ્ધ શ્રીયશોવિજયજી મહારાજાના સાહિત્યનો અમૂલ્ય ફાળો છે. તેઓશ્રીએ આગમના અર્થગંભીર રહસ્યોને અને જિનશાસનના અગમ્યપદાર્થોને નવ્યન્યાયની શૈલીમાં રચીને પરપક્ષના પ્રતિવાદીઓનું ખંડન કરી સ્યાદ્વાદ-ધર્મની જય-પતાકા વિશ્વમાં લહેરાવી જિનશાસનને ગૌરવોન્નત રાખવામાં અદ્ભુત ફાળો આપ્યો છે, એમ નિઃશંક કહી શકાય ! અનેક ગ્રંથો-પ્રકરણો અને નવતર સાહિત્યની રચના કરનારા તેઓશ્રીનું જે સાહિત્ય ઉપલબ્ધ છે એમાંથી જ આ એક અપ્રગટ કૃતિ નવતર સંપાદન પામી પ્રકાશન પામી રહી છે.

નાનકડા આ ગ્રંથ પ્રકાશનની યાત્રા મોટી રહી છે. તીર્થાધિરાજ શ્રી શત્રુંજયથી અધિષ્ઠિત પાલિતાણાના સાહિત્યમંદિરના સમૃદ્ધ હસ્તલિખિત જ્ઞાનભંડારમાંથી અકસ્માતે જ પ્રાપ્ત થયેલ આ કૃતિ, પૂ. ઉપાધ્યાયજી મહારાજના તથા બીજા કેટલાંક ગ્રંથોની હસ્તપ્રતિઓ મેળવવા જ્યારે મુ.શ્રીકલ્યાણભૂષણવિજયજી અને મુ.શ્રી કીર્તિન્દ્રવિજયજી ત્યાં પહોંચ્યા ત્યારે એક દાબડામાં મુનિશ્રીના નજરે ચઢી હતી. મુ. શ્રી કીર્તિન્દ્રવિજયજીના નજરે જ્યારે આ કૃતિ પડી ત્યારે તેઓએ પ્રતિ હાથમાં લીધી. આગળ-પાછળના પાનાંઓ જોયા. જ્યાં 'ચક્ષુરપ્રાપ્યકારિતાવાદ' આવું પ્રતિનું નામ અને આ કૃતિના રચયિતા તરીકે પૂ.મહોપાધ્યાયજીનું નામ વાંચ્યું ત્યારે તેઓ આનંદથી ઝૂમી ઉઠ્યા. આ ગ્રંથ વિશે જાણ્યું હતું, પણ જોવામાં તો પ્રથમવાર જ આવ્યો એટલે અવર્ણનીય આનંદ અનુભવાયો સાથેના મુનિવરને પણ બધી વાત કરી તેઓ પણ આનંદથી ખીલી ઊઠ્યા.

સાહિત્ય મંદિરના સમૃદ્ધ જ્ઞાનભંડારની સારી રીતે દેખભાળ રાખનારા **મુનિશ્રી જયભદ્રવિજયજી** કે જેઓ પૂ. આ. શ્રીવિજય ધર્મસૂરિજી મહારાજના સમુદાયના પૂ.આ. શ્રીવિજય યશોદેવસૂરિજી *મ.સા.ના શિષ્યરત્ન છે. તેઓએ જ્યારે જ્યારે આ મહાત્માઓ ત્યાં જાય ત્યારે દરેક વખતે સાથે*

રહીને પ્રતિઓ કાઢી આપતા. મુનિઓ દ્વારા પણ ઝેરોક્ષ કઢાવીને તુરત જ મૂળ પ્રતિઓ પાછી આપી દેવામાં આવતી હતી. તેઓના આ સહકારનું જેટલું અનુમોદન કરું એટલું ઓછું છે. આ રીતે પ્રાપ્ત થયેલી અલભ્યદુર્લભ એવી આ કૃતિ-પ્રતિ જ પ્રસ્તુત ગ્રંથના સંપાદનનો એકમે આધાર બની છે. એ પણ એક વાસ્તવિકતા છે કે ઘણી તપાસ કરવા છતાં આની બીજી કોઈ પ્રતિ અમને ક્યાંયથી મળી નથી.

શત્રુંજયમંડન દાદા શ્રીઆદિનાથપ્રભુના શીતલસાંનિધ્યમાં આ ગ્રંથનું સંપાદન-સંશોધન કરીને પુનરુદ્ધાર કરવાનો જે સંકલ્પ કર્યો હતો, પરમાત્માની કૃપાથી તે આજે સાકાર બની રહ્યો છે તેનો જેટલો આનંદ છે તેટલો જ આનંદ શત્રુંજયની ટુંક ઉપર આ ગ્રંથના રચયિતા મહાપુરુષ મહોપાધ્યાય શ્રીયશોવિજયજી મ.સા.ના પગલાની જે પ્રતિષ્ઠા થઈ હતી તેને ૩૦૦ વર્ષ ફાગણ સુદ-૫ (સં. ૨૦૬૮ વર્ષે)ના દિવસે પૂર્ણ થઈ રહ્યા છે તેનો છે. સાથે સાથે મારા પરમતારક, પરમારાધ્યપાદ, પરમોપકારી ભારતવર્ષાલંકાર-તપાગચ્છીયાવિચ્છિન્નસામાચારીસંરક્ષક પાવાપુરી-હસ્તગિરિ-અર્બુદાચલાદિ તીર્થોદ્ધારક પૂજ્યપાદ આચાર્યદેવેશ શ્રીમદ્‌વિજયરામચન્દ્રસૂરીશ્વરજી મહારાજાના ભવ્ય રીતે ઉજવાઈ રહેલા દીક્ષા-શતાબ્દિવર્ષે આ ગ્રંથના પ્રકાશન દ્વારા એક અણમોલ ભેટ તેઓશ્રીને અપાઈ રહી છે તેથી તે આનંદ દ્વિગુણિત બની રહ્યો છે.

અનેક વિશેષતાઓથી સભર' આ ગ્રંથ છે અને એની હસ્તપ્રત પણ એક ઉત્તમ આદર્શ કહી શકાય એવી છે. સૌથી મહત્ત્વની વિશેષતા એ છે - આ ગ્રંથના રચયિતા પૂજ્ય મહોપાધ્યાય શ્રીયશોવિજયજી મહારાજા સ્વયં પોતે છે. ગ્રંથનો વિષય ભલે નાનો રહ્યો, પણ મહત્ત્વનો છે. 'આંખ એ પદાર્થને સ્પર્શ્યા વગર જ વિષયનો અવબોધ કરે છે, આ સિદ્ધાંતનું નવ્યન્યાયની શૈલીમાં આપણા પ્રાચીન મહાપુરુષોની માન્યતાને પુષ્ટ કરતું આ વિવેચન પૂ. મહોપાધ્યાયશ્રીજીની પ્રચંડ શ્રદ્ધા-તીવ્રમેધા અને અનુપમ તાર્કિક શક્તિના દર્શન કરાવે છે. 'આંખ એ વિષયને સ્પર્શ્યા વગર નહિ, પણ વિષયને સ્પર્શીને જ પદાર્થનો અવબોધ કરે છે.' આવી માન્યતા ધરાવતા તે તે સમયના પંડિતોનું નામ આપી સિદ્ધાંતના આધારે તર્કબદ્ધ રજૂઆત દ્વારા ખંડન કરીને પરપક્ષીયની માન્યતાનો જે સફાયો બોલાવ્યો છે તે અદ્‌ભુત અજોડ ને બેનમૂન છે. જે રીતે ગ્રંથ વિશેષતાઓથી સભર છે તે રીતે આની હસ્તપ્રત પણ અનેક વિશેષતાઓથી સભર છે. આ પ્રતિના લેખક મુનિશ્રી કીર્તિરત્ન વિજયજી નામના મુનિવર છે. તેઓએ વિ.સં. ૧૭૧૦માં જે પ્રતિ લખી એ જ પ્રતિના આધારે આજે આ ગ્રંથનું સંકલન-સંપાદન થઈ રહ્યું છે. આ પ્રતિના લેખક મુનિવરે બીજા પણ ગ્રંથોનો પ્રથમાદર્શ કર્યો હોવાનો ઈતિહાસ સાંપડે છે.

આ પ્રતિ વિશિષ્ટ પ્રતિ લેખનનો આદર્શ નમૂનો છે. સુંદર મરોડદાર અને સ્પષ્ટ વાંચી શકાય તેવા અક્ષરો અંતરને અનેરો આનંદ આપે છે. દરેક જગ્યાએ કરાયેલ પદચ્છેદ, સંધિસૂચકાદિ ચિન્હોથી અંકિત, વિશિષ્ટ શબ્દોના અર્થ-બોધ કરાવતી વિશેષ ટીપ્પણોથી મંડિત, ૩૫૯ વર્ષ પૂર્વે લખાયેલી

હોવા છતાં સુંદર હાલત આ અને આવી બધી અનેક વિશેષતાઓથી સંયુક્ત આ પ્રતિ જિનશાસનની અદ્ભુત મૂડી છે. પૂર્વજોએ કરેલી મહેનત અને શ્રુતની જાળવણીનો વિચાર કરીએ ત્યારે ખ્યાલ આવે કે શ્રુત-સુરક્ષા એ વર્તમાનકાળનો ગંભીર પ્રશ્ન છે અને એ પ્રશ્નની ભયંકર ઉપેક્ષા સેવાઈ રહી છે એ પણ હકીકત છે.

પ્રસ્તુત ગ્રંથના સંકલનની પણ થોડી વાત રજૂ કરવી જરૂરી માનું છું. સૌપ્રથમ મૂળ ગાથા, ત્યાર પછી એનું ટીપ્પણ, ત્યાર પછી એ ગાથાનો સામાન્યભાવાનુવાદ આ રીતે ગ્રંથનું સંકલન કરવામાં આવ્યું છે. સંસ્કૃત ભાષા, નિરસવિષય અને નવ્યન્યાયની શૈલી હોવાથી એનો ગુર્જરભાવાનુવાદ સામાન્ય અભ્યાસુને સહાયક બની શકે તેવો છે. આ વિષયનો તલસ્પર્શી અભ્યાસ થઈ શકે એવી શુભ ભાવનાથી સ્વપર શાસનના અનેક ગ્રંથો-પ્રકરણોમાંથી આ વિષયને સમજાવતા-પુષ્ટ કરતા જે જે સંદર્ભો મળ્યા છે તે તે સંદર્ભોને તે તે ગ્રંથોના નામોલ્લેખ સાથે પરિશિષ્ટોમાં સમાવેશ કરવામાં આવ્યા છે. સૌથી અગત્યની વાત એ છે કે **'અજ્ઞાતકર્તૃકવાદસંગ્રહ'** નામની એક **અપ્રગટ હસ્તપ્રત**માં પણ આ વિષય ચર્ચેલો હોવાથી એનું પણ લિપ્યંતર કરીને આમાં જોડાણ કરવામાં આવ્યું છે.

એક વાતનો ઉલ્લેખ કર્યા વિના હું રહી શકતો નથી કે જે સ્વરૂપે આ ગ્રંથ તૈયાર થયો છે; એના મૂળમાં **મુનિશ્રી યશોજીતવિજયજીના** શિષ્યરત્નો-પુત્રમુનિવર્યો-**મુનિશ્રીવિરતીન્દ્રવિજયજી** અને **મુનિશ્રી કીર્તીન્દ્રવિજયજી** છે. એક વાત હું ભારપૂર્વક જણાવવા માગું છે કે આ બન્નેય મુનિવરોએ પોતાના ચાલુ જ્ઞાનાભ્યાસમાંથી પોતાનો કિંમતી સમય પ્રસ્તુત હસ્તપ્રતનું લિપ્યંતર કરવા માટે, ગ્રંથનો ગુજરાતી ભાવાનુવાદ કરવા માટે અને પરિશિષ્ટોમાં સંકલિત સંદર્ભો એકત્ર કરવા માટે આપીને જે જહેમત ઉઠાવી છે, તે દાદ માંગી લે એવું છે. મુ.શ્રી કલ્યાણભૂષણ વિજયને સતત માર્ગદર્શન આપતા રહ્યા છે. બન્નેય મુનિશ્રીઓ પોતાના પિતા ગુરુવર્યની શીતળ છાયામાં રહી સુંદર સંયમ-જીવન જીવવા સાથે જ્ઞાનની પરિણતિ કેળવવા-મેળવવા જે પુરુષાર્થ કરી રહ્યા છે; તે અનુમોદનીય છે. ભવિષ્યમાં તેઓ ખૂબ ખૂબ આગળ વધી જિનશાસન ઉપર કુઠારાઘાત કરનારા તત્ત્વોનો શાસ્ત્ર સાપેક્ષ પ્રતિકાર કરી સત્ય-સિદ્ધાન્તોની પુનઃસ્થાપના કરનારા બને એવી શુભેચ્છા પણ તેઓને પાઠવું છું.

પ્રસ્તુત કૃતિનું સંપાદન-સંશોધન કરતા કરતા સ્વાધ્યાયના પરમાનંદની જે દિવ્યાનુભૂતિ થઈ છે તે ફરી ફરી થતી રહે એવી પ્રાર્થના પરમાત્માને કરું છું. પ્રસ્તુત ગ્રંથની સરળ પ્રસ્તાવના લખી આપનારા જિનાજ્ઞા પ્રભાવક વિદ્વદ્વર્ય આ. શ્રી **વિજયજયદર્શનસૂરિજી**નું સહજ સ્મરણ થઈ આવે છે. આ ગ્રન્થના પ્રકાશનમાં સંઘના જ્ઞાન નિધિમાંથી સદ્વ્યય કરીને લાભાર્થી બનેલો **શ્રીચિંતામણી પાર્શ્વનાથ જૈન શ્વે. મૂ.પૂ. તપાગચ્છ સંઘ - નાસિક** પણ ધન્યવાદને પાત્ર છે કે જે સંઘને આની દુર્લભ કૃતિના પ્રકાશનમાં નિમિત્ત બનવાનું સૌભાગ્ય મળ્યું.

પ્રસ્તુત પ્રકાશનના અધ્યયન-અધ્યાપન દ્વારા સૌ ભવ્યજનો સમ્યગ્દર્શનને વિશુદ્ધ બનાવવી સમ્યગ્જ્ઞાનને પ્રાપ્ત કરી એના ફળ સ્વરૂપે સમ્યક્ ચારિત્રની પરિણતિને સંશુદ્ધ બનાવી પરમસંશુદ્ધ એવા પરમપદને પ્રાપ્ત કરે એજ મંગલ મનોભિલાષા.

**શ્રીવિજયરામચન્દ્રસૂરિ આરાધના ભુવન** **વિજય પુણ્યપાલસૂરિ...**

સુભાનપુરા-વડોદરા (ગુજરાત)

સં. ૨૦૬૮ શ્રાવણ સુદ - ૧૫

# અનુવાદની અનુભૂતિ

પૂ. મહોપાધ્યાય શ્રી યશોવિજયજી મ.સા.એ સાહિત્યસાગરનું અવગાહન કરીને મેળવેલા પદાર્થ રત્નોથી સંખ્યાબંધ ગ્રંથરત્નોને અલંકૃત કર્યા છે. તેમાંનો જ એક વિશિષ્ટ ગ્રંથરત્ન એટલે જ 'चक्षुरप्राप्यताकारितावादः' આંખ એ પદાર્થને સ્પર્શીને પદાર્થને જણાવે છે કે નહિ ? માત્ર આટલા જ વિષયની સ્પષ્ટતા માટે સ્વતંત્ર ગ્રંથ રચવાનું શ્રેય માત્રને માત્ર પૂ. ઉપાધ્યાયજી મ.ના ફાળે જાય છે.

આમ તો આ વિષયની ચર્ચા વર્તમાનમાં પ્રાપ્ત થતાં ૧૧ જેટલા ગ્રંથોમાં પૂ. ઉપાધ્યાયજી મ.એ થોડા ઘણા અંશે કરી છે. દરેક ગ્રંથો પોતાની વિશેષતાઓથી અલગ જ ભાત ઉપસાવે છે. તેમાં પણ આ વિષયની સંપૂર્ણ સ્વતંત્ર કૃતિ એ તો અનોખી જ ભાત પાડે છે. જે ખરેખર વિદ્વાનોના આકર્ષણના કેન્દ્ર સમી છે. ૫૯ ગાથાઓ દ્વારા આ ગ્રંથમાં પૂ. ઉપાધ્યાયજી મ.એ આ વિષયને સ્પર્શતી યુક્તિઓનો અદ્ભુત ખજાનો ખોલી નાંખ્યો છે. અને આ ગાથાઓ નીચે નોંધાયેલી ૭૦ જેટલી ટીપ્પણો પણ અદ્ભુત અદ્ભુતના ઉદ્ગારોને સર્જે તેવી છે. આ ટીપ્પણો પૂ. ઉપાધ્યાયજી મ.ના ખુદના હશે અથવા તો તેમની પાસે ભણતી વખતે કરેલી નોંધ રૂપે હશે. ખરેખર અધ્યયન અને અધ્યાપનની પરિપાટીનો આદર્શ નમુનો છે. સંક્ષિપ્ત ટીપ્પણો દ્વારા જે વાત સ્પષ્ટ થઈ છે તે વાત બદ્રીનાથ શુક્લ વગેરે વિદ્વાનોના કે ટીકાકારોના વિસ્તૃત વિવેચનો કે ટીકાગ્રંથો પણ કરી શક્યા નથી એવું કોઈ પણ મધ્યસ્થ વિચારકોને લાગ્યા વિના ન રહે. ખરેખર તો આવા ટીપ્પણો પૂ. ઉપાધ્યાયજી મ.ના બધા ગ્રંથો પર હોય તો તે એક અધ્યાપકની ગરજ સારે તેવા બની શકે. માત્ર ગ્રંથી સ્થળોને સહેલા કરવાનું પણ કામ જો વિદ્વાનો કરે તો બાકીની સ્પષ્ટતા જિજ્ઞાસુ વ્યક્તિ પરિશ્રમ કરી સ્વયં પણ મેળવી શકે. અસ્તુ.

પૂ. ઉપાધ્યાયજી મ. જેવા સિદ્ધહસ્ત લેખક મહાપુરુષ સાથે **'દ્વાદશારનયચક્ર'** નામના વિશાલકાય ગ્રંથલેખનનું સૌભાગ્ય જેમને પ્રાપ્ત થયું હતું તેવા પૂ. **મુનિરાજ શ્રી કીર્તિરત્નજી ગણિવરે** આ ગ્રંથનું લેખન કર્યું છે. કોઈ પણ ચેક-ચાક વગરના મરોડદાર અક્ષરો, પદચ્છેદ દર્શક ચિહ્નો, અ વર્ણની સંધિ તો અવગ્રહ દ્વારા સ્પષ્ટ કરી જ છે પરંતુ ઉકારાદિની સંધિને દર્શાવતા ચિહ્નો આપ્યા છે, જેને શોધવામાં એકદમ સરળતા રહે તે રીતની લીટી-નંબર સાથેની ટીપ્પણ યોજના વગેરે વિશેષતાઓ હસ્તલેખનના અપૂર્વ આદર્શ સમી છે. માત્ર બે પત્ર જેટલા લઘુકાય ગ્રંથ માટે લેખકશ્રીએ જે કાળજી રાખી છે તે અતિશય પ્રશસ્ય કોટિની છે.

બીજુ શ્લોક નં. ૫૮માં પૂ. ઉપાધ્યાયજી મ.સા.ના પંડિત તરીકેના ઉલ્લેખથી ત્યારે પૂ. ઉપાધ્યાયજી મ.સા. પંન્યાસપદે બિરાજમાન હતા તેવી સ્પષ્ટતા થઈ શકે છે અને શ્લોક નં. ૨૭માં સ્વકૃત શાસ્ત્રવાર્તા સમુચ્ચયના વ્યાખ્યાનનો (સ્યાદ્‌વાદ કલ્પલતાનો) ઉલ્લેખ કર્યો છે તેના ઉપરથી અધ્યાત્મમત પરીક્ષા, સ્યાદ્‌વાદ રહસ્ય, જ્ઞાનાર્ણવ, ન્યાયાલોક, શંખેશ્વર પાર્શ્વનાથ સ્તવ, વાદમાલા, નયરહસ્ય, ભાષારહસ્ય વગેરે પ્રાપ્યગ્રંથો અને દ્રવ્યાલોક, સપ્તભંગી તરંગિણી, શ્રી પૂજ્ય લેખ, ન્યાયવાદાર્થ વગેરે અપ્રાપ્ય ગ્રંથોની રચના પછી આ ગ્રંથની રચના થઈ છે એવું સિદ્ધ થાય છે. પૂ. સિંહસૂરિ મ.સા. સં. ૧૭૦૮ અષાઢ સુદ-૨ના કાળધર્મ પામ્યા અને સં. ૧૭૧૧માં પૂ. વિજયપ્રભસૂરિ મ.સા.ની ગણાનુજ્ઞા થઈ તેથી પૂ. દેવસૂરિ મ.સા.ના રાજ્યમાં આ પ્રતનું લેખન થયું છે તેમજ ગ્રંથનો રચનાકાળ પણ આની આસપાસનો હોઈ શકે તે બનવા જોગ છે.

વિશેષ તો આ ગ્રંથ ઉપર ટીકા બનાવવાની ભાવના હતી પરંતુ હાલના તબક્કે લોકો માટે આ ગ્રંથ સાવ અસ્પૃશ્ય ન બને તેટલો જ પ્રયત્ન ભાવોદ્‌ઘાટનમાં કર્યો છે. ઘણા ગ્રંથી સ્થળોને શિથિલ કરવાનો પ્રયાસ થોડા-ઘણા અંશે કર્યો છે. છતાં તે પ્રયાસમાં જે અનુભૂતિ થઈ છે તે છેલ્લે 'नास्ति एषा राजपद्धति' એ શ્લોક દ્વારા વ્યક્ત કરી છે.

આ વિષયને લગતા શતાધિક સંદર્ભો એ જ આ પ્રકાશનનું મુખ્ય વૈશિષ્ટ્ય છે ખરેખર તો આ વિપુલ સંદર્ભ સામગ્રી એ ચક્ષુરપ્રાપ્યકારિતાવાદોનું સંગ્રહસ્થાન જ છે. બાકી તેને સ્પર્શતા વિષયો જેવા કે સન્નિકર્ષ, સમવાય સિદ્ધિ, અતિરિક્ત અવયવિ સિદ્ધિ, યોગ્યતા, બાકીની ઇન્દ્રિયોની પ્રાપ્યાપ્રાપ્યકારિતા વગેરેના સંદર્ભોને જો એકત્ર કરવામાં આવે તો સંદર્ભગ્રંથોની સંખ્યા ઘણીબધી મોટી થઈ જાય. આ સંદર્ભગ્રંથોમાં પૂ. ઉપાધ્યાયજી મ.સા. એ રચેલા અન્ય ૧૦ ગ્રંથોમાં આવતા ચક્ષુરપ્રાપ્યકારિતાવાદો, અન્ય શ્વેતામ્બર આગમ-આગમેતર ગ્રંથો, દિગમ્બર ગ્રંથો, બૌદ્ધગ્રંથો, ન્યાય, વૈશેષિક, મીમાંસા, સાંખ્ય, વેદાન્તી અને વ્યાકરણના દાર્શનિકગ્રંથો જે અમારા ધ્યાનમાં આવ્યા તેનો સમાવેશ કર્યો છે. હજી પણ આ ગ્રંથોમાં ઉલ્લેખિત અને સંકેતપ્રાપ્ત ઘણા ગ્રંથો મળવાની સંભાવના છે. અને પૂ. ધર્મસૂરિ મ.કૃત પ્રમાણ પરિભાષાની પૂ. ન્યાય વિ.મ. કૃત ન્યાયાલંકાર ટીકા, પૂ. લબ્ધિસૂરિ મ. કૃત 'તત્ત્વન્યાય વિભાકર' વગેરે આધુનિક ગ્રંથો અને પૂ. ઉપાધ્યાયજી મ. કૃત ગ્રંથોની ટીકાઓ, વિવેચનો તથા અનુવાદો વગેરેનો આમાં સમાવેશ નથી કર્યો. પણ એટલું ચોક્કસ છે કે આ સંદર્ભ સામગ્રીથી ચક્ષુની પ્રાપ્યાપ્રાપ્યકારિતાના વિચાર બિન્દુનો ઉદ્‌ગમ અને વિકાસ તથા કેટકેટલાય વિચારપ્રવાહો તેમાં ભળી ગંગા કે યમુના વગેરે નદીઓના મોટા પ્રવાહ સ્વરૂપ વિચારધારાઓ તો આપણી સમક્ષ ચોક્કસ રજુ થઈ છે. અને તેઓશ્રીના શબ્દોનું તાત્પર્ય શું છે? એ નક્કી કરવા માટે એમનો મૂળ સ્રોત કયો છે ? તેની આછેરી રૂપરેખા મેળવવા માટે આ સંદર્ભસામગ્રી બહુજ ઉપયોગી નીવડશે. આ અનુભવ સિદ્ધ બાબત છે. આવા હેતુઓથી જ

આ સંદર્ભો એકત્ર કરીને મૂક્યા છે બાકી તો પૂ. ઉપાધ્યાયજી મ.સા.એ પૂ. હરિભદ્રસૂરીશ્વરજી મ.સા. માટે જે અનુભવ કર્યો હતો...

हारिभद्रवचः क्वेदम्, बहुतर्क पचेलिमं ।

क्वचाहं शास्त्रलेशज्ञ, तादृक् तन्त्राविशारदः ॥ - (स्याद्वाद कल्पलता)

તેનો અક્ષરશઃ અનુભવ उपाध्यायः वचः क्वेदम्, बहुतर्क पचेलिमम् । નો આજે અમને થયો છે. છતાં श्रमो ममोचितो भावि... એ આશાના કિરણે આ પ્રયત્ન કર્યો છે. અને અધ્યાત્મસારના સજ્જન સ્તુતિ અધિકારના શ્લોકોને જેમણે જીવનમાં આત્મસાત્ કર્યાં છે તેવા સજ્જનો આ પ્રયત્નને સફળ કરે એ જ અભિલાષા

इति शम् ।

વિ.સં. ૨૦૬૮

अधिक भा.व. प्रथम अष्टम्यां<br>
शनि रोहिणि-अमृतसिद्धियोगे<br>
पुना-फातिमा नगरे

द :<br>
यशशिशू

## વિષયાનુક્રમ


| विषय | पृष्ठ नं. |
|---|---|
| प्रकाशकीय | 3 |
| प्रस्तावना | 4 |
| संपादकीय | 10 |
| अनुवादनी अनुभूति | 14 |
| मूल ग्रंथ | १९ |
| विभाग-१ : महो.यशोवि. म.सा.ना ग्रन्थो | ३१ |
| विभाग-२ : जैन श्वेताम्बर सम्पदायना ग्रन्थो | ५३ |
| विभाग-३ : दिगम्बर सम्प्रदायना ग्रन्थो | १२९ |
| विभाग-४ : बौद्धदर्शनना ग्रन्थो | १५१ |
| विभाग-५ : वैशेषिक दर्शनना ग्रन्थो | १६१ |
| विभाग-६ : न्यायदर्शनना ग्रन्थो | १७९ |
| विभाग-७ : मिमांसादर्शनना ग्रन्थो | २१९ |
| विभाग-८ : व्याकरण दर्शननां ग्रन्थो | २२५ |
| विभाग-९ : सांख्यदर्शनना ग्रन्थो | २३३ |
| विभाग-१० : वेदान्तदर्शनना ग्रन्थो | २३५ |
| संदर्भ ग्रन्थसूचि | २३६ |


● ● ●



શ્રી યશોદેવસૂરીશ્વરજી મહારાજ સંગૃહિત હસ્તલિખિત જ્ઞાનભંડાર શ્રી સાહિત્ય મંદિર - પાલીતાણાથી પ્રાપ્ત થયેલ







॥ ऐँ नमः ॥

॥ अनन्तसिद्धिनिधानाय श्रीशत्रुञ्जयगिरिवराय नमः ॥

॥ सर्ववाञ्छितप्रदायकाय श्रीशङ्खेश्वर पार्श्वनाथाय नमः ॥

परमाराध्यपादपद्मेभ्यः आत्म-कमल-वीर-

दान-प्रेम-रामचन्द्र-महोदय-मित्रानन्द-महाबल सूरीश्वरेभ्यो नमः ॥

न्यायविशारद-महामहोपाध्याय-श्रीयशोविजयगणिवर-विरचितः

# श्री चक्षुरप्राप्यकारितावादः

सटिप्पणको भावोद्घाटनसहितश्च

पादलिप्तपुराधीशं जिनमादीश्वरं वरम् ।

प्रणम्य वादतात्पर्यं तनुतः श्रीयशःशिशू ॥

**શ્લોક-૧ : અવતરણિકા :** મંગલાદિનું નિરૂપણ કરે છે.

**ऐँकारकलितं ज्योतिर्ध्यायन्न्यायविशारदः ।**

**चक्षुरप्राप्यकारित्व-साधनायोप[१]तिष्ठते ॥ १ ॥**

**શ્લોકાર્થ : ઐંકાર સ્વરૂપ બીજમંત્રના પ્રણિધાનથી અનુભવાયેલ વાગ્દેવતાનું સ્મરણ કરતા ન્યાયવિશારદ ઉપા. યશોવિજયજી મ. સા.** 'આંખ એ વિષયનો સમ્બન્ધ કર્યા વિના જ્ઞાન કરાવે છે' આ વાતની સિદ્ધિ કરે છે.

---

१. तदनुगुणव्यापार-सम्पादनमुपस्थानम् ।

શ્લોક-૨ : અવતરણિકા : 'આંખ, વિષયનો સમ્બન્ધ કર્યા વગર જ જ્ઞાન કરાવે છે' આ વાત ન માનવામાં આવતાં દોષને કહે છે.

**चक्षुषः प्राप्यकारित्वे शाखाचन्द्रमसोर्ग्रहः[२] ।**
**तुल्यकालः कथं नु स्यान्निकटस्थदवीयसोः ॥ २ ॥**

શ્લોકાર્થ : આંખ, એ વિષયનો સમ્બન્ધ કરીને જ જ્ઞાનને પેદા કરે છે. એવું જો માનીએ તો નજીક રહેલી શાખા અને ઘણા દૂર રહેલા ચન્દ્રનું એકીસાથે જ્ઞાન કેવી રીતે થશે ? અર્થાત્ નહિ થઈ શકે !

२. ज्ञानम् ।

શ્લોક-૩ : અવતરણિકા : આ દોષનો પરિહાર કરતાં મીમાંસકમતના **શાલિકાચાર્ય**ની વાત કરે છે.

**निःसरन्तोऽक्षि विस्तीर्णं नयनान्नायनांशवः ।**
**आरभन्ते ततस्तुल्यकालः स इति शालिकः[३] ॥ ३ ॥**

શ્લોકાર્થ : આંખમાંથી નીકળતાં કિરણો આલોક સાથે ભળીને મોટી એવી આંખને ઉત્પન્ન કરે છે. જેથી નજીક રહેલી શાખા અને દૂરના ચન્દ્રનું જ્ઞાન પણ એક કાળે થઈ શકે છે. (માટે ચક્ષુઇન્દ્રિય ઘટાદિવિષયનો સમ્બન્ધ કરીને જ જ્ઞાન ઉત્પન્ન કરે છે. તેમ માનવામાં કોઈ દોષ નથી) આ પ્રમાણે શાલિકાચાર્ય કહે છે.

३. मीमांसकभेदः ।

શ્લોક-૪ : અવતરણિકા : આ **શાલિકાચાર્યે** કરેલાં પરિહારનું ખંડન કરતાં **વર્ધમાન-ઉપાધ્યાય** જે કહ્યું છે તે જણાવે છે.

**तन्नालोकं समासाद्या – सम्भवात् तस्य[४] जन्मनः ।**
**पृष्ठस्थितग्रहापत्तेरपीत्येवं परे[५] जगुः ॥ ४ ॥**

**શ્લોકાર્થ :** 'તે શાલિકાચાર્યની વાત બરાબર નથી. કારણ કે નહિ દેખાતાં એવા આંખનાં કિરણોથી, દેખાતા એવા આલોકની સાથે મળીને બૃહચ્ચક્ષુની ઉત્પત્તિ ઘટી શકતી નથી. અને ધારો કે તેવી બૃહચ્ચક્ષુની ઉત્પત્તિ થાય છે. તેવું માનશો તો તે મોટી એવી આંખથી જોનારને પોતાની પાછળ રહેલી વસ્તુ પણ દેખાવી જોઈએ' આ પ્રમાણે વર્ધમાન ઉપાધ્યાય વગેરે કહેતા હતાં.

---

४. अक्ष्णः । ५. वर्धमानप्रभृतयः ।

**શ્લોક-૫ : અવતરણિકા :** બીજી ગાથામાં કહેલ દોષનું બીજી રીતે નિરાકરણ કરતાં **ઉદયનાચાર્ય** જે કહેતા હતાં, તે જણાવે છે.

**शीघ्रप्राप्त्याभिमानोऽक्ष्णो वेगातिशयतो द्वयोः[६] ।**
**यौगपद्ये परिच्छित्योरित्यत्रोदयनो जगौ ॥ ५ ॥**

**શ્લોકાર્થ :** આ વિષયમાં **ઉદયનાચાર્ય** 'આંખમાંથી નીકળતાં કિરણો એટલાં વેગવાળા છે – કે જેથી તે નિકટસ્થ શાખા અને દૂર રહેલ ચન્દ્ર આ બન્નેને ખૂબ ટૂંકાગાળામાં આંબી જાય છે = પ્રાપ્ત કરી લે છે. તેથી બન્નેનું એક સાથે જ્ઞાન થતું હોય એવો ભ્રમ થાય છે' આવું કહેતા હતા.

---

६. वस्तु ०।[ ? ]

**શ્લોક-૬ : અવતરણિકા :** પૂ. ઉપાધ્યાયજી મહારાજ તે **ઉદયનાચાર્ય**ના નિરાકરણનું ખંડન કરતા કહે છે.

**तदप्यसत् यतो नैवमनुव्यवसितिर्द्वयोः[७] ।**
**घटेत [८]क्षणिकत्वेन ज्ञानयोस्तव दर्शने ॥ ६ ॥**

**શ્લોકાર્થ :** તે **ઉદયનાચાર્ય** કૃત નિરાકરણ પણ યથાર્થ નથી. કારણ કે તમારા મતમાં જ્ઞાન બે ક્ષણ રહેનારું છે માટે શાખા અને ચન્દ્ર બન્નેનું જ્ઞાન પણ દ્વિક્ષણ-સ્થાયી તરીકે સ્વીકારાયું છે. તેના કારણે તે બન્નેનું અનુવ્યવસાયાત્મક જ્ઞાન એકી સાથે ઘટી શકશે નહિ.

(કારણ કે જ્યારે બીજા ચન્દ્રના જ્ઞાનનો અનુવ્યવસાય થશે ત્યારે પ્રથમ થયેલ શાખાનું જ્ઞાન તો નષ્ટ થઈ ગયું હશે.)

७. ज्ञानविषयं ज्ञानमनुव्यवसायः । ८. तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वं क्षणिकत्वम्।

**શ્લોક-૭ : અવતરણિકા :** ગ્રંથકારશ્રીએ **ઉદયનાચાર્ય**ના મતમાં બતાડેલ દોષનું ગંગેશઉપાધ્યાયકૃત નિરાકરણ અને તેનું પણ ઉપાધ્યાયજી મ. સા. ખંડન કરતાં કહે છે.

**[९]आरोप्यानुभवत्वं तत् [१०]समूहालम्बनस्मृतौ ।**
**[११]तथाऽनुव्यवसायश्चेदिदं किञ्चि[१२]दलौकिकम् ॥ ७ ॥**

**શ્લોકાર્થ :** 'ક્રમિક ઉત્પન્ન થતા શાખા અને ચન્દ્ર બન્નેનાં જ્ઞાન દ્વારા જે તે બન્નેની એક સમૂહાલમ્બનાત્મક સ્મૃતિ ઉત્પન્ન થાય છે. તેમાં અનુભવત્વનો આરોપ કરીને અનુભવત્વેન ભ્રમાત્મક અનુવ્યવસાય થઈ શકે છે.' આવી ગંગેશ ઉપાધ્યાયની વાત કાંઈક અલૌકિક છે ! અર્થાત્ ગૌરવવાળી છે.

९. चिन्तामणिकृदुक्तं दूषयति । १०. विशेषणविशेष्यभावानवगाह्यनेकवस्तुविषयकं ज्ञानं समूहालम्बनम् । ११. शाखाचन्द्रमसावनुभवामीति। १२. अलौकिकमिति यत एकं ज्ञानस्य स्वसंविदितत्त्वं परित्यज्य ज्ञानान्तरवेद्यत्वं स्वीक्रियते । अन्यच्च शाखाचन्द्रज्ञानयोर्भेदयौगपद्यादिकं परं चान्तरालस्मृतिकल्पनमपरं च तत्रानुभवसाक्षात्त्वादि-भ्रमनिबन्धनदोषकल्पनमप्रामाणिकमिति ।

**શ્લોક-૮ : અવતરણિકા :** બીજી ગાથામાં જણાવેલ દોષનું નિરાકરણ જે ત્રીજી રીતે **વર્ધમાન- ઉપાધ્યાયે** કરેલ છે. તે જણાવે છે.

**अग्रावच्छिन्नसंयोगात् तिर्यग्भागस्थयोर्द्वयोः ।**
**तुल्यकालं परिच्छेदं वर्धमानस्तु मन्यते ॥ ८ ॥**

**શ્લોકાર્થ :** 'જ્યારે શાખા અને ચન્દ્ર તિર્યક્ભાગમાં (તિર્છા પ્રદેશમાં) રહેલા હોય ત્યારે આંખના કોઈક કિરણો શાખા અને બીજા કોઈક કિરણો ચન્દ્ર સાથે સંયોગ પામે છે. આમ અગ્રાવચ્છિન્ન = આંખના અગ્રભાગનો શાખા અને ચન્દ્રની સાથે સંયોગ થવાથી એકી સાથે તે શાખા અને ચન્દ્ર બન્નેનું જ્ઞાન થાય છે.' આ પ્રમાણે વર્ધમાન ઉપાધ્યાય માને છે.

**શ્લોક-૯ : અવતરણિકા :** પૂ. ઉપાધ્યાયજી મહારાજ, આ **વર્ધમાન-ઉપાધ્યાય**ના મતનું ખંડન કરતાં કહે છે.

**[१३]तेन प्रसारिताक्षेण प्रत्युदीचीं महीयसि ।**
**चान्द्रे महसि सौरे वा प्रेक्षे( क्ष्ये )त कनकाचलः ॥ ९॥**

**શ્લોકાર્થ :** ચન્દ્ર કે સૂર્યના ઘણાં બધાં પ્રકાશમાં જ્યારે તે **વર્ધમાન ઉપાધ્યાય**, ઉત્તરદિશા તરફ આંખ ખોલશે ત્યારે તેને મેરૂપર્વતના પણ દર્શન થવા જોઈએ. (કારણ કે ચન્દ્રની જેમ વિષયનું દૂર હોવું અને ચન્દ્રાદિના કિરણો દ્વારા આંખનાં કિરણોનું વધવું, તે ઉભયત્ર સમાન છે.)

१३. वर्धमानेन ।

**શ્લોક-૧૦ : અવતરણિકા :** ઉક્ત દોષનો પરિહાર અને તેનું પણ ખંડન કરે છે.

**तद्गतेर्नि[१४]यतत्वेन न दोष इति चेन्मतम् ।**
**[१५]तत्तद्धेतोरिति न्यायाज्-[१६]ज्ञापकं स्तान्नियामकम् ॥ १० ॥**

**શ્લોકાર્થ :** 'ઘટાદિ વિષય જ્યાં સુધી દેખાતો હોય ત્યાં સુધી જ આંખના કિરણો જઈ શકે છે. તેથી મેરૂપર્વત દેખાવાની આપત્તિ આવતી નથી' આ પ્રમાણે જો તમે માનશો તો **'तद्हेतोरेवास्तु किं तेन'** = 'જેના હેતુ માત્રથી જ જે કાર્ય ઉત્પન્ન થઈ શકે તેમ હોય તે કાર્ય માટે તેની પોતાની અપેક્ષા શું છે ?' આ લાઘવમૂલક પ્રસિદ્ધન્યાયથી વિષયદેશ સુધી જનારી એવી ચક્ષુની ગતિ = પ્રાપ્તિ = સંયોગનો જે નિયામક = જનક છે. તે જ સાક્ષાત જ્ઞાનોત્પાદક પણ થાઓ.

१४. अनतिक्रान्तदर्शनावधिकत्वेन । १५. तद्धेतोरेवास्तु किं तेन । १६. ज्ञानजनकम् ।

**શ્લોક-૧૧ : અવતરણિકા :** ચક્ષુરશ્મિના સંયોગનો જે જનક છે તેને જ ચાક્ષુષજ્ઞાન પ્રત્યે જનક માનવામાં લાઘવરૂપ ફાયદો તો છે જ તે સિવાય પણ બીજા ફાયદાઓ છે તે જણાવે છે.

**अनन्तचक्षुःसंयोगकल्पनागौरवादिकम् ।**
**इत्थं खलु परित्यक्तं वैलक्षण्यं[17] च तेजसः ॥ ११ ॥**

**શ્લોકાર્થ :** આ રીતે માનવાના કારણે અનન્તચક્ષુના સંયોગ-તેનો પ્રાગભાવ આદિની કલ્પનાનું ગૌરવ અને નહિં જોઈ શકાતો અને ન સ્પર્શી શકાતો એવો તેજનો (અનુદ્‌ભૂતરૂપ અને સ્પર્શવાળો) જુદો પ્રકાર પણ માનવાની કોઈ જરૂર પડતી નથી.

१७. अनुद्भूतरूपानुद्भूतस्पर्शवत्त्वलक्षणं प्रसिद्धतेजोवैपरित्यम् ।

**શ્લોક-૧૨ : અવતરણિકા :** હવે ચાર શ્લોક દ્વારા ચક્ષુની અપ્રાપ્યકારિતાના સિદ્ધાન્ત ઉપર **ઉદયનઆચાર્યાદિએ** આપેલા દોષોનું અનુવાદ પૂર્વક ખંડન કરે છે.

**[18]एतेन गृह्णदप्राप्तं गृह्णीयाद् व्यवधानभाक् ।**
**अप्राप्तत्वाविशेषेण वस्तुचक्षुरसंशयम् ॥ १२ ॥**

**શ્લોકાર્થ :** આ રીતે સંયોગનાં જનકકારણને અર્થાત્ ગતિ નિયામકને જ જ્ઞાનોત્પાદક માનવાના કારણે ઉદયનાચાર્યાદિ જે 'વિષયનો સમ્બન્ધ કર્યા વિના જ જો ચક્ષુ જ્ઞાનને પેદા કરતી હોય તો દિવાલાદિની પાછળ રહેલી વસ્તુનું પણ જ્ઞાન નિસ્સંદેહપણે કરાવવી જોઈએ. કારણ કે વસ્તુ દિવાલાદિની આગળ હોય કે પાછળ પણ તેમાં કાંઈ ફેરફાર થતો નથી. અપ્રાપ્યતાતો બંને સ્થળે સમાન જ છે.

१८. गतिनियामकस्यैव ज्ञापकत्वेन ।

**શ્લોક-૧૩ : : અવતરણિકા :** દિવાલાદિની આગળ કે પાછળ રહેલી વસ્તુમાં ફેરફાર કેમ થતો નથી ? દિવાલાદિની પાછળ રહેલી વસ્તુને 'અયોગ્ય છે' તેમ માની લઈએ તો શું વાંધો છે ? તેનો જવાબ ઉદયનાદિ સ્થૈર્ય = નિત્ય અને અસ્થૈર્ય = અનિત્ય આ બન્ને પક્ષને આશ્રયીને જણાવે છે.

**स्थैर्ये च योग्यता सैवाऽस्थैर्येऽपि सहकारिणः ।**
**नार्थेतिशयमप्रत्यासीदन्तः कर्तुमीशते ॥ १३ ॥**

**શ્લોકાર્થ :** નિત્યપક્ષમાં દિવાલાદિની આગળ રહેલી વસ્તુમાં જ્ઞાનની જે સ્વરૂપ યોગ્યતા છે તે જ દિવાલાદિની પાછળ રહેલી વસ્તુમાં પણ છે. તેથી તેને અયોગ્ય માની શકાશે નહીં અને અનિત્યપક્ષમાં પણ ચક્ષુ સંયોગાદિરુપ સહકારીઓ, સમ્બન્ધ કર્યા વિના વિષયમાં ફેરફાર કરવા સમર્થ નથી બની શકતા. માટે પણ તેને અયોગ્ય તરીકે સ્વીકારી શકાશે નહીં.

**શ્લોક-૧૪-૧૫ : અવતરણિકા :** ૧૩માં શ્લોકમાં જણાવેલ અતિશય = ફેરફાર પદાર્થ શું છે ? અને પ્રત્યાસત્તિનું સ્વરૂપ નૈયાયિકો અને બૌદ્ધોના મતે શું છે ? તે જણાવે છે અને તેના દ્વારા ચક્ષુમાં પ્રાપ્યકારિતા સિદ્ધ કરે છે.

**कुर्वद्रूपक्षणात्मायं संयोगोऽस्माभिरत्र च ।**
**बौद्धैर्निरन्तरोत्पादः प्रत्यासत्तिश्च भण्यते ॥ १४ ॥**

**तदेतदुभयं[११] कृष्णसारस्यार्थेन नोचितम् ।**
**गतिक्रमेण किन्त्वक्षणस्तद् युज्येतेत्यपाकृतम् ॥ १५ ॥**

**શ્લોકાર્થ :** અહિં વિષયનો ફેરફાર (અતિશય) પદાર્થ વિષયની ફલોન્મુખ અવસ્થા સ્વરૂપ છે અને પ્રત્યાસત્તિ = સમ્બન્ધ, અમારા = નૈયાયિકોના મતે સંયોગરૂપ છે અને બૌદ્ધો સંયોગને માનતા ન હોવાથી આંખના પ્રદેશથી માંડીને તે તે દેશના ક્રમે વિષયદેશ સુધીમાં જે નવી નવી આંખ ઉત્પન્ન થાય છે. તે સ્વરૂપ સ્વીકારાય છે. અને આ સંયોગ કે નિરન્તરોત્પાદ રૂપ બન્ને સમ્બન્ધો આંખની ગતિ ન માનો તો ઘટી શકે તેમ નથી માટે આંખ ગતિદ્વારા વિષય સુધી પહોંચીને પછી જ જ્ઞાનને ઉત્પન્ન કરે છે અર્થાત્ પ્રાપ્યકારી છે.' તેમ સ્વીકારવું જ યોગ્ય છે.'

આમ ૧૨ થી ૧૫ સુધીમાં જણાવેલ દોષ (એતેન = ગતિનિયામકને જ જ્ઞાનજનક માનવાના કારણે) ખંડિત થાય છે.

**નોંધ :** અંતર = આંતરું, વ્યવધાન - આંતરા વગરના તરીકે વસ્તુનો ઉત્પાદને સંયોગ, સ્થાનીય નિરંતર ઉત્પાદ.

---

११. निरन्तरोत्पादसंयोगलक्षणम् ।

**શ્લોક-૧૬ : અવતરણિકા :** ગતિનિયામકને જ જ્ઞાનના જનક માનવાના કારણે **ઉદયનાચાર્યાદિની** વાત (દોષ) કઈ રીતે ખંડિત થાય છે ? તે સ્પષ્ટ કરે છે.

**[२०]योग्यता तद्गतौ या वः सहकारिसमुच्चयात् ।**
**स्वरूपयोग्यताध्रौव्येऽप्यस्माकं न क्षतिस्तया ॥१६॥**

**શ્લોકાર્થ :** તદ્ = ચક્ષુની ગતિ માટે, સહકારીના સમુચ્ચય = સમવધાનથી ઘટાદિગત સ્વરૂપયોગ્યતાને તમે (નૈયાયિક) યોગ્યતા રૂપ માનો છો. તે યોગ્યતાથી ધ્રૌવ્ય = નિત્યપક્ષમાં પણ અમારે કોઈ ક્ષતિ નથી અને સ્યાદ્વાદીને તો ક્ષણિક = અનિત્ય પક્ષમાં (સ્થૂલઋજુસૂત્રનયે) દિવાલાદિની પાછળ રહેલા ઘટાદિ પદાર્થો જ્ઞાન માટે અયોગ્ય છે. જ્યારે જ્ઞાન માટે રૂકાવટ કરનાર દિવાલાદિ એક પણ પદાર્થો ન હોય તેવો ઘટાદિ પદાર્થ જ યોગ્ય છે. આ અર્થ ગ્રન્થકારશ્રી 'અપિ'ના દ્વારા સુચિત કરે છે.

આમ ચક્ષુ ગતિ પ્રત્યે દિવાલાદિ વ્યવધાનાભાવરૂપ સહકારિને કારણ માનવા કરતાં ચાક્ષુષજ્ઞાન પ્રત્યે જ સાક્ષાત્ વ્યવધાનાભાવ વિશિષ્ટ યોગ્યતાને કારણ માનવામાં લાઘવ છે. તેથી વ્યર્થ એવી ચક્ષુગતિને ચાક્ષુષ પ્રત્યે કારણ માનવી ઉચિત નથી.

२०. एतेनेत्युक्तं स्पष्टयति ।

**શ્લોક-૧૭ : અવતરણિકા :** જ્ઞાન કરનાર વ્યક્તિ અને જેનું જ્ઞાન કરવું છે તે વસ્તુની વચ્ચે કેવી દિવાલાદિ પ્રતિબંધક બને છે ? તે જણાવે છે, કારણ કે તેની ચોખવટ વિના તો પર્વતાદિના ચાક્ષુષ પ્રત્યે પણ મધ્યવર્તિ દિવાલાદિ પ્રતિબંધક બની જશે.

**ग्राह्याधिपरिमाणं हि ग्राह्य-ग्राहकमध्यगम् ।**
**चाक्षुष्के वक्तुमुचितं, भित्त्यादिप्रतिबन्धकम् ॥ १७ ॥**

**શ્લોકાર્થ :** જાણનાર વ્યક્તિ, જાણવા લાયક પદાર્થની વચ્ચે જે દિવાલ આદિ ચાક્ષુષ પ્રતિબંધક બને છે. તે જાણવાલાયક પદાર્થ કરતાં અધિક પરિમાણવાળું હોવું જોઈએ અર્થાત્ મોટા હોવા જોઈએ.

**શ્લોક-૧૮-૧૯ : અવતરણિકા :** ચક્ષુરપ્રાપ્યકારિત્વ પક્ષમાં **જયરામ ભટ્ટાચાર્ય** જણાવેલ ગૌરવ અને ચક્ષુપ્રાપ્યકારિત્વ પક્ષમાં લાઘવ સાધક પૂર્વપક્ષ રજૂ કરે છે.

**[२१]यत्त्वेवं खलु भित्त्यादि [२२]स्वप्राचीस्थस्य चाक्षुषे ।**
**[२३]स्वप्रतीचीगतत्वेन वक्तव्यं प्रतिबन्धकम् ॥१८॥**

**[२४]तथा च गौरवात्क्लृप्ते चक्षुषो [२५]द्रव्यचाक्षुषे ।**
**संयोगेनैव हेतुत्वे नार्तिः [२६]फलमुखा[२७]त्ततः ॥१९॥**

**શ્લોકાર્થ :** ચક્ષુરપ્રાપ્યકારિતાવાદીના (જૈનોના) મતે દિવાલાદિની પાછળ રહેલી વસ્તુને ત્યાં જ રહેલો વ્યક્તિ તો જોઈ શકે છે. તેથી દિવાલને સામાન્યથી તો પ્રતિબંધક કહી શકાશે નહિ. આવી સ્થિતિમાં દિવાલાદિ પ્રતિબંધકની પૂર્વદિશામાં રહેલ વ્યક્તિના ચાક્ષુષ પ્રત્યક્ષ પ્રત્યે તમારે સ્વ પ્રતીચી (પશ્ચિમદિશા) વૃત્તિત્વ સમ્બન્ધથી દિવાલાદિ પ્રતિબન્ધક છે તેમ કહેવું પડશે. અને તે તે પ્રતિબંધકના અભાવોને કારણ તરીકે પણ માનવા પડશે માટે વ્યક્તિભેદે અનંત પ્રતિબધ્ય - પ્રતિબંધક ભાવ માનવા પડશે, તેથી સ્પષ્ટપણે કલ્પનાગૌરવદોષ તમારા મતે આવે છે.

જ્યારે અમારા મતે તો ઘટાદિદ્રવ્યના ચાક્ષુષપ્રત્યક્ષ પ્રત્યે સંયોગેન ચક્ષુની કારણતા સિદ્ધ જ છે. તેથી ત્યારબાદ જે અનન્તચક્ષુસંયોગ તત્પ્રાગભાવ-ધ્વંસાદિની કલ્પનાકૃત ગૌરવ આવે છે. તે ફલમુખ = કાર્યકારણભાવના નિશ્ચય પછી જ આવે છે. માટે દોષકારક બનતું નથી.

---

२१. जयरामभट्टाचार्याः । २२. स्वस्माद् भित्त्यादेः प्राचीस्थस्य पुंसः । २३. स्वप्रतीचीवृत्तित्वसम्बन्धेन यत्र भित्त्यादिकं वर्त्तते, तत्र स्वप्राचीस्थस्य पुंसः साक्षात्कारो न भवतीत्यर्थः। २४. उक्तरीत्या । २५. द्रव्यस्य चक्षुर्जन्यसाक्षात्कारे । २६. चक्षुसंयोगकारणत्वसिद्ध्युत्तरकालीनोपस्थितिकात् । २७. अनन्तचक्षुसंयोगादिकल्पना-गौरवात् ।

**શ્લોક-૨૦ : અવતરણિકા : જયરામભટ્ટાચાર્યના** પૂર્વપક્ષનું ગ્રન્થકારશ્રી નિરાકરણ કરે છે.

**विचार्यमप्यदो भट्टाचार्याणां वचनं बुधैः ।**
**सर्वत्रानुगता यस्मात् सम्बन्धो योग्यतैव हि ॥ २० ॥**

**શ્લોકાર્થ : જયરામભટ્ટાચાર્યનું** આ વચન પણ પંડિત પુરૂષોએ વિચારવા જેવું છે. કારણ કે શક્તિરૂપ કે જ્ઞાનાવરણકર્મના વિપાકોદયરૂપ પ્રતિબંધકના અભાવાત્મક જે યોગ્યતા છે. તે જ સર્વત્ર વ્યવહિતાવ્યવહિત, યોગી-અયોગી, સ્ફટિકાદિ અન્તરિત-અનન્તરિતાદિ જ્ઞાન પ્રત્યે અનુગતપણે સમ્બન્ધ બને છે.

આમ યોગ્યતાત્વેન તે યોગ્યતા સર્વત્ર અનુગત હોવા છતાં વસ્તુતસ્તુ સન્નિહિત વિષયના જ્ઞાન માટે ઘટાદિ પદાર્થોમાં રહેલ વ્યવધાનાભાવકૂટરૂપ યોગ્યતા કારણ છે. અને વ્યવહિત = દૂર રહેલા ઘટાદિ વિષયના જ્ઞાન માટે અંજનાદિમાં રહેલ શક્તિરૂપ જે યોગ્યતા છે. તે કારણ બને છે. આમ હેતુભૂત પુરૂષ અને વિષય જુદા જુદા પ્રકારના હોવાથી યોગ્યતાને વિલક્ષણ સ્વીકારવામાં પણ સ્યાદ્‌વાદિને કોઈ દોષ નથી.

**શ્લોક-૨૧ : અવતરણિકા :** ચક્ષુની અપ્રાપ્યકારિતાનું દૃષ્ટાન્તથી સમર્થન કરે છે.

**अप्याकर्षत्यनाश्लिष्टं लोहं लोहोत्पलो यथा ।**
**[२८]योग्यत्वेन तथाऽप्राप्तं गृह्णीयाच्चक्षुरप्यहो ॥ २१ ॥**

**શ્લોકાર્થ :** જેવી રીતે 'અનાશ્લિષ્ટ એવા પણ લોખંડને યોગ્ય હોવાથી લોહચુંબક આકર્ષે છે. તેવી રીતે અપ્રાપ્ત એવા વિષયને યોગ્ય હોવાથી ચક્ષુ પણ ગ્રહણ કરે છે. યોગ્યતા અવ્યવધાનાદિ રૂપ ગ્રહણ કરવાની છે.

નોંધ : **અહો** શિષ્યને સન્મુખ કરવા માટે આમંત્રણ અર્થમાં છે.

---

२८. अव्यवधानादि लक्षणेन ।

**શ્લોક-૨૨ : અવતરણિકા :** યોગ્યતા શું પદાર્થ છે ? તે અન્યના મતે બતાવતા કહે છે.

**योग्यत्वं च स्वभावः स्यादनादिः [२९]पारिणामिकः ।**
**अन्ये त्वागन्तुकं तत्त्वं नै[३०]यत्याख्यं प्रचक्षते ॥ २२ ॥**

**શ્લોકાર્થ :** અનાદિ પરિણામ સિદ્ધ સ્વભાવએજ યોગ્યતા કહે છે. (જેમ ભવ્યત્વ = સિદ્ધિગમન યોગ્યતા એ અનાદિ પારિણામિક ભાવ છે તેમ) જ્યારે બીજાઓ નૈયત્ય = નિયતિ નામના આગન્તુક તત્ત્વને યોગ્યતા કહે છે.

---

२९. परिणामसिद्धः । ३०. तत् तत् ज्ञात्रादिस्वभावोत्पादव्ययज्ञात्रैकस्वभावलक्षणम् ।

**શ્લોક-૨૩ : અવતરણિકા :** પૂર્વ શ્લોકમાં બતાવેલા મતદ્વયના સમન્વય પૂર્વક સ્વમતને બતાવે છે.

**स्वभावस्य परावृत्तिस्तत् तद् ज्ञात्राद्यपेक्षया ।**
**एकस्वभावानुगता त्रैलक्षण्यं न बाधते ॥ २३ ॥**

**શ્લોકાર્થ :** તે તે જ્ઞાત્રાદિ અપેક્ષાએ = વ્યવહિત અવ્યવહિતાદિ જ્ઞાતા આદિની અપેક્ષાએ, જ્ઞેયત્વ રૂપ એક સ્વભાવાનુગત એવી, સ્વભાવની પરાવૃત્તિ રૂપ જે યોગ્યતા છે તે ઉત્પાદ- વ્યય-ધ્રૌવ્ય રૂપ ત્રૈલક્ષણ્યનો બાધ કરતી નથી.

**શ્લોક-૨૪ : અવતરણિકા :** ત્રૈલક્ષણ્યના સ્વીકારથી વ્યવહારની સંગતિને બતાવે છે.

**आवृत्तानावृत्तत्वाभ्यां योग्यायोग्यत्वभेदभाक् ।**
**[३१]इत्थमेवोपपन्नः स्याद् व्यवहारोऽपि [३२]तात्त्विकः ॥२४॥**

**શ્લોકાર્થ :** આ રીતે જ = ત્રૈલક્ષણ્યનો સ્વીકાર કરવાથી જ અર્ધાવૃત્ત દશામાં આવૃત્તત્વ અને અનાવૃત્તત્વના કારણે એક જ ઘટમાં યોગ્યત્વ અને અયોગ્યત્વનાં ભેદને ભજનારો તાત્ત્વિક વ્યવહાર પણ ઉત્પન્ન થાય.

---

३१. त्रैलक्षण्याभ्युपगम एव । ३२. पारमार्थिकः ।

**શ્લોક-૨૫ : અવતરણિકા : શંકર સ્વામીએ** કરેલા વ્યવહાર ઉપપાદકનું નિરાકરણ કરે છે.

**आवृत्तत्त्वं च संयोगो [३३]महारजनरक्तवत् ।**
**वक्तुमत्र न [३४]शक्येतान्यत्र [३५]चातिप्रसङ्गतः ॥ २५ ॥**

**શ્લોકાર્થ :** 'જેમ કુંકુમાદિ રંજક દ્રવ્ય દ્વારા થયેલી રક્તતા, સંયોગ સ્વરૂપ છે અને તે અવ્યાપ્યવૃત્તિ હોવાથી એક જગ્યાએ રક્ત હોય તો પણ સર્વદેશમાં રક્તતાનો પ્રસંગ આવતો નથી, તેમ આવૃત્તત્વ એ આવરણ સંયોગ રૂપ છે. તેથી એકદેશના આવરણમાં સર્વનું આવરણ માનવું આવશ્યક નથી,' એમ કહેવું તે આ વિષયમાં = વ્યવહાર ઉપપાદનના

વિષયમાં શક્ય નથી. કારણ કે અન્યત્ર અસંયુક્ત એવા વ્યવધાયક પદાર્થમાં અતિપ્રસંગ આવશે = વ્યવધાયકત્વ છે. છતાં સંયોગ નથી, માટે અનાવૃતત્વ પ્રાપ્ત થવાથી ચાક્ષુષ પ્રત્યક્ષ થવાની આપત્તિ આવશે.

३३. रञ्जकद्रव्य । ३४. व्यवधायकस्थले संयोगाभावात् । ३५. चक्षुः प्राप्तिलक्षणय[।] ।

**શ્લોક-૨૬ : અવતરણિકા : ન્યાયલીલાવતીકારના** સમાધાનની તુચ્છતાને બતાવે છે.

**भावभङ्ग्याऽविरोधार्थमभावस्य[३६] प्रजल्पनम् ।**
**नद्यां निमज्जतां काश - कुशालम्बनमेव हि ॥२६॥**

**શ્લોકાર્થ :** ભાવભઙ્ગી સાથે = આવૃત્તત્વ સાથે વિરોધ ન આવે એ માટે અભાવનું = અનાવૃત્તત્વનું કથન ખરેખર નદીમાં ડૂબતા માણસે લીધેલા કાશ-કૂશ જેવા તરણમાં અસહાયક દ્રવ્યના આલંબન જેવું જ છે.

* ( हस्तादर्शे टीप्पणम् अनुपलब्धम् ) ३६. विरोधाभावार्थम् ।

**શ્લોક-૨૭ : અવતરણિકા :** શંકર સ્વામી પ્રમુખનાં વચનોનાં દૂષણો સ્વકૃત શાસ્ત્રવાર્તાસમુચ્ચય સ્તબક-૭ શ્લોક ૧૩ની ટીકામાં જોવાની જિજ્ઞાસુઓને ભલામણ કરે છે.

**शङ्करस्वामिमुख्याणामस्माभिर्दूषणेष्वदः ।**
**व्याख्यातवद्भिराख्यातं[३७] शास्त्रवार्तासमुच्चयम् ॥ २७ ॥**

**શ્લોકાર્થ : શંકર સ્વામી** વિગેરેના દૂષણોને વિષે આ વાત **શાસ્ત્રવાર્તા સમુચ્ચયનું વ્યાખ્યાન** કરતા અમારા વડે કહેવાયી છે.

३७. स्याद्वादकल्पलतायाम् ।

**શ્લોક-૨૮ : અવતરણિકા :** અભ્યુપગમ સિદ્ધાન્તથી વસ્તુનિષ્ઠ યોગ્યતાનું નિરૂપણ કરીને આત્મનિષ્ઠ યોગ્યતાનું નિરૂપણ કરતા કહે છે.

**अस्तु वा [३८]वस्तुवादोऽयं योऽयं [३९]व्यवहिताग्रहः ।**
**स [४०]तदावरणाह्रासान्नचातो [४१]योगिनामिति ॥ २८ ॥**

**શ્લોકાર્થ :** અથવા તો આ = વક્ષ્યમાણ પારમાર્થિક વાદ હો. કયો વાદ પારમાર્થિક છે? એ જ બતાવે છે. 'જે આ-બુદ્ધિસ્થ એવો વ્યવહિત પદાર્થનો અગ્રહ છે. તે તેના આવરણનાં= વ્યવહિત પદાર્થવિષયક જ્ઞાનનાં આવરણના અહ્રાસથી = ક્ષયોપશમાદિનાં અભાવથી છે. આથી જ = વ્યવહિત પદાર્થના અગ્રહ પ્રત્યે તેના આવરણના ક્ષયોપશમાદિનો અભાવ પ્રયોજક હોવાથી જ, યોગીઓને નથી = વ્યવહિતનો અગ્રહ નથી.'

३८. पारमार्थिकवादः । ३९. व्यवहितार्थानुपलम्भः । ४०. व्यवहितार्थग्रहणावरणक्षयोपशमाभावात् । ४१. व्यवहितार्थदर्शिनाम् ।

**શ્લોક-૨૯ : અવતરણિકા :** આવરણનો ક્ષયોપશમ ચાક્ષુષ પ્રત્યક્ષ પ્રત્યે કારણ છે, એવું માનશો તો ઘટનાં ચાક્ષુષ પ્રત્યક્ષ સમયે આવરણનો ક્ષયોપશમ તો છે જ, તો પટનું પણ જ્ઞાન થવાની આપત્તિ આવશે. તો એના વારણ માટે શું કરશો? એ પ્રકારની શંકાનું સમાધાન કરતા કહે છે.

**आपत्तिर्जगति [४२]व्यक्तिस्थानीया तु न विद्यते ।**
**विद्यते चेत् तदत्रापि तत्[४३]स्वाभाव्यं सदुत्तरम् ॥२९॥**

**શ્લોકાર્થ :** 'સામગ્રી એ કાર્યતાઅવચ્છેદકાવચ્છિન્ન કોઈને પણ ઉત્પન્ન કરે જ' એવો જ નિયમ છે નહીં કે કોઈ વિશેષને માટે આપાદક નહીં હોવાથી વ્યક્તિસ્થાનીય-ઘટ વ્યક્તિના જ્ઞાન સમયે પટ વ્યક્તિના જ્ઞાન સ્વરૂપ આપત્તિ, જગતમાં તો વિદ્યમાન નથી. જો તેવી આપત્તિ છે એવી શિષ્યને કદાચ શંકા થઈ જાય, તો એમાં પણ = એ શંકાના વિષયમાં પણ, તત્સ્વભાવતા = ઘટનાં ચાક્ષુષ પ્રત્યક્ષ કાળે જે ઘટ જ્ઞાનાવરણીય ક્ષયોપશમનિષ્ઠ ઘટ જ્ઞાન જનન સ્વભાવતા છે. તે જ સમ્યગ્ = જાતિ આદિ સ્વરૂપ અસદુત્તરથી ભિન્ન, એવું સમાધાન છે. અર્થાત્ ઘટનાં ચાક્ષુષ પ્રત્યક્ષ સમયે ક્ષયોપશમમાં ઘટના જ્ઞાનને ઉત્પન્ન કરવાનો સ્વભાવ હોવાથી પટના જ્ઞાનની ઉત્પત્તિ થવાની આપત્તિ નહિ આવે.

**નોંધ :** વ્યક્તિ સ્થાનીયાપત્તિને સ્પષ્ટ કરવા 'પદાર્થમાલા' પૃ. ૨૨૪ વિગેરે સ્થળો જોવા.

४२. घटज्ञानकाले पटज्ञानप्रसङ्गलक्षणा । ४३. तदा घट-ज्ञानजननादिस्वभावत्वम् ।

**શ્લોક-૩૦ : અવતરણિકા :** વ્યવહિત પદાર્થના ચાક્ષુષ પ્રત્યક્ષનું લોકોત્તર દૃષ્ટાન્ત શ્લોક ૨૮માં બતાવ્યું, હવે વ્યવહિત પદાર્થના ચાક્ષુષ પ્રત્યક્ષનું લૌકિક દૃષ્ટાન્ત બતાવે છે.

**धनादि हि व्यवहितं संस्कृतेनाञ्जनादिना ।**
**नयनेन न किं नाम लोकेनाऽपि न दृश्यते ॥ ३० ॥**

**શ્લોકાર્થ :** અંજનાદિથી સંસ્કૃત એવા નયનથી વ્યવહિત એવુ ધનાદિ લોકો વડે પણ શું નથી જોવાતું ? આશય એ છે કે આવરણના ક્ષયોપશમને વ્યવહિત ગ્રહ પ્રત્યે કારણ ન માનો તો 'અંજનાદિ સંસ્કૃત નયનથી પણ લોકોને વ્યવહિત પદાર્થનું ચાક્ષુષ પ્રત્યક્ષ થાય છે.' આ અનુભવનાં અપલાપની આપત્તિ આવશે.

**શ્લોક-૩૧ : અવતરણિકા :** અહીં કોઈને પ્રશ્ન થાય કે ક્ષયોપશમથી જ વ્યવહિતનો ગ્રહ થવાનો હોય તો અંજનાદિનું કાર્ય શું છે ? તેનું સમાધાન આપવા માટે અંજનાદિના ક્ષયોપશમકારિત્વનું સમર્થન કરતાં કહે છે.

**[४४]द्रव्यं क्षेत्रं च कालं च भवं भावं च जन्मिनां ।**
**[४५]प्रतीत्य कर्मणां चित्रः क्षयोपशम इष्यते ॥ ३१ ॥**

**શ્લોકાર્થ :** બ્રાહ્મી ઘૃતાદિ દ્રવ્ય, મહાવિદેહાદિ ક્ષેત્ર, ચતુર્થ આરકાદિકાળ, મનુષ્યાદિ ભવ અને અર્થપર્યાલોચનાદિરૂપભાવને આશ્રયીને કર્મનો ચિત્ર = જુદા પ્રકારનો ક્ષયોપશમ ઈચ્છાય છે.

४४. अञ्जनादेः क्षयोपशमकारित्वं समर्थयितुमाह । द्रव्यं - ब्राह्मीघृतादिलक्षणम् । क्षेत्रं - महाविदेहादिलक्षणम् । कालं - चतुर्थारकादिलक्षणम् । भवं - मनुजत्वादिलक्षणम् । भावं - अर्थभावनादिलक्षणम् । ४५. आश्रित्य ।

**શ્લોક-૩૨-૩૩ : અવતરણિકા : ઉદયનાચાર્યકૃત ન્યાયવાર્તિક તાત્પર્યપરિશુદ્ધિના** આધારે અન્ય રીતે ચક્ષુના પ્રાપ્યકારિપણાની શંકા કરીને સમાધાન કરતાં કહે છે.

**[४६]यदवच्छिन्नसंयोगं चक्षुर्ननु करोति हि ।**
**तदवच्छिन्न आलोक-संयोगो द्रव्यचाक्षुषम् ॥ ३२ ॥**

**इत्थं च प्राप्यकारित्वमिति चेन्नात्र यन्मता ।**
**[४७]अनुषक्तावयविका देशापेक्षैव योग्यता ॥ ३३ ॥**

**શ્લોકાર્થ :** 'નનુ'થી શંકા કરે છે.

ચક્ષુ યદ્દેશાવચ્છેદેન સંયોગ કરે છે. તદ્દેશાવચ્છેદેન જ આલોકસંયોગ દ્રવ્યચાક્ષુષને કરે છે = દ્રવ્યવૃત્તિલૌકિકવિષયત્વસંબંધાવચ્છિન્ન-ચાક્ષુષત્વાવચ્છિન્નજન્યતાનિરૂપિત-જનકતાનો આશ્રય બને છે, આ રીતે = ચક્ષુસંયોગાવચ્છેદકા-વચ્છિન્નઆલોકસંયોગની, દ્રવ્યચાક્ષુષ પ્રત્યે કારણતા સિદ્ધ થાય છે. એ રીતે સન્નિકૃષ્ટગ્રાહિત્વ રૂપ પ્રાપ્યકારિત્વ ચક્ષુમાં પ્રાપ્ત થશે. ઈતિ ચેત્ ન = આ રીતે પ્રાપ્યકારિત્વ સિદ્ધ કરવું યોગ્ય નથી. કેમ કે અવયવી સંબંધી યોગ્યતા = અવયવી જ્ઞાનાવરણના ક્ષયોપશમરૂપ યોગ્યતા, દેશની = અવયવની અપેક્ષાવાળી = અભિમુખ એવા અવયવી સાથે અવિષ્વગ્ભૂત એવા આલોક સંયોગવિશિષ્ટ અવયવની અપેક્ષાવાળી, મનાયી છે. આશય છે કે આલોક સંયોગ ક્ષયોપશમનો ઉદ્બોધક છે. એ જો અભિમુખ અવિષ્વગ્ભૂત અવયવાવચ્છેદેન હોય તો જ ક્ષયોપશમનો ઉદ્બોધક બની શકે છે. તેથી ચક્ષુને પ્રાપ્યકારિ માનવાની આવશ્યકતા રહેતી નથી.

---

૪૬. યદ્દેશાવચ્છિન્નસંયોગમ્ । ૪૭. દેશિજ્ઞાનસમર્થનાર્થમેતદ્ વિશેષણં યોગ્યતાયાઃ ।

**શ્લોક-૩૪ : અવતરણિકા :** દેશાપેક્ષ યોગ્યતાને નહિ માનીને ચક્ષુની પ્રાપ્યકારિતાના આગ્રહરૂપ વિપક્ષનો બાધ કરતા કહે છે.

**देश-देशिषु सम्बन्धभेदकल्पनकष्टतः ।**
**मोचयेत् त्वामिहान्यः को विना स्याद्वादबान्धवम् ॥३४॥**

**શ્લોકાર્થ :** આ વિષયમાં અવયવ અને અવયવીના સંબંધના ભેદની કલ્પનાનાં કષ્ટથી = કારણ અકારણ સંયોગ અને તજ્જન્ય કાર્ય-અકાર્યના સંયોગરૂપ સંબંધના ભેદની કલ્પનાનાં કષ્ટથી સ્યાદ્વાદરૂપી બાન્ધવ વિના બીજો કોણ તને છોડાવે ? અર્થાત્ કોઈ છોડાવનાર નથી. કેમકે સ્યાદ્વાદાદિમાં અવયવ કથંચિત્ અવયવી સાથે અવિષ્વગ્ભૂત હોવાથી સંબંધ ભેદની કલ્પના કરવાની આવશ્યકતા નથી.

**શ્લોક-૩૫ : અવતરણિકા :** આ રીતે આવરણના ક્ષયોપશમ રૂપ દેશની અપેક્ષાવાળી યોગ્યતાથી જ્ઞાનમાં પ્રધાનરૂપે દેશનું જ ભાન થતું હોવાથી અપ્રાપ્યકારિત્વ પક્ષનાં અન્ય હેતુઓમાં કોઈ દોષ નથી એવું સિદ્ધ કરતા કહે છે.

**[४८]इत्थं पृथुतरज्ञानं त्वग्दृष्टान्तेन चक्षुषः ।**
**समर्थितं स्वमानेन वर्धमानेन नार्थवत् ॥ ३५ ॥**

**શ્લોકાર્થ :** આવું હોવાથી = દેશની અપેક્ષાવાળી યોગ્યતાથી દેશ રૂપે જ દેશીનું જ્ઞાન થતું હોવાથી **વર્ધમાન ઉપાધ્યાયે કિરણાવલી પ્રકાશ**માં સ્વમતિથી ત્વગ્‌નાં દૃષ્ટાન્તથી ચક્ષુને પ્રાપ્યકારિ માનીને પૃથુતર જ્ઞાનને = પોતાની અપેક્ષાએ મોટી વસ્તુના ગ્રહણને આપેલું સમર્થન અર્થવત્ નથી અર્થાત્ નિષ્ફળ છે. આશય એ છે કે **કિરણાવલી**માં પૂર્વપક્ષ રૂપે જે **ઉદયનાચાર્યે** કહ્યું છે કે : '**चक्षुः अप्राप्यकारि पृथुतरग्रहणात्, यन्नैवं तन्नैवं यथा परशुच्छेदने नखरञ्जनिका**' આ પૂર્વપક્ષના ખંડનની અવતરણિકા કરતાં ટીકાકાર વર્ધમાન ઉપાધ્યાયે પૃથુતર ગ્રહણ એ અપ્રાપ્યકારિત્વના અભાવવતી સ્વાધિકપરિમાણગ્રાહી ત્વગ્ ઇન્દ્રિયમાં હોવાથી વ્યભિચારી છે. એમ કહ્યું છે. પણ એ વાત બરાબર નથી કેમકે ત્વગ્ઇન્દ્રિય પણ તાદૃશયોગ્યતાનાં બળે દેશરૂપે જ દેશિનું જ્ઞાન કરે છે. માટે વ્યભિચાર આવશે નહિ.

४८. देशापेक्षयोग्यतया प्राधान्येन देशस्यैव ज्ञाने ।

**શ્લોક-૩૬ : અવતરણિકા :** ઉદયનાચાર્યે પૃથુતર ગ્રહણરૂપ હેતુનું જે ખંડન કિરણાવલીમાં કર્યું છે તેનું ખંડન કરતા કહે છે.

**स्यादेतद्यदि नेत्रस्य[४९] पृथ्वग्रत्वेन दीपवत् ।**
**[५०]तद्वदेव तदा भायात् भाग्रं [५१]तत्प्रतिसम्प्लुतम् ॥ ३६ ॥**

**શ્લોકાર્થ :** જો નેત્રનું પૃથ્વગ્રપણુ હોવાથી = અગ્રભાગ પૃથુ હોવાથી દીપકની જેમ પૃથુતરનું ગ્રહણ થાય તો દીપકની જેમ જ ભાગ્ર = ચક્ષુના કિરણોનો અગ્રભાગ તેના પ્રતિ = ચક્ષુ પ્રતિ સમ્પ્લવ પામેલો દેખાય.

४९. पृथुतरज्ञानम् । ५०. दीपवदेव । ५१. नेत्रम् ।

**શ્લોક-૩૭ : અવતરણિકા :** પૃથ્વગ્રતાનું ખંડન કરવા માટે અન્ય યુક્તિ દ્વારા નૈયાયિકનું અજ્ઞાન પ્રદર્શિત કરે છે.

**निमीलनेन नष्टं चोत्पन्नं चोन्मीलनादिना ।**
**कः श्रद्दधीत नयनं विना नैयायिकं पशुम् ॥ ३७ ॥**

**શ્લોકાર્થ :** આંખ બંધ થવાથી નાશ પામેલા અને આંખ ઉઘડવાથી ઉત્પન્ન થયેલા નયનની નૈયાયિકરૂપી પશુ વિના કોણ શ્રદ્ધા કરે ?

**નોંધ :** અહીં સારોપાલક્ષણા મૂલક રૂપક અલંકાર બતાવવા દ્વારા અત્યંત અનુપાદેયતાને વ્યંજીત કરે છે.

**શ્લોક-૩૮ : અવતરણિકા :** પૃથ્વગ્રતાની આશ્રયીભૂત ચક્ષુની બહિર્ભૂતતા માનવામાં પ્રાપ્ત થતી આપત્તિના પરિહારનું ખંડન કરે છે.

**[૫૨]एतेन गोलकाश्लिष्टासन्निकर्षान्निमीलने ।**
**चक्षुषार्थ-ग्रहापत्तिपरिहारो निराकृतः ॥ ३८ ॥**

**શ્લોકાર્થ :** આથી = ઉન્મીલન-નિમીલન દ્વારા ઉત્પાદ વિનાશને માનવો એ અજ્ઞાન મૂલક છે. એવું સિદ્ધ કર્યું તેનાથી, નિમીલન થયે છતે ચક્ષુથી અર્થગ્રહની આપત્તિનો ગોલક આશ્લિષ્ટ અસન્નિકર્ષરૂપ હેતુથી કરેલો પરિહાર નિરાકરણ કરાયો છે.

---

૫૨. निमीलनादिना नाशाद्यभावेन ।

**શ્લોક-૩૯ : અવતરણિકા :** ચક્ષુની અપ્રાપ્યકારિતાને સિદ્ધ કરવા અપર હેતુનું સમર્થન કરતાં કહે છે.

**[૫૩]अप्राप्यकार्यधिष्ठानासम्बन्धार्थग्रहादपि ।**
**चक्षुर्यदीदृशी व्याप्तिरिन्द्रियेषु[૫૪] न बाधिता ॥ ३९ ॥**

**શ્લોકાર્થ : चक्षुः अप्राप्यकारी अधिष्ठानअसम्बद्धार्थग्राहित्वात्** આ અનુમાનથી પણ ચક્ષુમાં અપ્રાપ્યકારિત્વની સિદ્ધિ થઈ શકે છે કેમકે આ અનુમાનમાં હેતુ અને સાધ્યની વ્યાપ્તિ ઇન્દ્રિયોમાં બાધિત થતી નથી અર્થાત્ હેતુમાં ઇન્દ્રિયત્વનો નિવેશ કરીએ તો **ઉદયનાચાર્યજીએ** દીપકમાં આપેલા વ્યભિચારનો પરિહાર થઈ જાય છે.

૫૩. चक्षुरप्राप्यकारि अधिष्ठानासम्बद्धार्थाग्राहीन्द्रियत्वात् । यन्नैवं तन्नैवं यथा त्वक् घटादिर्वा । ५४ - इन्द्रियेष्वित्यनेन प्रदीपे व्यभिचार परिहारः [ परिहार? ]।

**શ્લોક-૪૦-૪૧ : અવતરણિકા :** ચક્ષુની અપ્રાપ્યકારિતાના સાધક હેત્વન્તરનું સમર્થન કરતા કહે છે.

**काचाद्यन्तरितार्थानामुपलब्धेरपि स्फुटम् ।**
**[५५]इत्थमेत[५६]न्नचात्रापि प्रभावत् सुसमर्थनम् ॥ ४० ॥**

**काचादिकं हि निर्भिद्य गच्छेयुर्यदि रश्मयः ।**
**तदा ते कमलादिनां भेदेऽपि स्युः प्रभूष्णवः ॥ ४१ ॥**

**શ્લોકાર્થ :** એતત્ = ચક્ષુ ઇત્થં = અપ્રાપ્યકારી છે. કેમકે કાચાદિથી વ્યવહિત એવી વસ્તુનું જ્ઞાન પણ થાય છે. એ સ્ફૂટ છે. 'આ વિષયમાં પણ = કાચાદિથી વ્યવહિત એવી વસ્તુનું જ્ઞાન થવાના વિષયમાં પણ, પ્રદીપાદિની પ્રભા જેમ આપ્રાપ્યકારિ ન હોવા છતાં પણ કાચાદિ વ્યવહિત અર્થનાં ગ્રહની જનક બને છે તેમ ચક્ષુ પણ અપ્રાપ્યકારિ ન હોવા છતાં કાચાદિ વ્યવહિત અર્થનાં ગ્રહની જનક બનશે.' આ ઉદયનાચાર્યે કહેલું સમર્થન યોગ્ય નથી. કેમકે જો કાચાદિને ભેદીને કિરણો જતા હોય તો કાચાદિની અપેક્ષાએ અત્યંત કોમળ એવા કમળ આદિના ભેદમાં પણ સમર્થ થવા જોઈએ. આવું થતું નથી માટે કાચાદિને ભેદીને કિરણો વસ્તુના બોધનું કારણ બને છે એમ માનવું યોગ્ય નથી.

૫૫. अप्राप्यकारि । ५६. चक्षुः ।

**શ્લોક-૪૨ : અવતરણિકા :** સ્વચ્છ દ્રવ્ય ગતિપ્રતિબંધક બની શકતા નથી અને કમલાદિ સ્વચ્છદ્રવ્ય નથી માટે એનો ભેદ થતો નથી જેમ અતિકઠિન એવા પણ લોખંડને ભેદી શકનાર પારો તુંબડાને ભેદી શકતો નથી આવું **ઉદયનાચાર્યે** જે સમાધાન આપ્યું છે એનું સમાધાન કરતા કહે છે.

અથવા કોઈને પ્રશ્ન થાય કે સ્ફટિકાદિને ભેદીને કિરણોની ગતિ થાય છે. એવું ન માનીએ તો અનુભવસિદ્ધ એવા કાચાદિ વ્યવહિતના પ્રકાશની સંગતિ કેવી રીતે કરી શકાય ? તેના સમાધાન માટે વાસ્તવિક સંગતિને બતાવવા કહે છે.

**[५७]संसर्गिद्रव्य[५८]सच्छाये परिणामे प्रसारिणि ।**
**प्रसत्तिस्समयुक्ता स्यान्नतु [५९]स्वाश्रयभेदने ॥ ४२ ॥**

**શ્લોકાર્થ :** વ્યવધાયક પદાર્થગત પ્રસત્તિ = સ્વચ્છતા એ સંબદ્ધ દ્રવ્ય જેવું હોય તેવા પ્રસાર પામનારા પરિણામ માટે ઉપયોગી છે. પરંતુ સ્વાશ્રયનાં-સ્વચ્છદ્રવ્યનાં ભેદ માટે નહિ.

નોંધ : અહીં સપ્તમી નિમિત્ત સપ્તમી છે. તેથી 'માટે' એવો અર્થ કરી શકાય.

५७. वास्तवीमुपपत्तीमाह । ५८. सम्बन्ध-द्रव्यसदृशे । ५९. स्वशब्देन प्रसत्तिस्तदाश्रयः प्रसन्नद्रव्यं स्फटिकादि ।

**શ્લોક-૪૩ : અવતરણિકા :** કોઈને પ્રશ્ન થાય કે કાચથી અન્તરિત પદાર્થનો ગ્રહ થાય છે. તો દર્પણથી અન્તરિત પદાર્થનું ગ્રહણ કેમ થતું નથી ? તેના સમાધાન અર્થે કહે છે.

**सर्व्वतो हि प्रसन्नस्य [६०]तथा परिणतिर्ध्रुवा ।**
**परभागे तु [६१]विषमे पुरस्थप्रतिबिम्बनम् ॥ ४३ ॥**

**શ્લોકાર્થ :** બધી જ બાજુથી સ્વચ્છ દ્રવ્યની તથાપરિણતિ = સંસર્ગિ દ્રવ્ય સદૃશ પરિણામ અવશ્ય થાય જ છે. પરંતુ જ્યારે પરભાગ વિષમ-અસ્વચ્છ હોય ત્યારે સન્મુખ રહેલી વસ્તુનું પ્રતિબિમ્બ થાય છે.

६०. संसर्गिद्रव्यसच्छायपरिणतिः । ६१. अप्रसन्ने ।

**શ્લોક-૪૪ : અવતરણિકા :** કાચાદિને ભેદીને કિરણો પ્રકાશ કરે છે એવું માનનારાઓને બૌદ્ધ મતમાં પ્રવેશની આપત્તિ આપતા કહે છે.

**[६२]काचादिनां तु भिन्नानामुत्पन्नानां च [६३]तादृशाम् ।**
**आश्रयेद् [६४]बौद्धसिद्धान्तं [६५]प्रत्यभिज्ञादिसङ्गतिः ॥ ४४ ॥**

**શ્લોકાર્થ :** ચક્ષુથી ભેદ થવા છતાં પણ સ્ફટિકાદિ ઉપર રહેલી વસ્તુ પડી જતી નથી તેથી એને ઉપપન્ન કરવા માટે ચક્ષુથી ભેદાયેલા અને ફરી એવા ને એવા ઉત્પન્ન થયેલા કાચાદિને જો માનો તો બૌદ્ધનાં સિદ્ધાન્તને માની લો કેમકે બૌદ્ધના સિદ્ધાન્ત મુજબ સાદશ્યના કારણે ક્ષણિક એવા આત્માદિ પદાર્થોની પણ પ્રત્યભિજ્ઞા સંગત થઈ શકે છે. આશય એ છે કે બૌદ્ધના સિદ્ધાન્ત મુજબ સાદશ્યના કારણે ક્ષણિક એવા આત્માદિ પદાર્થોની પણ પ્રત્યભિજ્ઞા નહિ માનો તો કાચાદિને પણ ઉત્પાદ-વિનાશશાલી માનીને તેની પ્રત્યભિજ્ઞાને સંગત કરી શકશો નહિ.

---

६२. नयनरश्म्यादिना काचादिभेदे प्रत्यभिज्ञाया दुरुपपादत्वमाह । ६३. तादृशानां । ६४. सादृश्यविषयत्वेन प्रत्यभिज्ञा । ६५. घटादेः क्षणित्वेपि तथा प्रत्यभिज्ञाया उपपादयितुं शक्यत्वादिति भावः ।

**શ્લોક-૪૫ : અવતરણિકા :** નિગમન કરતાં કહે છે.

**तस्मात् काचादिभिन्नानां व्यवधायकता स्थितौ ।**
**सर्वमेवोपपन्नं स्यात् योग्यतामेव भेजुषां ॥ ४५ ॥**

**શ્લોકાર્થ :** તે કારણથી કાચાદિથી ભિન્ન દ્રવ્યોની વ્યવધાયકતા સ્થિત હોતે છતે યોગ્યતાને જ ભજનારાઓનું બધું જ ઉપપન્ન થાય.

**શ્લોક-૪૬ : અવતરણિકા :** ચાક્ષુષ પ્રત્યક્ષ પ્રત્યે યોગ્યતાને જ કારણ માનવાથી પ્રાપ્ત થતા અન્ય લાભને બતાવતા કહે છે.

**[६६]अल्पाल्पतरभेदेन प्रचितावरणस्य च ।**
**मन्दातिशयित-ज्ञानभेदोऽत्र न विरुध्यते ॥ ४६ ॥**

**શ્લોકાર્થ :** આમાં = યોગ્યતાને કારણ માનવામાં અલ્પ અલ્પતર ભેદથી બાંધેલા આવરણવાળા વ્યક્તિને અનુક્રમે મન્દ જ્ઞાન અને અતિશયિત જ્ઞાનનો ભેદ વિરોધ પામતો નથી આશય એ છે કે સમાન વિષયમાં સમાન ચક્ષુ સંયોગ હોવા છતાં પણ કોઈકને મન્દજ્ઞાન થાય છે ને કોઈકને અતિશયિત જ્ઞાન થાય છે આવો ભેદ ચક્ષુપ્રાપ્યકારિત્વ માનનારનાં મતે સંગત થશે નહિ.

૬૬. मन्द-मन्दतरलक्षणविशेषेण ।

**શ્લોક-૪૭ : અવતરણિકા :** લીલાવતીકારે બતાડેલી યુક્તિ દ્વારા પ્રાપ્યકારિતાની શંકા કરે છે.

**ननु [६७]स्वव्याप्तसंख्याकाऽवयवेष्वेव चक्षुषः ।**
**हस्तद्वयग्रहो न स्यान्नूनं संयोगमन्तरा ॥ ४७ ॥**

**શ્લોકાર્થ :** 'નનુ'થી આક્ષેપ કરે છે. હસ્તવ્યાપ્ત સંખ્યાવાળા અવયવોમાં ચક્ષુના સંયોગ વિના ઘટાદિ પદાર્થ બે હાથનો છે એવું જ્ઞાન નહિ જ થાય. આશય એ છે કે લીલાવતીકારના મતે અર્ધાવૃત્ત દશામાં પણ ઘડો તો અનાવૃત્ત જ છે. છતાં તેના પરિમાણનું ગ્રહણ કેમ થતું નથી ? તેનું સમાધાન આપતાં કહે છે કે જેટલા પરિમાણવાળો પદાર્થ હોય તેટલા પરિમાણમાં રહેલા અવયવો સાથે ચક્ષુનો સંયોગ થાય ત્યારે જ તે તે દ્વિહસ્તત્વાદિ પરિમાણનો ગ્રહ થાય છે. તેથી ચક્ષુને જો પ્રાપ્યકારિ માનશો તો જ આ વાત સંગત થઈ શકશે.

૬૭. हस्त

**શ્લોક-૪૮ : અવતરણિકા :** પૂર્વશ્લોકમાં કરેલ આક્ષેપનું નિરાકરણ કરતા કહે છે.

**नैवं [६८]यदन्यथाप्यस्य वितस्तिद्वैत रूपिणः ।**
**ग्रहोऽपीति [६९]तथाज्ञाने योग्यतैव नियामिका ॥ ४८ ॥**

**શ્લોકાર્થ :** ન એવં-આ વાત બરાબર નથી, કેમકે એક હાથનો ઘડો બે વેંતનો પણ છે. એટલે બે વેંતવાળા એવા આનો-ઘડાનો દ્વિવિતસ્તિત્વેન પણ ગ્રહ થાય છે. એટલા માટે ક્યારેક દ્વિવિતસ્તિત્વેન ક્યારેક હસ્તત્વેન જ્ઞાન થાય છે તેમાં તે તે પ્રકારની યોગ્યતા જ નિયામિકા છે અર્થાત્ જેવો ક્ષયોપશમ હોય તેવું જ્ઞાન થાય.

૬૮. वितस्ति द्वयत्वादिनापि । ६९. हस्तत्वादिना ज्ञाने ।

**શ્લોક-૪૯ : અવતરણિકા :** શ્લોક ૪૮માં દર્શાવેલી યુક્તિને નહિ માનવાથી પ્રાપ્ત થતા દોષને બતાવે છે.

**नो चेद्धस्तद्वयमिति द्विकपालघटे तव ।**
**उपायस्तत् ग्रहापत्तेः शान्तये [७०]कोंऽशदर्शने ॥ ४९ ॥**

**શ્લોકાર્થ :** જેમ બે વેંતના પરિમાણવાળો ઘડો હોય તો દ્વિવિતસ્તિત્વેન ગ્રહ થાય. તેમ એક હાથના ઘડાના બંને કપાલો પણ એક એક હાથના હોય છે તો તેવા બે કપાલવાળા ઘડાના અંશમાં = કપાલરૂપ અવયવમાં દર્શને=ચક્ષુ સંયોગે=ચક્ષુનો સંયોગ થયે છતે, हस्तद्वयम् घट परिमाणम् ઇત્યાકારક ગ્રહ [એક હાથના ઘડામાં] થવાની આપત્તિની શાંતિનો શું ઉપાય છે ? અર્થાત્ કોઈ ઉપાય નથી.

૭૦. कपालांशचक्षुः संयोगे ।

**શ્લોક-૫૦ : અવતરણિકા : જીનભદ્રગણિક્ષમાશ્રમણે વિશેષાવશ્યક ભાષ્યમાં** બતાવેલા, ચક્ષુને પ્રાપ્યકારી માનવાથી પ્રાપ્ત થતા દોષને કહે છે.

**अनुग्रहोपघातौ चाभिष्टानिष्टार्थयोगतः ।**
**[७१]स्यातां देह इवावश्यं चक्षुषि प्राप्यकारिणि ॥ ५० ॥**

**શ્લોકાર્થ :** અને ચક્ષુ પ્રાપ્યકારી હોતે છતે અભીષ્ટ અને અનિષ્ટ અર્થના યોગથી શરીરની જેમ અવશ્ય અનુગ્રહ ને ઉપઘાત થવા જોઈએ.

૭૧. विषयस्थले इति भावः ।

**શ્લોક-૫૧ : અવતરણિકા :** પૂર્વના શ્લોકમાં બતાવેલો તર્ક એ તર્કાભાસ નથી. એવું સિદ્ધ કરતાં કહે છે.

**इष्टापत्तिश्च नेन्द्वर्क-किरणाभ्यामिहोचिता ।**
**त्वग्वत् प्राप्तेन [७२]मूर्तेन यतः प्राप्तस्य तौ न तु ॥ ५१ ॥**

**શ્લોકાર્થ :** બીજું 'ચન્દ્ર અને સૂર્યનાં કિરણોથી અનુગ્રહ ને ઉપઘાત રૂપ આપાદ્ય ચક્ષુરૂપ પક્ષમાં રહેતો હોવાથી ઈષ્ટાપત્તિ રૂપ દોષ આવશે અને ઉપલક્ષણથી વિપર્યય

અપર્યવસાન રૂપ દોષ પણ આવશે.' એમ કહેવું યોગ્ય નથી કેમકે પ્રાપ્ત એવા મૂર્ત ચન્દ્ર અને સૂર્યના કિરણાદિથી જે અનુગ્રહ-ઉપઘાત થાય છે તે પ્રાપ્ત થયેલી ચક્ષુના [અનુગ્રહ ઉપઘાત] નથી. જેમ સ્પર્શનેન્દ્રિયમાં આવીને, સૂર્ય ચન્દ્રના કિરણો, અનુગ્રહ ઉપઘાત કરે છે પરંતુ સ્પર્શનેન્દ્રિય સૂર્ય ચન્દ્રને પ્રાપ્ત થતી નથી તેમ.

૭૨. इन्द्वर्ककिरणादिना ।

**શ્લોક-૫૨ : અવતરણિકા :** હવે નૈયાયિક શંકા કરે છે.

**[૭૩]अनुग्रहोपघातौ चेत् सुखदुःखात्मकौ ननु ।**
**तदा तौ क[૭૪]थमापाद्यौ नयनस्यार्थयोगिनः ॥ ५२ ॥**

**શ્લોકાર્થ :** 'નનુ'થી શંકા કરે છે.

જો અનુગ્રહ અને ઉપઘાત સુખદુઃખાત્મક હોય તો તે બંને અર્થની સાથે યોગવાળા=સંયોગ સમ્બન્ધવાળા નયનના આપાદ્ય કેવી રીતે બને ? અર્થાત્ ન બને. કેમકે સુખ અને દુઃખનો આશ્રય તો આત્મા જ છે.

૭૩. अथ नैयायिकः । ૭૪. आत्मन एव सुखदुःखाश्रयत्वात् ।

**શ્લોક-૫૩ : અવતરણિકા :** સુખ-દુઃખરૂપ અનુગ્રહ ઉપઘાત વિષયસ્થળે નેત્રની પ્રાપ્તિ થાય ત્યારે થાય છે કે

સુખ-દુઃખરૂપ અનુગ્રહ-ઉપઘાત, નેત્ર દેશમાં વિષયની પ્રાપ્તિ થાય ત્યારે થાય છે

કે પુષ્ટિ હાનિરૂપ અનુગ્રહ ઉપઘાત નેત્ર દેશમાં વિષયની પ્રાપ્તિ થાય ત્યારે થાય છે

કે પુષ્ટિ હાનિરૂપ અનુગ્રહ ઉપઘાત વિષય દેશમાં નેત્રની પ્રાપ્તિ થાય ત્યારે થાય છે. આ ચાર વિકલ્પોમાં પ્રથમ વિકલ્પ અને તૃતીય વિકલ્પમાં નૈયાયિકોની માન્યતા શું છે ? તે સ્પષ્ટ કરવા દ્વારા અનુગ્રહોપઘાતની આપત્તિ યોગ્ય નથી એવું સિદ્ધ કરતા શ્લોકદ્વયને કહે છે.

દ્વિતીય વિકલ્પ અભ્યુપગમ સિદ્ધ છે અને ચતુર્થ વિકલ્પ અસંભવ બાધિત છે. અર્થાત્ દ્વિતીય વિકલ્પ ઉભયપક્ષને માન્ય છે. અને ચતુર્થ વિકલ્પ સંભવી શકે તેમ જ નથી.

**अवच्छेद्यौ शरीरेणेन्द्रियेण तु न तौ[૭૫] यतः ।**
**[૭૬]नेत्रावच्छिन्नतत्प्राप्तिस्ततो न विषयस्थले ॥ ५३ ॥**

**શ્લોકાર્થ :** જે કારણથી તે બંને = અનુગ્રહ અને ઉપઘાત શરીરથી અવચ્છેદ્ય છે = શરીરાવચ્છિન્ન આત્મામાં થાય છે. ઈન્દ્રિયથી અવચ્છેદ્ય નથી તે કારણથી વિષયસ્થળમાં નેત્રાવચ્છિન્ન અનુગ્રહ ઉપઘાતની આપત્તિ આવશે નહિ. આશય એ છે કે, વિષયમાં નેત્રોનો સંયોગ હોવા છતાં સુખ દુઃખનું અવચ્છેદક શરીર હાજર ન હોવાથી નેત્રને પ્રાપ્યકારી માનવાથી અનુગ્રહ ઉપઘાતની આપત્તિ આવશે એવું કેવી રીતે કહી શકાય ?

૭૫. अनुग्रहोपघातौ । ૭૬. नेत्रावच्छिन्नानुग्रहोपघातापत्तिः ।

**अर्थप्राप्तिनिमित्तौ च तावधिष्ठानसङ्गतौ ।**
**सूक्ष्मेन्द्रियाश्रयौ नैव पुष्टिहान्यादिलक्षणौ ॥ ५४ ॥**

**શ્લોકાર્થ : ૫૪ :** અને અધિષ્ઠાન સંગત = ગોલક સંબદ્ધ એવા અર્થપ્રાપ્તિના કારણે થયેલાં પુષ્ટિ હાનિઆદિરૂપ અનુગ્રહ અને ઉપઘાત સૂક્ષ્મેન્દ્રિયના આશ્રયવાળા નથી. આશય એ છે કે ઈન્દ્રિય સૂક્ષ્મ હોવાથી અનુગ્રહ અને ઉપઘાત સૂક્ષ્મેન્દ્રિયના આશ્રયવાળા નથી. પરંતુ બહાર રહેલી સ્થુલ ઈન્દ્રિયમાં જ થાય છે.

**શ્લોક : ૫૫-૫૬ : અવતરણિકા :** હવે ઉપાધ્યાયજી મહારાજા સમાધાન કરવા માટે પ્રતિજ્ઞા કરે છે.

**अत्र ब्रूमोऽनयोर्[૭૭]हेतुरिन्द्रियप्राप्तिरेव हि ।**
**शरीरेणानवच्छिन्ने कार्ये तु [૭૮]तदकारणम्[૭૯] ॥ ५५ ॥**

**उक्तापत्तिस्ततो युक्ता सौक्ष्म्येऽपि च विरोधिनाम् ।**
**नादृष्टमौषधादीनां सामर्थ्यं तद्[૮૦] विभेदने ॥५६॥**

**શ્લોકાર્થ :** આ શંકા થયે છતે અમે જવાબ આપીએ છીએ કે આ બંનેનો અર્થાત્ સુખદુઃખાત્મક અનુગ્રહ ઉપઘાતનો હેતુ ઈન્દ્રિય પ્રાપ્તિ જ છે. કેમ કે શરીર અનવચ્છિન્ન એવા સુખદુઃખાદિ કાર્ય પ્રત્યે શરીર કારણ બની શકતું નથી. તેથી શરીરાનવચ્છેદ્ય અનુગ્રહ ઉપઘાત માનવા પડશે એવા તાત્પર્યવાળી ઉક્ત આપત્તિ યોગ્ય છે = અમારો તર્ક અદુષ્ટ છે. અને પુષ્ટિ-હાનિ આદિ રૂપ અનુગ્રહ ઉપઘાત સ્વીકારવામાં ઈન્દ્રિયોનું સૌક્ષ્મ્ય

હોવા છતાં પણ ચક્ષુના નાશમાં, વિરોધી = વિપરિત એવા ઔષધાદિનું સામર્થ્ય જોવાયું નથી એવું નથી.

૭૭. सुखदुःखात्मकयोरनुग्रहोपघातयोः । ૭૮. शरीरम् । ૭૯. तथा च शरीरानवच्छिन्नावेव तौ स्यातामिति भावः । ૮૦. चक्षुर्विभेदने ।

**શ્લોક-૫૭ : અવતરણિકા :** શ્રદ્ધાનુસારિ શ્રોતાને ચક્ષુની અપ્રાપ્યકારિતા શબ્દ પ્રમાણથી સિદ્ધ કરતાં અને તર્કાનુસારી શ્રોતાને તર્કનું ઉપજીવક શબ્દ પ્રમાણ છે એવું ઘોતન કરવા માટે ૧૪ પૂર્વધર ભદ્રબાહુસ્વામીજી મહારાજના વચનનો આશ્રય કરીને ચક્ષુની અપ્રાપ્યકારિતાને સિદ્ધ કરે છે.

**रूपं पश्यति चास्पृष्टमिति [૮૧]सूत्रं व्यवस्थितं ।**
**चक्षुरप्राप्यकारित्वसाधनायेति शोभनम् ॥५७ ॥**

**શ્લોકાર્થ : 'रूपं पश्यति चास्पृष्टम्'** એ પ્રમાણેનું સૂત્રં ચક્ષુની અપ્રાપ્તિકારિતાને સિદ્ધ કરવા માટે વ્યવસ્થિત છે પ્રમાણે ઇતિ શોભનમ્ ।

નોંધ : इति શબ્દ ગ્રંથ સમાપ્તિ અર્થક છે.

शोभनम् શબ્દ અંતિમ મંગલ સૂચક છે.

રૂપં પશ્યતિ...નો અર્થ આ પ્રમાણે છે -- જેમ શરીરમાં ધૂળ સ્પર્શે તેમ શ્રોત્રેન્દ્રિય પટુ હોવાથી સ્પર્શાયેલા એવા શબ્દ દ્રવ્યને ગ્રહણ કરે છે. ચક્ષુરિન્દ્રિય નહિ સ્પર્શાયેલા રૂપને જુએ છે. અને બાકીની ત્રણ ઇન્દ્રિયો બદ્ધસ્પૃષ્ટ એવા ગંધ-રસ તથા સ્પર્શ યોગ્ય દ્રવ્યોને ગ્રહણ કરે છે.

૮૧. पुट्ठं सुणेइ सद्दं, रुवं पुण पासइ अपुट्ठं तु । गंधं रसं च फासं च बद्धपुट्ठं वियागरे ॥ १ ॥ इत्यावश्यके

**શ્લોક-૫૮ : અવતરણિકા :** ગ્રન્થની પ્રશસ્તિ કરતાં કહે છે.

**श्रीमन्नयादि-विजयाभिधानां सुधियां शिशुः ।**
**चक्रे वादममुं प्रीत्या यशोविजय-पण्डितः ॥५८ ॥**

**શ્લોકાર્થ :** શ્રીમાન્-આશ્રિત જનનું ઉપાધ્યાયજી મહારાજા જેવા રત્ન રૂપે પરિણમન થાય એ રીતે યોગ-ક્ષેમ કરવામાં સક્ષમ એવી જ્ઞાનાદિ લક્ષ્મીથી હંમેશા યુક્ત એવા 'નયવિજયજી મહારાજા' એ પ્રમાણે નામવાળા સુંદર બુદ્ધિથી યુક્ત એવા ગુરુ ભગવન્તના બાળક એવા પન્યાસ યશોવિજયજી મહારાજે પ્રીતીપૂર્વક આ વાદને કર્યો ન્યાય માર્ગાનુસારી તાત્પર્યાર્થ આ પ્રમાણે થઈ શકે છે- 'प्रीतिसमानाधिकरणवादोत्पादनानुकूलकृतिमान् यशोविजय पण्डितः ।

**શ્લોક-૫૯ : અવતરણિકા :** ગ્રન્થથી થતા સદ્ભૂત ફળનો અનુવાદ કરે છે.

**कर्णेजपानां कुधियां परं कर्णज्वरं तथा ।**
**करोत्वयं सकर्णानांकर्णपीयूष-पारणम् ॥५९ ॥**

**इति चक्षुरप्राप्यकारितावादः सं. १७१० माघवदि-११**
**भृगौ कीर्तिरत्नेनालेखि ॥**

**શ્લોકાર્થ :** આ ચક્ષુ અપ્રાપ્યકારિતાવાદ કર્ણેજપ-દુર્જન એવા દુષ્ટ બુદ્ધિવાળા જીવોને અત્યંત કર્ણનોજ્વર=પીડાને કરો અને સકર્ણ-સજ્જનોના કર્ણને અમૃતનું પારણું કરાવો.

નોંધ : 'पारणम्-व्रतान्तभोजनम्', इति શબ્દ લેખન સમાપ્તિ અર્થક છે.

આ પ્રમાણે ચક્ષુરપ્રાપ્યકારિતાવાદ સં. ૧૭૧૦ મહાવદ ૧૧ શુક્રવારનાં દિવસે
પૂ.કીર્તિરત્ન વિ. નામના મુનિએ લખ્યો.

**नास्त्येषा राजपद्धतिः किन्त्वयं विषमः पथः ।**
**तथापि दर्शितेयं दिक् शोधयन्तु बुधा मुदा ॥**

**सं. २०६६ द्वितीय माधव कृष्ण प्रतिपद्दिने शुक्रे ।**
**इति यशः शिशुकृता गुर्जरभाषावृत्तिः ॥**

• • •

॥ अज्ञातकर्तृकचक्षुरप्राप्यकारितावादः ॥ ( अद्यावधि अप्रकटः )

**ननु** प्राप्यकारि चक्षुः, बाह्येन्द्रियत्वात्, यद् बाह्येन्द्रियं तत् प्राप्यकारि प्रतिपन्नं, यथा त्वगादि। बाह्येन्द्रियं च चक्षुः, प्राप्यकारि। तस्मात् 'प्राप्यकारित्वे चक्षुषो महतः पर्वतादेरप्रकाशप्रसङ्गः' इति न **वाच्यम्**। धत्तूरकपुष्पवदादौ सूक्ष्माणामप्यन्तेमहत्त्वोपपत्तेः तद्रश्मिनाम्। ते हि आलोकमिलिता यावदर्थं वर्द्धन्ते। महतः पर्वतादेः प्रकाशकत्वान्यथानुपपत्तेः।

**न च** रश्मिवत्त्वं चक्षुषोऽसिद्धम्, तत्साधकप्रमाणसद्भावात्। तथाहि–रश्मिवच्चक्षुः, तैजसत्वात्, प्रदीपवत्। **न चेद**मप्यसि**द्धम्**, तत एव। तथाहि तैजसं चक्षुः, रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात्। तद्वदेव।

**ननु** चक्षुषः प्राप्यकारित्वे कथं शाखाचन्द्रमसोर्युगपद्ग्रहणम्? **इत्यपि वार्त्तम्**, युगपद्ग्रहणस्यासिद्धत्वात्। प्रथमतो हि चक्षुः सन्निकृष्टां शाखां प्राप्य प्रकाशयति पश्चाद् विप्रकृष्टं चन्द्रमसम्। युगपत्प्रतिपत्त्यभिमानस्तूत्पलपत्रशतव्यतिभेदवद् भ्रान्तिनिबन्धनः।

दूरनिकटादिव्यवहारोऽपि चक्षुषः प्राप्यकारित्वे न दुर्घटः। शरीरापेक्षया चक्षुर्विषयस्य सन्निकृष्टविप्रकृष्टतोपपत्तेः।

यदि चाप्राप्यकारि चक्षुः स्यात् तर्हि कुड्याद्यव्यवहितवत्तद्व्यवहितस्यापि घटादेर्मेर्वादिश्चानेकयोजनशतव्यवहितस्यापि तत् प्रकाशकं स्यात्। क्वचित्प्रत्यासत्तिविप्रकर्षाभावात्, न चैवम्, अतः प्राप्यकारि तत् प्रतिपत्तव्यम्। कारकत्वाच्च। यत्कारकं तत्प्राप्यकारि, यथा वास्यादि, कारकं च चक्षु**रिति**।

**अत्र प्रतिविधीयते**। यत्तावदुक्तं '**प्राप्यकारि चक्षुरिति,**' तत्र धर्मित्वेन उपात्तं चक्षुर्गोलकस्वभावं, रश्मिरूपं वा। **प्रथमपक्षे** प्रत्यक्षविरोधः। अर्थेना सम्बद्धस्य अर्थदेशपरिहारेण शरीरप्रदेश एव गोलकस्वभावचक्षुषः प्रत्यक्षतः प्रतीतेः। **द्वितीयपक्षे** तु धर्मिणोऽसिद्धिः। रश्मिरूपस्य चक्षुषः कुतश्चित् प्रमाणादप्रसिद्धेः। तत् साधकं हि प्रमाणं प्रत्यक्षमनुमानं वा स्यात्। न तावत् प्रत्यक्षमर्थवत् तत्र, तत्स्वरूपाप्रतीतेर्न खलु रश्मयः प्रत्यक्षतः प्रतीयन्ते, विप्रत्तिपत्त्यभावप्रसङ्गात्। न हि नीले नीलतया प्रतीयमाने कश्चिद् विप्रतिपद्यते।

किञ्च, इन्द्रियार्थसन्निकर्षजं प्रत्यक्षं भवन्मते। **न च** अर्थदेशे विद्यमानैस्तैरपरेन्द्रियस्य सन्निकर्षोऽस्ति यतस्तत्र प्रत्यक्ष मु**त्पद्येत**, अनवस्थाप्रसङ्गात्। अनुमानतोऽप्यत एव अन्यतो वा तत्सिद्धिः स्यात्? यद्यत एव, अन्योन्याश्रयः प्रसिद्धे ह्यनुमानोत्थानेऽतस्तत्सिद्धिः, अस्याश्चानुमानोत्थानमिति। अनुमानान्तरात् तत्सिद्धावनवस्था धर्मिणः तत्रापि अनुमानान्तरात् सिद्धिप्रसङ्गात्।

**एतेन** यदुक्तं **रश्मिवच्चक्षुः तैजसत्वात्** इति तत् **प्रत्याख्यातम्,** उक्तपक्षदोषाणामत्रापि अविशेषात् ।

किञ्च, रश्मिवत्ता गोलकरूपस्य चक्षुषः साध्यते तद्व्यतिरिक्तस्य वा । न तावत् तद्व्यतिरिक्तस्य, तस्यासिद्धस्वरूपत्वाद् अपसिद्धान्तप्रसङ्गाच्च । गोलकरूपस्य तु तत्साधने पक्षस्य प्रत्यक्षबाधा, प्रभासुर-प्रभारहितस्य गोलकस्य प्रत्यक्षतः प्रतीतेः ।

**अथ** अदृश्याः तद्रश्मयः, अनुद्भूतरूपस्पर्शत्वात् । अतो न अस्य प्रत्यक्षबाधा । कथमेवं रूप-प्रकाशकत्वं तस्य स्यात् ? तथाहि-चक्षू रूपप्रकाशकं न भवति, अनुद्भूतरूपत्वात्, जलसंयुक्तानलवत्। न च अनुद्भूतरूपस्पर्शं तेजोद्रव्यं क्वचित् प्रतीयते । जलहेम्नोर्भासुररूपोष्णस्पर्शयोरनुद्भूतप्रतीतिरस्ति **इत्यपि असम्यग्,** उभयानुद्भूतेस्तत्राप्यप्रतिपत्तेः । दृष्टानुसारेण चादृष्टार्थकल्पना । अन्यथा पृथिव्यादेरपि तद्वत्ताप्रसङ्गः । तथाहि-रश्मिवन्तः पृथिव्यादयो द्रव्यत्वात्, प्रदीपवत् । यथा एव हि तैजसत्वं रश्मिवत्तया व्याप्तं प्रदीपे प्रतिपन्नं तथा द्रव्यत्वमपि ।

**अथ** ततस्तेषां तत्साधने प्रत्यक्षविरोधः । सोऽन्यत्रापि समानः । **अथ** मार्जारादिचक्षुषोः प्रत्यक्षतः प्रतीयन्ते रश्मयः कथं तद्विरोधः ? यदि नाम तत्र तेऽन्यत्र किमायातम ? अन्यथा हेम्नि पीतत्वस्य सुवर्णत्वेन व्याप्तिप्रतिपत्तेः पटादौ पीतत्वोपलम्भात् सुवर्णत्वसिद्धिः स्यात्, प्रत्यक्षबाधो-ऽन्यत्रापि । रश्मिवत्त्वे चास्यार्थप्रकाशने आलोकापेक्षा न स्यात् । तथाहि-यद् रश्मिवत् तद् अर्थप्रकाशनेनालोकापेक्षं, यथा प्रदीपो, रश्मिवच्च भवद्भिरभिप्रेतं चक्षुरिति । तथा तद्वत्त्वे स्वसम्बद्धस्याञ्जनादेः प्रकाशकत्वप्रसङ्गः । तथाहि-यद्रश्मिवत् तत्स्वसम्बद्धमर्थं प्रकाशयति एव, यथा प्रदीपः, रश्मिवच्चक्षुः, तस्मात् स्वसम्बद्धं कामलादिकं प्रकाशयेदेव ।

यदपि **'तैजसत्वाद्'** इति साधनमुक्तं, तदप्ययुक्तम्, असिद्धत्वात् । तदसिद्धत्वं च कुतश्चि-त्प्रमाणात् तत्र तस्य अप्रतीतेः । तद्धि गोलकरूपस्य चक्षुषोऽभ्युपगम्येत रश्मिरूपस्य वा ?। यदि गोलकस्वरूपस्य, तदाध्यक्षबाधा, भासुररूपोष्णस्पर्शरहितस्याऽध्यक्षतः प्रतीतेः । अनुमानबाधश्च तथाहि-चक्षुः तैजसं न भवति, भासुररूपोष्णस्पर्शरहितत्वाद्, यदेवं तदेवं, यथा मृत्पिण्डादिः तथा च इदम्, तस्मात् तथा इति । तथा न तैजसं चक्षुः, तमःप्रकाशकत्वात्, यत्पुनः तैजसं तन्न तमःप्रकाशकं, यथा आलोकः, तमःप्रकाशकं च चक्षुः, तस्मान्न तैजसमिति । रश्मिरूपस्य तु चक्षुषोऽसिद्धरूपत्वान्न तैजसत्वमुपपद्यते ।

**यदपि रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वादिति** तत् तैजसत्वे साधनमुक्तं **तदपि** जलाञ्जनचन्द्रमाणिक्यादिभिरनैकान्तिकम् । न च एतद् वक्तव्यम् जलादीन् प्रतिगत्वा व्यावृतानां चक्षूरश्मीनामेव तत्प्रकाशकत्वं न जलादीना**मिति** । सर्वत्रदृष्टहेतुवैकल्यापत्तेः । तथा च

दृष्टान्तासिद्धिः। प्रदीपादावप्यन्यस्यैव तत्प्रकाशकत्वप्रसङ्गात् । प्रत्यक्षबाधनमुभयत्र। अतश्चक्षुषः कुतश्चित् तैजसत्वासिद्धेः कथं रश्मिवत्त्वं सिद्धेये० यतः प्राप्यकारित्वं स्यात् ।

किञ्च, अस्य प्राप्यकारित्वे विषयश्चक्षुर्देशम् आगच्छेच्चक्षुर्वा विषयदेशं ? **तत्राद्य**विकल्पे प्रत्यक्षबाधा, चक्षुःप्रदेशे विषयस्य पर्वतादेरागमनाप्रतीतेः। **द्वितीय**पक्षेऽध्यक्षविरोधः, विषयं प्रति चक्षुषो गमनाप्रतीतेः । चक्षुर्गत्वा नार्थेनाभिसम्बध्यते, इन्द्रियत्वात्, त्वगादिवद्, इत्यनुमानविरोधश्च। तदविशेषेऽपि दृष्टातिक्रमेण कस्यचित् तत्र गत्वा सम्बन्धाभ्युपगमे यथा प्रतीत्यसम्बन्ध एव किं नाभ्युपगम्यते । अलं प्रतीत्यपलापेन।

किञ्च, चक्षुर्गत्वा संयुज्यार्थं चेत् द्योतयति, तर्हि यथा विप्रकृष्टस्यादित्यादेर्संयुक्तसमवायाद् रूपं द्योतयति, एवं कर्मापि द्योतयेत् । संयुक्तवसमवायाविशेषात् । कथं च एवं वादिनः काचाभ्रपटल-स्वच्छोदकस्फटिकाद्यन्तरितार्थनामुपलम्भः स्यात्, चक्षुषः तत्र गच्छतः काचाद्यवयविना प्रतिबन्धात् ।

**अथ** काचादिकं भित्त्वा चक्षुरश्मयोऽर्थदेशं गच्छन्ति, तर्हि तद्व्यवहितार्थोपलम्भसमये काचादेरनुपलम्भः तदाधेयद्रव्यस्य पातश्च स्यात्, तदाधारस्य नाशात् । न चैवं । युगपत् तयोः निरन्तरं समुपलम्भात् । **एतेन 'शाखाचन्द्रमसोः क्रमेणानुभवेऽपि आशुवृत्त्योत्पल पत्रशतव्यतिभेदवद् युगपत्प्रतिपत्त्यभिमानो भ्रान्तिनिबंधन'** इति **प्रत्याख्यातम्**।

**यच्चान्यदुक्तम् 'शरीरापेक्षया चक्षुर्विषयस्य सन्निकृष्ट विप्रकृष्टतोपपत्तेः' इति** तदपि श्रद्धामात्रम्, इन्द्रियसन्निकर्षेणास्य प्रतिपत्तौ तथा तद्व्यवहारानुपपत्तेः । तथाहि-यदिन्द्रियसन्निकर्षेण प्रतीयते, न तत्र दूरनिकटादिव्यवहारः, यथा रसादौ, इन्द्रियसन्निकर्षेण प्रतीयते च चक्षुर्विषय इति ।

प्राप्यकारित्वे च चक्षुषः संशयविपर्ययानुपपत्तिः । सामान्यवद् विशेषाणामपि सन्निकृष्टा-नामुपलम्भसम्भवात् । विशेषानुपलब्धिनिमित्तो हि संशयो विपर्ययश्चेतिन प्राप्यकारित्वं चक्षुषो घटते। **नचाप्राप्यकारित्वे** सकलार्थप्रकाशकत्व**प्रसङ्गः**, योग्यदेशापेक्षणाद्, अयस्कान्तवत् । न ह्यस्कान्तोऽयसोऽप्राप्तस्याकर्षणे प्रवर्तमानः सर्वस्यायसस्तथाविधस्याकर्षणे अपि तु योग्यदेश-स्थस्यैव । भवतोऽपि चक्षू रश्मयो लोकान्तं गत्वा किमिति रूपं नप्रकाशयन्ति । चक्षुर्वा संयुक्त-समवायाद् यथा रूपं प्रकाशयति तथा गन्धादिकमपि किमिति न प्रकाशयेत्, तत्रापि तस्याविशेषादिति चोद्ये योग्यतैव शरण्यम् ।

यदपि '**कारकत्वादि**'त्युक्तं तदपि मनसाऽयस्कान्ताञ्जनतिलकमन्त्रादिना चानैकान्तिकम्, तस्य कारकत्वेऽप्यप्राप्यकारित्वात् । इति सिद्धं चक्षुषोऽप्राप्यकारित्वमिति ।

● ● ●



"सन्दर्भग्रन्थाः"

## विभाग-१

### मध्यम स्याद्वादरहस्य –

चक्षुषोऽप्राप्यकारित्वमेव न सहामहे इति चेत् ? शृणु ।

**प्रसंगसंगतमथ प्रथमानातिशुद्धधीः । चक्षुरप्राप्यकारित्वं ब्रूते न्यायविशारदः ॥**

तथाहि चक्षुषः प्राप्यकारित्वं तावद् व्यवहितार्थाप्रकाशत्वान्यथानुपपत्त्या परैः परिकल्प्यते– तदयुक्तम्, चक्षुः संयोगस्यापि परमाण्वाकाशादौ सत्त्वाद् व्यभिचारेण चाक्षुषं प्रति हेतुत्वायोगात् । महत्त्वसमानाधिकरणोद्भूतरूपस्यापि तत्र सहकारित्वान्नायं दोष इति **चेत्,** न, उद्भूतरूपस्याप्य-वच्छेदकत्वसम्भवेन विनिगमनाविरहात् । **अथ** पाकेन रूपनाशक्षणेऽपि घटादिचाक्षुषोत्पत्तिरेव समानाधिकरण्येनोद्भूतरूपविशिष्टमहत्त्वस्यैव हेतुत्वे विनिगमिकेति **चेत्,** न, तत्र रूपनाशक्षण एव चाक्षुषं न तु तदुत्तरोपजायमानरूपोत्तरमित्यस्य कोशपानप्रत्यायनीयत्वात् । **अथ** महत्त्वोद्भूतरूपयोः पृथगेवास्तु कारणता, महत्त्वजन्यतावच्छेदकं च जन्यद्रव्यसाक्षात्कारत्वमेव, अत एवात्मसाक्षात्कार एवात्मनि महत्त्वे मानम् ! उद्भूतरूपजन्यतावच्छेदकं च द्रव्यचाक्षुषत्वमेवेति **चेत्,** तथापि चक्षु-र्गोलकपरिकलिताञ्जनाद्यनुपलब्धिः किमधीना योग्यताऽभावाधीनेति चेत्, तर्हि पाटच्चरविलुण्टिते वेश्मनि यामिकजागरणवृत्तान्तानुसारणं, भित्त्याद्यन्तरितानुपलब्धेरपि योग्यत्वाभावेनैवोपपत्तौ चक्षुः-प्राप्यकारित्वपथिकस्य दूरप्रोषितत्वात् ।

**स्यादेतत्** भित्त्यादिव्यवहितार्थस्य न स्वरूपायोग्यत्वं, कालान्तरे तस्यैवोपलम्भदर्शनात् किन्तु भित्त्यादेश्चक्षुःप्राप्तिविघातकतया विरोधित्वादेव न तदन्तरितार्थग्रहणमिति, **मैवं,** भित्त्यादिव्यवहित-स्यापि योगिना चक्षुषा ग्रहात्, सूक्ष्मव्यवहितार्थज्ञाने ज्ञानावरणकर्मविपाकोदयविशेष एव हि प्रतिबन्धको वाच्यस्तदभाव एव च योग्यतात्मनिष्ठा सूक्ष्मव्यवहितार्थज्ञानजननीति गीयते । **ननु** स्फटिकाद्यन्तरितोपलब्धौ तादृशयोग्यताऽभावाद्व्यभिचार इति **चेत्,** न, स्फटिकाद्यन्तरितो-पयोगस्योत्तेजकत्वात्, उपयोगश्चोपलिप्सोराभोगकरणम् इति **विशेषावश्यकवृत्तौ,** व्यवहितत्वं च स्वाभिमुखपराङ्मुखत्वादिकम्, अस्तु वा विशिष्यैव प्रतिबध्यप्रतिबन्धकभावस्तथाऽपि परेषामनन्तचक्षुःसंयोगेषु तत्तद्देशानां तत्तत्क्रियाणां च कारणत्वकल्पनापेक्षया लाघवमेव । **यत्तु**

संयोगेन चक्षुषश्चाक्षुषं प्रति हेतुत्वे प्रागुक्तकारणत्वकल्पनागौरवं फलमुखत्वान्न दोषायेति,—**तन्न**; **संयोगादिप्रत्यासत्तीनामननुगमेन** ताभिस्तस्य चाक्षुषं प्रत्यकारणत्वात्, सम्बन्धाननुगमस्यापि स्वघटितव्याप्तिघटितकारणता भेदकतया दोषत्वात् कालिकेनैव चक्षुषश्चाक्षुषं प्रति हेतुत्वस्य तवाप्यवश्यमभ्युपगन्तव्यत्वात्, स्वप्राचीस्थपुरुषसाक्षात्कारे स्वप्रतीचीवृत्त्यन्यूनपरिणामकाऽतिस्वच्छ-भिन्नस्वप्रतीचीवृत्तित्वसम्बन्धेन सत्त्वेनास्तु भित्त्यादीनां प्रतिबन्धकता, प्रतिबन्धकतावच्छेदक-सम्बन्धाननुगमश्च न दोषाय, तावत् सम्बन्धपर्याप्तप्रतियोगितावच्छेदकताकविलक्षणाभावस्य कारणत्वस्वीकारात् । तथा च न चक्षुरप्राप्यकारित्वेऽपि भित्त्यादिव्यवहितोपलब्धिप्रसङ्ग इति **कश्चित्**तदसत्, तेन सम्बन्धेन द्रव्यत्वमूर्तत्वादिना प्रतिबन्धकत्वे विनिगमकाभावाद् व्यवहितेऽपि योगिचाक्षुषानुरोधेन योग्यताया अवश्याश्रयणीयत्वाच्च ।

**योग्या चेद्योग्यता वः सपदि जनयितुं ज्ञानमक्ष्णोऽनपेक्षः,**
**कस्मादस्मास्माकस्मिक इव न तदा हन्त वस्तूपलम्भः;**
**आयासं कः प्रकुर्यादणुमणिविभाभूषिते भूमिभागे,**
**प्रद्योतार्थी प्रदीपं प्रकटयितुमलं तैलसंपूरणादौ ॥ १ ॥**

**योग्यता वस्तुनो बोधे स्मृता प्रतिनियामिका ।**
**उपधानं पुनस्तस्य चक्षुरुन्मीलनादिना ॥ २ ॥**

**कालिकेन नयनं यदि हेतुर्मीलिताक्ष्णि न हि पुंसि कुतो धीः ।**
**इत्थमालपति वेद न यौगस्त्वाभिमुख्यमिह चेत्थममुष्य ॥ ३ ॥**

**यदाभिमुख्यं किल नोपकारकं प्रक्लृप्तसंयोगनियामकं धियः ।**
**इहास्मि नास्मिन्नियमे स्पृहावहः कृतान्तकोपस्तु तवैव केवलम् ॥ ४ ॥**

**यत्र यत्र परिसर्पति चक्षुस्तत्र तत्र किल वेदनजन्म ।**
**गौतमीयसमये तदिदानीं प्राप्यकारिणि न चक्षुषि साक्षि ॥ ५ ॥**

**यत्तु** स्फटिकादिकं भित्त्वा नयनरश्मिप्रसरणं प्रत्यभिज्ञाभिज्ञानां दुरभ्युपगममिति, **तत्तु** विकट-कपाटसंपुटसंघटितमपवरकमुपभिद्य प्रसृमरमृगमदपरिमलाभ्युपगमसमसंमाधानमिति **केचित्** । वस्तुतो नयनस्य तैजसत्वासिद्ध्या तद्रश्मय एव न सम्भवन्ति । **न च** चक्षुस्तैजसं द्रव्यत्वे सति रूपादिषु मध्ये रूपस्यैवाभिव्यञ्जकत्वादित्यनुमानाच्चक्षुषस्तैजसत्वसिद्धिः । न चाञ्जनेन व्यभिचार-स्तस्य चाक्षुषप्रयोजकत्वेऽपि तदजनकत्वादिति **वाच्यम्** । अप्रयोजकत्वात् । **नैयायिकैकदेशिनस्तु** इन्द्रियत्वं पृथिव्याद्यवृत्तिर्जन्यसाक्षात्कारत्वावच्छिन्नजनकतावच्छेदको जातिविशेष इत्याहुः **नेत्यन्ये**,

इन्द्रियत्वेन साक्षात्कारं प्रतिहेतुत्वे चक्षुः संयोगेनान्धकारस्थघटादिसाक्षात्कारापत्तेः, एवं सति चक्षुषो रश्म्यप्रसिद्ध्या प्राप्यकारित्वमपि दुरुपपादम् । **ननु** किञ्चिदवच्छेदेन तमःप्रच्छन्नेऽपि भित्त्यादौ यदवच्छेदेन चक्षुःसंयोगस्तदवच्छेदेनालोकसंयोगादेव चाक्षुषदर्शनाच्चक्षुषः प्राप्यकारित्वं सेत्स्यतीति **चेत्**, एतन्निपुणतरम**न्धकारवादे** प्रतिविधास्यामः । एवं च शाखाभिमुखेन चक्षुषा विटपिनो मूलावच्छिन्नसंयोगग्रहाभावादव्याप्यवृत्तिचाक्षुषं प्रति चक्षुः संयोगावच्छेदकाविच्छिन्नसमवाय-सम्बन्धावच्छिन्नाधारतायाः सन्निकर्षत्वस्यावश्यकल्पनीयतयाचक्षुषः प्राप्यकारित्वमायास्यती**त्यपि प्रतिविधातव्यप्रायं वेदितव्यं**, तदानीं चक्षुरभिमुखदेशविष्वग्भावाभावादेव संयोगादिचाक्षुषानुदयात्, **'रूवं पुण पासई अपुट्ठं तु'** (आ.नि.गा. ५) इत्याद्यागमोप्यत्रार्थे साक्षीति दिग् ।

**॥ बृहत्स्याद्वादरहस्यम् ॥**

वैशद्यवद्ज्ञानं प्रति योग्यताविशेषस्य हेतुत्वाच्चक्षुषोऽप्राप्यकारित्वात्, अथ चक्षुषोऽप्राप्य-कारित्वमेव न क्षमिति चेत् शृणु;-

**प्रसङ्गसङ्गतमथ प्रथमानविशुद्धधीः । चक्षुरप्राप्यकारित्वं ब्रूते न्यायविशारदः ॥१॥**

तथा हि-जन्यसाक्षात्कारत्वावच्छिन्नं प्रतीन्द्रियसम्बन्धत्वेन तावन्न हेतुता इन्द्रिय-सम्बन्धत्वस्यैकस्यासम्भवात् ।

**एतेन** चाक्षुषत्वावच्छिन्नं प्रति चक्षुःसम्बन्धत्वेन हेतुताऽपि **परास्ता** ।

**अथ** द्रव्यचाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुःसंयोगत्वादिना विशिष्यैव हेतुता । तदुक्तं **मणिकृता** प्रत्यक्षविशेषे इन्द्रियार्थसन्निकर्षविशेषो हेतुरनुगत एवेति इति **चेत्-न,** चक्षुःसंयोगस्यापि परमाण्वाकाशादौ व्यभिचारेण चाक्षुषं प्रति हेतुत्वायोगात् महत्त्वसमानाधिकरणोद्भूतरूपस्यापि तत्र सहकारित्वात्, नायं दोष इति **चेत्, न,** उद्भूतरूपसमानाधिकरणमहत्त्वत्वेन सहकारित्वेऽपि विनिगमकाभावात् ।

**अथ** पाकेन रूपनाशक्षणेऽपि घटादिचाक्षुषोत्पत्तिरेवोद्भूतरूपविशिष्टमहत्त्वस्यैव द्रव्य-चाक्षुषहेतुत्वे विनिगमिकेति **चेत्-न,** तत्र रूपनाशक्षण एव चाक्षुषं न तु तदुत्तरोपजायमानरूपोत्तरम् इत्यस्य कोशपानप्रत्यायनीयत्वात् । **अथ** महत्त्वोद्भुतरूपयोः पृथगेवास्तु कारणता, महत्त्वजन्यता-वच्छेदकं च जन्यद्रव्यसाक्षात्कारत्वम्, अत एवात्मसाक्षात्कार एवात्मनि महत्त्वे मानम् । उद्भूतरूपजन्यतावच्छेदकं च द्रव्यचाक्षुषत्वमिति **चेत्,** तथापि चक्षुर्गोलकपरिकलिताञ्जनाद्यप्रत्यक्षं किमधीनम् ! योग्यताऽभावाधीनमिति **चेत्,** तर्हि पाटच्चरविलुण्टिते वेश्मनि यामिकजागरण-वृत्तान्तानुसारणम्, भित्त्याद्यन्तरिताप्रत्यक्षस्यापि योग्यताविरहेणैवोपपत्तौ व्यवहितार्थाप्रकाशकत्वा-न्यथानुपपत्त्या चक्षुःप्राप्यकारित्वसाधनमनोरथस्य दूरप्रोषितत्वात् ।

**स्यादेतत्**-भित्त्यादिव्यवहितार्थस्य न स्वरूपायोग्यत्वं, कालान्तरे तस्यैव प्रत्यक्षसम्भवात् । किन्तु भित्त्यादेश्चक्षुःप्राप्तिविघातकतया विरोधित्वादेव न तदन्तरितार्थग्रहणम् । एवमतिसान्निध्यस्यापि दूरत्ववद्दोषत्वेन प्रतिबन्धकत्वात् न नयनाञ्जनादिलौकिकचाक्षुषम् । **यत्तु** विजातीयचक्षुःसंयोगत्वेन हेतुत्वादेव न दूरस्थलौकिकचाक्षुषम्, इति,-**तन्न**, सति विशेषदर्शनादौ, दूरस्थस्यापि लौकिकचाक्षुषदर्शनात् । **मैवम्**; अननुगततत्तद्दोषाणां तत्तत्प्रत्यक्षप्रतिबन्धकत्वकल्पनापेक्षया सामान्यतः सूक्ष्मव्यवहितार्थप्रत्यक्षे ज्ञानावरणकर्मविपाकोदयविशेषस्यैव प्रतिबन्धकत्वकल्पनौचित्यात्; वस्तुतश्चक्षुषः प्राप्यकारित्वे शाखाचन्द्रमसोर्युगपद्ग्रहणानुपपत्तिः । **अथ** क्रमिकत्वमेव तद्ज्ञानयोः, यौगपद्यप्रत्ययस्य शतपत्रशतपत्रीवेधव्यतिकरेण भ्रमत्वादिति **चेत् न**; तथा सति ततः साक्षात्करोमीत्यनुव्यवसायस्य तयोरनुपपत्तेः । तदनुव्यवसायसमये शाखाज्ञानस्य नष्टत्वात् । **न च** शाखाचन्द्रयोः क्रमिकज्ञानाहितसंस्काराभ्यां जनितायां समूहालम्बनस्मृतावेवानुभवत्वारोपात्तथानुव्यवसायो यथा पञ्चावधानस्थले इति **वाच्यम्**, उपेक्षात्मक तद्ज्ञानतस्तादृशस्मृत्यसम्भवात् । तव लौकिकसन्निकर्षजन्यज्ञानस्यैव विषयतया 'साक्षात्करोमि इत्यनुव्यवसायजनकत्वाच्च । **यत्तु**-स्फटिकादिकमुपभिद्य नयनरश्मिप्रसरणं प्रत्यभिज्ञानां दुरभ्युपगमम् इति । **तत्तु**-विकटकपाटसम्पुटसङ्घटितमपवरकमुपभिद्य मृगमदसन्दोहसमागमसमसमाधानम्, इति **कश्चित्** ।'

वस्तुतो मृगमदसंसर्गारब्धसुगन्धिद्रव्याण्येव बहिरनुभूयन्ते । अन्यथा बंहीयसा कालेन बंहीयसा वायुना तदवयवानां भूयसामपगमे तद्गुरुत्वप्रच्यवापातात् । तथा च स्फटिकादिनाऽपि प्रतिबन्धात् नयनरश्मीनां कथं बहिर्निर्गमः! अत एव काचकूपिकादितस्तच्छायद्रव्यान्तरारम्भोऽपि तत्र तत्र व्यावर्णितः ।

अपि च नयनस्य तैजसत्वाऽसिद्ध्या तद्रश्मय एव कुतस्त्याः ! **न च** चक्षुः तैजसम् रूपादिषु रूपस्यैवाभिव्यञ्जकत्वादालोकवत्, इत्यनुमानात् चक्षुषस्तैजसत्वसिद्धिः । **न चा**ञ्जनेनव्यभिचारस्तस्य चाक्षुषप्रयोजकत्वेऽपि तदजनकत्वादिति **वाच्यम्**; अप्रयोजकत्वात् । अनुद्भूतरूपानुद्भूतस्पर्शतेजोन्तरकल्पने गौरवाच्च । अत एवेन्द्रियत्वं जन्यसाक्षात्कारत्वावच्छिन्नजनकतावच्छेदकः पृथिव्याद्यवृत्तिरेव जातिविशेष इति **यौगैकदेशिनः** । तेषामपि चक्षुःसंयोगत्वेन हेतुतासिद्ध्यैव चक्षुः प्राप्यकारित्वसाधनाभिकाङ्क्षा सम्पूर्येत, सैव तु नास्त्यत्र, 'तद्धेतोरेवास्तु किं तेन' इति न्यायात्, चक्षुःसंयोगत्वावच्छिन्ननियामकादेव चाक्षुषदेशविषयप्रतिनियमसम्भवात् ।

**एतेन**-

योग्या चेद्योग्यता वः सपदि जनयितुं ज्ञानमक्ष्णोऽनपेक्षः,
कस्मादस्माकमाकस्मिक इव न तदा हन्त वस्तूपलम्भः ।
आयासं कः प्रकुर्यादनणुमणिविभापूरिते गेहदेशे,
प्रद्योतार्थी प्रदीपं प्रकटयितुमलं तैलसम्पूरणादौ ॥१॥

अपि च

स्वनयननिकटोपटङ्किनोऽर्थः पटु विकसन्ति न जातु तत्प्रतीपाः ।
जगति विचरतीह योग्यतेयं शिव शिव वञ्चनचातुरी धुरीणा ॥२॥

इत्यादि **निरस्तम्** । यतः-

योग्यता वस्तुनो बोधे स्मृता प्रतिनियामिका ।
उपधानं पुनस्तस्य चक्षुरुन्मीलनादिना ॥३॥

यदाभिमुख्यं नियमाय कर्मणो न नाम संयोगनियामकं धियः ।
इहास्मि नास्मिन्नियमे स्पृहावहः, कृतान्तकोपस्तु तवैव केवलम् ॥४॥

यत्र यत्र परिसर्पति चक्षुस्तत्र तत्र किल वेदनजन्म ।
गौतमीयसमये तदिदानीं प्राप्यकारिणि न चक्षुषि साक्षि ॥५॥

अनन्तनयनविषयसंयोगानां तत्तद्देशादिष्वनन्ततज्जनकत्वानां च कल्पनायां महागौरवात् । नयनक्रियाभिमुख्यस्य रूपादावपि सम्भवे बाधकाभावाद् द्रव्यतत्समवेतादिसाधारणचाक्षुषं प्रत्येकहेतुत्वे लाघवाच्च । लोहोपलस्य लोहाकर्षकत्वमिवाप्रत्यासन्नस्यापि चक्षुषश्चाक्षुषजनकत्वमित्यप्याहुः, तेषामपि सम्बन्धविशेषाश्रयणमावश्यकम् । अन्यथाऽतिप्रसङ्गात्

तथाचैवं प्रयुञ्जत नयनं योग्यदेशावस्थिताऽप्राप्तार्थपरिच्छेदकम्, प्राप्तिनिबन्धनानुग्रहोपघातशून्यत्वात्, मनोवदिति, वनस्पतिसूर्यालोकनादिना नयनानुग्रहोपघातोदयात् व्यभिचारवारणाय प्राप्तिनिबन्धनेति विशेषणम् । तदुपघातस्य प्राप्तिनिमित्तकत्वे नयनस्य जलानलसंयोगेन क्लेददाहापत्तेः ।

**अथ** मनसोऽपि घटादिनाऽलौकिकज्ञानादिप्रत्यासत्तिसत्त्वात् साध्यविकलो दृष्टान्त इति **चेत्-न;** संयोगप्रत्यासत्त्यापरिच्छेदकत्वाभावस्यैव सिषाधयिषितत्वात् । **न चा**त्ममानसत्वावच्छिन्नं प्रति संयोगेनैव मनसो हेतुत्वात् न किञ्चिदेतद् इति **वाच्यं;** पूर्वं तदप्राप्यकारित्वं प्रसाध्य दृष्टान्तत्वाभिप्रायात् । एवं च मनस इव चक्षुषस्तत्तदुपयोगसाचिव्यात्तदा तदा तत्तदर्थग्राहकत्वं स्वभावदेवेत्यपि **प्राञ्चः** ।

स्वप्राचीस्थपुरुषसाक्षात्कारे स्वप्रतीचीवृत्तित्वसम्बन्धेन विजातीयद्रव्यत्वेनास्तु भित्त्यादीनां प्रतिबन्धकता, प्रतिबन्धकतावच्छेदकसम्बन्धाननुगमश्च न दोषाय तावत्सम्बन्धपर्याप्तप्रति-योगितावच्छेदकताकविलक्षणाभावस्यैकस्य कारणतास्वीकारात् । तथा च भित्त्यादीनां प्रतिबन्धकत्वादेव न तदन्तरितार्थग्रहणमिति किं योग्यतयेति **कश्चित्,** तन्न, पृथिवीत्वादिना साङ्कर्येण विजातीयद्रव्यत्वेन

तथात्वासम्भवात् । व्यवहितेऽपि योगि चाक्षुषानुरोधेन योग्यताया अवश्याश्रयणीयत्वाच्च । **एतेन** स्फटिकत्वाद्यभावकूटविशिष्टद्रव्यत्वेनोक्तसम्बन्धेनास्तु प्रतिबन्धकत्वम् इत्यप्यपा**स्तम्** ।

**ननु** किञ्चिदवच्छेदेन तमः प्रच्छन्नेऽपि भित्त्यादौ यदवच्छेदेन चक्षुःसंयोगः, तदवच्छेदेनालोकसंयोगादेव चाक्षुषदर्शनाच्चक्षुषः प्राप्यकारित्वं सेत्स्यति, इति **चेत्**,–एतन्निपुणतरम**न्धकारवादे** प्रतिविधास्यामः । एवं च-शाखाभिमुखेन चक्षुषा विटपिनो मूलावच्छिन्नसंयोगग्रहाभावादव्याप्यवृत्तिचाक्षुषं प्रति चक्षुः संयोगावच्छेदकावच्छिन्नसमवायसम्बन्धावच्छिन्नाधारतायाः सन्निकर्षत्वस्यावश्यकल्पनीयतया चक्षुषः प्राप्यकारित्वमायास्यति, इत्यपि प्रतिविधेयप्रायमवधेयम् । तदानीं चक्षुरभिमुखदेशाविष्वग्भावाभावादेव संयोगादिचाक्षुषानुदयात् ।

**केचित्तु**-चक्षुषः प्राप्यकारित्वे पृथुतरग्रहणानुपपत्तिः, न ह्यणुना चक्षुषा पृथुतरद्रव्यसंयोगः सम्भवीत्याहुः । **'रूवं पुण पासई अपुट्ठं'** इत्याद्यागमोऽप्यत्रार्थे साक्षी, इति दिग् । इति चक्षुः अप्राप्यकारिताव्यवस्थापनं प्रासङ्गिकम् ।

**॥ सविवरणम् श्रीज्ञानार्णवप्रकरणम् ॥**

दृष्टान्तेन तावच्चक्षुषोऽप्राप्यकारित्वं व्यवस्थापयति–

**अप्राप्यकार्यधिष्ठाना-सम्बद्धग्राहि लोचनम् ॥**
**अनुग्रहोपघाताभ्यां, विषयाद् भाव्यमन्यथा ॥१६॥७४॥**

[वि] चक्षुरप्राप्यकारि अधिष्ठानासम्बद्धार्थग्राहकेन्द्रियत्वाद्, मनोवद्, अधिष्ठानेत्यादिविशेषणेन स्पर्शनादाविन्द्रियपददानेन च प्रदीपप्रभायां व्यभिचारः परिहृतः, **न चा**प्रयोजकत्वं सम्बद्धार्थग्राहकत्वे तस्य करवालजलावलोकनादिनोपघातानुग्रहप्रसङ्गात्, **न चा**सिद्ध एव तस्योपघातानुग्रहाभावो भूयो भूयः सूरकरावलोकनेन जलावलोकनेन च दाहशैत्यलक्षणतद्दर्शनादिति **वाच्यम्,** अवलोकनानन्तरं चक्षुर्देशं प्राप्तेन मूर्तेन रविकरादिनोपघातस्य सम्भवाज्जलावलोकनादौ चोपघाताभावेनानुग्रहाभिमानात् स्वतस्तद्देशं प्राप्तेन च चन्द्रमरीचिनीलादिनाऽनुग्रहोऽपि भवत्येव, यदि च चक्षुः स्वत एवानुग्राहकोपघातवस्तुनी संसृज्यानुग्रहोपघातौ लभेत तर्हि सूरकरावलोकनादिव करवालावलोकनादप्यभिघातः स्यात्, तदिदमाह–

**"लोअणमपत्तविसयं, मणोव्व जमणुग्गहाइसुन्नं ति ॥**
**जलसूरालोआइसु, दीसंति अणुग्गहविघाया ॥२०९॥**

**डज्झेज्ज पाविउं रवि-कराइणा फरिसणं व को दोसो ॥**
**मन्नेज्ज अणुग्गहं पि व उ वघायाभावओ सोम्म ! ॥२१०॥**

**गंतुं ण रूवदेसं, पासइ पत्तं सयं व णियमोयं ॥**
**पत्तेण उ मुत्तिमया, उवघायाणुग्गहा होज्जा ॥२११॥" (विशेषा भा)**

**लोचनमप्राप्तविषयं, मन इव यदनुग्रहादिशून्यमिति ।**
**जलसूरालोकादिषु दृश्येते अनुग्रहविघातौ ॥**

**दह्येत प्राप्य रविकरादिना स्पर्शनमिव को दोषः ।**
**मन्येतानुग्रहमिवोपघाताभावतः सौम्य ! ॥**

**गत्वा न रूपदेशं, पश्यति प्राप्तं स्वयं वा नियमोऽयम् ॥**
**प्राप्तेन तु मूर्तिमतोपघातानुग्रहौ भवेताम् ॥१६॥**

**ननु** नयनान्नायना रश्मयो निर्गत्य प्राप्य च वस्तु रविरश्मय इव प्रकाशमादधति सूक्ष्मत्वेन तैजसत्वेन च तेषां वह्न्यादिभिर्दाहादयो न भविष्यन्तीति **चेत्, न,** चक्षुषस्तैजसत्वस्यैवासिद्धेः, तथाहि–

**अदृष्टकल्पनापत्तिस्तैजसत्वे हि चक्षुषः ॥**
**न च तत्साधकं किञ्चिद्-बलवन्मानमीक्ष्यते ॥१७॥७५॥**

[वि.] चक्षुषस्तैजसत्वकल्पनेऽनुद्भूतरूपानुद्भूतस्पर्शतेजोन्तरं कल्पनीयमित्यदृष्टकल्पनापत्तिः परमते, न च तत्तैजसत्वसाधकं किञ्चिद्बलवत्प्रमाणमीक्षामहे । **न च** चक्षुस्तैजसं रूपादिषु मध्ये रूपस्यैवाभिव्यञ्जकत्वात्प्रदीपवदित्यनुमानात्तत्सिद्धिः, स्वस्पर्शव्यञ्जकत्वेन प्रदीपदृष्टान्तस्य साधन-वैकल्याद्विषयेन्द्रियसंयोगेनानैकान्तिकत्वाद्, द्रव्यत्वे सतीति विशेषणेऽप्यञ्जनविशेषेणानैकान्ति-कत्वाच्च ।

**एतेन** "रूपसाक्षात्कारासाधारणकारणं तैजसं रसाव्यञ्जकत्वे सति स्फटिकाद्यन्तरित-प्रकाशत्वात्प्रदीपवद्" इत्यपि **निरस्तम्** । अञ्जनादिभिन्नत्वे सतीति विशेषणदाने चाप्रयोज-कत्वाच्चक्षुःप्रदीपयोरेकया जात्या व्यञ्जकत्वासिद्धेः ।

**एतेन** "स्वप्नादिकमिवाञ्जनादिकं सहकृत्य मनसैव साक्षात्कृते निध्यादौ चाक्षुषत्वभ्रम एवैत्युक्तावपि **न क्षतिः** । किं चैवं तवाऽञ्जनादेः पृथक्प्रमाणत्वापत्तिः, मनो यदसाधारणं सहकार्य्यासाद्य बहिर्गोचरां प्रमां जनयति तस्य प्रमाणान्तरत्वनियमात् । **न च** पटपटलाच्छन्नचक्षुषामञ्जनादिजनितो निध्यादिसाक्षात्कारो न प्रमेत्युक्तिर्**युक्तिसहा**, यथार्थप्रवृत्ति-जनकत्वेन तत्प्रमात्वस्य व्यवस्थितत्वात् । **न च** कारणबाधाद**प्रमात्वं**, तस्यैवासिद्धेः । **न च** स्वप्नादिवदञ्जनादेर्निध्यादिसूचकत्वमेवेति युक्तं व्याप्तिग्रहादिकं विनाऽनुमितिरूपतत्सूचनाऽसम्भवात्, स्वप्नादिस्थले तु व्याप्तिग्राहकस्वप्नशास्त्राद्यनुसरणनियमादिति दिग् ।

**ननु** चक्षुर्यदि न प्राप्यकारि तदाऽसन्निहितत्वाऽ(विशेषात्कुड्यादिव्यवहित-स्यापि ग्रहणप्रसङ्ग इति **चेत्, न,** अतिसन्निहितस्य गोलकादेरिव भित्त्यादिव्यवहितस्यापि योग्यताऽभावादेवाग्रहात् ।) **नन्वग्रावच्छेदेनैव** चक्षुःसंयोगस्य ग्राहकत्वान्न मूलावच्छेदेन तत्संयुक्तगोलकादिग्रहप्रसङ्गः । कुड्यादिव्यवहितानां स्वरूपयोग्यता च स्थैर्यपक्षे न परावर्तते, क्षणिकत्वपक्षेऽप्यप्रत्यासन्नानां सहकारिणां नातिशयजनकत्वं, प्रत्यासत्तिश्च परेषां निरन्तरोत्पादः, अस्माकं तु संयोगः, तदुभयमपि **कृष्णासारस्यार्थेन** न सम्भवतीति **चेत् ? न,** शक्तिप्रत्यासत्त्यैवातिशयाधानाल्लोहाकर्ष-कायस्कान्तादावतिरिक्तप्रत्यासत्त्यदर्शनात्सामीप्यविशेषस्य तत्र सम्बन्धत्वे चात्रापि तेनैवोपपत्तेः ।

युक्तं चैतत्, संयोगादिनानाप्रत्यासत्त्यकल्पनलाघवात्, **न चैवमप्राप्यकारित्वभङ्गः,** चक्षुः-संयोगस्य चाक्षुषाजनकत्वेनैव तदुपपत्तेः ।

वस्तुतः सन्निहितविषयग्रहे व्यवधानाभावकूट एव विषयनिष्ठा योग्यता व्यवहितविषयग्रहे चाञ्जनादिनिष्ठैव शक्तिलक्षणा योग्यता हेतुः, विषयपुरुषादिभेदेन तद्वैचित्र्यात् । अत एवास्मदादीनामा-लोकापेक्षयैव विषयग्रहः पेचकादीनां तु न तथेत्युपपद्यते । इत्थं चाव्यवहितचाक्षुषसाक्षात्कारे चक्षुर्व्यवधानाभावादीनां व्यवहितचाक्षुषे च चक्षुरञ्जनादीनां विलक्षणशक्तिमत्त्वेन हेतुत्वान्न किञ्चिदनुपपन्नम्, भित्त्यादेश्चक्षुःसंयोगप्रतिबन्धकत्वे तु स्फटिकादीनामपि तथात्वप्रसङ्गात्तद्व्यवहिता-नामप्यनुपलब्धिप्रसङ्गः । प्रसादस्वभाववतां स्फटिकादीनां न नायनरश्मिगतिप्रतिबन्धकत्वमिति **चेत्,** तर्हि भित्त्यादीनां चक्षुःप्राप्तिप्रतिबन्धकत्वापेक्षया लाघवाच्चाक्षुषप्रतिबन्धकत्वमेव कल्प्यताम् । स्वप्राचीस्थपुरुषसाक्षात्कारे स्वप्रतीचीवृत्तित्वसम्बन्धेन भित्त्यादीनां तत्त्वसम्भवात् ।

**यदि च** तत्तत्क्रियातत्तदुत्तरदेशादीनामेव संयोगनियामकत्वेनानतिप्रसङ्गाद्भित्त्यादीनां न प्रतिबन्धकत्वमिति **विभाव्यते** तदा 'तद्धेतोः' (तद्धेतोरेव तदस्तु किं तेन) इति न्यायेन लाघवात्त-त्तन्नयनोन्मीलनस्यैव तत्तच्चाक्षुषहेतुत्वमस्तु किमनन्तसंयोगादिकल्पनया ?।

इन्द्रियसम्बन्धत्वेन प्रत्यक्षहेतुत्वकल्पनात्फलमुखं गौरवं न दोषायेति **चेत्, न,** इन्द्रिय-सम्बन्धत्वस्यैकस्याभावेन तथाहेतुताया एवासिद्धेः ।

तथापि द्रव्यचाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुःसंयोगत्वादिना हेतुत्वमनुगतमेव । तदुक्तं **मणिकृता** 'प्रत्यक्षविक्षेषे इन्द्रियार्थसन्निकर्षविशेषो हेतुरनुगत एवेति' इति चेत्, न, परमाण्वाकाशादौ व्यभिचारात् । **न च** महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वस्यापि सहकारित्वान्न दोष इति **वाच्यम्,** समाकलितसकलनेत्रगोलकस्य दूरासन्नतिमिररोगावयविन उपलम्भप्रसङ्गात्,

आह च-"**जइ पत्तं गेण्हेज्ज उ, तग्गयमंजणरओमलाईयं ॥**
**पेच्छेज्ज जं न पासइ, अपत्तकारि तओ चक्खुं ॥२१२॥**" ( ? )

(यदि प्राप्तं गृह्णीयात्तद्गतमञ्जनरजोमलादिकम् ॥ प्रेक्षेत यन्न पश्यति, अप्राप्तकारि ततश्चक्षुः ॥) अत्यन्तासत्त्यभावस्यापि सहकारित्वे चाधिष्ठानसंयुक्ताञ्जनशलाकाया अप्यप्रत्यक्षत्वप्रसङ्गात्, अग्रावच्छेदेन चक्षुःसंयोगस्य हेतुत्वेऽप्युदीचीं प्रति व्यापारितनेत्रस्य काञ्चनाचलोपलम्भप्रसङ्गात्, दूरत्वेन नेत्रगतिप्रतिबन्धे च शशधरस्याप्यनवलोकनप्रसङ्गात् । तदभीषुभिरिव तिग्मकराभीषुभिरपि तदभिवृद्धेश्चाविशेषात्, तिग्मत्वेन तिग्मकररश्मीनां तत्प्रतिघातकत्वे च तदालोकपरिकलितपदार्थमात्राभानप्रसङ्गादिति **रत्नप्रभाचार्यप्रभृतयः** (रत्नाकरावतारिकाद्वितीयपरि० सूत्र ५) । इन्द्रियसम्बन्धत्वेन प्रत्यक्ष-हेतुत्वेऽपि सामीप्यविशेषेण संयोगस्यान्यथासिद्धिरित्यपि युक्तमुत्पश्यामः ।

प्राप्यकारित्वे च चक्षुषः शाखाचन्द्रमसोर्युगपद्ग्रहानुपपत्तिः, युगपदुभयसंयोगाभावात् । **न च** शतपत्रसूचीवेधव्यतिकरेण तत्र यौगपद्याभिमान एव, क्रमेणैव वेगातिशयादुभयसंयोगेनोभयसाक्षात्कारजननादिति **वाच्यम्,** चन्द्रज्ञानानुव्यवसायसमये शाखाज्ञानस्य नष्टत्वेन शाखाचन्द्रौ साक्षात्करोमीत्यनुव्यवसायानुपपत्तेः, **न च** क्रमिकतदुभयानुभवजनितसंस्काराभ्यां जनितायां समूहालम्बनस्मृतावेवानुभवत्वारोपात् तथानुव्यवसाय इति **साम्प्रतम्,** तादृगारोपादिकल्पनायां महागौरवम्। **न च** तिर्यग्भागावस्थितयोः शाखाचन्द्रमसोर्युगपत्संयोग इति **साम्प्रतम्,** सन्निहितव्यवहितयोर्युगपत्संयोगेऽतिप्रसङ्गात् ।

नयनान्निःसरता नायनेन तेजसाऽर्थसंसर्गसमकालमेव बाह्यालोकसहकारेणान्यचक्षुरारम्भाच्छाखाचन्द्रमसोर्युगपद्ग्रह **इत्यपि तुच्छम्,** उद्भूतरूपवत्तेजःसंसर्गेणानुद्भूतरूपवत्तेजस आरम्भानभ्युपगमाद् बाह्यचक्षुषा पृष्ठावस्थितवस्तुग्रहप्रसङ्गाच्चेत्यधिकं मत्कृत**स्याद्वादरहस्यादवसेयम्)** (न्यायालोकादुद्धृतम्)

**॥ न्यायालोकः ॥**

तस्मात् *सम्बन्धविशेषेण विषयनिष्ठस्य प्रत्यक्षप्रतिबन्धकज्ञानावरणाऽपगमस्य शक्तिविशेषस्य वा प्रत्यक्षविषयतानियामकत्वमिति* युक्तमुत्पश्यामः । **एतेन** क्वचिदिन्द्रियसन्निकर्षः क्वचिद्दोषविशेषश्च तन्नियामकः, अन्ततस्तदन्यान्यत्वेन वा तन्नियामकत्वं तत्र ज्ञानभेदनिवेशे गौरवमिति**निरस्तम्** ।

वस्तुतः चक्षुर्मनसोऽप्राप्यकारित्वात् दोषाऽजन्यलौकिकप्रत्यक्षविषयतायामपि नेन्द्रियसन्निकर्षनियामकत्वमिति स्मर्तव्यम् । अप्रयोजकत्वेनैतादृशनियमाऽसिद्धेश्च । अभेदे कथं विषयत्वमिति **चेत्**? यथा घटाभावे घटाभावविशेषणत्वम् ।

'किं तदि'ति **चेत्** ? स्वभावविशेष एव । अनिर्वचनात् तदसिद्धिरिति **चेत् ? न,** माधुर्यादिवत्तस्याऽऽख्यातुमशक्यत्वेऽपि प्रत्याख्यातुमशक्यत्वात् ।

**यत्तु**-स्वव्यवहारशक्तत्वमेव स्वविषयत्वमिति **तन्न**, आत्मन्यतिप्रसङ्गात्, ज्ञानपददाने चेच्छाद्यनुपसङ्ग्रहात्, इच्छादौ परम्परया तत्सत्त्वस्य च ज्ञानादावपि सुवचत्वात्, शक्तेः पदार्थान्तरत्वेनाऽऽत्माश्रयोद्धारेऽपि तस्या अनन्यथा-सिद्धनियतपूर्ववृत्तित्वज्ञानव्यङ्ग्यत्वेनाऽन्योन्याश्रयानुद्धाराच्चेति विभावनीयम्। xx...........xx

तथाहि-चक्षुरप्राप्यकारि, अधिष्ठानाऽसम्बद्धार्थग्राहकेन्द्रियत्वात्, मनोवत् । 'अधिष्ठाने'त्यादिविशेषणेन स्पर्शनादाविन्द्रियपददानेन च प्रदीपप्रभायां व्यभिचारपरिहारः । **न चा**ऽप्रयोजकत्वं, **सम्बद्धार्थग्राहकत्वे** तस्य करवालजलावलोकनादिनोपघातानुग्रहप्रसङ्गात् । **न चा**ऽसिद्ध एव तस्योपघातानुग्रहाऽभावः, मुहुर्मुहुः सूरकरजलावलोकनाभ्यां दाहशैत्यलक्षणतद्दर्शनादिति **वाच्यम्,** अवलोकनानन्तरं चक्षुर्देशं प्राप्तेन मूर्तेन रविकरादिनोपघातसम्भवात्, जलावलोकनादौ चोपघाताभावेनानुग्रहाभिमानात्, स्वतस्तद्देशं प्राप्तेन च चन्द्रमरीचिनीलादिनाऽनुग्रहोऽपि भवत्येव । यदि च चक्षुः स्वतः एवानुग्राहकोपघातकवस्तुनी संसृज्याऽनुग्रहोपघातौ लभेत तर्हि सूरकरावलोकनादिव करवालावलोकनादप्यभिघातः स्यात् । तदिदमुक्तं भाष्यकृता-

**लोअणमपत्तविसयं मणोव्व जमणुग्गहाइसुन्नं ति ।**
**जलसुरालोआईसु दीसंति अणुग्गहविघाया ॥**

**डज्झेज्झ पाविउं रविकराइणा, फरिसणं व को दोसो ?**
**मन्नेज्जणुग्गहं पि व उवघायाभावओ सोम्म ॥**

**गंतुं ण स्ववदेसं पासई पत्तं सयं व णियमोऽयं ।**
**पत्तेण उ मुत्तिमया उवघायाणुग्गहा होज्ज** ॥ (विशेषा.भा.श्लो. २०९-२१०-२११) । **त्ति**

**ननु** नयनान्नायना रश्मयो निर्गत्य प्राप्य च वस्तु रविरश्मय इव प्रकाशमादधति सूक्ष्मत्वेन तैजसत्वेन च तेषां वह्न्यादिभिर्दाहादयो न भविष्यन्तीति **चेत् ? न,** चक्षुषस्तैजसत्वस्यैवाऽसिद्धेः । न च चक्षुः तैजसं, रूपादिषु मध्ये रूपस्यैवाऽभिव्यञ्जकत्वात् प्रदीपवदित्यनुमानात् तत्सिद्धिः, चक्षुर्विषयसंयोगेनाऽनैकान्तिकत्वात् । द्रव्यत्वे सतीति विशेषणेऽप्यञ्जनविशेषेणानैकान्तिकत्वाच्च ।

**एतेन**-'रूपसाक्षात्काराऽसाधारणकारणं तैजसं, रसाऽव्यञ्जकत्वे सति स्फटिकाद्यन्तरितप्रकाशकत्वात्, प्रदीपवत्' इत्यपि **निरस्तम्** । अञ्जनादिभिन्नत्वे सतीति विशेषणदाने चाऽप्रयोजकत्वात् चक्षुःप्रदीपयोरेकया जात्या व्यञ्जकत्वाऽसिद्धेः । एतेन स्वप्नादिकमिवाञ्जनादिकं सहकृत्य मनसैव साक्षात्कृते चाक्षुषत्वभ्रम एव इत्युक्तावपि न क्षतिः ।

वस्तुत एवमञ्जनादेः पृथक्प्रमाणत्वापत्तिः, मनो यदसाधारणं सहकार्यासाद्य बहिर्गोचरां प्रमां जनयति तस्य प्रमाणान्तरत्वनियमात् । **न च** पटपटलाच्छन्नचक्षुषामञ्जनादिजनितो निध्यादि-

साक्षात्कारे न प्रमा इत्युक्तिः **युक्तिसहा**, यथार्थप्रवृत्तिजनकत्वेन तत्प्रमात्वस्य व्यवस्थितत्वात्। न च कारणबाधादप्रमात्वम्, तस्यैवाऽसिद्धेः । **न च** स्वप्नादिवदञ्जनादेर्निध्यादिसूचकत्वमेवेति **युक्तम्**, व्याप्तिग्रहादिकं विनाऽनुमितिरूपतत्सूचनाऽसम्भवात्, स्वप्नादिस्थले तु व्याप्तिग्राहकस्वप्नशास्त्राद्यनुसरणनियमादिति दिग्।

**अथ** चक्षुषोऽप्राप्यकारित्वेऽसन्निहितत्वाऽविशेषात् कुड्यादिव्यवहितस्यापि ग्रहणप्रसङ्ग इति **चेत् ? न,** अतिसन्निहितस्य गोलकादेरिव भित्त्यादिव्यवहितस्यापि योग्यताऽभावादेवाऽग्रहात्।

**नन्वग्रावच्छेदेनैव** चक्षुःसंयोगस्य ग्राहकत्वात् न मूलावच्छेदेन तत्संयुक्तगोलकादिग्रहप्रसङ्गः । कुड्यादिव्यवहितानां स्वरूपयोग्यता च स्थैर्यपक्षे न परावर्तते, क्षणिकत्वपक्षेऽप्यप्रत्यासन्नानां सहकारिणां नातिशयाऽजनकत्वम् । प्रत्यासत्तिश्च परेषां निरन्तरोत्पादः अस्माकं तु संयोगः, तदुभयमपि कृष्णसारस्यार्थेन न सम्भवतीति **चेत् ? न,** शक्ति-प्रत्यासत्त्यैवाऽतिशयाऽऽधानाल्लोहाकर्षकायस्कान्तादावतिरिक्तप्रत्यासत्त्यदर्शनात् सामीप्यविशेषस्य तत्र सम्बन्धत्वे चात्राऽपि तेनैवोपपत्तेः।

युक्तश्चैतत्, संयोगादिनानाप्रत्यासत्त्यकल्पनलाघवात् । **न चैवमप्राप्यकारित्वभङ्गः,** चक्षुःसंयोगस्य चाक्षुषाऽजनकत्वेनैव तदुपपत्तेः वस्तुतः सन्निहितविषयग्रहे व्यवधानाभावकूट एव विषयनिष्ठा योग्यता व्यवहितविषयग्रहे चाऽञ्जनादिनिष्ठैव शक्तिलक्षणा योग्यता, हेतु-विषय-पुरुषादिभेदेन तद्वैचित्र्यात्। अत एवाऽस्मदादीनामालोकापेक्षयैव विषयग्रहः पेचकादीनां तु न तथेत्युपपद्यते।

इत्थञ्चाऽव्यवहितचाक्षुषसाक्षात्कारे चक्षुर्व्यवधानाभावादीनां व्यवहितचाक्षुषे चक्षुरञ्जनादीनां विलक्षणशक्तिमत्त्वेन हेतुत्वान्न किञ्चिदनुपपन्नम्।

भित्त्यादेश्चक्षुःसंयोगप्रतिबन्धकत्वे तु स्फटिकादीनामपि तथात्वप्रसङ्गात् तद्व्यवहितानामप्यनुपलब्धिप्रसङ्गः। प्रसादस्वभाववतां स्फटिकादीनां न नायनरश्मिगतिप्रतिबन्धकत्वमिति **चेत्** ? तर्हि भित्त्यादीनां चक्षुःप्राप्तिप्रतिबन्धकत्वापेक्षया लाघवात् चाक्षुषप्रतिबन्धकत्वमेव कल्प्यताम्, स्वप्राचीस्थपुरुषसाक्षात्कारे स्वप्रतीचीवृत्तित्वसम्बन्धेन भित्त्यादीनां तत्त्वसम्भवात्।

यदि च तत्तत्क्रियातत्तदुत्तरदेशादीनाममेव संयोगनियामकत्वेनाऽनतिप्रसङ्गात् भित्त्यादीनां न प्रतिबन्धकत्वमिति विभाव्यते, तदा तद्धेतोरिति न्यायेन लाघवात् तत्तन्नयनोन्मीलनस्यैव तत्तच्चाक्षुषहेतुत्वमस्तु, किमनन्तसंयोगादिकल्पनया।

'इन्द्रियसम्बन्धत्वेन प्रत्यक्षहेतुत्वकल्पनात् फलमुखं गौरवं न दोषाय' इति चेत् ? न, इन्द्रियसम्बन्धत्वस्यैकस्याभावेन तथाहेतुताया एवाऽसिद्धेः।

तथापि द्रव्यचाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुःसंयोगत्वादिना हेतुत्वमनुगतमेव, तदुक्तं **मणिकृता-प्रत्यक्षविशेषे इन्द्रियार्थसन्निकर्षविशेषो हेतुरनुगत एवेति**-(त.चिं.प्र.ख.) इति **चेत् ? न,** परमाण्वाकाशादौ व्यभिचारात् । **न च** महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वस्यापि सहकारित्वात् न दोष इति **वाच्यम्,** समाकलितसकलनेत्रगोलकस्य दूरासन्नतिमिररोगावयविन उपलम्भप्रसङ्गात् । अत्यन्ताऽऽसत्त्यभावस्यापि सहकारित्वे चाधिष्ठानसंयुक्ताञ्जनशलाकाया अप्यप्रत्यक्षत्वप्रसङ्गात् ।

अग्रावच्छेदेन चक्षुःसंयोगस्य हेतुत्वेऽप्युदीचीं प्रति व्यापारितनेत्रस्य काञ्चनोचलोपलम्भप्रसङ्गात्, दूरत्वेन नेत्रगतिप्रतिबन्धकत्वे च शशधरस्याऽप्यनवलोकनप्रसङ्गात्, तदभीषुभिरिव तिग्मकराभीषु-भिरपि तदभिवृद्धेश्चाऽविशेषात्, तिग्मत्वेन तिग्मकररश्मीनां तत्प्रतिघातकत्वे च तदालोकपरिकलित-पदार्थमात्राऽभानप्रसङ्गादिति **रत्नप्रभाचार्य**प्रभृतयः ।

इन्द्रियसम्बन्धत्वेन प्रत्यक्षहेतुत्वेऽपि सामीप्यविशेषेण संयोगस्याऽन्यथासिद्धिरित्यपि युक्त-मुत्पश्यामः ।

प्राप्यकारित्वे च चक्षुषः शाखाचन्द्रमसोर्युगपद्ग्रहणानुपपत्तिः, युगपदुभयसंयोगाभावात् । **न च** शतपत्रसूचीवेधव्यतिकरेण तत्र यौगपद्याभिमान एव, क्रमेणैव वेगातिशयादुभयसंयोगेनोभय-साक्षात्कारजननादिति **वाच्यम्,** चन्द्रज्ञानानुव्यवसायसमये शाखाज्ञानस्य नष्टत्वेन 'शाखा-चन्द्रौ साक्षात्करोमी'त्यनुव्यवसायानुपपत्तेः । **न च** क्रमिकतदुभयानुभवजनितसंस्काराभ्यां जनितायां समूहालम्बनस्मृतावेवानुभवत्वारोपात् तथानुव्यवसाय इति **साम्प्रतम्,** तादृगारोपादिकल्पनायां महागौरवात् । **न च** तिर्यग्भागापस्थितयोः शाखाचन्द्रमसोर्युगपत्संयोग इति **साम्प्रतम्,** सन्निहित-व्यवहितयोर्युगपत्संयोगेऽतिप्रसङ्गात् ।

"नयनान्निःसरता नायनेन तेजसाऽर्थसंसर्गसमकालमेव बाह्यालोकसहकारेणान्यचक्षुरारम्भाच्छा-खाचन्द्रमसोर्युगपद्ग्रहः" इत्यपि तुच्छम्, उद्भूतरूपवत्तेजःसंसर्गेणाऽनुद्भूतरूपवत्तेजस आरम्भान-भ्युपगमाद् बाह्यचक्षुषा पृष्ठावस्थितवस्तुग्रहप्रसङ्गाच्चेत्यधिकं मत्कृत**ज्ञानार्णव-स्याद्वादरहस्य-योर**वसेयम् ।

## स्याद्वादकल्पलता

चक्षुर्न प्राप्यकारि, अधिष्ठानाऽसंबद्धार्थग्राहकेन्द्रियत्वात्, मनोवत् । **न** **चा**प्रयोजकत्वम् संबद्धार्थग्राहकत्वे तस्य वहि्नजलावलोकनादिना दाहक्लेदादिप्रसङ्गात्, अधिष्ठानाच्चक्षुषो विभागे-ऽन्धत्वप्रसङ्गाच्च । **अथ** नयनाद् नायना रश्मय एव निर्गत्य प्राप्यं च वस्तु रविरश्मय इव प्रकाशमादधति, सूक्ष्मत्वेन तैजसत्वेन च तेषां वहन्यादिभिर्दाहादयो न भविष्यन्तीति **चेत् ? न,** **चक्षुषस्तैजसत्वस्यैवासिद्धेः** । **न च** 'चक्षुस्तैजसम्, रूपादिषु मध्ये रूपस्यैवाभिव्यञ्जकत्वात्,

प्रदीपवत्' इत्यनुमानात् तत्सिद्धिः, चक्षुःविषयसंयोगेनानैकान्तिकत्वात्, 'द्रव्यत्वे सति' इति विशेषणेऽप्यञ्जनविशेषेणानैकान्तिकत्वाच्च । **एतेन** 'रूपसाक्षात्काराऽसाधारणकारणं तैजसम्, रसाऽव्यञ्जकत्वे सति स्फटिकाद्यन्तरितप्रकाशकत्वात्, प्रदीपवत्' इत्यपि **निरस्तम्** 'अञ्जनादिभिन्नत्वे सति' इति विशेषणदाने चाऽप्रयोजकत्वात्, अञ्जनादिवच्चक्षुषोऽतैजसत्वेऽप्यक्षतेः, चक्षुः प्रदीपयोरेकया जात्या व्यञ्जकत्वाऽसिद्धेश्च ।

**अथ** चक्षुषोऽप्राप्यकारित्वे कुड्यादिव्यवहितस्यापि ग्रहणं स्यात्, असंनिहितत्वाऽविशेषात्, योग्यता च स्थैर्यपक्षे न परावर्तत इति **चेत्** ? हन्त ! एवं तवापि कथं नायं दोषः ! स्फटिकादिव्यवहितग्रहणेऽप्यतिप्रसंगस्य दुर्निवारत्वात्, स्फटिकादिकं निर्भिद्य विषयदेशं यावद् नायनरश्मीनां गमने च तूलपटलादेस्तैः सुतरां सुभेदत्वात्, तूलपटलाद्यन्तरितस्याप्युपलम्लप्रसङ्गात् । यत् पुनरु**दयनेनोक्तम्**—'स्फटिकाद्यन्तरितोपलब्धिः प्रसादस्वभावतया स्फटिकादीनां तेजोगतेरप्रतिबन्धकतया प्रदीपप्रभावदेवोपपन्ना' इति—**तद्** दूषितं **वृद्धैः**प्रसन्नतावन्मूर्तद्रव्यकृतगत्यप्रतिबन्धस्य क्वाप्यदर्शनात्, तूलादिना जलादिगत्यप्रतिबन्धस्य प्रशिथिलावयवारभ्यत्वनिमित्तकस्यैव दर्शनात् । स्फटिकान्तर्गतप्रदीपरश्मयस्तु न तं भित्त्वा प्रसरन्ति, किन्तु तत्संपर्कमासाद्य स्फटिकपरमाणुपुञ्ज एव तथा परिणतः सर्वतः प्रसरति । अत एव पीतरक्तादिकाचकूपिकातो रश्मयोऽपि तच्छायाः प्रसरन्तो दृश्यन्ते । **अथ** यथा पारदस्याऽयस्पात्र भेदे सामर्थ्यम्, न पुनरलाबुपात्रभेदे, तथा लोचनरोचिषामपि स्फटिकादिभेदे शक्तिर्भविष्यति न तूलपटलभेद इति **चेत् ? न,** प्रत्यभिज्ञाबाधात् । तस्मात् कुड्यद्यन्तरितचाक्षुषजनकक्षयोपशमाभावादेवास्मदादीनां न तदन्तरितचाक्षुषम्, तादृशक्षयोपशमवतामतिशयितज्ञानिनां तु भवत्येव तच्चाक्षुषम् ।

**अथा**नन्तरितस्यापि कदाचिदन्तरितत्वात् कुड्यदिव्यवधानकालीनघटादिचाक्षुषे ज्ञानावरणप्रकृतिविशेषस्य प्रतिबन्धकत्वेऽपि तद्दशायां तदव्यवधानकालीनचाक्षुषापत्तिवारणाय तादृशचाक्षुषे तत्तत्कुड्यादिव्यवधानाभावहेतुत्वे स्वप्राचीस्थपुरुषाक्षात्कारे स्वप्रतीचीवृत्तित्वसंबन्धेन कुड्यादीनां प्रतिबन्धकत्वकल्पने वा गौरवाच्चक्षुषः प्राप्यकारित्वमेव युक्तम्, चाक्षुषत्वावच्छिन्न एव चक्षुःसंयोगत्वेन हेतुताकल्पने लाघवात्, कुड्यादीनां नयनादिप्राप्तिप्रतिबन्धकत्वकल्पनागौरवस्य फलमुखत्वात्, तत्तत्क्रियातत्तदुत्तरदेशादीनामेव संयोगनियामकत्वेनानतिप्रसङ्गाद्, भित्त्यादीनां प्रतिबन्धकत्वाऽकल्पनाद् वेति **चेत् ? न,** अन्धकारादिसाधारण्येन कुड्यदीनामेकशक्तिमत्त्वेनावारकत्वकल्पने गौरवाभावात् । **एतेन** 'परभागेऽन्धकारवति भित्यादौ चाक्षुषोदयाच्चक्षुःसंयोगावच्छेदकावच्छिन्नालोकसंयोगत्वेन द्रव्यचाक्षुषत्वावच्छिन्नं प्रति हेतुत्वाच्चक्षुषः प्राप्यकारित्वसिद्धिः' इत्यपि **निरस्तम्;** कुड्यदिवदर्वाग्भागावस्थितस्यैवान्धकारस्यावरणत्वात् अन्धकारव्यवधानस्य च विषयव्याप्तस्य

व्यवधानकालीनचाक्षुषप्रतिबन्धकत्वाद् नान्धकारमध्यावस्थितस्यालोकस्थसाक्षात्कारानुपपत्तिः । प्रतिबन्धकत्वं च प्रकृतिविशेषशक्त्युद्बोधकत्वमिति नानुपपत्तिः ।

प्राप्यकारित्वे च चक्षुषः शाखा–चन्द्रमसोर्यगपद्ग्रहानुपपत्तिः, युगपदुभयसंयोगाभावात् । न च 'तिर्यग्भागावस्थितयोः शाखा–चन्द्रमसोर्युगपद् संयोगोपपत्तिः' इति **वर्धमाननोक्तं** निरवद्यम्, ऊर्ध्वं प्रसृतानामेव नयनरश्मीनां तयोस्तिर्यग्भागेऽवस्थानोपपत्तेरूर्ध्वस्थितवस्तुग्रहणप्रसङ्गात् । **न** चाग्रभागावच्छेदेन संयुक्तस्यैव चक्षुषो ग्राहकत्वम्, अत एव न नयनस्थिताञ्जनादिग्रहोऽपीति नायं प्रसङ्ग इति **वाच्यम्;** तथापि तावत्पर्यन्तं प्रसृस्यान्तरालिकवस्त्वन्तरग्रहणप्रसङ्गात्, संनिहितं विमुच्याऽसंनिहितसंयोगानुपपत्तेः, अनन्यगत्या वेगादिविशेषात् विनैव संनिकृष्टदेशविशेषसंयोगं विप्रकृष्टदेशसंयोगोपपादने चानन्यगत्या देशविशेषस्य तत्तच्चाक्षुषहेतुत्वमस्तु, अनन्तचक्षुःक्रियासंयोगविभागतत्कार्यकारणभावाद्यकल्पनलाघवात् । अस्तु वा नयनप्राप्तिनियामकं विशिष्टाभिमुख्यमेव तत्कार्यनियामकम् । **एतेन** 'क्रमिकोभयसंयोगवता चक्षुषा शाखा–चन्द्रमसोर्ग्रहणे कालसनिकर्षाद् यौगपद्याभिमानः' इत्यपि **निरस्तम्,** चन्द्रज्ञानानुव्यवसायसमये शाखाज्ञानस्य नष्टत्वेन 'शाखाचन्द्रौ साक्षात्करोमि' इत्यनुव्यवसायानुपपत्तेश्च । **न च** क्रमिकतदुभयजनितसंस्काराभ्यां जनितायां समूहालाम्बनस्मृतावेवानुभवत्वारोपात् तथाऽनुव्यवसाय इति **सांप्रतम्;** तादृगारोपादिकल्पनायां महागौरवादिति । अधिकं **ज्ञानावर्णवादौ** ।

**॥ स्याद्वादकल्पलता ॥**

अत्रेयं प्रक्रियाअणूनामेवैकत्वसंख्यासंयोगमहत्त्वऽपरत्वादिपर्यायैरुत्पत्तिः, बहुत्वसंख्याविभागाणुपरिमाणपरत्वादिपर्यायैश्चानुत्पत्तिः, न च विशिष्टाऽण्वतिरिक्तमवयविद्रव्यमऽस्ति । न चैवं विभक्तस्येव संहतस्याप्यणोरचाक्षुषत्वं स्यादिति वाच्यम्, 'नानास्वभावत्वेन तस्य तदा चाक्षुषजननस्वभावत्वात्, विप्रकृष्टसन्निकृष्टेषु रेण्वादिषु तथास्वभाव्यदर्शनात्, प्रतिप्रतिपत्तारं च प्रति नियमेनाऽनतिप्रसङ्गात्' इति बहवः ।

**ननु**–"न स्थूलत्वं परमाण्वभिन्नं गुणगुणिनोर्भेदात्, कारणबहुत्वकारणमहत्त्वप्रचयक्रमेणोत्पन्नस्य तस्याऽवयविनिष्ठत्वाच्च । न चावयविनि मानाभावः, विलक्षणसंस्थानावच्छेदेन सन्निकर्षाद् यद्द्रव्यगतघटत्वादिग्रहस्तत्तद्व्यक्तेरुत्पादविनाशभेदादिप्रत्ययान्यथाऽनुपपत्त्या पृथगवयविसिद्धेः । न चाऽऽवृतत्वाऽनावृतत्वाभ्यां तत्भेदः, अवच्छेदकभेदेनाऽविरोधात् । न चाऽर्धावृतेप्यवयविनीन्द्रियसन्निकर्षसत्त्वे परिमाणादिग्रहप्रसङ्ग, इष्टत्वात्, तद्गतहस्तत्वादिजातिग्रहे तु यावदवयवाऽवच्छेदेन सन्निकर्षस्य हेतुत्वात् ।

**॥ जैनतर्कभाषायाम् प्रमाणपरिच्छेदः ॥**

स च नयन–मनोवर्जेन्द्रियभेदाच्चतुर्धा, नयनमनसोरप्राप्यकारित्वेन व्यञ्जनावग्रहासिद्धेः, अन्यथा तयोर्ज्ञेयकृतानुग्रहोपघातपात्रत्वे जलानलदर्शनचिन्तनयोः क्लेददाहापत्तेः । रविचन्द्राद्यवलोकने

चक्षुषोऽनुग्रहोपघातौ दृष्टावेवेति **चेत्; न;** प्रथमावलोकनसमये तददर्शनात्, अनवरतावलोकने च प्रासेन रविकिरणादिनोपघातस्य, नैसर्गिकसौम्यादिगुणे चन्द्रादौ चावलोकिते उपघाताभावादनुग्रहाभिमानस्योपपत्तेः ।

## ॥ अनेकान्तव्यवस्थाप्रकरणम् ॥

एवं च चक्षुःसंयुक्तसमवायादेरप्यस्वीकाराल्लाघवमिति । *चक्षुरप्राप्यकारित्वे द्रव्यचाक्षुषेऽपि चक्षुराभिमुख्यमेव नियामकमिति गुणादिचाक्षुषेऽपि तदेव नियामकं युक्तमिति सन्निकर्षमात्रान्यथासिद्धिकारकं तदप्यतिरिच्यत* इति मदेकपरिशीलितो **लता**दिविदितः पन्थाः ॥

## ॥ आत्मख्यातिः ॥

अत एव भूयोवयवावच्छेदेन चक्षुःसंयोगाभावान्नार्द्धनिखातवंशादेर्द्विहस्तादिपरिमाणग्रह इति परेषामभिमतम् । भूयोऽवयवावच्छिन्नत्वोपलक्षितसमवायावच्छिन्नाधारताविशेषेण 'चक्षुःसंयोगवत्' समवेतत्वस्य महत्त्वादिग्राहकस्याभावान्न तद्ग्रह इति तदुक्तिपरमार्थः । अन्यथा यावदवयवसन्निकर्षस्य कुत्राप्यसम्भवादनेकतत्संयोगस्य चातिप्रसञ्जकत्वा(द्)भूयोऽवयवावच्छिन्नत्वाभिधानमनर्थकं स्यात् ।

**यत्तु**-विषयतासम्बन्धेन परिमाणसाक्षात्कारत्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्वसम्बन्धेन तत्तदावरकसंयोगत्वेन प्रतिबन्धकत्वान्नार्धनिखातवंशादिपरिमाणग्रहो यद्वाऽर्धनिखातवंशादेर्महत्त्वादिकं गृह्यत एव महानयं वंश इति प्रतीतेस्तदवान्तरवैजात्यं तु नानुभूयत इति तत्तद्वैजात्यग्रहं प्रत्यावश्यकसंयोगस्य विरोधिता । **न च** निखातानिखातसदृशवंशयोः सन्निकर्षदशायां तन्महत्त्वादिवृत्तिवैलक्षण्यानुभवाद्वैजात्य-प्रत्यक्षं प्रत्यावारकसंयोगानां प्रतिबन्धकत्वासम्भव इति **वाच्यम्,** तादृशवैलक्षण्यप्रकारकप्रत्यक्षं प्रत्येव तेषां विरोधित्वाद्विशेष्यत्वं प्रतिबध्यतावच्छेदकः सम्बन्धः स्वाश्रयसमवेतत्वं च प्रतिबन्धकतावच्छेदक इत्यनतिप्रसङ्गात् । न चैवं निखातसन्निकर्षात्तादृशवैलक्षण्यनिर्विकल्पकापत्तिरिष्टत्वादिति **मथुरानाथादिभिरहितम् तत्तुच्छम्** । एवमपि निखातसन्निकर्षान्महत्त्वप्रकारकतादृशवैलक्षण्यविशेष्यकसाक्षात्कारापत्तेर्दुर्वारत्वात् ।

किञ्चैवमावृतैकपार्श्वावच्छेदेन यस्य चक्षुःसंयोगान्नोक्तवैजात्यस्य तद्ग्रहस्तस्यैवान्यदा पुरुषान्तरस्य वा तदानीं पार्श्वान्तरावच्छेदेन चक्षुःसंयोगेऽप्यग्रहः स्यादावारकसंयोगस्य विरोधिनः सत्त्वात् । तत्कालीनतत्तत्पुरुषीयमहत्त्वादिप्रत्यक्षं प्रत्येवोक्तप्रतिबन्धकत्वे त्वनावरणकालीनस्य विलक्षणमहत्त्वादिप्रत्यक्षस्यावरणदशायामुत्पत्तिप्रसङ्गाः, न हि तत्रापि सन्निकर्षं विनाऽन्यद्विशिष्य कारणं क्लृप्तं येन तद्विलम्बात्तद्विलम्बः स्यात् । स्वप्राचीस्थपुरुषीयोक्तवैजात्यसाक्षात्कारत्वावच्छिन्न एव स्वप्रतीच्यवच्छिन्नावरकसंयोगत्वेन प्रतिबन्धकत्वे तु द्रव्यचाक्षुषेऽप्येवं भित्त्यादिसंयोगप्रतिबन्धकत्वेन

निर्वाहे व्यवहितार्थादर्शनान्यथानुपपत्त्या चक्षुःप्राप्यकारित्वसाधनप्रयासवैफल्यापत्तिरिति न किञ्चिदेतत् ।

समवायसम्बन्धावच्छिन्नावारकसंयोगाभावावच्छेदकावच्छिन्नचक्षुःसंयोगवत्समवेतसमवेतत्व-स्योक्तवैजात्यग्रहे प्रत्यासत्तित्वात्तत्साक्षात्कारप्रयोजकतयापि चक्षुरादिसंयोगनिष्ठवैजात्यान्तर-स्वीकाराद्वा नार्धनिखातस्थलीयवैजात्यस्य निर्विकल्पकापत्तिरित्यपि **केचित्**,-तदप्यसत् । सन्निकर्षे आवश्यकसंयोगाभावस्य निवेशे चक्षुःसंयोगवृत्तिजात्यन्तरकल्पने गौरवात्, आधारताविशेषस्य सन्निकर्षमध्ये निवेश एव लाघवादिति दिक् ।

## ॥ ज्ञानबिन्दुप्रकरणम् ॥

तर्हि चक्षुष्यपि तथैव गृह्यतां चक्षुर्ज्ञानमिति, नतु चक्षुर्दर्शनमिति । अथ तत्र दर्शनम्, इतरत्रापि तथैव गृह्यतां, युक्तेस्तुल्यत्वात् । कथं तर्हि शास्त्रे चक्षुर्दर्शनादिप्रवाद इत्यत आह-

''नाणमपुट्ठे जो अविसए अ अत्थंमि दंसणं होई ॥
मुत्तूण लिंगओ जं, अणागयाईयविसएसु ॥२-२५॥''

अस्पृष्टेऽर्थे चक्षुषा य उदेति प्रत्ययः स ज्ञानमेव सच्चक्षुर्दर्शनमित्युच्यते, इन्द्रियाणामविषये च परमाण्वादावर्थे मनसा य उदेति प्रत्ययः स ज्ञानमेव सदचक्षुर्दर्शनमित्युच्यते । अनुमित्यादिरूपे मनोजन्यज्ञानेऽतिप्रसङ्गमाशङ्क्याऽऽह, अनागतातीतविषयेषु यल्लिङ्गतो ज्ञानमुदेति 'अयं काल आसन्नभविष्यद्वृष्टिकस्तथाविधमेघोन्नतिमत्त्वात्,' 'अयं प्रदेश आसन्नवृष्टमेघः पूरविशेषवत्त्वाद्' इत्यादिरूपं तन्मुक्त्वा । इदमुपलक्षणं, भावनाजन्यज्ञानातिरिक्तपरोक्षज्ञानमात्रस्य तस्यास्पृष्टविषयार्थ-स्यापि दर्शनत्वेनाव्यवहारात् ।

## ॥ तत्त्वार्थटीका ॥

**सूत्रम्-न चक्षुरनिन्द्रियाभ्याम् ॥१॥१९॥**

[भा.] चक्षुषा नोइन्द्रियेण च व्यञ्जनावग्रहो न भवति । चतुर्भिरिन्द्रियैः शेषैर्भवतीत्यर्थः ।

[व्या.] करणे सहार्थे चैषा तृतीया । **चक्षु**षोपकरणाख्यचक्षुरिन्द्रियेण, **अनिन्द्रि**येण च मन ओघ-ज्ञानरूपेण च सह ते रूपाकारणपरिणताः पुद्गलाश्चिन्त्यमानाश्च वस्तुविशेषाः संश्लेषं न यान्ति, अतो व्यञ्जनं चक्षुरुपकरणेन्द्रियनोइन्द्रिययोर्न भवति । तदभावाच्च तत्करणकोऽवग्रहोऽपि नास्तीति भाष्यं **प्राञ्चो** व्याचक्षते । तच्चाभिमतशब्दपूरणवाक्यभेदौ विना न सुस्थम्, *गवि शशशृङ्गं नास्तीत्यत्र यथा गवाधिकरणकं शृङ्गं शशीयत्वेन नास्तीत्यर्थः, तथाऽत्र चक्षुर्नोइन्द्रियकरणकोऽवग्रहो व्यञ्जनीयत्वेन नास्तीत्यर्थः, ईदृशबोधश्च तत्तदानुपूर्वीज्ञानस्य तथाबोधजनकत्वज्ञानात्, तथा च करणतृतीययैवोपपत्तिरिति तु न्याय्यमाभाति ।*

अयमत्राशयःइन्द्रियचतुष्टयस्य प्राप्यकारित्वाद् व्यञ्जनावग्रहः सम्भवति। नयनमनसोस्त्वप्राप्यकारित्वान्न तत् सम्भवः । प्रमाणं च तत्र, नयनमनसी अप्राप्यकारिणी, विषयकृतानुग्रहोपघातशून्येन्द्रियत्वात्, व्यतिरेके त्वगादिर्दृष्टान्त इति, त्वगादीनां चानुग्रहोपघातौ चन्दनाङ्गनादिस्पर्शनक्षीरशर्कराद्यास्वादनकर्पूरपुद्गलाद्याघ्राणनमृदुमन्दाद्याकर्णनकर्कशकम्बलादिस्पर्शनत्रिकटुकाद्यास्वादनाशुच्यादिपुद्गलाघ्राणनभेर्यादिशब्दश्रवणस्थले दृष्टौ, नयनस्य तु निशितकरपत्रचन्दनाद्यालोकनं मनसश्च तच्चिन्तने न दृश्येते तौ, ततो न नयनमनसी प्राप्यकारिणी इति । **एतेन** चक्षुर्न प्राप्यकारि अधिष्ठानासम्बद्धार्थग्राहकत्वात्, यत्प्राप्यकारि तन्नाधिष्ठानासम्बद्ध-ग्राहकं, यथा रसनादीत्यनुमानं न चक्षुरप्राप्यकारित्वसाधकम्, प्रदीपप्रभायामनैकान्तिकत्वात्, चक्षुषो हि गोलकमिव प्रभाया अपि दीपोऽधिष्ठानं तदसम्बद्धार्थग्राहकत्वं च प्रभायां न चाप्राप्यकारित्वं तत्रेति **नैयायिकोक्तमपास्तम्,** प्रभावन्नयनरश्मीनां विषयपर्यन्तं गमनाभ्युपगमे तत्कृतानुग्रहोपघातप्रसङ्गदोषस्य दुर्निवारत्वाद्विपरीतबाधकतर्केणास्मदुक्तानुमानस्य बलवत्त्वात् । सूक्ष्मत्वात्तैजसत्वाच्च नयनरश्मीनां नाञ्जनदहनादीनां सम्बन्धादनुग्रहोपघाताविति **परिहारो न रमणीयः**, प्राप्तचन्द्रसूर्यादिकिरणैस्तदप्रसङ्गात्, अधिष्ठानगतानुग्रहोपघाताभ्यां तदन्यथासिद्धिरित्यपि **वार्त्तम्,** आत्मगतसुखदुःखरूपौ तौ प्रतीन्द्रियकतयोरेव तयोर्हेतुत्वात्, अन्यथोपहतघ्राणस्य कुसुमादिनानुग्रहप्रसङ्गात्, अत एवास्माकं विलक्षणसुखत्वावच्छिन्ने चक्षुःकर्पूरसंयोगत्वादिना हेतुत्वम्, तव त्वधिष्ठानावच्छिन्नचक्षुःकर्पूरसंयोगत्वादिनेति महागौरवम् । **यत्तु** चक्षुषोऽप्राप्यकारित्वे भित्त्यादिव्यवहितस्यापि ग्रहः स्यात्, भित्त्यादिकं हि प्राप्तिविघातकतयैव विरोधि, न तु स्वरूपसत्तया, तथात्वे तस्मिन् सति क्वचिदपि कार्यं न स्यादिति **परैरुच्यते, तत्तुच्छम्,** काचादिना न प्राप्तिविघातो भित्त्यादिना तु तद्विघात इत्यत्र परेषामिव काचादिना न चाक्षुषप्रतिबन्धो भित्त्यादिना तु तत्प्रतिबन्ध इत्यत्रास्माकं स्वभावस्यैव शरणीकरणीयत्वात्, तन्निर्वाहार्थं च यदि स्वप्राचीस्थपुरुषचाक्षुषे स्वप्रतीचीवृत्तित्वसम्बन्धेन तत्तद्भित्त्यादेः प्रतिबन्धत्वं कल्प्यते, तदा न गौरवं बाधकम्, प्रामाणिकत्वात् । यदि च व्यवहितमयोग्यत्वादेव न गृह्यते, तदापि न दोषः, *व्यवधानाभावरूपनैरन्तर्येण चक्षुर्ग्राह्यतानुकूलयोग्योत्पादस्य स्थूलर्जुसूत्रनयेनाश्रयणेऽस्माकं बाधकाभावात् ।* **एतेना**योग्यत्वं हि न स्वरूपायोग्यत्वम्, स्थैर्यपक्षे तस्यैव कालान्तरे ग्रहात् । क्षणिकत्वपक्षेऽपि प्रत्यासन्नानां सहकारिणामेव तत्रातिशयजनकत्वं नाप्रत्यासन्नानाम्, प्रत्यासत्तिश्च **बौद्धानां** निरन्तरोत्पादोऽस्माकं द्रव्ययोः संयोगस्तदुभयमपि कृष्णसारस्यार्थेन न सम्भवति, किन्तु तदाश्रितस्येन्द्रियस्यातीन्द्रियस्य गतिक्रमेणेति **निरस्तम्,** तत्तद्व्यवधानाभावकूटविशिष्टतयोत्पन्नस्यैव घटादेर्योग्यत्वात् । किञ्चानन्तचक्षुरवयवगतिसंयोगादिकल्पनापेक्षया तद्धेतुत्वेन कल्प्यमानस्य तत्तद्व्यवधानाभावकूटस्य तत्सम्बन्धेनाभिमुख्यस्यैव वा चाक्षुषहेतुत्वं युक्तम् । **यदपि** सूक्ष्मवस्त्राद्यावरणे घटादेरल्पप्रकाशस्तदभावे च

महाप्रकाश इति व्यवस्था स्वल्पभूयोऽवयवावच्छेदेन चक्षुःसंयोगवाद एव घटत **इति,** तदपि तन्नियामकादेव तदुपपत्तौ तादृशसंयोगकल्पनायां गौरवादेव निराकरणीयमिति दिग् । मनसोऽप्यप्राप्यकारित्वं चिन्त्यमानविषयसम्बन्धकृतानुग्रहोपघातशून्यत्वात् समर्थितमेव । यश्चेह मृतनष्टादिकं वस्तु चिन्तयतोऽत्यार्तरौद्रध्यानप्रवृत्तस्य दौर्बल्योरःक्षतादिलिङ्गैरुपघातः, इष्टसङ्गमविभवलाभादिकं च चिन्तयतो हर्षादिभिरनुग्रहोऽनुमीयते, स इष्टानिष्टाहाराभ्यवहारसदृशमनस्त्वपरिणतेष्टानिष्टपुद्गलसङ्घातनिमित्तकः, नतु चिन्त्यमानसम्बन्धकृत इति न दोषः । **न च** सूक्ष्ममनःपुद्गलैः स्थूलचयोपचयासम्भव इत्यपि **शङ्कनीयम्,** स्थूलैरपि पुद्गलैः सूक्ष्मापनयनद्वारैव तत्करणाभ्युपगमात्, अन्यथा प्रतिक्षणं बालादिशरीरवृद्ध्यनुपपत्तेः, सुप्रसिद्धं चैतत् 'सर्पाः पिबन्ति पवनं न च दुर्बलास्ते' इत्यादौ, न च मनसाऽऽत्मनि प्राप्त एव ज्ञानं जन्यते, चिन्त्यमानास्तु पदार्था उपनीता एव तत्र भासन्त इति तस्य प्राप्यकारित्वमेवेति युक्तम् । चिन्तादृष्टाद्युद्बुद्धसंस्काररूढानामपि पदार्थानां मनोयोग्यत्वात्, स्वप्नज्ञानकविकाव्यमूलज्ञानादिस्थले तेषां विशेष्यतया मनसाऽवगाहनात्, तेष्वप्राप्यज्ञानजनने आत्मप्राप्तिमात्रेण मनसः प्राप्यकारित्वासिद्धेः, *विशेष्यतया स्वजन्यज्ञानव्याप्यप्राप्तिकत्वस्यैव प्राप्यकारित्वपदार्थत्वादिति दिग् ।*

॥ अष्टसहस्रीतात्पर्यविवरणम् ॥

**सा पुनर्योग्यतेति । ननु** एवं द्रव्यचाक्षुषादौ तत्प्रतिबन्धककर्मक्षयोपशमत्वादिना हेतुता वाच्या, तद्धेतुता च चक्षुःसन्निकर्षादेरेवेति 'तद्धेतोः' इत्यादिन्यायेन प्रत्यक्षे इन्द्रियार्थसन्निकर्षस्य हेतुत्वं युक्तमिति **चेत्, न** तत्रापि तद्धेतोरित्यादिन्यायस्य सुलभत्वेनान्तरङ्गप्रत्यासत्तेः क्षयोपशमहेतुतायामेव विनिगमकत्वात् ।

**एतेन** स्थैर्यपक्षे विषयनिष्ठाया योग्यताया अपरावृत्तेर्नयनसन्निकर्षस्याहेतुत्वे भित्त्याद्यावृतस्य चाक्षुषापत्तिरित्यादिकम् **अपास्तम्,** आवृतचाक्षुषजनकक्षयोपशमवतां तदापत्तेरिष्टत्वात्, अनावृतचाक्षुषे चावरणेनैव क्षयोपशमप्रतिबन्धात्, अपरेषां तु दिव्याञ्जनादिसंस्कृतचक्षुषामनुभूयमानभित्त्याद्यावृतचाक्षुषानुपपत्तिः, तत्र चाक्षुषत्वापलापे च घटादिज्ञानेऽपि तदपलापप्रसङ्गो, विकल्पज्ञानस्य सर्वस्य समानसत्ताया एव युक्तत्वात् ।

किञ्च प्रत्यासत्तिहेतुतावादिना नेत्राञ्जनसूक्ष्मतारकाद्यप्रत्यक्षत्वायाऽत्यासत्त्यतिदूरत्वयोर्दोषत्वं वाच्यम्, आदर्शसाम्मुख्याञ्जनादिसन्निधाने च तत्प्रत्यक्षत्वाय तत्तद्विषये तदभावविशिष्टतत्तदासत्त्यतिदूरत्वाभावस्य चाक्षुषहेतुत्वं वाच्यमित्यतिगौरवम्, मम तु क्षयोपशमे विशिष्य हेतुता, चाक्षुषादौ तु विलक्षणक्षयोपशमत्वेनैव समानविषयत्वप्रत्यासत्त्येति लाघवम् ।

किञ्चेन्द्रियप्रत्यासत्तेरपि क्षयोपशमाधायकतयैव प्रत्यक्षहेतुता वाच्या, असङ्ख्येयसमय-प्रविष्टानामेव पुद्गलानां ग्रहणयोग्यतायाः पारमर्षेऽभिधानात्, सकृत्सम्बन्धे बोधाननुभवेन तस्य च यौक्तिकत्वादसङ्ख्येयैश्च समयैः क्षयोपशमपुष्टेरेव सिद्धेः । तथा च योग्येन्द्रियविषय-सम्बन्धानकामेनापि क्षयोपशमहेतुत्वेनानुगमय्य प्रत्यक्षहेतुतां वदता विलक्षणक्षयोपशमत्वेनैव हेतुतायां किं लाघवं नोद्वीक्ष्यते ? ।

**एतेन** तुरगादौ वेगेन गच्छतो युगपदनेकवृक्षसन्निकर्षेऽपि क्वचिदेव प्रतिनियतधर्मप्रकारकग्रहो नान्यत्रेति नियमाय चक्षुःसन्निकर्षविषयमाहात्म्यादीनां विशेष्यग्रहसामग्रीत्वेनानुगतानां हेतुत्वमित्य**पि व्याख्यातम् ।** तत्रौपधायकतासम्बन्धेन विलक्षणक्षयोपशमवत्त्वस्यैव सामग्रीपदार्थत्वात्, तस्या यावत्कारणरूपत्वेऽतीतानागतकतिपयचक्षुःसन्निकर्षाभावे चाक्षुषानुपपत्तेः ।

**एतेनैव** तद्व्यक्तिविषयकचाक्षुषे तद्व्यक्तिचक्षुःसंयोगत्वेनैव व्यासज्यवृत्तिधर्मप्रत्यक्षानुरोधेन कारणता कल्प्यते तत एव तद्व्यक्तिवृत्तिगुणकर्माभावचाक्षुषनिर्वाहाच्चक्षुःसंयुक्तसमवायादिप्रत्या-सत्त्यकल्पनशलाघवादिति नवीननैयायिकोक्तमपि **अपास्तं**, सामान्यलक्षणादिप्रत्यासत्त्या सन्निकृष्टतद्-व्यक्तिविषयकप्रत्यक्षवारणाय तद्व्यक्तिनिष्ठलौकिकविषयताशालित्वस्य कार्यतावच्छेदककोटा-वावश्यनिवेशनीयतया तद्व्यक्तिनिष्ठायास्तद्गतगुणकर्माभावादिनिष्ठायाश्च लौकिकविषयताया नियमाय तव प्रत्यासत्तिविशेषस्य मम तत्स्थाने क्षयोपशमविशेषस्य च हेतुताया आवश्यकत्वात् ।

किञ्च व्यासज्यवृत्तिधर्मस्य घटाकाशसंयोगादेर्गुरुत्वादिवदयोग्यत्वादेव न प्रत्यक्षं, चक्षुःसंयुक्त-तदसंयुक्तघटपटसंयोगाप्रत्यक्षत्वस्य तु नोक्तकार्यकारणभावादपि निर्वाहः । संयोगादिप्रत्यक्षस्य यावदाश्रयविषयकत्वनियमोक्तावपि परस्परानवच्छेदकावच्छेदेन घटचक्षुःसंयोगपटचक्षुःसंयोगो-भयसत्त्वे घटपटसंयोगादिप्रत्यक्षापत्तेर्दुर्वारत्वात्, स्वावच्छेदकावच्छिन्नघटवृत्तिपटसंयोगावच्छेदका-वच्छिन्नत्वसम्बन्धेन घटचक्षुःसंयोगविशिष्टपटचक्षुःसंयोगत्वादिना तद्धेतुत्वे तु विनिगमनाविरहाद-नन्तकार्यकारणभावापत्तेश्च महागौरवम् । तस्माद् द्रव्यसमवेताव्याप्यवृत्तिप्रत्यक्षे व्याप्यवृत्तेरप्य-वच्छेदकस्वीकारे वा द्रव्यसमवेतप्रत्यक्षत्वावच्छिन्न एव चक्षुःसंयोगावच्छेदकावच्छिन्नसमवाय-सम्बन्धावच्छिन्नाधारतानिरूपकत्वस्य प्रत्यासत्तित्वं परस्य वक्तुमुचितमिति यत्किञ्चिदेतत् ।

वस्तुतो द्रव्यविषयचाक्षुषसामग्र्यैव न तद्वृत्तिगुणकर्माभावप्रत्यक्षनिर्वाहो, द्रव्याविषयकस्यापि परमाणुवाय्वोर्महत्त्वरूपाभावचाक्षुषस्य परैरभ्युपगमात्तद्वत्तादृशरूपादिचाक्षुषस्यापि तैरभ्युपगन्तुं शक्यत्वादिति । द्रव्यार्थतश्चाक्षुषादेः सार्वत्रिकत्वेऽपि पर्यायार्थतस्तत्तच्चाक्षुषविशेषे क्षयोपशम-विशेषस्य हेतुत्वमवश्यं वाच्यम्, अन्यथा नियतधर्मोल्लेखानुपपत्तेः, तथा च प्रत्यासत्तीनां विशिष्य

हेतुत्वमनतिप्रयोजनं, चाक्षुषत्वावच्छिन्नं चक्षुराभिमुख्यस्यैकस्यैव प्रत्यासत्तिस्थानेऽभिषेकौचित्यादित्यस्मत्सम्प्रदायानुगतो नवीनः पन्थाः ।

**एतेन** घटाकाशसंयोगादेर्विशिष्यायोग्यत्वकल्पनपरिहाराय व्यासज्यवृत्तिधर्मप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वं कल्पनीयम्, तत्र कारणतावच्छेदकं कार्यतावच्छेदकं पर्याप्तिमत्त्वमेव, कारणतावच्छेदकतावच्छेदकः सम्बन्धः स्वावच्छिन्नाधारतावच्चाक्षुषत्वं, कारणतावच्छेदकः स्वविषयवृत्तिता, कार्यतावच्छेदकतावच्छेदकः स्वावच्छिन्नाधेयतावच्चाक्षुषत्वं, कार्यतावच्छेदकः सम्बन्धो विशेष्यतेति नाननुगम इत्यादि नवीनतरोक्तमपि **अपास्तं**, सति क्षयोपशमविशेषे यावदाश्रयप्रत्यक्षोत्पत्तिकाल एव द्वित्वसंयोगादिप्रत्यक्षोपगमेन तस्य तद्धेतुत्वे मानाभावाद् द्रव्यजात्यन्यचाक्षुषे चाक्षुषान्यसमवेतत्वस्य प्रतिबन्धकत्वेनैव घटाकाशसंयोगादिप्रत्यक्षत्वोपपत्तेः । इत्थमेव क्रमिकद्वित्रिपदार्थगतद्वित्वत्रित्वादिप्रत्यक्षस्यैकत्वद्वयप्रत्यक्षोत्पत्तिकाले द्वित्वादिप्रत्यक्षस्य चोपपत्तिः ।

किञ्च संयोगत्वादिना पर्याप्तिमत्प्रत्यक्षे न यावदाश्रयप्रत्यक्षं हेतुः, किन्तु घटादिप्रकारकसंयोगादिप्रत्यक्षे, तत्र च विशेषणतावच्छेदकप्रकारकज्ञानमुद्रयैव घटादिज्ञानस्य हेतुत्वान्न यावदाश्रयप्रत्यक्षत्वेन हेतुत्वम्, अन्यथा घटपटोभयाभावप्रत्यक्षादौ यावत्प्रतियोगिज्ञानत्वेनापि हेतुतापत्तेरिति विना क्षयोपशमानुसरणं न कुत्राप्युपपत्तिरिति दृढतरमनुसन्धेयम्, अधिकमस्मत्कृत**स्याद्वादरहस्यस्याद्वादकल्पलतादौ** । तत्सिद्धमेतत् प्रतिबन्धककर्मक्षयोपशमक्षयलक्षणैव प्रत्यक्षजननयोग्यतेति ।

### ॥ प्रमेयमाला ॥

विशिष्टादृष्टोपगृहीतं गोलकमेवास्तु चक्षुरिन्द्रियम्, कर्णशष्कुलीवत् । **न च** व्यवहितोपलम्भा**पत्ति**रयोग्योत्वेनैव तदग्रहाद् । **अथ** व्यवहितस्यापि न स्वरूपायोग्यत्वम्, स्थैर्यपक्षे तस्यैव कालान्तरे ग्रहात्, क्षणिकत्वपक्षेऽपि प्रत्यासन्नानां सहकारिणामेवेन्द्रियातिशयजनकत्वेन योग्यता वाच्यानां प्रत्यासन्नानाम् । प्रत्यासत्तिश्च बौद्धानां निरन्तरोत्पादोऽस्माकं द्रव्ययोः संयोगस्तदुभयमपि कृष्णसारस्यार्थेन न सम्भवतीति **चेन्न,** योग्यदेशावस्थितस्यैव ग्राह्यत्वाद् व्यवहितानुपलम्भाभ्युपगमादन्यथा महानिलेरितवस्त्वग्रहप्रसङ्गः । पवनेन तेजसा दूरमपनयनात् तेजोभेदेनैवमिति **चेन्न** कराभ्यामप्यनावरणापत्तेः । कराभ्यां वारणीयमपि काण्डादिवायुना न प्रतिबध्यत इत्यनैकान्तिकमिति **चेन्न,** तथापि करप्रतिबद्धगतिकवाते मन्दं गच्छतीति नियमाद् वातेन चक्षुषो वेगमान्द्यप्रसङ्गान्न च तथेष्यते, यावद्दूरं हि निर्वाते याति काण्डादि न तावद्दूरं वायावित्यस्ति चक्षुस्तु वातनिर्वातयोरुभयत्र तुल्यगम्यैवेति । शाखाचन्द्रमसोः समसमयवेदनाच्च न चक्षुरतिरिक्तम् । न च तद् भ्रान्तं बाधकाभावादेवं रसनादिकमप्यतीन्द्रियमपास्तमिति **चेन्न,** देशयोग्यताया अपि स्वरूपभेदेना-

व्यवस्थितेरावरककुड्यादेश्चक्षुःप्राप्तिविघातकतयैव विरोधित्वेन विषयप्राप्तिमदतीन्द्रियचक्षुःसिद्धेः । **न च** तत्तद्भित्तेः स्वप्राच्यादिस्थपुरुषसाक्षात्कारे स्वप्रतीच्यादिवर्त्तित्वसम्बन्धेन प्रतिबन्धकत्वकल्पनं **युक्तम्**, गौरवात् । **न च** भित्त्यादेश्चक्षुःसंयोगप्रतिबन्धकत्वं त्वया वाच्यमिति चाक्षुषप्रतिबन्धकत्वमेव युक्तमिति **वाच्यम्**, तत्तत् क्रिया तत्तदुत्तरदेशानां तत्तत्संयोगहेतुत्वेनानतिप्रसङ्गेन भित्त्यादेः संयोग-प्रतिबन्धकत्वाकल्पनात् । पवनेरितवस्तुसङ्ग्रहस्तु चक्षुषोऽतिशयितवेगवत्त्वेनाप्रतिबन्धादुपपद्यते । अत एव शाखाचन्द्रग्रहयौगपद्यस्य भ्रान्तत्वं वेगविशेषादेव तत्र गतिभेदानुपलक्षणाद् यत्काले चन्द्रेण संयुक्तं चक्षुस्तत्काले शाखयाऽपीति तुल्यकालग्रहणोपपत्तिर्न **चाग्रावच्छेदेनैव** चक्षुःसंयोगो ग्राहको-ऽन्यथा मूलावच्छेदेन गोलकस्य नित्यसम्बन्धात् तद्ग्रहापत्तिरिति नोक्तोपपत्तिरिति **वाच्यम्** । तिर्यग्भूतेन चक्षुषाऽग्रावच्छेदेन द्वयोः सम्प्रयोगसम्भवादित्यप्याहुः । **न चैवं** नयनस्य प्राप्यकारित्वे उन्मील्य निमीलितनयनस्यापि साक्षात्कारापत्तिः, गोलकसन्निकृष्टेन्द्रियविषयसंयोगे सति ज्ञान-जनकत्वोपगमाद् । **अथ** निमीलनेन मूलतो नयननाशेऽन्धत्वापत्तिरन्तर्बहिर्भूतनयनावयवैः खण्ड-खण्डनयनारम्भाभ्युपगमेऽपि मुहुर्मुहुर्निमीलनोन्मीलनाभ्यां निःशेषनयनभागरिक्ततायां तदापत्तितादव-स्थ्यमेव, पिधानेन प्रदीपप्रभाया इव निमीलनेन सकलनयनावयवानामन्तः पिण्डीभावाभ्युपगमे चोन्मील्य निमीलने सति विषयेन्द्रियसंयोगाभावादेव न साक्षात्कार इति किमिन्द्रियस्य गोलकसन्नि-कृष्टत्वानुधावनेनेति **चेन्न**, प्रदीपप्रभावन्निमीलनेन नयनस्यान्तरुपसंग्रहे पक्ष्मपर्यन्तमन्तः प्रकाशापत्ते-र्निमीलनेन पूर्वचक्षुर्नाशस्योन्मीलनेन च चक्षुरन्तरोत्पादस्यैवाभ्युपगमान् निमीलनेऽपि चक्षुःसन्तानानु-वर्त्तकादृष्टानिवृत्तेरेवान्ध्याप्रसङ्गादिति । उन्मीलनस्येव चिकित्साया अपि गोलकसन्निकृष्टनयन-विशेषजननादेवोपयोग इति बहिर्वृत्तिनयनाभ्युपगमे चिकित्साप्रयोगवैफल्यशङ्कापि निरस्ता द्रष्टव्येत्थं च यदुच्यते **दिङ्नागेन**–

**सान्तरग्रहणं न स्यात् प्राप्तौ ज्ञानेऽधिकस्य च ।**
**अधिष्ठानाद् बहिर्नाक्षं चिकित्सादिप्रयोगतः ॥१॥**

**सत्यप्यक्ष बहिर्भावे न शक्तिर्विषयेक्षणे ।**
**यदि च स्यात् तदा पश्येदप्युन्मील्य निमीलनात् ॥२॥**

इत्यादि तत् सर्वं **प्रत्याख्यातमिति** दिग् ।

● ● ●



## विभाग-२

### ॥ प्रज्ञापना मलयगिरिवृत्तिः ॥

पुट्ठाइं मंते ! सद्दाइं सुणेति अपुट्ठाइं सद्दाइं सुणेति ?, गो. ! पुट्ठाइं सद्दाइं सुणेति नो अपुट्ठाइं सद्दाइं सुणेति, पुट्ठाइं भंते ! रूवाइं पासति अपुट्ठाइं पासति ?, गो. ! नो पुट्ठाइं पासति, अपुट्ठाइं रूवाइं पासति, (सूत्रं १९४)

'पुट्ठाइं भंते ! सद्दाइं सुणेति' इत्यादि, प्राकृतत्वात् सूत्रे शब्दस्य नपुंसकत्वं, अन्यथा पुंस्त्वं प्रतिपत्तव्यं, स्पृष्टान् भदन्त ! श्रोत्रेन्द्रियमिति कर्तृपदं सामर्थ्याल्लभ्यते शब्दान् शृणोति, तत्र स्पृश्यन्ते इति स्पृष्टास्तान् तनौ रेणुमिवालिङ्गितमात्रानित्यर्थः, 'पुट्ठं रेणुं व तणुंमि' (स्पृष्टं तनौ रेणुरिव) इति वचनात्, शब्द्यन्तेप्रतिपाद्यन्ते अर्थाएभिरिति शब्दाः तान् शृणोति गृह्णाति उपलभते इतियावत्, किमुक्तं भवति ?-स्पृष्टमात्राण्येव शब्दद्रव्याणि श्रोत्रेन्द्रियमुपलभते, न तु घ्राणेन्द्रियादिवत् बद्धस्पृष्टानीति, कस्मादिति **चेत्, उच्यते,** इह शब्दद्रव्याणि घ्राणेन्द्रियादिविषयभूतेभ्यो द्रव्येभ्यः सूक्ष्माणि तथा बहूनि तथा तत्क्षेत्रभाविशब्दयोग्यद्रव्यवासकानि च, ततः सूक्ष्मत्वादतिप्रभूतत्वात्तदन्यद्रव्यवासकत्वाच्चात्मप्रदेशैः स्पृष्टमात्राण्यपि निर्वृतीन्द्रियमध्ये प्रविश्य झटित्युपकरणेन्द्रियमभिव्यञ्जयन्ति, श्रोत्रेन्द्रियं च घ्राणेन्द्रियाद्यपेक्षया स्वविषयपरिच्छेदे पटुतरं, ततः स्पृष्टमात्राण्यपि तानि श्रोत्रेन्द्रियमुपलभते, नास्पृष्टान् सर्वथाऽऽत्मप्रदेशैः सम्बन्धमप्राप्तान्, श्रोत्रेन्द्रियस्य प्राप्तविषयपरिच्छेदस्वभावत्वात्, यथा च श्रोत्रेन्द्रियस्य प्राप्तकारिता तथा नन्द्यध्ययनटीकादौ चर्चितमिति ततोऽवधार्यं, 'पुट्ठाइं भंते! रूवाइं' इत्यादि सुगमं, निर्वचनमाहगौतम ! न स्पृष्टानि रूपाणि पश्यति चक्षुः किन्त्वस्पृष्टानि, चक्षुषोऽप्राप्तकारित्वात्, तच्चाप्राप्तकारित्वं **तत्त्वार्थटीकादौ** सविस्तरेण प्रसाधितमिति ततोऽवधारणीयम् ।

**वंजणोग्गहे णं भंते ! कतिविधे पं. ?, गो. ! चउव्विधे पं., तं.-सोतिंदियवंजणोग्गहे घाणिंदियवंजणोग्गहे जिब्भिंदियवंजणोग्गहे फासिंदियवं. । अत्थोग्गहे णं भंते ! कतिविधे पं. ?, गो. ! छव्विहे पं., तं.-सोतिंदियअत्थोवग्गहे चक्खिंदियअ. जिब्भिंदियअ. फासिंदियअ. नोइंदियअत्थो. । नेरइयाणं भंते ! कतिविहे उग्गहे पण्णत्ते ?, गो. ! दुविहे पं., तं.-अत्थोग्गहे य वंजणोग्गहे य, एवं असुरकुमाराणं जाव थणियकुमाराणं ।**

**पुढविकाइयाणं भंते ! कतिविधे उग्गहे, पं. ?, गो. ! दुविधे उग्गहे पं.-अत्थोग्गहे य वंजणोवग्गहे य । पुढविकाइयाणं भंते ! वंजणोग्गहे कतिविधे पं. ? गो. ! एगे फासिंदियवंजणोग्गहे पं.** । (सूत्रं-२००)

व्यञ्जनावग्रहो न नयनमनसोः, तयोरप्राप्यकारित्वात्, सा चाप्राप्यकारिता **नन्द्यध्ययनटीकायां** प्रदर्शितेति नेह प्रदर्श्यते, अर्थावग्रहः षड्विधः, तद्यथा-'**सोइंदियअत्थुग्गहे**' इत्यादि, श्रोत्रेन्द्रियेणार्थावग्रहो व्यञ्जनावग्रहोत्तरकालमेकसामयिकमनिर्देश्यं सामान्यमात्रार्थग्रहणं श्रोत्रेन्द्रियार्थावग्रहः, एवं घ्राणजिह्वास्पर्श नेन्द्रियार्थावग्रहेष्वपि वाच्यं, चक्षुर्मनसोस्तु व्यञ्जनावग्रहो न भवति ।

॥ **नन्दीसूत्र-हारिभद्रीयवृत्तिः** ॥

'से किं त'मित्यादि (२९-१६२) अथ कोऽयं व्यञ्जनावग्रहः इत्यत्र पुनरुत्पत्तिक्रम एवाश्रितो यथासम्भवमिति सुश्लिष्टमेतदिति, प्रकृतमुच्यतेव्यञ्जनावग्रहश्चतुर्विधः प्रज्ञप्तः, तद्यथा-श्रोत्रेन्द्रियव्यञ्जनावग्रहः इत्यादि सूत्रसिद्धम् । **आह**-पञ्चेन्द्रियमनःसद्भावे सति किमित्ययं चतुर्विध इति ?, **अत्रोच्यते**, नयनमनसोरप्राप्तकारित्वाद्, अप्राप्तकारित्वं च विषयकृतानुग्रहोपघातशून्यत्वात्, प्राप्तकारित्वे पुनरनलजलशूलाद्यालोकने दहनक्लेदनपाटनादयः स्युः, अत्र च विषयदेशं गत्वा न पश्यति, प्राप्तं चार्थं नालम्बत इत्येतावन्नियम्यते, मूर्तिमता पुनः प्राप्तेन भवत एवानुग्रहोपघातौ भास्करकिरणादिनेति, **अन्यस्त्वाहव्यवहितार्थानुपलब्धेरनुमानात्** प्राप्तकारित्वं लोचनस्येति, **एतदयुक्तं,** नैकान्तिकत्वाद्, काचाऽभ्रपटलस्फटिकान्तरितोपलब्धेः, **स्यादेतत्**नायना रश्मयो निर्गत्यतमर्थं गृह्णन्तीति दर्शने रश्मीनां तैजसत्वात्, तेजोद्रव्यैरप्रतिस्खलनाददोष इति, **एतदप्ययुक्तं,** महाज्वालादौ प्रतिस्खलनोपलब्धेरित्यत्र बहु वक्तव्यम् तत्तु नोच्यते ग्रन्थविस्तरभयाद् गमनिकामात्रमेतदिति ।

॥ **श्रीमलयगिरीयानन्दीवृत्तिः** ॥

सम्प्रति तु व्यञ्जनावग्रहादूर्ध्वमर्थावग्रह इति क्रममाश्रित्य प्रथमं व्यञ्जनावग्रहस्वरूपं प्रतिपिपादयिषुः शिष्यः प्रश्नं कारयति-

**से किं तं वंजणुग्गहे ?, वंजणुग्गहे चउव्विहे पण्णत्ते, तंजहा-सोइंदिअवंजणुग्गहे घाणिंदियवंजणुग्गहे जिब्भिंदियवंजणुग्गहे फासिंदिअवंजणुग्गहे । से तं वंजणुग्गहे २९**

'**से किं तमि**'त्यादि, अथ कोऽयं व्यञ्जनावग्रहः ?, आचार्य आह-व्यञ्जनावग्रहश्चतुर्विधः प्रज्ञप्तः, तद्यथा-'श्रोत्रेन्द्रियव्यञ्जनावग्रह' इत्यादि, **अत्राह**-सत्सु पञ्चस्विन्द्रियेषु षष्ठे च मनसि कस्मादयं चतुर्विधो व्यावर्ण्यते ?, **उच्यते,** इह व्यञ्जनमुपकरणेन्द्रियस्य शब्दादिद्रव्याणां च परस्परं सम्बन्ध उच्यते, सम्बन्धश्चतुर्णामेव श्रोत्रेन्द्रियादीनां, न नयनमनसोः, तयोरप्राप्यकारित्वात्, आह-कथमप्राप्यकारित्वं तयोरवसीयते ?, उच्यते, विषयकृतानुग्रहोपघाताभावात्, तथाहि-यदि प्राप्तमर्थं

चक्षुर्मनो वा गृह्णीयात् तर्हि यथा स्पर्शनेन्द्रियं स्रक्चन्दनादिकं अङ्गारादिकं च प्राप्तमर्थं परिच्छिन्द-त्तत्कृतानुग्रहोपघातभाग् भवति तथा चक्षुर्मनसी अपि भवेताम्, विशेषाभावात्, न च भवतः तस्माद-प्राप्यकारिणी ते, **ननु** दृश्येते एव चक्षुषोऽपि विषयकृतावनुग्रहोपघातौ, तथाहि-घनपटलविनिर्मुक्ते नभसि सर्वतो निविडजठरिमोपेतं करप्रसरमभिसर्प्पयन्तमंशुमालिनमनवरतमवलोकमानस्य भवति चक्षुषो विघातः, शशाङ्ककरकदम्बकं यदि वा तरङ्गमालोपशोभितं जलं तरुमण्डलं च शाड्वलं निरन्तरं निरीक्षमाणस्य चानुग्रहः, **तदेतदपरिभावितभाषितं**, यतो न ब्रूमः-सर्वथा विषयकृता-नुग्रहोपघातौ न भवतः, किन्त्वेतावदेव वदामो यदा विषयं विषयतया चक्षुरवलम्बते तदा तत्कृताव-नुग्रहोपघातौ तस्य न भवत इति तदप्राप्यकारि, शेषकालं तु प्राप्तेनोपघातकेनोपघातो भविष्यति अनुग्राहकेण चानुग्रहः, तत्रांशुमालिनो रश्मयः सर्वत्रापि प्रसरमुपददाना यदाऽंशुमालिनः सम्मुख-मीक्षते तदा ते चक्षुर्देशमपि प्राप्नुवन्ति, ततश्चक्षुःसम्प्राप्तास्ते स्पर्शनेन्द्रियमिव चक्षुरुपघ्नन्ति, शीतांशु-रश्मयश्च स्वभावत एव शीतलत्वादनुग्राहकास्ततस्ते चक्षुःसम्प्राप्ताः सन्तस्ते स्पर्शनेन्द्रियमिव चक्षुर-नुगृह्णन्ति, तरङ्गमालासङ्कुलजलावलोकने च जलकणसम्पृक्तसमीरावयवसंस्पर्शतोऽनुग्रहो भवति, शाड्वलतरुमण्डलावलोकनेऽपि शाड्वलतरुच्छायासम्पर्कशीतीभूतसमीरणसंस्पर्शात्, शेषकालं तु जलावलोकनेऽनुग्रहाभिमान उपघाताभावादवसेयः, भवति चोपघाताभावेऽनुग्रहाभिमानो यथाऽति-सूक्ष्माक्षरनिरीक्षणाद्विनिवृत्त्य यथासुखं नीलीरक्तवस्त्राद्यवलोकने, इत्थं चैतदङ्गीकर्त्तव्यं, अन्यथा समाने सम्पर्के यथा सूर्यमीक्षमाणस्य सूर्येणोपघातो भवति तथा हुतवहजलशूलाद्यालोकने दाहक्लेदपाटनादयोऽपि कस्मान्न भवन्तीति ?, अपि च-यदि चक्षुः प्राप्यकारि तर्हि स्वदेशगतर-जोमलाञ्जनशिलाकादिकं किं न पश्यति ?, तस्मादप्राप्यकार्येव चक्षुः । **ननु** यदि चक्षुरप्राप्यकारि तर्हि मनोवत्कस्मादविशेषेण सर्वानपि दूरव्यवहितादीनर्थान् न गृह्णाति, यदि हि प्राप्तं परिच्छिन्द्यात्तर्हि यदेवानावृतमदूरदेशं वा तदेव गृह्णीयात् नावृतं दूरदेशं वा, तत्र चक्षुरश्मीनां गमनासम्भवः सम्पर्काभावात्, ततो युज्यते चक्षुषो ग्रहणाग्रहणे, नान्यथा, तथा चोक्तम् प्राप्यकारि चक्षुः, उपलब्ध्यनुपलब्ध्योरनावरणेतराप्रेक्षणात् अदूरेतराप्रेक्षणाच्च, यदि हि चक्षुरप्राप्यकारि भवेत्तदाऽऽव-रणभावादनुपलब्धिः अन्यथोपलब्धिरिति न स्यात्, न हि तदावरणमुपघातकरणसमर्थं, प्राप्यकारित्वे तु मूर्त्तद्रव्यप्रतिघातादुपपत्तिमान् व्याघातोऽतिदूरे च गमनाभावादिति, प्रयोगश्चात्र न चक्षुषो विषय-परिमाणं, अप्राप्यकारित्वात्, मनोवत्, तदेतदयुक्ततरं, दृष्टान्तस्य साध्यविकलत्वात्, न खलु मनो-ऽप्यशेषान् विषयान् गृह्णाति, तस्यापि सूक्ष्मेष्वागमगम्यादिष्वर्थेषु मोहदर्शनात्, तस्माद् यथा मनो-ऽप्राप्यकार्यपि स्वावरणक्षयोपशमसापेक्षत्वात् नियतविषयं तथा चक्षुरपि स्वावरणक्षयोपशम-सापेक्षत्वादप्राप्यकार्यपि योग्यदेशावस्थितनियतविषयमिति न व्यवहितानामुपलम्भप्रसङ्गो नापि दूरदेशस्थितानामिति । अपि च-दृष्टमप्राप्यकारित्वेऽपि तथास्वभावविशेषाद्योग्यदेशापेक्षणं, यथा-

ऽयस्कान्तस्य, न खल्वयस्कान्तोऽयसोऽप्राप्यकर्षणे प्रवर्त्तमानः सर्वस्याप्ययसो जगद्वर्त्तिन आकर्षको भवति, किन्तु प्रतिनियतस्यैव, (यत्तु)**शङ्करस्वामी** प्राह-"**अयस्कान्तोऽपि प्राप्यकारी, अयस्कान्तच्छायाणुभिः सह समाकृष्यमाणवस्तुनः सम्बन्धभावात्, केवलं ते छायाणवः सूक्ष्मत्वान्नोपलभ्यन्ते**" इति, तदेतदुन्मत्तप्रलपितं, तद्ग्राहकप्रमाणाभावात्, न हि तत्र छायाणु-सम्भवग्राहकं प्रमाणमस्ति, न चाप्रमाणकं प्रतिपत्तुं शक्नुमः, **अथा**स्ति ग्राहकं प्रमाणमनुमानं, इह यदाकर्षणं तत्संसर्गपूर्वकं, यथाऽयोगोलकस्य सन्दंशेन, आकर्षणं चायसोऽयस्कान्तेन, तत्र साक्षादयस्कान्ते संसर्गः प्रत्यक्षबाधित इत्यर्थात् छायाणुभिः सह द्रष्टव्य इति, **तदपि बालिशजल्पितं,** हेतोरनैकान्तिकत्वात्, मन्त्रेण व्यभिचारात्, तथाहि-मन्त्रः स्मर्यमाणोऽपि विवक्षितं वस्त्वाकर्षति, **न च** तत्र कोऽपि संसर्ग इति, अपि च-यथा छायाणवः प्राप्तमयः समाकर्षन्ति तथा काष्ठादिकमपि प्राप्तं कस्मान्नाकर्षन्ति ?, शक्तिप्रतिनियमादिति **चेत्** ननु स शक्तिप्रतिनियमोऽप्राप्तावपि तुल्य एवेति व्यर्थं छायाणुपरिकल्पनम् । **अन्यस्त्वाह**अस्ति चक्षुषः प्राप्यकारित्वे व्यवहितार्थानुपलब्धिरनुमानं प्रमाणं, **तदयुक्तं,** अत्रापि हेतोरनैकान्तिकत्वात्, काचाभ्रपटल-स्फटिकैरन्तरितस्याप्युपलब्धेः, **अथे**दमाचक्षीथाःनायना रश्मयो निर्गत्य तमर्थं गृह्णन्ति, नायनाश्च रश्मयस्तैजसत्वान्न तेजोद्रव्यैः प्रतिस्खल्यन्ते ततो न कश्चिद्दोषः, **तदपि न मनोरमं,** महाज्वालादौ स्खलनोपलब्धेः, तस्मादप्राप्यकारि चक्षुरिति स्थितं ।

## नन्दिसूत्र अवचूरि

**से किं तमित्यादि** । अथ किं तत् श्रुतनिश्रितं मतिज्ञानं ?, गुरूः आह - श्रुतनिश्रितं मतिज्ञानं चतुर्विधं प्रज्ञप्तं, तद्यथा-अवग्रहईहा-अपायो-धारणा च, तत्र अवग्रहणं अवग्रहः, अनिर्देश्यसामान्यमात्ररूपार्थग्रहणं इत्यर्थः । तथा ईहनं ईहा, सद्भूतार्थपयोलोचनरूपा चेष्टा इत्यर्थः । किं उक्तं भवति ? अवग्रहात् उत्तरकालं अपायात् पूर्वं सद्भूतार्थविशेषोपादानाभिमुखोऽसद्भूतार्थ-विशेषपरित्यागाभिमुखः - 'प्रायो अत्र मधुरत्वादयः शङखादिधर्मा दृश्यन्ते खरकर्कशनिष्ठुरतादायः शाङ्गादिशब्दधर्म्मा इति । एवंरुपो मतिविशेष ईहा । तथा यस्य एव अवगृहीतस्येहितस्यार्थस्य निर्णयरूपोऽध्यवसायोऽपायः, शाङख एव अयं, शाङ्र्ग एव अयं, शाङ्र्ग एव अयं इत्यादिरूपोऽवधारणात्मकः प्रत्ययोऽपाय इत्यर्थः । तस्य एव अर्थस्य निर्णीतस्य धारणं धारणा, सा च त्रिधा अविच्युतिः वासना स्मृतिश्च । तत्र तदुपयोगात् अविच्यवनं अविच्युतिः, सा च अन्तर्मुहूर्त्तप्रमाणा । ततः तया आहितो यः संस्कारः सा वासना, सा च संख्येयमसंख्येयं वा कालं यावत् भवति । ततः कालान्तरे कुतश्चित्तादृशार्थदर्शनादिकारणात् संस्कारस्य प्रबोधे यत् ज्ञानं उदयते - तदेव इदं यन्मया प्राग् उपलब्धं' इत्यादिरूपं सा स्मृतिः । उक्तं च -

**"तदनंतरं तदत्थाविच्चवणं जो उ वासणाजोगो ।**
**कालांतरे जं पुण अणुसरणं धारणा सा उ ॥ १ ॥"**

एताश्च अविच्युतिवासनास्मृतयो धरणलक्षणसामान्याऽन्वर्थयोगाद्धारणाशब्दवाच्याः ॥

अथ कोऽयं अवग्रहः ?, सूरिराह – अवग्रहो द्विविधः प्रज्ञप्तः, तद्यथा – अर्थावग्रहश्च व्यञ्जनावग्रहश्च । तत्र अर्थ्यत इत्यर्थः, अर्थस्यावग्रहणं अर्थावग्रहः – सकलरुपादिविशेष-निरपेक्षानिर्देश्यसामान्यमात्ररुपार्थग्रहणं एकसामयिकं इत्यर्थः, तथा व्यज्यतेऽनेन अर्थः प्रदीपेनेव घट इति व्यञ्जनम् । तच्च उपकरणेन्द्रियस्य श्रोत्रादेः शब्ददिपरिणतद्रव्याणां च परस्परं सम्बन्धः, सम्बन्धे सति सोऽर्थः शब्दादिरुपः श्रोतादि इन्द्रियेण व्यञ्जजितुं शक्यते, न अन्यथा, ततः सम्बन्धो व्यञ्जनं । व्यञ्जनेन – सम्बन्धेन अवग्रहणं सम्बध्यमानस्य शब्दादिरुपस्यार्थस्य अव्यक्तरुपः परिच्छेदो व्यञ्जनावग्रहः । अथवा व्यज्यन्ते इति व्यञ्जनानि, "कृत् बहुलं" इति वचनात् कर्म्मण्यनट्, सम्प्रति तु व्यञ्जनावग्रहात् ऊद्धर्वं अर्थावग्रह इति क्रमं आश्रित्य प्रथमं व्यञ्जनावग्रहस्वरुपं प्रतिपिपादयिषुः शिष्यः प्रश्नं करोति **से किं तं वंजणुग्गहे ?** अथ कोऽयं व्यञ्जनावग्रहः ?, आचार्य आह – व्यञ्जनावग्रहः चतुर्विधः प्रज्ञप्तः, तद्यथा – "श्रोत्रेन्द्रियव्यञ्जनावग्रह" इत्यादि । अत्र आह – सत्सु पञ्चसु इन्द्रियेषु षष्ठे च मनसि कस्मात् अयं चतुर्विधा व्यावर्ण्यते ?, उच्यते, इह व्यञ्ज उपकरणेन्द्रियस्य शब्दादिद्रव्याणां च परस्परं सम्बन्ध उच्यते । सम्बन्धश्चतुर्णां एव श्रोत्रेन्द्रियादीनां, न नयनमनसोः, तयोः अप्राप्यकारित्वात् । आह – कथं अप्राप्यकारित्वं तयोः अवसीयते ? उच्यते, विषयकृतानुग्रहोपघाताभावात् । तथाहि यदि प्राप्तं अर्थं चक्षुः मनो वा गृह्णीयात्, तर्हि यथा स्पर्शनेन्द्रिय स्त्रक्चन्दनादिकं अङ्गारादिकं च प्राप्तमर्थं परिच्छिन्नदन् तत्कृतानुग्रहोपघातभाग् भवति । तथा चक्षुः मनसी अपि भवेतां, विशेषाभावात्, न च भवतः तस्मादप्राप्यकारिणी ते । **ननु** दृश्यते एव चक्षुषो विषयकृतौ अनुग्रहोपघातौ । तथाहि – घनपटलविनिर्मुक्ते नभसि सर्वतो निबिडजरठिमोपेतं करप्रसरमभिसर्प्पयन्तमंशुमालिनमनवरतं अवलोकमानस्य भवति चक्षुषो विघातः । शशाङ्ककरकदम्बकं यदि वा तरङ्गमालोपशोभितं जलं तरुमण्डलं च शाड्वलं निरन्तर निरीक्ष्यमाणस्य च अनुग्रहः, तदेतदपरिभावितभाषितं । यतो न ब्रूमः-सर्वथा विषयकृतानुग्रहोपघातौ न भवतः, किं त्वेतावदेव वदामो–यदा विषयं विषयतया चक्षुरवलम्बते तदा तत्कृतावनुग्रहोपघातौ तस्य न भवत इति तदप्राप्यकारि, शेषकालं तु प्राप्तेनोपघातकेनोपघातो भविष्यत्यनुग्राहकेण चानुग्रहः ।

**॥ आवश्यक-हारिभद्रीयवृत्तिः ॥**

इत्थमवग्रहादीनां स्वरूपमभिधाय इदानीं श्रोत्रेन्द्रियादीनां प्राप्ताप्राप्तविषयतां प्रतिपिपादयिषुराह-

**पुट्ठं सुणेइ सद्दं रूवं पुण पासई अपुट्ठं तु । गंधं रसं च फासं च बद्धपुट्ठं वियागरे ॥ ५॥**

**व्याख्या**–आह–**ननु** व्यञ्जनावग्रहनिरूपणाद्वारेण श्रोत्रेन्द्रियादीनां प्राप्ताप्राप्तविषयता प्रतिपादितैव, किमर्थं पुनरयं प्रयास इति, **उच्यते,** तत्र प्रक्रान्तगाथा व्याख्यानद्वारेण प्रतिपादिता, साम्प्रतं तु सूत्रतः प्रतिपाद्यत इत्यदोषः । तत्र 'स्पृष्टं' इत्यालिङ्गितं तनौ रेणुवत्, शृणोति गृह्णाति उपलभत इति पर्यायाः, कम् ?–शब्द्यतेऽनेनेति शब्दः तं शब्दप्रायोग्यं द्रव्यसंघातं, इदमत्र हृदयम् तस्य सूक्ष्मत्वात् भावुकत्वात् प्रचुरद्रव्यरूपत्वात् श्रोत्रेन्द्रियस्य चान्येन्द्रियगणात्प्रायः पटुतरत्वात् स्पृष्टमात्रमेव शब्दद्रव्यनिवहं गृह्णाति । रूप्यत इति रूपं तद्रूपं पुनः, पश्यति गृह्णाति उपलभत इत्येकोऽर्थः, अस्पृष्टमनालिङ्गितं गन्धादिवत्र सम्बद्धमित्यर्थः, तुशब्दस्त्वेवकारार्थः, स चावधारणे, रूपं पुनः पश्यति अस्पृष्टमेव, चक्षुषः अप्राप्तकारित्वादिति भावार्थः, पुनःशब्दोविशेषणार्थः, किं विशिनष्टि ?–अस्पृष्टमपि योग्यदेशावस्थितम्, न पुनरयोग्यदेशावस्थितं अमरलोकादि । गन्ध्यते घ्रायत इति गन्धस्तं, रस्यत इति रसस्तं च, स्पृश्यत इति स्पर्शस्तं च, चशब्दौ पूरणार्थौ, 'बद्धस्पृष्टं' इति बद्धमाश्लिष्टं नवशरावे तोयवदात्मप्रदेशैरात्मीकृतमित्यर्थः, स्पृष्टं पूर्ववत्, प्राकृतशैल्याचेत्थमुपन्यासो 'बद्ध-पुट्ठं' ति, अर्थतस्तु स्पृष्टं च बद्धं च स्पृष्टबद्धम् । **आह–यद्**बद्धं गन्धादि तत् स्पृष्टं भवत्येव, अस्पृष्टस्य बन्धायोगात्, ततश्च स्पृष्टशब्दोच्चारणं गतार्थत्वादनर्थकमिति, **उच्यते,** सर्वश्रोतृसाधारणत्वाच्छास्त्रारम्भस्यायमदोष इति । त्रिप्रकाराश्च श्रोतारो भवन्ति केचिद् उद्घाटितज्ञाः, केचित् मध्यमबुद्धयः, तथाऽन्ये प्रपञ्चितज्ञा इति, तत्र प्रपञ्चितज्ञानां अनुग्रहाय गम्यमानस्याप्यभिधानमदोषायैव, अथवा विशेषणसमासाङ्गीकरणाददोषः, स्पृष्टं च तद्बद्धं च स्पृष्टबद्धं, तत्र स्पृष्टं गन्धादि विशेष्यं, बद्धमिति च विशेषणं । **आह**–एवमपि स्पृष्टग्रहणमतिरिच्यते, यस्माद्यद्बद्धं न तत्स्पृष्टत्वव्यभिचारि, उभयपदव्यभिचारे च विशेषणविशेष्यभावो दृष्टो यथा नीलोत्पलमिति, न चेह उभयपदव्यभिचारः, **अत्रोच्यते, नैष दोषः,** यस्मादेकपदव्यभिचारेऽपि विशेषणविशेष्यभावो दृष्टो, यथा अब्द्रव्यं पृथिवी द्रव्यमिति, भावना अब् द्रव्यमेव, न द्रव्यत्वं व्यभिचरति, द्रव्यं पुनरब् चानब् चेति व्यभिचारि, अथ च विशेषणविशेष्यभाव इति । प्रकृतभावार्थस्त्वयम्–आलिङ्गितानन्तरमात्मप्रदेशैरागृहीतं गन्धादि बादरत्वाद् अभावुकत्वात् अल्पद्रव्यरूपत्वात् घ्राणादीनां चापटुत्वात् गृह्णाति निश्चिनोति घ्राणेन्द्रियादिगण इत्येवं व्यागृणीयात् प्रतिपादयेदितियावत् ।

**आह**–भवतोक्तं योग्यदेशावस्थितमेव रूपं पश्यति, न पुनरयोग्यदेशावस्थितमिति, तत्र कियान् पुनश्चक्षुषो योग्यविषयः ?, कियतो वा देशादागतं श्रोत्रादि शब्दादि गृह्णातीति, **उच्यते,** श्रोत्रं तावच्छब्दं जघन्यतः खल्वङ्गुलासंख्येयमात्राद्देशात्, उत्कृष्टतस्तु द्वादशभ्यो योजनेभ्य इति, चक्षुरिन्द्रियमपि रूपं जघन्येनाङ्गुलसंख्येयभागमात्रावस्थितं पश्यति, उत्कृष्टतस्तु योजनशतसहस्राभ्यधिकव्यवस्थितं इति, घ्राणरसनस्पर्शनानि तु जघन्येनाङ्गुलासंख्येयभागमात्राद्देशादागतं गन्धादिकं गृह्णन्ति, उत्कृष्टतस्तु नवभ्यो योजनेभ्य इति । आत्माङ्गुलनिष्पन्नं चेह योजनं ग्राह्यमिति । **आह**–उक्तप्रमाणं विषयमुल्लङ्घ्य

कस्माच्चक्षुरादीनि रूपादिकमर्थं न गृह्णन्तीति, **उच्यते**, सामर्थ्याभावात्, द्वादशभ्यो नवभ्यश्च योजनेभ्यः परतः समागतानां शब्दादिद्रव्याणां तथाविधपरिणामाभावाच्च, मनसस्तु न क्षेत्रतो विषय-परिमाणमस्ति, पुद्गलमात्रनिबन्धनाभावात्, इह यत् पुद्गलमात्रनिबन्धनियतं न भवति, न तस्य विषयपरिमाणमस्ति, यथा केवलज्ञानस्य, यस्य च विषयपरिमाणमस्ति, तत्पुद्गलमात्रनिबन्धनियतं दृष्टं, यथाऽवधिज्ञानं मनःपर्यायज्ञानं वेति गाथासमासार्थः ॥

साम्प्रतं यदुक्तमासीत् यथा "नयनमनसोरप्राप्तकारित्वं '**पुट्ठं सुणेइ सद्दं**' इत्यत्र वक्ष्यामः, तदुच्यते, नयनं योग्यदेशावस्थिताप्राप्तविषयपरिच्छेदकं, प्राप्तिनिबन्धनतत्कृतानुग्रहोपघातशून्यत्वात्, मनोवत्, स्पर्शनेन्द्रियं विपक्ष इति । **आह**जलघृतवनस्पत्यालोकनेष्वनुग्रहसद्भावात् सूर्याद्यालोकनेषु चोपघातसद्भावात् असिद्धो हेतुः, मनसोऽपि प्राप्तविषय-परिच्छेदकत्वात्साध्यविकलो दृष्टान्तः, तथा च लोके वक्तारो भवन्ति-"अमुत्र मे गतं मनः" इति, **अत्रोच्यते**, प्राप्तिनिबन्धनाख्यहेतुविशेषणार्थ-निराकृतत्वाद् अस्याक्षेपस्येत्यदोषः । किं च-यदि हि प्राप्तिनिबन्धनौ विषयकृतावनुग्रहोपघातौ स्यातां, एवं तर्हि अग्निशूल जलाद्यालोकनेषु दाहभेदक्लेदादयः स्युरिति । किं च-प्राप्तविषयपरिच्छेदकत्वे सति अक्षि-अञ्जनमलशलाकादिकमपि गृह्णीयात् । **आह** नायना मरीचयो निर्गत्य तमर्थं गृह्णन्ति, ततश्च तेषां तैजसत्वात् सूक्ष्मत्वाच्चानलादिसम्पर्के सत्यपि दाहाद्यभाव इति, **अत्रोच्यते**, प्राक् प्रतिज्ञातयोर-नुग्रहोपघातयोरप्यभावप्रसङ्गाद् अयुक्तमेतत्, तदस्तित्वस्य उपपत्त्या ग्रहीतुमशक्यत्वाच्च । व्यवहितार्थानुपलब्ध्या तदस्तित्वावसाय इति **चेत्, न,** तत्रापि तदुपलब्धौ क्षयोपशमाभावात् व्यवहितार्थानुपलब्धिसिद्धेः, आगममात्रमेवैतत् इति **चेत्, न,** युक्तिरप्यस्ति, आवरणाभावेऽपि परमाण्वादौ दर्शनाभावः, स च तद्विधक्षयोपशमकृतः ।

**॥ आवश्यकसूत्र मलयगीरिवृत्ति ॥**

स च चतुर्विधस्तद्यथाश्रोत्रेन्द्रियव्यञ्जनावग्रहः घ्राणेन्द्रियव्यञ्जनावग्रहः जिह्वेन्द्रियव्यञ्जनावग्रहः स्पर्शनेन्द्रियव्यञ्जनावग्रहश्च, **ननु** सत्सु पञ्चस्विन्द्रियेषु षष्ठे च मनसि कस्मादयं चतुर्विधः ?, **उच्यते**, इह व्यञ्जनमुपकरणेन्द्रियस्य शब्दादिपरिणतद्रव्याणां परस्परं सम्बन्ध उच्यते, सम्बन्धश्च चतुर्णामेव श्रोत्रेन्द्रियादीनां, न नयनमनसोः, तयोरप्राप्यकारित्वात्, कथमप्राप्यकारितेति **चेत्, उच्यते**, विषय-कृतानुग्रहोपघाताभावात्, यदि पुनः प्राप्तमर्थं चक्षुर्मनो वा गृह्णीयात् तर्हि यथा स्पर्शनेन्द्रियं स्रक्चन्दनादिकमङ्गारादिकं वा प्राप्तमर्थं परिच्छिन्दत्तत्कृतानुग्रहोपघातभाग् भवति, तथा चक्षुर्मनसी अपि भवेतां, न च भवतस्तस्मादप्राप्यकारिणी ते इति, **ननु** दृश्येते चक्षुषोऽनुग्रहोपघातौ, तथाहि-जरठकरप्रसरमभिसर्प्पयन्तमंशुमालिनं चिरं विलोकमानस्य भवति चक्षुषो विघातः, शशाङ्ककरनिकरं तरङ्गमालोपशोभितं जलं शाड्वलतरुमण्डलं वाऽवलोकमानस्यानुग्रहः, तदेतज्जाड्यविलसितं, यतो न वयं ब्रूमः सर्वथा चक्षुषोऽनुग्रहोपघातौ न भवतः, किन्तु विषयमप्राप्तं चक्षुर्गृहणातीत्येवाभिदध्महे,

विषयकृतानुग्रहोपघातासम्भवेऽपि तत्परिच्छेदभावात्, प्राप्तेन तूपघातकेनोपघातो भविष्यत्यनुग्राहकेण चानुग्रहः, तत्रांशुमालिनो रश्मयः सर्वत्रापि प्रसरमुपाददते, नात्र विसंवादः, ततस्ते चक्षुः सम्प्राप्ताः सन्तः स्पर्शनेन्द्रियमिव चक्षुरप्युपघ्नन्ति, शीतांशुरश्मयस्तु स्वभावत एव शीतलत्वादनुग्राहकाः ततस्ते चक्षुरनुगृह्णन्ति, तरङ्गमालासङ्कुलजलावलोकेन च जलकणसम्पृक्तसमीरणावयवसंस्पर्शतोऽनुग्रहः, शाड्वलतरुमण्डलावलोकनेऽपि शाड्वलतरुच्छायासम्पर्कशीतीभूतसमीरसंस्पर्शात्, शेषकालं तु जलाद्यवलोकनेऽनुग्रहाभिमान उपघाताभावादवसेयः, भवति चोपघाताभावेऽनुग्रहाभिमानो, यथाऽति-सूक्ष्माक्षरनिरीक्षणाद्विनिवृत्त्य यथासुखं नीलीरक्तवस्त्राद्यवलोकने, इत्थं चैतदङ्गीकर्त्तव्यम्, अन्यथा सम्पर्के यथा सूर्येणोपघातो भवति तथा हुतवहजलशूलाद्यालोकने दाहक्लेदपाटनादयोऽपि कस्मान्न भवन्ति ?, अपिच-यदि चक्षुः प्राप्यकारि तर्हि स्वदेशगतं रजोमलाञ्जनादि किं न पश्यति ?, तस्मादप्राप्यकार्येव चक्षुः, **ननु** यदि चक्षुरप्राप्यकारि तर्हि कस्मादविशेषेण सर्वानप्यर्थान् न गृह्णाति, यदि हि प्राप्तं परिच्छिन्द्यात् तर्हि यदेवानावृतमदूरदेशं वा तदेव गृह्णीयात् नावृतं दूरदेशस्थं वा, तत्र नयनरश्मीनां गमनासम्भवात् संपर्क्काभावात्, ततो युज्येत चक्षुषो ग्रहणाग्रहणे नान्यथा, तथा चोक्तम्-"**प्राप्यकारि चक्षुः उपलब्ध्यनुपलब्ध्योरनावरणेतरापेक्षणात् दूरेतरापेक्षणाच्च, यदि हि चक्षुरप्राप्यकारि भवेत् तदा आवरणभावादनुपलब्धिरन्यथोपलब्धिरिति न स्यात्, न हि तदावरणमुपघातकरणसमर्थं, प्राप्यकारित्वे तु मूर्त्तद्रव्यप्रतिघातादुपपत्तिमान् तथा व्याघातः, अतिदूरे च गमनाभावादिति,**" प्रयोगश्चात्र-न चक्षुषो विषयपरिमाणमप्राप्यकारित्वात्, मनोवत्, **तदेतद**युक्ततरं, दृष्टान्तस्य साध्यविकलत्वात्, न खलु मनोऽप्यशेषान् विषयान् गृह्णाति, तस्यापि सूक्ष्मेष्वागमगम्यादिष्वर्थेषु मोहदर्शनात्, ततो यथा मनोऽप्राप्यकार्यपि स्वावरणक्षयोपशम-सापेक्षत्वान्नियतविषयं तथा चक्षुरपि स्वावरणक्षयोपशमसापेक्षत्वात् योग्यदेशावस्थितनियतविषयमिति न व्यवहितानामुपलम्भप्रसङ्गो नापि दूरदेशस्थितानामिति, अपिचदृष्टमप्राप्यकारित्वेऽपि तथास्वभाव-विशेषात् योग्यदेशापेक्षणं, यथा अयस्कान्तस्य, न खल्वयस्कान्तोऽयसोऽप्राप्यकर्षणे प्रवर्त्तमानः सर्वस्याप्ययसो जगद्वर्त्तिन आकर्षको भवति, किन्तु प्रतिनियतस्यैव, अथ मन्येथा अयस्कान्तोऽपि प्राप्यकारी, अयस्कान्तच्छायाणुभिः समाकृष्यमाणवस्तुनः सम्बन्धभावात्, केवलं ते छायाणवः सूक्ष्मत्वान्नोपलभ्यन्ते, तदेतदुन्मत्तप्रलपितं, तद्ग्राहकप्रमाणाभावात्, न हि तत्र छायाणुसम्भवग्राहकं प्रमाणमस्ति, न चाप्रमाणकं प्रतिपत्तुं शक्नुमः, अथास्ति तद्ग्राहकं प्रमाणमनुमानं, इह यदाकर्षणं तत्संसर्गपूर्वकं यथाऽयोगोलकस्य संदंशेन, चायसोऽयस्कान्तेन, तत्र साक्षादयस्कान्तेन संसर्गः प्रत्यक्षबाधित इत्यर्थात् छायाणुभिः सह द्रष्टव्य इति, तदेतद्बालिशजल्पितं, हेतोरनैकान्तिकत्वात्, मन्त्रेण व्यभिचारात्, तथाहि-मन्त्रः स्मर्यमाणोऽपि विवक्षितं वस्त्वाकर्षति, नच तत्र कोऽपि संसर्ग इति ॥ **अन्यस्त्वाह**अस्ति चक्षुषः प्राप्यकारित्वे व्यवहितार्थानुपलब्धिरनुमानं, **तदप्ययुक्तं**, अत्रापि हेतोरनेकान्तिकत्वात्, काचाभ्रस्फटिकैर्व्यवहितस्याप्युपलब्धेः, **अथेद**माचक्षीथाः नायना रश्मयो

निर्गत्य तमर्थं गृह्णन्ति, नायनाश्च रश्मयस्तैजसत्वान्न तेजोद्रव्यैः प्रतिस्खल्यन्ते, ततो न कश्चिद्दोषः, **तदपि** न मनोरमं, महाज्वालादौ प्रतिस्खलनोपलब्धेः, तस्मादप्राप्यकारित्वं चक्षुषः ।

**॥ विशेषावश्यकभाष्य टीका ॥**

तदेवं स्पर्शन-रसन-घ्राण श्रोत्राणां प्राप्यकारित्वं समर्थितम्; सांप्रतं 'नयण-मणोवज्जिदिय-भेयाओ' इत्यादिना सूचितं नयन-मनसोरप्राप्यकारित्वमभिधित्सुर्नयनस्य तावदाह-

**लोयणमपत्तविसयं मणो व्व जमणुग्गहाइसुण्णं ति ।**
**जल-सूरालोयाइसु दीसंति अणुग्गह-विघाया ॥२०९॥**

अप्राप्तोऽसंबद्धोऽसंश्लिष्टो विषयो ग्राह्यवस्तुरूपो यस्य तदप्राप्तविषयं लोचनम्, अप्राप्यकारीत्यर्थः, इति प्रतिज्ञा । कुतः ?, इत्याह-यद् यस्मादनुग्रहादिशून्यम्, आदिशब्दादुपघात-परिग्रहःग्राह्यवस्तुकृतानुग्रहोपघातशून्यत्वादित्यर्थः, अयं च हेतुः । मनोवदिति दृष्टान्तः । यदि हि लोचनं ग्राह्यवस्तुना सह संबध्य तत्परिच्छेदं कुर्यात्, तदाऽग्न्यादिदर्शने स्पर्शनस्येव दाहाद्युपघातः स्यात्; कोमलतुल्याद्यवलोकने त्वनुग्रहो भवेत्, न चैवम्, तस्मादप्राप्यकारि लोचनमिति भावः । मनस्यप्राप्यकारित्वं परस्याऽसिद्धम्, इति कथं तस्य दृष्टान्तत्वेनोपन्यासः ? इति **चेत्** । सत्यम्, किन्तु वक्ष्यमाणयुक्तिभिस्तत्र तत् सिद्धम्, इति निश्चित्य तस्येह दृष्टान्तत्वेन प्रदर्शनम्, इत्यदोषः । **अथ** परो हेतोरसिद्धतामुद्भावयन्नाह-'जल-सूरेत्यादि' आदिशब्दः, आलोकशब्दश्च प्रत्येकमभिसंबध्यते । ततश्च जलादीनामालोके लोचनस्याऽनुग्रहो दृश्यते, सूरादीनां त्वालोके उपघात इति । अतो 'अनुग्रहादि-शून्यत्वात्' इत्यसिद्धो हेतुरित्यर्थः । इदमुक्तं भवति-जल-घृत-नीलवसन-वनस्पती-न्दुमण्डलाद्य-वलोकनेन नयनस्य परमाश्वासलक्षणोऽनुग्रहः समीक्ष्यते; सूर-सितभित्त्यादिदर्शने तु जलविगलनादि-रूप उपघातः संदृश्यत इति । अतः किमुच्यते-'जमणुग्गहाइसुण्णं ति' ? ॥ इति गाथार्थः ॥२०९॥

अत्रोत्तरमाह-

**डज्जेज्ज पाविउं रविकराइणा फरिसणं व को दोसो ? ।**
**मणेज्ज अणुग्गहं पिव उवघायाभावओ सोम्मं ॥ २१० ॥**

अयमत्र भावार्थःअस्मदभिप्रायाऽनभिज्ञोऽप्रस्तुताभिधायी परः, न हि वयमेतद् ब्रूमो यदुत-चक्षुषः कुतोऽपि वस्तुनः सकाशात् कदाचित् सर्वथैवानुग्रहोपाघातौ न भवतः । ततो रविकरादिना दाहाद्यात्मकेनोपघातवस्तुना परिच्छेदानन्तरं पश्चाच्चिरमवलोकयतः प्रतिपत्तुश्चक्षुः **प्राप्य** समासाद्य स्पर्शनेन्द्रियमिव **दह्येत**दाहादिलक्षणस्तस्योपघातः क्रियेतेत्यर्थः । एतावता चाऽप्राप्यकारिचक्षुर्वादि-नामस्माकं **को दोषः** ? न कश्चित्, दृष्टस्य बाधितुमशक्यत्वादिति भावः । तथा यत् स्वरूपेणैव

**सौम्यं** शीतलं शीतरश्मि वा जलघृतचन्द्रादिकं वस्तु, तस्मिंश्चिरमवलोकिते उवघाताभावादनुग्रहमिव मन्येत चक्षुः, 'को दोषः ?' इत्यत्राऽपि संबध्यते, न कश्चिदित्यर्थः ॥ इति गाथार्थः ॥२१०॥

आह-यद्युक्तन्यायेनोपघातकाऽनुग्राहकवस्तुन्युपघाताऽनुग्रहाभावं चक्षुषो न ब्रूषे, तर्हि यद् ब्रूषे तत् कथय, इत्याशङ्क्याह-

**गंतुं न रूवदेसं पासइ पत्तं सयं व नियमोऽयं ।**
**पत्तेण उ मुत्तिमया उवघाया-णुग्गहा होज्जा ॥ २११ ॥**

अयं नियमःइदमेवाऽस्माभिर्नियम्यत इत्यर्थः । किं तत् ?, इत्याह रूपस्य देशो **रूपदेश** आदित्यमण्डलादिसमाक्रान्तप्रदेशरूपस्तं **गत्वो**त्प्लवनतस्तं समाश्लिष्य चक्षुर्न **पश्यति** न परिच्छिनत्ति, अन्यस्याऽश्रुतत्वाद् 'रूपम्' इति गम्यते । '**पत्तं सयं व त्ति**' स्वयं वाऽन्यत आगत्य चक्षुर्देशं प्राप्तं समागतं रूपं चक्षुर्न पश्यति, किन्त्वप्राप्तमेव योग्यदेशस्थं विषयं तत् पश्यति ॥ अत्राह परःनन्वनेन नियमेनाऽप्राप्यकारित्वं चक्षुषः प्रतिज्ञातं भवति । न च प्रतिज्ञामात्रेणैव हेतूपन्यासमन्तरेण समीहितवस्तुसिद्धिः । अतो हेतुरिह वक्तव्यः । '**जमणुग्गहाइसुण्णं ति**' इत्यनेन पूर्वोक्तगाथावयवेन विषयकृतानुग्रहोपघातशून्यत्वलक्षणोऽयमभिहित **एवेति चेत्** । अहो ! जराविधुरितस्येव सूरेर्विस्मरण-शीलता, यतो 'जमणुग्गहाइसुण्णं तिं' इत्यनेन विषयादनुग्रहोपघातौ चक्षुषो निषेधयति, 'डज्जेज्ज पाविउं रविकराइणा फरिसणं व' इत्यादिना तु पुनरपि ततस्तौ तस्य समनुजानीते, अतो न विद्मः, कोऽप्येष वचनक्रम इति । नैतदेवम्, अभिप्रायाऽपरिज्ञानात्, यतः प्रथमत एव विषयपरिच्छेदमात्र-कालेऽनुग्रहोपघातशून्यता हेतुत्वेनोक्ता, पश्चात्तु चिरमवलोकयतः प्रतिपत्तुः प्राप्तेन रविकरादिना, चन्द्रमरीचिनीलादिना वा मूर्तिमता निसर्गत एव केनाऽप्युपघातकेन, अनुग्राहकेण च विषयेणोपघाता-ऽनुग्रहौ भवेतामपीति । एतदेवाह-'पत्तेण उ मुत्तिमयेत्यादि' अनेनाऽभिप्रायेण तौ पुनरपि समनुज्ञायेते, न पुनर्विस्मरणशीलतया । यदि पुनर्विषयपरिच्छित्तिमात्रमपि तमप्राप्य चक्षुर्न करोतीति नियम्यते, तदा वह्नि-विष-जलधि-कण्टक-करवाल-करपत्र-सौवीराञ्जनादिपरिच्छित्तावपि तस्य दाह-स्फोट-क्लेद-पाटन-नीरोगतादिलक्षणोपघाता-ऽनुग्रहप्रसङ्गः । न हि समानायामपि प्राप्तौ रवि-करादिना तस्य भवन्ति दाहादयः, न वह्न्यादिभिः । तस्माद् व्यवस्थितमिदम् विषयमप्राप्यैव चक्षुः परिच्छिनत्ति, अञ्जनदहनादिकृताऽनुग्रहोपघातशून्यत्वात्, मनोवत् । परिच्छेदानन्तरं तु पश्चात्प्राप्तेन केनाऽप्युपघातकेन, अनुग्राहकेण वा मूर्तिमता द्रव्येण तस्योपघाताऽनुग्रहौ न निषिध्येते, विषशर्करादि-भक्षणे मूर्च्छास्वास्थ्यादय इव मनस इति ॥

**अत्राऽपरः प्राह**-नयनाद् नायना रश्मयो निर्गत्य प्राप्य च रविबिम्बरश्मय इव वस्तु प्रकाशयन्तीति नयनस्य प्राप्यकारिता प्रोच्यते । सूक्ष्मत्वेन, तैजसत्वेन च तेषां वह्न्यादिभिर्दाहादयो न

भवन्ति, रविरश्मिषु तथादर्शनात् ॥ **तदेतदयुक्ततरम्,** तेषां प्रत्यक्षादिप्रमाणाग्राह्यत्वेन श्रद्धातुमशक्यत्वात्, तथा-विधानामप्यस्तित्वकल्पनेऽतिप्रसङ्गात् । वस्तुपरिच्छेदाऽन्यथानुपपत्तेस्ते सन्तीति विकल्प्यन्त इति **चेत् । न,** तानन्तरेणाऽपि तत्परिच्छेदोपपत्तेः, न हि मनसो रश्मयः सन्ति; न च तदप्राप्तं वस्तु न परिच्छिनत्ति, वक्ष्यमाणयुक्तितस्तस्य तत्सिद्धेः । न च रविरश्म्युदाहरणमात्रेणाऽचेतनानां नयनरश्मीनां वस्तुपरिच्छेदो युज्यते, नख-दन्त-भाल-तलादिगतशरीररश्मीनामपि स्पर्शविषयवस्तुपरिच्छेदप्रसङ्गात् । इत्यलं विस्तरेण ॥ इति गाथार्थः ॥ २११ ॥

तदेवमञ्जनज्वलनादिविषयविहितानुग्रहोपघातशून्यत्वलक्षणहेतोरप्राप्यकारितां चक्षुषः प्रसाध्य हेत्वन्तरेणापि तस्य तां प्रसाधयितुमाह-

**जइ पत्तं गेण्हेज्ज उ, तग्गयमंजण-रओ-मलाईयं ।**
**पेच्छेज्ज, जं न पासइ अपत्तकारिं तओ चक्खुं ॥ २१२ ॥**

यदि तु प्राप्तं विषयं चक्षुर्गृह्णीयादित्युच्यते, तदा तद्गतमात्मसंबद्धमञ्जन-रजो-मल-शलाकादिकं पश्येदवगच्छेत्, तस्य निर्विवादमेव तत्प्राप्तत्वेनोपलब्धेः; यस्माच्च तद् न पश्यति, ततोऽप्राप्तकारि चक्षुरिति स्थितम् । यद्यप्राप्यकारि चक्षुः, तर्ह्यप्राप्तत्वाविशेषात् सर्वस्याऽप्यर्थस्याऽविशेषेण ग्राहकं स्यात्, न प्रतिनियतस्येति **चेत् । न,** ज्ञानदर्शनावरणादेस्तत्प्रतिबन्धकस्य सद्भावात्, मनसा व्यभिचाराच्च, तथाहि-अप्राप्यकारित्वे सत्यपि नाऽविशेषेण सर्वार्थेषु मनः प्रवर्तते, इन्द्रियाद्यप्रकाशितेषु सर्वथाऽदृष्टाऽश्रुतार्थेषु तत्प्रवृत्त्यदर्शनात् । इत्यलं प्रसङ्गेन ॥ इति गाथार्थः ॥ २१२ ॥

तदेवं व्यवस्थापिता चक्षुषोऽप्राप्यकारिता । कया पुनर्गाथया निर्युक्तिकृताऽसौ भण्यते ?, इत्याह-

**पुट्ठं सुणेइ सद्दं रूवं पुण पासइ अपुट्ठं तु । गंधं रसं च फासं च बद्धपुट्ठं वियागरे ॥३३६॥**

श्रोत्रेन्द्रियं कर्तृ, शब्दं कर्मतापन्नं शृणोति । कथंभूतम् ?, इत्याह-स्पृश्यत इति स्पृष्टस्तं स्पृष्टं तनौ रेणुवदालिङ्गितमात्रमेवेत्यर्थः । इदमुक्तं भवति स्पृष्टमात्राण्येव शब्दद्रव्याणि श्रोत्रमुपलभते, यतो घ्राणेन्द्रियविषयभूतद्रव्येभ्यस्तानि सूक्ष्माणि, बहूनि, भावुकानि च, पटुतरं च श्रोत्रेन्द्रियं विषयपरिच्छेदे घ्राणेन्द्रियादिगणादिति । श्रोत्रेन्द्रियस्य चेह कर्तृत्वं शब्दश्रवणान्यथानुपपत्तेर्लभ्यते । एवं घ्राणेन्द्रियादिष्वपि वाच्यम् । तानि पुनः कथं गन्धादिकं गृह्णन्ति ?, इत्याह-गन्ध्यत इति गन्धस्तमुपलभते घ्राणेन्द्रियम्, रस्यत इति रसस्तं च गृह्णाति रसनेन्द्रियम्, स्पृश्यत इति स्पर्शस्तं च जानाति स्पर्शनेन्द्रियम् । कथम्भूतं गन्धादिकम् ?, इत्याह-बद्धस्पृष्टम् । तत्र स्पृष्टमिति पूर्ववदेव, बद्धं तु गाढतरमाश्लिष्टमात्मप्रदेशैस्तोयवदात्मीकृतमित्यर्थः । ततश्च गन्धादिद्रव्यसमूहं प्रथमं स्पृष्टमालिङ्गितम्, ततश्च

स्पर्शनानन्तरं बद्धमात्मप्रदेशैर्गाढतरमागृहीतमेवोपलभते घ्राणेन्द्रियादिकमिति । एवं व्यागृणीयात् **प्ररूपयेत्** प्रज्ञापकः, यतो घ्राणेन्द्रियादिविषयभूतानि गन्धादिद्रव्याणि शब्दद्रव्यापेक्षया स्तोकानि, बादराणि, अभावुकानि च, विषयपरिच्छेदे श्रोत्रापेक्षयाऽपटूनि च घ्राणादीनि; अतो बद्धस्पृष्टमेव गन्धादिद्रव्यसमूहं गृह्णन्ति, न पुनः स्पृष्टमात्रमिति भावः । **ननु** यदि स्पर्शानन्तरं बद्धं गृह्णाति, तर्हि '**पुट्ठबद्धं**' इति पाठो युक्तः, इति **चेत्** । **उच्यते**-विचित्रत्वात् सूत्रगतेरित्थं निर्देशः, अर्थतस्तु यथा त्वयोक्तं तथैव द्रष्टव्यम् । **अपरस्त्वाह**-यद् बद्धं तत् स्पृष्टं भवत्येव, विशेषबन्धे सामान्यबन्धस्याऽन्तर्भावात्, ततः किं स्पृष्टग्रहणेन ? इति । **तदयुक्तम्**, सकलश्रोतृसाधारणत्वाच्छास्त्रारम्भस्य, प्रपञ्चितज्ञाऽनुग्रहार्थमर्था-पत्तिगम्यार्थाभिधानेऽप्यदोषादिति ॥

चक्षुरिन्द्रियं त्वप्राप्तमेव विषयं गृह्णाति, इत्याह-'रूवं पुण पासई अपुट्ठं त्विति' रूपं कर्मतापन्नं चक्षुरस्पृष्टमप्राप्तमेव पश्यति । पुनःशब्दस्य विशेषणार्थत्वादस्पृष्टमपि योग्यदेशस्थमेव पश्यति, नाऽयोग्यदेशस्थं सौधर्मादि, कटकुट्यादिव्यवहितं वा घट्यदि ॥ इति निर्युक्तिगाथार्थः ३३६

अथैतद्व्याख्यानाय भाष्यम्-

**पुट्ठं रेणुं व तणुम्मि बद्धमप्पीकयं पएसेहिं । छिक्काइं चिय गिण्हइ सद्ददव्वाइं जं ताइं ॥३३७॥**

**बहु-सुहुम-भावुगाइं जं पडुयरं च सोत्तविण्णाणं । गंधाईदव्वाइं विवरीयाइं जओ ताइं ॥३३८॥**

**फरिसाणंतरमत्तप्पएसमीसीकयाइं घेप्पंति । पडुयरविण्णाइं जं च न घाणाइकरणाइं ॥ ३३९ ॥**

'स्पृष्टं' इत्यस्य व्याख्यानं 'पुट्ठं रेणुं व तणुम्मि त्ति' यथा रेणोस्तनौ संबन्ध इत्येतावन्मात्रेण यद् वस्तु संबद्धं तदिह स्पृष्टमुच्यत इति भावः । 'बद्धमित्यादि' यदात्मीकृतमात्मना गाढतरमागृहीतम्, आत्मप्रदेशैस्तनुलग्नतोयवद् मिश्रीभूतं तद् बद्धमुच्यत इत्यर्थः । तत्र 'छिक्काइं चिय त्ति' स्पृष्टान्येव शब्दद्रव्याणि गृह्णाति श्रोत्रम्, यतस्तानि बहूनि, सूक्ष्माणि, भावुकानि च वासकानि चेत्यर्थः । पटुतरं च श्रोतृविज्ञानम् । गन्धादिद्रव्याणि तु विपरीतानि स्तोक-बादरा-ऽभावुकानि यतः, अतस्तानि स्पर्शानन्तरमात्मप्रदेशैर्मिश्रीकृतानि स्पृष्ट-बद्धानि गृह्यन्ते घ्राणादिभिः; पटुतरविज्ञानानि च न भवन्ति यतो घ्राणादिकरणानि ॥ इति गाथात्रयार्थः ॥ ३३७-३३९॥

अथ 'रूवं पुण पासइ अपुट्ठं तु' इत्यत्रोपपत्तिमाह-

**अप्पत्तकारि नयणं मणो य नयणस्स विसयपरिमाणं ।**
**आयंगुलेण लक्खं अइरित्तं जोयणाणं तु ॥३४०॥**

प्रागुक्तयुक्त्या अप्राप्तकारि-अप्राप्तस्यैव वस्तुनः परिच्छेदकारि यतो नयनं, मनश्च; ततोऽस्पृष्टमेव रूपं पश्यति नयनेन्द्रियम् । ननु यद्यप्राप्तं रूपमेतत् पश्यति, तर्हि लोकान्तादर्वाग् यदस्ति तत् सर्वं

पश्यतु, अप्राप्तत्वाविशेषात्, इत्याशङ्क्य, यदिन्द्रियाणां विषयपरिमाणं भणनीयत्वेन प्राक् प्रतिज्ञातं, तत्र चक्षुषस्तावत् तदाह-'नयणस्सेत्यादि' नयनेन्द्रियस्याऽऽगमे आत्माङ्गुलेन सातिरेकं योजनलक्ष-मुत्कृष्टतोऽपि विषयपरिमाणमभिहितम्, तेनाऽप्राप्तकारित्वाविशेषेऽपि परतो न पश्यतीति भावः ।

**॥ श्री विशेषावश्यकभाष्य-कोट्याचार्यीयटीका ॥**

'**णयणे**'त्यादि । नयनमनसी वर्जयित्वा व्यञ्जनावग्रहश्चतुर्धा, '**तंजहाफासिंदियवंजणोग्गहे जिब्भिंदिय० घाणिंदिय० सोइंदियवंजणोग्गहे**' इन्द्रियत्वे तुल्ये केयं मुखपरीक्षिका ? इति **चेत्**, उच्यते, 'उवघायाणुग्गहतो' यद्-यस्मात्तानिस्पर्शनादीनि 'प्राप्यतकारीणि' स्पृष्टार्थग्राहिणीति गाथार्थः ॥२०४॥ अत्राह-'**जुज्जती**'त्यादि । स्पर्शनरसनयोः सा युज्यते, अनुभाविकत्वात्, न श्रोत्रघ्राणयोः, गृह्णीतः स्वविषयं आत्मीयं ग्राह्यमितं अस्मादिन्द्रियविवराद् '**भिन्नदेशमपि**' विप्रकृष्टक्षेत्रव्यवस्थितमपि, दूरे ध्वनिः श्रूयत इति वचनात्, अतः किमुच्यते-'वंजणोग्गहो चउह'त्ति गाथार्थः ॥२०५॥ **उच्यते नैतद्,** उद्भ्रान्तत्वाद् भवतः, तथाहि-'**पावंती**'त्यादि । '**धूमो**' इत्यादि । इह शब्धगन्धावन्यत आगत्य प्राप्नुतः, के ? ते-श्रोत्रघ्राणे कर्मणी, ते तु श्रोत्रघ्राणे गत्वा विषयदेशं स्वयं न गृह्णीतः तेन ते अप्राप्यकारिणी स्यातां, अबाह्यकारणत्वात् स्पर्शनवत्, **आह**-तावपि कस्मात् न प्राप्नुतः ? इत्यत-आह-यद्-यस्मात्तौ पुद्गलमयत्वे सति सक्रियौ, कुत एतदित्याहवायुवहनाद् धूमवत्, तथा सक्रियौ तौ '**संहरणतो**'त्ति गृहादिषु पिण्डीभवनाद् धूमवदेव, तथा द्वारानुविधानतो विशेषेण, तोयवत्, तथा नितम्बादिप्रस्खलनान् मरुद्वदिति गाथाद्वयार्थः ॥२०६॥ ॥२०७॥ तस्मात्-'**गेण्हंती**'त्यादि, श्रोत्रघ्राणे प्राप्तं सन्तमर्थ गृह्णीतः, उपघातानुग्रहोपलब्धेः, स्पर्शनरसने इव, **आह**-अप्राप्यकारित्वे सतीयं भविष्यतीत्यनैकान्तिको हेतुरिति, **तन्न,** यतः-'**बाहिज्जे**'त्यादि, प्रतिज्ञा रोगहेतुत्वात् आकाशवदिति, अतो यदुक्तं 'नयने'त्यादि तत्स्थितमिति गाथार्थः ॥२०८॥ **अथ** कस्मादयं न षोढा? **उच्यते,** नयनमनसोरप्राप्यकारित्वेन व्यञ्जनोपादानायोगाद्, आह च-'**लोयण**'मित्यादि ॥ '**लोयण**'मित्यादि, अप्राप्यकारि लोचनमालम्ब्यकृतोपघातानुग्रहशून्यत्वात् मनोवत्, तत्रैतत्स्याद्-असिद्धो हेतुर्यतः जलघृतवनस्पतीन्दुमण्डलालोकनेऽनुग्रह उपलभ्यते सूरसितभित्त्याद्यालोकने चोपघात इति गाथार्थः ॥२०९॥ तदेवमसिद्धीभूते हेतावाचार्य आह-'**डज्झेज्ज**' इत्यादि ॥ चक्षू रविकरादिना पुद्गलधर्मेण 'प्राप्य' आश्लिष्य 'दह्येत' भस्मीक्रियेत विह्वलीक्रियेत वा स्पर्शनमिवान्वयय्येव दृष्टान्तः, इत्यतः को देशो ?, नैव कश्चिद्, दृष्टस्य बाधितुमशक्यत्वात्, तथा मन्येतानुग्रहमपि चक्षुः स्पर्शनवदुपघाताभावात् सौम्ये जलघृत-वनस्पतीन्द्वालोकने सति, अत्रापि को दोषः ? ॥२१०॥

काममेतत्, किन्तु-'**गंतु**' मित्यादि । इह हि चक्षुरुत्प्लुत्यगत्वा रूपदेशमादित्यमण्डलादि-लाञ्छितं न पश्यतिनादत्ते, किं ?, रूपमेवेति गम्यते अन्यस्याश्रुतत्वात्, तथा-'पत्तं संयं व' त्ति स्वयं

वाऽन्यतः स्वतन्त्रतया आगतं सद्रूपं चक्षुर्न गृह्णात्यञ्जनादिभिर्व्यभिचारात्, श्रोत्रेन्द्रियं शब्दमिव, नियमोऽयमितिएतदत्र नियम्यते वाचो युक्त्या, काक्वा पच्छद्धमाह-'**पत्तेण उ**' चक्षुर्देशे '**मुत्तिमया**' रविकरादिना 'उपघातानुग्रहौ' परितापाह्लादौ भवेतांस्यातां एतत्स्वभावत्वात् पुद्गलानां, वनस्पत्यादयस्तु दूरस्था एव गृह्यन्त इति गाथार्थः ॥२११॥

अपिच-'**जती**'त्यादि। यदि तु प्राप्तं सन्तमर्थमक्षि गृह्णीयात्-ततस्तद्गतं रजोमलाद्यपि गृह्णीयात्, तस्यैव परमार्थप्राप्तेः, यतश्च न पश्यत्यत इदमप्राप्यकारीति गाथार्थः ॥२१२॥ **तत्रैतत्स्यात्**प्राप्यकारि चक्षुः आवरणात् स्पर्शनवत्, **न**, मनसाऽनैकान्तिकत्वात्, अप्राप्यकारि चक्षुरावरणान्मनोवत्, तथा च मनः *खल्वप्राप्यकारि भाविसिद्धया विषादिभिश्चाव्रियत इति, रूपावरणेऽपि ह्यग्राहकं चक्षुर्बाह्या-*नुग्रहाभावान्मनोवत्, तथाहि-मनोऽप्राप्यकारित्वे सत्यप्यैन्द्रियकेषु न क्वचिदनुप्रवर्त्तत इति, इन्द्रिया-नुग्रहशून्यं सदिति, यस्य चाभिप्रायः खल्वप्राप्यकारिणा चक्षुषा बाह्यानुग्रहनिरपेक्षेणाप्यनुवर्त्तितव्यं तस्य मनसाऽपीन्द्रियैः प्रकाशितेष्वप्रकाशितेषु वा विशेषेण सर्वार्थष्वनुप्रवर्त्तितव्यम्, न चानुप्रवर्त्तते-ऽत्यन्तमदृष्टाश्रुतादिष्विति।

'जती'त्यादि। नयनेन्द्रियमाभ्यां हेतुदृष्टान्ताभ्यामप्राप्यकारि कस्मात् सकलं त्रैलोक्यं न गृह्णाति दृष्टान्तधर्म्मिमन इव ?, अतः, **पश्चार्द्धं स्पष्टम्** ॥२४५॥ तस्मात्-'**विसये**'त्यादि। '**तस्स**'त्ति तस्य चक्षुषो 'विषयपरिमाणं' आलम्बनपरिमाणं 'अनियतम्' अनन्तं अप्राप्तविषयत्वात् मनस इव, अत्राचार्यः साध्यविकलतां दृष्टान्तस्योद्भावयन्नाह-मनसोऽप्य-प्राप्यग्राहिणो विषयेऽयं नास्त्येव, यस्मान्न तत्सर्वत्र क्रामतीति ॥२४६॥ तथाहि-'**अत्थे**'त्यादि। 'अर्थगहनेषु' अर्थगुपिलेषु वस्तुष्वा-गमगम्येषु '**सत्स्वपि**' विद्यमानेष्वपि कस्यचिन्मनो 'मुह्यति' कुण्ठीभवति, तथा केवलादिगम्येषु च, अतोऽहमपि भवन्तं पृच्छामितत्किं कृतं मनसोऽग्रहणं ?, अतीन्द्रियैन्द्रियकाणां भावानां, कस्मिन् सतीत्याह-अप्राप्य-कारित्वे सामान्ये ग्राह्याग्राह्येष्विति गाथार्थः ॥२४७॥ एवं पृष्टः पर आह-'**कम्मो**'इत्यादि। कर्मोदयात् तत्स्वाभाव्याद्वाऽप्राप्यकारित्वे सति ग्रहणाग्रहणं, सूरिराह ननु लोचने-ऽपि तद्ग्रहणाग्रहणं तुल्यं कम्मोदययोव्व सभावउव्वत्ति, तदेवं अप्राप्यकारिवादिना प्राप्यकारिवा-द्युक्तप्रसङ्गसाधने परिहृते प्राप्यकारिवादिनोऽप्यमुं दोषं गुणं वाऽभिधित्सुराहतुल्यो वा एष उपालम्भः-सर्वासर्वग्रहणलक्षणः प्राप्यकारिवादिनोऽपि भवतः, कस्मिन् सतीत्याह-'**संपत्तविसयेऽवि**'त्ति नयनमनसोः प्राप्तेऽप्यर्थ इत्युक्तं भवति, तथाहि-न यावता नयनमभिसम्बध्यते तत्सर्वमेव गृह्यते अञ्जनरजोमलशलाकादिभिर्व्यभिचारात्, मनसा त्वनवस्थानान्न गृह्यते, गृह्यते च सम्बद्धमप्य-नुभवादिति गाथार्थः ॥२४८॥ अथ सद्भावमाह-'**सामत्थे**'त्यादि। नयनं विषयपरतो न गृह्णाति सामर्थ्याभावात् मनोवत्, साधितश्च दृष्टान्तः, सामर्थ्यासामर्थ्यमेव कुतः ? इत्याह-कर्मक्षयोपशमात्

सामर्थ्यं विषये तस्यैव वाऽक्षयोपशमादसामर्थ्यं विषये, तथा रूपालोकमनस्कारानुग्रहाच्च सामर्थ्यं तस्यैव चाननुग्रहादसामर्थ्यमिति गाथार्थः ॥२४९॥ xx.........xx

**पुट्ठं सुणेइ सद्दं रूवं पुण पासई अपुट्ठं तु । गंधं रसं च फासं च बद्धपुट्ठं वियागरे ॥३३६॥** ( नि. ५ )

**पुट्ठं रेणुंव तणुम्मि बद्धमप्पीकयं पएसेहिं । छिक्काइं चिय गिण्हइ सद्ददव्वाइं ज ताइं ॥३३७॥**

**बहुसुहुमभावुगाइं जं पडुययरं च सोत्तविण्णाणं । गंधाई दव्वाइं विवरीयाइं जओ ताइं ॥३३८॥**

**फरिसाणतरमत्तप्पएसमीसीकयाइं घेप्पंति । पडुयरविण्णाणाइं जं च न घाणाइकरणाइं ॥३३९॥**

'**पुट्ठ**'मित्यादि, पुट्ठं-आलिंगियं रेणुं व तणुंमि शृणोति गृह्णात्युपलभत इति पर्यायाः, कं ?- शब्द्यतेऽनेनेति शब्दः तं, शब्दप्रायोग्यां, द्रव्यसंहतिमित्यर्थः, तस्य बहुसूक्ष्मभावुकत्वात् श्रोत्रेन्द्रियस्य चान्येन्द्रियगणतः पटुतरत्वात्, तथा रूप्यत इति रूपं तद्रूपं पुन पश्यतिगृह्णाति उपलभते '**अपुट्ठं**' अस्पृष्टमेवानालिङ्गितमेव, किं कारणम् ?, चक्षुषः अप्राप्यकारित्वात्, पुनःशब्दस्य विशेषणार्थत्वात् अस्पृष्टमपि योग्यदेशस्थं नायोग्यदेशस्थमपि सौधर्मादीति, गन्ध्यत इति गन्धस्तं, रस्यत इति रसस्तं, स्पृश्यते इति स्पर्शस्तं च, च शब्दौ पूरणार्थौ, बद्धं आत्मीकृतमात्मप्रदेशैस्तोयवदाश्लिष्टमित्यर्थः, '**पुट्ठं तु**' पूर्ववत्, प्राकृतशैल्या चेत्थमाह '**बद्धपुट्ठं तु**', अर्थतस्तु '**पुट्ठ बद्ध**'मिति दृश्यं, अनुगुणत्वात्, **अत्राह**-यद् बद्धं गन्धद्रव्यादि तत् स्पृष्टं भवत्येवेति स्पृष्टग्रहणं न कर्त्तव्यं, **तन्न,** सकलश्रोतृसाधारणत्वाच्छास्त्रारम्भस्य, प्रपञ्चितज्ञानानुग्रहार्थमर्थापत्तिगम्यार्थाभिधानेऽप्यदोषात्, अथवा स्पृष्टं च तद् बद्धं चेति विशेषणसमासाङ्गीकरणाददोषः तत्र स्पृष्टं गन्धादि विशेष्यं वर्त्तते, बद्धमिति तु विशेषणम्, **आह**-एवमपि स्पृष्टग्रहणमतिरिच्यते, बद्धस्य स्पृष्टत्वाव्यभिचारादुभयपद-व्यभिचारे च विशेषणविशेष्यभावो दृष्ट यथा नीलोत्पलमिति, नचेहोभयपदव्यभिचारः एकपद-व्यभिचाराद् **उच्यते,** एकपदव्यभिचारेऽपि विशेषणविशेष्यभावो दृष्ट एव, यथाऽप् द्रव्यं पृथिवी द्रव्यमिति, तत्र अप् द्रव्यं नियमात् द्रव्यं पुनरब् वाऽनब् वेति, तद्वदत्रापि भावार्थस्त्वयं स्पृष्टानन्तरमात्मप्रदेशैरागृहीतं गन्धादि बादरत्वात् अभावुकत्वादल्पद्रव्यरूपत्वात् घ्राणादीनां चापटुत्वात्, गृह्णाति विनिश्चिनोति घ्राणेन्द्रियादिगण इत्येवं 'व्यागृणीयात्' प्रतिपादयेदिति निर्युक्तिगाथासमुदायार्थः ॥३३६॥ अवयवार्थस्तु भाष्यकार आह-'**पुट्ठं**'मित्यादि '**बहु**' इत्यादि '**फरिसे**'त्यादि, गाथात्रयं भावितार्थम् ॥३३७-३८-३९॥ '**रूवं पुण पासती अपुट्ठं तु**' इत्येतद्विशेषतो व्याचिख्यासुराह-

**अप्पत्तकारि नयणं मणो य नयणस्स विसयपरिमाणं ।**
**आयंगुलेण लक्खं अइरित्तं जोयणाणं तु ॥३४०॥**

नणु भणियमुस्सयंगुलपमाणओ जीवदेहमाणाई ।
देहपमाणं चिय तं न उ इंदियविसयपरिमाणं ॥३४१॥

जं तेण पंचधणुसयनराइविसयववहारवोच्छेओ ।
पावइ सहस्सगुणियं जेण पमाणंगुलं तत्तो ॥३४२॥

इंदियमाणेऽवि तयं भयणिज्जं जं तिगाउआईणं ।
जिब्भिदियाइमाणं संववहारे विरुज्झेज्जा ॥३४३॥

तणुमाणं चिय तेणं हविज्ज भणियं सुएऽवि तं चेव ।
एएण देहमाणाई नारयाईण मिज्जंति ॥३४४॥

लक्खेहिं एक्कवीसाएँ साइरेगेहिं पुक्खरद्धम्मि ।
उदये पेच्छंति नरा सूरं उक्कोसए दिवसे ॥३४५॥

नयणिंदियस्स तम्हा विसयपमाणं जहा सुएऽभिहियं ।
आउस्सेहपमाणंगुलाण एक्केणऽवि ण जुत्तं ॥३४६॥

सुत्ताभिप्पाओऽयं पयासणिज्जे तयं न उ पयासे ।
वक्खाणओ विसेसो नहि संदेहादलक्खणया ॥३४७॥

बारसहिंतो सोत्तं सेसाइं नवहिं जोयणेहिंतो ।
गिण्हंति पत्तमत्थं एत्तो परओ न गिण्हंति ॥३४८॥

दव्वाण मंदपरिणामयाएँ परओ न इंदियबलंपि ।
अवरमसंखेज्जंगुलभागाओ नयणवज्जाणं ॥३४९॥

संखेज्जइभागाओ नयणस्स मणस्स न विसयपमाणं ।
पोग्गलमित्तनिबंधाभावाओ केवलस्सेव ॥३५०॥

'अप्पत्ते'त्यादि, नयनमनसी अप्राप्यकारित्वाद् रूपं न स्पृष्टमेव गृह्णतः, यदुक्तं–'विषयप्रमाणं च' तदिदानीं प्रतीयते, 'णयणस्से'त्यादि, अयमत्र प्रक्रमः अत्र त्रिविधमङ्गुलमुक्तं, आत्माङ्गुलमुच्छ्र्याङ्गुलं प्रमाणाङ्गुलं चेति, तत्राद्यं

"जे णं जया मणूसा तेसिं जं होइ माणरूवं ति ।
तं भणियमिहायंगुलमणियतमाणं पुण इमं तु ॥१॥" द्वितीयं तु–

"परमाणू तसरेणू रहरेणु अग्गयं च वालस्स ।
लिक्खा जूया य जवो अट्ठगुणविवड्ढिया कमसो ॥२॥" तृतीयं तु–

**''उस्सेहंगुलमेगं हवइ पमाणंगुलं सहस्सगुणं ।**

**तं चेव दुगुणियं खलु वीरस्सायंगुलं भणियं ॥३॥**

**आयंगुलेण वत्थुं उस्सेहपमाणओ मिणसु देहं ।**

**णगपुढविविमाणाइं मिणसु पमाणंगुलेणं तु ॥४॥''**

एवं स्थिते 'नयनस्य' चक्षुरिन्द्रियस्य 'विषयपरिमाण' प्रसर्प्पणपरिमाणं कियति देशे व्यवस्थितं रूपमालम्बते ? इति गाथार्थः ॥३४०॥

**तत्त्वार्थसूत्रीय हरिभद्रसूरिकृतवृत्तिः**

**॥ न चक्षुरनिन्द्रियाभ्यां ॥१९॥**

चक्षुषा उपकरणेन्द्रियाख्येन सह नोइन्द्रियेण च मनओघज्ञानरूपेण व्यञ्जनावग्रहो न भवति, एतदुक्तं भवति ते रूपाकारपरिणताः पुद्गलाश्चिन्त्यमानाच वस्तुविशेषाः न ताभ्यां संश्लिष्य विज्ञानं जनयन्ति, अपि तु योग्यदेशावस्थिताश्चक्षुषा गृह्यन्ते, प्रणिधानसचिवाश्च मनसा चिन्त्यन्ते, संश्लेषाभ्युपगमे तु अक्ष्यञ्जनादेः ग्रहणं, विषयकृतौ वाऽनुग्रहोपघातौ दुर्निवारौ, नायनरश्मिविधानं मनोनिर्गमनं चान्यत्र निराकृतमिति नेहाभिधीयते, अतश्चक्षुरनिन्द्रियाभ्यां व्यञ्जनावग्रहो न भवति ।

**॥ तत्त्वार्थस्वोपज्ञभाष्य-सिद्धसेनीयाटीका ॥**

**अथ** किं स्पर्शनादीनामिन्द्रियाणां सर्वेषां व्यञ्जनावग्रहः समस्ति, उत कस्यचिन्नेति ? । **उच्यते**-कस्यचिन्न सम्भवतीत्यपि । एतद् दर्शयति-

**सूत्रम्-न चक्षुरनिन्द्रियाभ्याम् ॥१-१९॥**

भाष्यं-**चक्षुषा नोइन्द्रियेण च व्यञ्जनावग्रहो न भवति, चतुर्भिरिन्द्रियैः शेषैर्भवति ।**

टीका-करणे सहार्थे चैषा तृतीया, **चक्षुषा** उपकरणेन्द्रियाख्येन सह **नोइन्द्रियेण** वा मनओघज्ञानरूपेण सह ते रूपाकारपरिणताः पुद्गलाश्चिन्त्यमानाः वस्तुविशेषाः संश्लेषं न यान्ति, अतो व्यञ्जनम् चक्षुरुपकरणेन्द्रियनोइन्द्रिययो रूपाद्याकारपरिणतिपुद्गलानां च यत् संश्लेषरूपं तद्व्यञ्जनमेवंविधं नास्ति, तदभावाच्च तदवग्रहोऽपि नास्ति, एतदाह**व्यञ्जनस्यावग्रहो न भवति** । एतदुक्तं भवति ये ते दृश्यमानाश्चिन्त्यमानाश्च वस्तुविशेषाः न ते चक्षुरिन्द्रियेणोपकरणरूपेण नोइन्द्रियेण च सह संश्लेषमिताः परिच्छिद्यन्ते, यतो योग्यदेशावस्थितं वस्तु चक्षुः शरीरस्थमेव सत् परिच्छिनत्ति, न गत्वा विषयपरिच्छेदे व्याप्रियते, न वा विषयमागतं धान्यमसूरकाकृतिके इन्द्रियदेशेऽवगच्छति, अतश्च लोचनमप्राप्तविषयग्राहि, न खलु ग्राह्येण तस्यानुग्रहोपघातानुभवो दृष्टः, स्वान्तस्येव, नापि धान्यमसूराकृतीन्द्रियदेशवर्तिविषयपरिच्छेदि विलोचनं, यदि स्यात् ततस्तद्गतमञ्जनादि परिच्छिन्द्यात्, न च

परिच्छिनत्ति, अतो निश्चीयतेऽनागतं विषयमवबुध्यते तत्, न वा गत्वा विषयदेशमित्यतो न व्यञ्जनावग्रहस्तस्य।

### प्रवचन सारोद्धारा वृत्ति

अयं च नयनमनोवर्जेन्द्रियचतुष्टयभेदाच्चतुर्धा, नयनमनसोरप्राप्यकारित्वेन विषयसम्बन्धाभावाद्, अस्य चेन्द्रियविषययोः सम्बन्धग्राहकत्वादिति भावः,

### ॥ स्याद्वादरत्नाकरसहितः प्रमाणनयतत्त्वालोकालङ्कारः ॥

तस्मान्निर्दोषत्वात्स्पष्टत्वं प्रत्यक्षलक्षणं प्रेक्षावद्भिरङ्गीकर्त्तव्यं नेन्द्रियसन्निकर्षोत्पन्नमित्यादि **नैयायिककल्पितम्**। चाक्षुषसंवेदने तस्यासत्त्वेनाव्यापकत्वात्। चक्षुषोऽर्थेन सन्निकर्षाभावात्।

**इदमस्मदुदीरितं निशम्य प्रोद्यत्कोपविपाटलीकृताक्षम्।**
**निगदति नितराममृष्यमाणं तदिदं योगकदम्बकं मिलित्वा ॥ ३१३ ॥**

आः किमिदमुच्यते चक्षुषोऽर्थेन सन्निकर्षाभावादिति। अस्ति हि तत्सद्भावग्राहकमनुमानम्।

तथा च **व्योमशिवः "चक्षुः प्राप्तार्थपरिच्छेदकं व्यवहिताप्रकाशकत्वात् यद्यद्व्यवहिताप्रकाशकं तन्नाप्राप्तार्थपरिच्छेदकं 'यथा प्रदीपः व्यवहिताप्रकाशकञ्च चक्षुः तस्मात्प्राप्तार्थपरिच्छेदकम्"** इति।

**किरणावलीकारोऽपि 'येषां त्वप्राप्यकारि चक्षुस्तेषामप्राप्तत्वाविशेषा- दव्यवहितमिव व्यवहितमपि किन्न गृह्णीयात्'** इति वदति तदेव समर्थयते

**श्रीधरोऽप्येतत् 'बाह्येन्द्रियत्वात्त्वगिन्द्रियवत्'** इति द्वितीयं च प्राह।

**कश्चित्पुनरुवाच**। चक्षुः प्राप्यकारि भौतिकत्वाद्यदेवं तदेवं यथा परशुस्तथा चेदं ततस्तथा। अथ चक्षुषः प्राप्यकारित्वे कथं भूधरचन्द्रमसोर्युगपद्ग्रहणम्। **तदसत्**। युगपत्तद्ग्रहणस्याप्रसिद्धेः। प्रथमतो हि चक्षुः सन्निहितं महीधरं प्राप्य प्रकाशयति। पश्चाद्दूरचारिणं हरिणलक्ष्माणम्। युगपत्प्रतिपत्त्यभिमानस्तु शतपत्रपत्रशतव्यतिभेदवदाशूत्पत्तिनिमित्तकः।

**एवं च लोचनस्य प्रासिध्यत् प्राप्यकारिता श्रुतिवत्।**
**तन्नयनसन्निकर्षाभाववचः सङ्गतिं कथमुपैतु ॥ ३१४ ॥**

**एषामहो जगदपूर्वपदार्थसिद्धौ कोऽप्येष दुर्द्धरतरः खलु पक्षपातः।**
**किन्त्वभ्यधायि स न कश्चन युक्तिलेशः प्राप्नोति यः किमपि हन्त तदानुरूप्यम् ॥३१५॥**

तथा हि यत्पौरस्त्यमनुमानम्। तत्र भावचक्षुर्द्रव्यचक्षुर्वा धर्मितया वर्ण्येत। न तावद्भावचक्षुः। त्वया तस्याकक्षीकारेण धर्मिणोऽप्रसिद्धौ साधनस्याश्रयासिद्धताप्रसक्तेः। कक्षीकारेऽपि नास्य पदार्थेन

प्राप्तिः सिद्धयति। भावचक्षुः खल्वात्मनो बुद्धिलक्षणो गुणः प्राप्तिरपि पदार्थेन संयोगो गुणः। न च गुणे गुणान्तरमस्ति। निर्गुणत्वात् तद्गुणानाम्। द्रव्यचक्षुरपि गोलकरूपमन्यद्वा किञ्चिद्भवेत्। आद्यपक्षे प्रत्यक्षबाधः प्रतिज्ञायाः। प्रत्यक्षेण परिच्छित्तिकाले पदार्थासम्बद्धस्यैव गोलकस्योपलब्धेः। अन्यथा तदानीं पुंसः पक्ष्मप्रदेशे प्रकटकोटरोपलम्भः स्यात्। पदार्थस्य वा गोलकदेशे प्रतीतिः स्यात्। अथान्यत्किञ्चिच्चक्षुरिन्द्रियं धर्मितया ह्यधिष्ठाननिष्ठमेवं पटिष्ठमर्थपरिच्छेदे स्वीक्रियते। तदा स एव तद्देशे पदार्थस्योपलम्भः स्यात्।

**अथा**धिष्ठानदेशात्प्रसरद्रश्मिरूपावयवसमवेतं चक्षुः प्रसृत्यार्थेन सम्बद्धयते सम्बद्धं चोपलम्भयति। **तदसुलभम्**। चक्षुःप्रसृत्य नार्थेन सम्बद्धय त्वगादिवदित्यनुमानबाधापातात् चक्षुषो रश्मिवत्त्वासिद्धेः। **अथ** रश्मिवच्चक्षुस्तैजसत्वात् यदित्थं तदित्थं यथा ज्योतिस्तथाचेदं तस्मात्तथेत्यतस्तत्सिद्धिः। न चासिद्धं तैजसत्वम्। चक्षुस्तैजसं रूपादिषु मध्ये नियमेन रूपस्याभिव्यञ्जकत्वाद्यदेवं तदेवं यथा दीपस्तथा चेदं तस्मात्तथेत्यतस्तत्सिद्धेः। रूपस्याभिव्यञ्जकत्वादित्युक्ते मनसा व्यभिचारो भवेत्। तद्धि रूपव्यञ्जकं न च तैजसमिति तद्व्यवच्छेदार्थं नियमेनेति पदम्। न हि मनो रूपस्यैव व्यञ्जकं गन्धादीनामपि व्यञ्जकत्वात्। एवमपि रूपत्वद्रव्यादिव्यञ्जकत्वोपलब्धेरसिद्धत्वं स्यादिति रूपादिषु मध्ये इत्युक्तमिति **चेत्। तदसुन्दरम्**। इन्दुदीधितिप्रतिबन्धे तदिति प्रतिबन्धे रूपा-दिष्वित्यादिहेतोरनैकान्तिकत्वात्। **न च** शुचिरोचिःशोचिःसञ्चयस्यापि तैजसत्वान्न व्यभिचार इति **वाच्यम्**। उष्णस्पर्शशून्यत्वेन तैजसत्वासम्भवात्। तथा **तेजःप्रकरणे वैशेषिकभाष्यम्। 'उष्ण एव स्पर्शः'** इति।

**यत्पुनरुदयनोऽत्राह 'एवकारश्चन्द्रचामीकरचक्षुरादिष्वनुपलम्भहेतुकां विप्रतिपत्तिमपनेतुं, तेषां तैजसत्वेनोष्णत्वानुमानात्'** इति। **तदबन्धुरम्**। शशधरेऽद्यापि तैजसत्वासिद्धेः। **अथ** प्रस्तुतहेतुत एवात्रापि तत्सिद्धिरभिधीयते। **तदशस्यम्**। अस्यानुमानबाधितपक्षानन्तरोपन्यस्तत्वेन कालात्ययापदिष्टत्वात्। तथाहि न चन्द्रस्तैजसः शैत्यहेतुत्वात् पाथोवदिति। सति च सुधांशोरतैजसत्वे सुतरां तन्मरीचीनामतैजसत्वम्।

**यस्त्वयं** कस्यचिदागमः। **'जलकल्लोलश्चन्द्रस्तत्र प्रतिहतास्तपनांशवः प्रद्योतन्ते शिशिराश्च भवन्ति तत एव शैत्यहेतव'** इति। **सोऽपि** स्वैरालापः। कस्य पयोराशेरयं कल्लोलः। कथं तं विहाय विहायस्तलमालम्बे। कुतः परिमण्डल एव कथं न स्पन्दते। काठिन्यमाप्तो वा। तत्प्रतिफलितास्तपनांशाः शिशिराः सुखालोकाः सकलदिक्प्रासारिणश्च भवन्ति। कथं च न दिवापि तत्प्रतिफलनमित्यादि विचारचतुःपथासञ्चरिष्णुत्वात्। तथाविधस्यापि स्वीकारे परस्परस्यापि स्वेष्टासिद्धया स्वमतव्याघातः। तेजोरूपनयनसन्निकर्षेणापि व्यभिचारी प्रकृतहेतुः। अयं हि रूपादिषु रूपस्यैवाभिव्यञ्जकोऽस्ति न च तैजसः।

**अथ** द्रव्यत्वे रूपादिषु नियमेन रूपस्याभिव्यञ्जकत्वदिति विशिष्य हेतुरुच्यते । **तदाप्यञ्ज-**नादिनानैकान्तः । **अथ** तैजसमेवाञ्जनं न पुनः पार्थिवम् । तत्रानुद्भूतस्य तेजोद्रव्यस्य भावादिति **चेत्** । **तदयुक्तम्** । प्रमाणभावात् । तैजसमञ्जनं रूपावभासने नयनस्य सहकारित्वात्प्रदीपवदिति प्रमाण-मस्तीति **चेत्** । **तदचतुरस्रम्** । चेतसा व्यभिचारस्य दुष्परिहारत्वात् । **अथ** रूपस्यैवावभासने नयनस्यैव वा सहकारित्वादित्यवधारणगर्भसाधनोपदर्शनेन सकलानां विषयाणामिन्द्रियाणां वा साधारणस्यान्तःकरणस्य व्यवच्छेदेन व्यभिचारपरिहारः क्रियते । तदाऽऽ**द्यपक्षे** हेतुरसिद्धः । द्रव्यादेरपि व्यञ्जनेऽञ्जनस्य नयनसहकारित्वात् । **द्वितीये तु** दृष्टान्तस्य साधनवैकल्यम् । रूपेऽपि स्वविषयतयावभासं जनयति प्रदीपस्य सहकारितया नयनं प्रत्येवं सहकारित्वासम्भवात् । **अथ** रूपादिषु मध्य इत्यादिहेतोरेवाञ्जनस्य तैजसत्वसिद्धिरुच्यते । तर्हि निदर्शनं वाच्यम् । प्रदीप एवेति **चेत्** । **न** । अस्य साधनशून्यत्वात् ।

अहो किमिदमुच्यते किं प्रदीपः प्रबोधितो न रूपमभिव्यनक्ति रसादीनपि चाभिव्यनक्ति । **उच्यते** । अभिव्यञ्जयत्येवायं स्वान्तर्निमग्नानामगुरुमृगनाभिकर्पूरशकलादीनां सुरभिपरिमलोद्गारं नागकर्णिकाविमर्द्दककरतलमिव नागकर्णिकादेः । एवं चक्षुषस्तैजसत्वसिद्ध्यनुमानेऽपि साधन-वैकल्यं दृष्टान्तस्य वाच्यम् । अपि च यदि चक्षुषस्तैजसत्वं स्यात्तदा कथं न तत्र भास्वररूपोपलम्भः । तेजसि तस्य स्वाभाविकत्वात् । अनुद्भूतत्वादिति **चेत्**, नन्वेवं रूपाभिव्यञ्जकत्वमस्य दुरुपपादम् । तथा हि यदुद्भूतभासुररूपरहितं तन्न रूपाभिव्यञ्जकं यथा पाथःसंयुक्तस्तनूनपात्तथा चक्षुः कक्षीकृतं त्वयेति ।

**यत्तु** भूषणेनाबभाषे । **'कथमनुद्भूतरूपाणामर्थप्रकाशकत्वमितिचेत् । न । प्रदीपादि-प्रकाशसहितानां तदुपपत्तेः । अत एव येषामदृष्टसामर्थ्यादुद्भूतरूपा नायना रश्मय उत्पन्ना-स्तेषां बाह्यप्रकाशनिरपेक्षा एवार्थं प्रकाशयन्ति यथा नक्तञ्चराणाम् । तथा च केषांचिन्न-क्तञ्चराणां नायना रश्मयः प्रत्यक्षेणैव दृश्यन्ते'** इति । **तदपि** न कमनीयम् । कुम्भादेरप्यनुद्भूत-भासुररूपपरिकल्पनया प्रदीपादिसहकृतस्य प्रकाशकत्वोपपत्तेः । तस्यातैजसत्वेन भासुररूपमेव नास्तीति कुतस्तत्र तस्यामुद्भूतत्वकल्पनोपपत्तिमतीति **चेत्** । ननु चक्षुषोऽपि कुतस्तैजसत्वसिद्धिः । रूपादिषु नियमेनेत्यादिहेतोरेवेति **चेत्** । तत एवान्यस्यापि सास्तु । अत्रायं हेतुरसिद्ध इति **चेत्** । लोचनेऽपि कथं सिद्धः । प्रदीपादिसहकृतस्य प्रकाशकत्वोपलब्धेरिति **चेत्** । तदन्यत्रापि न नाम नास्ति ।

**अथ** वृषदंशादिचक्षुरालोकासहकृतमपि प्रकाशकमुपलब्धं नत्वेवं कुम्भादिरिति **चेत्** । तत्किमयमाशयस्ते यदालोकसहकृतमेव प्रकाशकं तन्न तैजसमिति । तर्हि नरनारीनयनानां तादृशम-

तैजसत्वप्रसक्तिः। यदप्यवाचि केषाञ्चिन्नक्तञ्चराणां नायना रश्मयः प्रत्यक्षेण दृश्यन्त इति। तदपि यदि परममांसचक्षुषामपेक्षया प्रोक्तम्। अस्मदादिभिस्तत्र रश्मीनामप्रतिपत्तेः। वृषदंशदृशोः प्रतीयन्त एवेति **चेत्। न**। तद्गोलकप्रदेशविशेष एव हि तथा प्रतिभासते नतु रश्मयः क्वचित्। यदि तु ते तत्र स्युः तदा प्रदीपादिवत्तेऽपि प्रसरन्तो दृश्येरन्। न च यमर्थं निशि निशाचरः पश्यति स तल्लोचनरुचिनिचयविच्छुरितो दीपप्रभाप्राग्भारपरिरब्ध इव निकटोपटीकमानमनुष्येण दृश्यते। **न च** तेषामतितनुतरतया न नरान्प्रत्यभिव्यञ्जकत्वमिति **वाच्यम्**। रात्रिञ्चरानपि प्रति तदभिव्यञ्जनविरोधात्। उद्भूतभासुररूपत्वेन हि तेषामभिव्यञ्जकत्वं तच्चोभयत्र तुल्यम्। यद्वा सन्तु मार्जारनेत्रयोर्मरीचयो यत्र चाकचीक्यायमानतास्ति काचित्। यत्र तु गृहगोधिकादिचक्षुषि न किञ्चिन्निशि चकास्ति तत्रोद्भूतभासुररूपा रश्मयः सन्तीति कः स्वस्थः कथयेत्। दर्शनयोग्यं हि रूपमुद्भूतमुच्यते। अन्यथा मनुष्यनेत्रेषु तदनुद्भूतताभ्युपगमः किंनिमित्तकः स्यात्। अनुद्भूतताभ्युपगमे तु गृहगोधिकादिचक्षु-रश्मीनामालोकनिरपेक्षाणामेव प्रकाशकत्वमवलोकितमिति कथं प्रदीपादिप्रकाशसहितानां तदुपपत्तेरिति प्रागुक्तमुपपद्यते।

**यत्तु** तेनैव नेत्ररश्मिष्वनुद्भूतरूपतामनिच्छतावाचि। अथालोकावयवसहितेभ्यस्तदवयवेभ्य उद्भूतरूपा एव नायना रश्मयः उत्पद्यन्ते। दृष्टौ हि तेजसामाशुतरविनाशोत्पादौ। रूपस्पर्शौ चोद्भूतानुद्भूतत्वधर्मविकल्पोपेतावित्युद्भूतरूपत्वेनोत्पन्नानामपि रश्मीनामन्यस्मिन्समावेशाद्विवेकेनाग्रहणम्। यथाऽनेकप्रदीपरश्मीनामेकार्थसम्बद्धानामिति। **तदपि** नोपपद्यते। यतो यदि नामालोकमिलितमनुष्यलोचनेष्वेवम्। तथापि बहुलनिशीथे निरन्तरमञ्जनकुवलयदलश्यामलान्धकारकलापेऽतिशयसटितविकटकपाटसम्पुटापवरकक्रोडे विचरतां गृहगोधिकादिपिपीलिकादिपापीयःप्राणिनां साक्षादपि पश्यतां कथं रश्मीनामुपलम्भो न भवेत्। तत्रालोकमिलनस्यासम्भवात्। **अथ** यत्रालोकमिलनं तत्रैव तेषामुद्भूतानामुत्पत्तिः। **तर्हि** गृहगोधिकादिनेत्ररश्मीनामप्रकाशकत्वं स्यात्। अनुद्भूतभासुररूपत्वादिति प्रागुक्तान्न मुच्यसे।

**भाषमाणेन निःसारमित्येवं भूषण त्वया।**
**सत्यं सत्यापयांचक्रे भूषणं भस्मभङ्गिभिः॥ ३१६**

ततोऽनुद्भूतभासुररूपस्याभिव्यञ्जकत्वाघटनादसिद्धं ते रूपाभिव्यञ्जकत्वं चक्षुषि। अनुमानबाधितं च चक्षुसस्तैजसत्वम्। चक्षुषस्तैजसं न भवति तमःप्रकाशकत्वाद्यन्नैवं न तदेवं यथा प्रदीपस्तथा चेदं तस्मात्तथेति। **न च** तमसोऽसत्त्वेनासिद्धं तत्प्रकाशकत्वम्। अस्य प्रसाधयिष्यमाणत्वात्। तदेवं तैजसत्वस्यासिद्धत्वान्न चक्षुषि रश्मिवत्त्वसिद्धिनिबन्धनत्वम्।

**अथ क्वचन** निरन्तरतिमिरनिकरकरम्बितापवरककोणे निषण्णस्य जरन्मार्जारस्येक्षणे प्रत्यक्षतो रश्मिवत्त्वप्रतीतेस्तन्निदर्शनेनान्यत्रापि नेत्रत्वहेतुना तत्सिद्धिरभिधीयते। **तर्हि** तरुणरमणीवीक्षणे

कट्यक्षलक्षप्रक्षेपाः प्रेक्ष्यन्ते तत एव करभादिलोचनेऽपि तत्सिद्धिः किं न स्यात् । तस्मान्न साधर्म्यमात्रेण हेतोर्गमकत्वमपि त्वन्यथानुपपन्नत्वेन । न चात्र तदस्ति । तद्ग्राहकप्रमाणस्यासम्भवात्। न च मार्जारनेत्रेऽपि रश्मिवत्त्वं नः सिद्धमिति प्रागुक्तम् । तदित्थं दृशो रश्मिवत्त्वाप्रसिद्धेरसम्बद्धमुक्तमधिष्ठानदेशात्प्रसरद्रश्मिरूपावयवसमवेतमित्यादि । अनुमानबाधितश्च चक्षुषः प्राप्तार्थपरिच्छेदनपक्षः । तथा हि चक्षुः प्राप्तार्थपरिच्छेदि न भवत्यत्यासन्नार्थाप्रकाशकत्वाद्यत्पुनर्नैवं न तदेवं यथा घ्राणं तथा चैतत्तस्मात्तथेति । न चात्र हेतुरसिद्धः । गोलकसंसर्गिणोऽञ्जनस्य लोचनेनाप्रकाशनात् । **अथात्यासन्नोऽर्थो** योग्योऽयोग्यः सामान्यतो वा विवक्षितः । **आद्यपक्षे** हेतोरसिद्धिः । योग्यस्यात्यासन्नस्य सर्वस्य तेन प्रकाशनात् अञ्जनस्य तु न योग्यता । प्रसरतो हि नयनरश्मिसमूहस्य यत्तत्प्रगुणदेशेऽवस्थितं तदेव चक्षुर्ग्रहणे योग्यम् । न चाञ्जनं तथा । तस्य पक्ष्मपुटतटोट्टङ्कितस्य गोलकान्तर्निःसरतां मूले मृणालसूत्रसूक्ष्मेण रश्मिसमूहेन सार्थं प्रगुणत्वायोगात् । **द्वितीये तु पक्षे** व्यभिचारः । स्पर्शनादीनामाकाशपरमाणुप्रमुखात्यासन्नायोग्यपदार्थाप्रकाशकत्वेऽपि प्राप्तार्थपरिच्छेदकत्वात् । तृतीयेऽप्ययमेव कलङ्कः । **तदखिलं** प्रलापमात्रम् । **यतोयदि** नाम सूक्ष्मरश्मि दंष्ट्रादिस्वकीयालीककल्पनयाञ्जनमयोग्यं पर्यकल्पि तथापि सकलगोलकव्यापितिमिरकामलादिषु कः प्रतीकारः । ते हि तद्व्यापित्वादेव तद्रश्मीनां प्रगुणदेशस्थिताः । यथा स्फुटस्फटिककाचादिकूपिकाक्रोडोपगतप्रदीपरश्मीनां स्फाटिकादिकूपिका इति । न च स्पर्शनेन प्राप्तार्थप्रकाशकेनाप्यत्यासन्नस्याभ्यन्तरशरीरावयवस्पर्शस्याप्रकाशनादत्यासन्नार्थाप्रकाशकत्वस्यानेकान्तः । आभ्यन्तरशरीरावयवानां स्पर्शनेन्द्रियकारणत्वेन तत्सम्बन्धिस्पर्शस्य तदविषयत्वात् । अकारणस्य तु जलादेः पीयमानस्य शशिरस्पर्शोऽभ्यन्तरमनुभूयत एव । व्यवहिताप्रकाशकत्वादिति हेतुरप्यसिद्धः । कुलिशकाचाभ्रपटलस्वच्छसलिलस्फटिकोपलान्तरितानामपि पदार्थानामुपलम्भात् । **अथ** चक्षूरश्मयः। कुलिशादिकं विभिद्य तदन्तरितपदार्थदेशमुपसर्प्पन्ति ततस्तदुपलम्भः तर्हि तूलपटलान्तरितपदार्थोपलम्भः सुतरां भवेत्तस्य सुभेदत्वात् । ये हि कमपि कर्कशमतिशयनिशितशस्त्राभेद्यं दम्भोलिस्फाटिकादिकमपि भिन्दन्ति न ते तूलपटलीं भेदयितुमलमिति कः सकर्णः कर्णेऽपि कुर्व्वीत ।

यत्पुनरुदयन उदचीचरत् । "**स्फटिकाद्यन्तरितोपलब्धिः प्रसादस्वभावतया स्फटिकादीनां तेजोगतेरप्रतिबन्धकतया प्रदीपप्रभावद्भवेदुपपन्ना**" इति । **तदपि** नोपपन्नम् । न हि प्रसन्नतानिमित्तको मूर्त्तद्रव्यस्य मूर्त्तद्रव्यान्तरेण गतेरप्रतिबन्धः क्वापि प्रैक्षि । किन्तु प्रशिथिलावयवारब्धत्वनिमित्तकः । यथा तूलादिभिरेव जलादीनां पुनः स्फटिकादिभिः । तद्वदिहापि तूलादय एव नयनरश्मिगतेरप्रतिबन्धकाः । न स्फटिकादयः । स्फटिकान्तर्गतप्रदीपरश्मयस्तु न तं भित्वा प्रसरन्ति । किन्तु तत्सम्पर्कमासाद्य स्फटिकपरमाणुपुञ्ज एव तथा परिणतः सर्वतः प्रसरति । अत एव

पीतरक्तादिकाचकूपिकातो रश्मयोऽपि तच्छायाः प्रसरन्तो दृश्यन्ते । **अथ** यथा पारदस्यायस्पात्रभेदे सामर्थ्यं न पुनरलाबुपात्रभेदे तथा लोचनरोचिषामपि स्फटिकादेर्भेदे शक्तिर्भविष्यति न तूलपटलीभेद इति **चेत्** । तदप्रतीतिकम् सोऽयं स्फटिकादिरिति निर्णयाद्विनाशव्यवहारस्य तत्र कस्यचिदभावाच्च । अथ पूर्व्वपूर्व्वकाचादिव्यूहवृत्तावुत्तरोत्तरतद्रूपव्यूहान्तरस्योपपत्तेः प्रदीपज्वालावन्निरन्तरताभ्रान्ति-रित्युच्यते । हन्तैवम् ।

**कलशकुलिशप्राकाराद्यं त्रिविष्टपकन्दरा-**
**कुहरकलितं विश्वं वस्तु प्रतिक्षणभङ्गुरम् ।**
**ज्वलनकलिकावत्किन्त्वस्मिन्निरन्तरताभ्रमः**
**प्रभवति वदन्नित्थं शाक्यः कथं प्रतिहन्यते ॥ ३१७ ॥**

**अथा**त्मादिपदार्थानां क्षणिकत्वमाचक्षाणं भिक्षुं प्रतिक्षेप्स्यति प्रत्यभिज्ञैवेति **चेत्** । स्फटि-कादावप्यस्त्येवासौ । सान्यत्र दृढेति चेत् किंकृतं तत्रास्य दार्ढ्यम् । बाधाभावकृतमिति **चेत्** । प्रकृतेऽपि तत्समानम् । न हि स्फटिकादौ प्रत्यभिज्ञानस्यैकत्वपरामर्शिनः किञ्चद्बाधकमस्त्यात्मा-दिवत् । स्फाटिकान्तरितार्थोपलम्भेन तद्भेदसिद्धिरेकत्वग्राहकप्रत्यभिज्ञानस्य बाधिकेति **चेत्** । नैवम् । इतरेतराश्रयापत्तेः भेदसिद्धौ हि स्फटिकादेस्तदन्तरितार्थोपलम्भः सिद्ध्यति तत्सिद्धौ च भेदसिद्धिरिति । यदि च तथा स्फाटिकादेराशूत्पादविनाशौ स्वीक्रियेते तदा चैवं दर्शनान्तरितम्प्रदर्शनमपि स्यात् । न च तत्र तदा कस्यचित् तदनुभूयते । तद्विनाशस्य तद्विनाशस्य पूर्वोत्तरोत्पादाभ्यामाशुभाविभ्यां तिरोहितत्वान्न तत्रादर्शनं स्यादिति **चेत्** । **नन्वेवं** तदुत्पादस्य पूर्वोत्तरविनाशाभ्यामाशुभाविभ्यामेव तिरोधानाद्दर्शनमपि माभूत् । तदुत्पादयोः स्वमध्यगतविनाशतिरोधाने सामर्थ्यं भावस्वभावत्वेन बलीयस्त्वात् । नतु निस्स्वभावयोस्तन्नाशयोः स्वमध्यगतोत्पादतिरोधाने । अभावस्वभावत्वेन दुर्बलत्वादिति **चेत्** नैतद्वाच्यम् । भावाभावस्वभावयोः समानबलत्वात् । तयोरन्यतरबलीयस्त्वे युगपद्भावाभावात्मकवस्तुप्रतीतिविरोधात् । न हि वस्तुनो भाव एव कदाचित्प्रतीयते । स्वरूपादि-चतुष्टयेनेव पररूपादिचतुष्टयेनापि भावप्रतीतिप्रसक्तेः । न चानाद्यनन्तं सर्वात्मकं वस्तु प्रतिभाति । यतस्तथाभ्युपगमः श्रेयान् । नाप्यभाव एव वस्तुनोऽनुभूयते। पररूपादिचतुष्टयेनेव स्वरूपादि-चतुष्टयेनाप्यभावप्रतिपत्तिप्रसङ्गात् । न च सर्वथाप्यसत्प्रतिभाति । यतस्तदभ्युपगमोऽपि कस्य-चित्प्रतितिष्ठेत । प्ररूपयिष्यते च भावाभावप्रतिभासनम् । ततः सर्वथोत्पादे विनाशे च पुनः पुनः स्फटिकादौ दर्शनसान्तरस्यादर्शनस्य प्रसञ्जनं दुर्निवारमिति स्थितम् । **न चैवं** प्रदीपे कथं नैरन्तर्यभ्रम इति **वाच्यम्** । सर्वथोत्पादविनाशयोस्तत्राघटमानत्वादिति वक्ष्यते । सन्दिग्धव्यतिरेकि च व्यवहिताप्रकाशकत्वम् । अप्राप्तार्थपरिच्छेदित्वेऽपि व्यवहिता-प्रकाशकत्वस्याविरोधात् ।

**यत्तूक्त**मप्राप्तत्वाविशेषादव्यवहितवत्कुड्यादिव्यवहितमपि किं न गृह्णीयादिति । **तदप्यसङ्गतम्** । योग्यतावशेनैव तेन प्रकाशनात् । अभ्युपगतं च भवताप्येतत् । कथमन्यथा स्फाटिकान्तरितस्येव समलजलान्तरितस्यापि भावस्योपलम्भो न भवेत् । **अथ** पाथो विध्वसितत्वाल्लोचनतेजो न तद्भित्त्वार्थेन सम्बध्यते इति कथं तदुपलम्भः । **तर्हि** स्वच्छसलिलान्तरितस्यापि तस्यानुपलम्भः स्यात् । कथं वा कुड्यादेर्न रश्मिभिर्भेदः । नहि तत्तेजो विरोधि । स्फटिकादावपि तद्विरोधित्वापत्तेः । प्रसन्नतानिमित्तस्तु तद्भेदः पूर्वमेव व्यपास्तः । किं च घ्राणं यथा कैरवस्यैवं परमाणोरपि गन्धं कुतो न प्रकाशयेत् । **अथ** प्रकाशयत्येव योगिनो घ्राणं परमाणुगन्धमपि । नास्मदादेः । तादृगदृष्टविशेषस्याभावात् । महत्त्वाद्युपेतद्रव्यगन्धादि तु प्रकाशयति । तादृगदृष्टविशेषस्य सद्भावात् । इत्यदृष्टवैचित्र्यात्तद्विज्ञानभावाभाववैचित्र्यम् । **तदितरत्रापि** तुल्यम् । स्याद्वादिनामपि चक्षुरप्राप्यकारि केषाञ्चिदतिशयज्ञानभृतामस्मदाद्यगोचरविप्रकृष्टस्वविषयस्य परिच्छेदकम् । तादृशतदावरणक्षयोपशमविशेषसद्भावात् अस्मदादीनां तु यथाप्रतीति पदार्थप्रकाशकत्वं स्वानुरूपतदावरणक्षयोपशमविशेषादित्युमाभ्यामभ्युपगन्तव्या योग्यता । अधिकश्चास्माकमनुभवः साक्षी । अनुमानं चानन्तरं निरूपितम् ।

**यत्तु कन्दलीकारो** व्याकरोवि । "**योग्यताभावादव्यवहिताग्रहणमिति चेत् । इन्द्रियस्य तावद्योग्यता विषयग्रहण सामर्थ्यमस्त्येव तदानीमव्यवहितग्रहणात् विषयस्यापि योग्यता महत्त्वानेकद्रव्यवत्त्वरूपविशेषाद्यात्मिका व्यवधानेऽप्यनिवृत्तैव । आर्जवावस्थानमपि तदावस्थमिति" । तदप्येतेन निरस्तम्** । प्रमातुस्तादृशक्षयोपशमरूपतद्ग्रहणयोग्यताया अभावात् । कथमन्यथा निशीथिनीनाथरूपस्येव तद्गतेरुपलम्भो न भवेत् । **अथ** भास्वरत्वाद्दूरादपिरूपं तस्योपलभ्यते नतु गतिस्तद्विपरीतत्वात् **तर्हि** तदुत्सङ्गसङ्गतः कुरङ्गकलङ्कः सैंहिकेयनिकेतनैकदेशश्चनोपलभ्येत । तद्रूपाभावेन सितत्वेन तदुपलम्भे कतरो गतावपराधः यन्नासौ दृश्यते । तदेवं न व्यवहिताप्रकाशकत्वानुमानं साधीयः । नापि बाह्येन्द्रियत्वानुमानम् । तत्रापि प्रतिपादितदोषाणां प्रायः प्रसर्प्पणात् ।

किं च किमिदं बाह्येन्द्रियत्वं चक्षुषः । किं बहिरर्थग्रहणाभिमुख्यं बहिर्देशावस्थायित्वं, बहिष्कारणप्रभवत्वं वा स्यात् । **तत्र प्राचीनं** चेतसा व्यभिचारि । तस्याप्राप्तसुपर्व्वपर्व्वतस्वर्गादिपरिच्छेदकत्वेऽपि बहिरर्थग्रहणाभिमुख्यतया बाह्येन्द्रियत्वात् । **द्वितीयपक्षे**ऽप्यर्थदेशः शरीराद्बहिर्वा बहिर्देशो विवक्षितः । व्यवस्थायित्वमपि **पौरस्त्यपक्षे**ऽर्थदेशाश्रितत्वमर्थाभिमुख्येन प्रवृत्तिर्वा स्यात् । आद्यपक्षे उभयासिद्धिः । चक्षुषो गोलकान्तर्देशसमाश्रितत्वेन वादिप्रतिवादिभ्यामभ्युपगतत्वात् । दृष्टान्तश्च साधनविकलः । त्वगिन्द्रियस्यार्थदेशानाश्रित्वात् । **द्वितीयपक्षेऽपि** प्रवृत्तिरर्थाभिमुख्येन प्रसर्प्पणरूपो व्यापारः प्रतीत्युत्पादकत्वं वा । **प्रथमे** प्रतिवाद्यसिद्धिः । न खलु

प्रतिवादिना नयनरश्मयोऽर्थदेशेऽपसर्प्पन्तः स्वीकृताः । तेन नयनस्यातैजसत्वेन प्रतिपादनात् । तत्साधकस्य रूपादिषु नियमेनेत्यादिप्रमाणस्य प्राक्पराकृतत्वेन बाधकस्य चोपन्यस्तत्वेनोभयासिद्धिर्वा । साधनविकलतात्रापि दृष्टान्तस्य स्पष्टैव । अर्थाभिमुख्येन प्रतीत्युत्पादकत्वं पुनर्मनसैवानैकान्तिकम् । **अथ** शरीराद्बहिर्देशे गोलकस्वरूपे समाश्रितत्वं बहिर्देशावस्थायित्वम् । चेतसा च व्यभिचारोत्सारणाय बाह्येति विशेषणम् । तद्धि देहान्तर्देशसमाश्रितमिति । **तदप्यबन्धुरम्** । इन्द्रियबाह्यत्वस्याप्राप्तार्थपरिच्छेदेनापि सार्द्धमविरोधात् । न चाविरुद्धं विशेषणं विपक्षेण ततो हेतुं निवर्त्तयति । न च विरोधसाधनसावधानं किञ्चिदिह प्रमाणमस्ति ।

**अथ** मनसि प्राप्तार्थपरिच्छेदव्यावृत्त्या बाह्येन्द्रियत्वस्यापि व्यावृत्तेर्विरोधसिद्धिरभिधीयते । **नैवम्** । क्वचित् साध्यनिवृत्तौ साधननिवृत्तावपि विरोधस्यासिद्धेः । अन्यथा चक्षुरप्राप्तार्थपरिच्छेदि स्पर्शनरसननासाश्रोत्रान्येन्द्रियत्वात् मनोवदित्यतः कश्चिच्चक्षुषोऽप्राप्तार्थपरिच्छेदं प्रसाधयन् कथं प्रतिरोत्स्यते । समस्ति खल्वत्राप्यप्राप्तार्थपरिच्छेदव्यावृत्त्या स्पर्शनरसननासाश्रोत्रान्येन्द्रियत्वस्यापि व्यावृत्तिः स्पर्शनादाविति । तस्माद्व्यतिरेकानिश्चयात्सन्दिग्धव्यतिरेको हेतुः । बहिष्कारणप्रभवत्वमपि मनसैव व्यभिचारि । आत्मापेक्षया हि बहिष्कारणं पुद्गलतत्त्वं तत्प्रभवत्वं च चक्षुरादीन्द्रियवन्मनसोऽप्यस्त्येव । तस्यापि पौद्गलिकत्वेन षट्पदार्थपरीक्षायां समर्थयिष्यमाणत्वात् । चक्षुः प्राप्यकारि भौतिकत्वादित्यत्रापि प्राप्यकारीति कोऽर्थः । प्राप्य संयुज्य स्वकार्यं करोतीति **चेत्** । **ननु** प्राप्तिरपि स्वकार्यं तदपि च प्राप्य करोत्यन्यथा वा । प्राप्यचेत्, तर्हि सापि प्राप्तिः प्राप्यैव कर्त्तव्येति प्राप्ति-परम्परोत्पाद एवोपशान्तशक्तित्वात्प्रस्तुतकार्यानिष्पत्तेरनवस्था । अन्यथेति पक्षे त्वनयैव व्यभिचारः ।

**अथ** ज्ञानरूपकार्यापेक्षयैव चक्षुषः प्राप्यकारित्वसाधनान्नोक्तदोषानुषङ्गः । ननु कुत एतदाप्तमायुष्मता । प्राप्यकारीति शब्दस्य प्राप्तिपूर्वक्रियामात्राभिधानपर्यवसितत्वात् । न च शब्दान्तरमस्ति यत्सन्निधानादयं "**देवस्य शृंगारिणः**" इत्यादिवदभिमतार्थवृत्तिः स्यात् ।

**अथ** सैन्धवादिवत्प्रकरणवशादस्याभीष्टार्थनिष्ठाभिधीयते । तथाहि प्राप्य वा चक्षुर्ज्ञप्तिं कुर्यादप्राप्य वेत्यत्र प्रस्तावे प्रोच्यते चक्षुः प्राप्येत्यादि । **तदपि नोपपन्नम्** । एवं सति निदर्शनस्य साध्यशून्यतापत्तेः । परश्वधो हि पादपं प्राप्य द्वैधीभावमेव विधत्ते नतु ज्ञप्तिम् ।

**अथा**भिदध्यात्कश्चित्, स्वविषयज्ञप्तिकरणापेक्षया परशुर्निदर्शनमुपदर्शितो न च्छिदपेक्षया । तथा च न साध्यवैकल्यं दोषः । प्राप्यैवेन्द्रियं तेन ज्ञप्तिकरणादिति । **सोऽपि** नोपपन्नवक्ता । यतश्चाक्षुषीं स्पार्शनीं वा ज्ञप्तिमपेक्ष्य तेनैतदुच्येत । यदि **पौरस्त्यम्** । तदा सैव साध्यशून्यता निदर्शनस्य । चक्षुरर्थयोः प्राप्तेरद्याप्यसिद्धेः । अथ **स्पार्शनीं** तामपेक्षोच्यते । अस्त्वेवम् । किन्तु हेतोर्मेरुणा मनःपरिच्छेद्येन व्यभिचारः । भौतिकेनापि तेन मनोऽप्राप्तेनैव स्वपरिच्छित्तिकरणात् ।

**अथ** करणभूतेन येन परिच्छित्तिर्जन्यते स एव प्राप्यकारीह सङ्गतो न विषयत्वेनापि । **तर्हि** दृष्टान्तान्तरं वक्तव्यम् । न प्रकृतम् । अस्तु प्रदीपादिरेवासौ तेन हि करणभूतेन रश्मिद्वारेण प्राप्त एवार्थः प्रकाश्यत इति **चेत् । नैवम्** । एवमपि हेतोः प्रतिबन्धानिश्चयात् । साधर्म्यमात्रेण तन्निश्चयायोगात् । अप्राप्यकारित्वमपि स्पृशतो भौतिकत्वस्य न किञ्चित्परिपन्थिप्रमाणमिति । **एतेन** कारकत्वादिति साधनं यत्केनचिदुच्यते । तदपि **परास्तम्** । अयस्कान्तेन च व्यभिचारीदम् । तेनाप्राप्तस्यैव लोहस्याकर्षणात् ।

**अथ** तस्यापि प्राप्तस्यैवाकर्षणम् । अयस्कान्तो हि वायुद्वारेण तदाकर्षति यथा पुरुषो नालान्तर्व्वायुप्रयोगेण पानीयादि । संयुक्तसंयोगश्चात्र प्राप्तिः । **तदसत्** । वायोस्तत्राप्रमाणत्वात् । न तावत्प्रत्यक्षं *तद्ग्राहकम् । अननुभवात् । अनुमानमपि नास्ति । समाकर्षणस्यान्यथानुपपत्तिरस्ति* इति **चेत्, न** । अप्राप्तस्याप्याकर्षणोपपत्त्यास्या उपक्षीणत्वात् । अप्राप्तस्याप्याकर्षणे कथं न सकललोहाकर्षणम् । प्राप्तस्याप्याकर्षणे कथं न तद्देशवर्त्तितृणतूलादिसमाकर्षणम् । तस्यायोग्यत्वादिति **चेत्** । अनयैवोक्त्यामृतमास्वादय । सकललोहानामयोग्यत्वादप्राप्तत्वाविशेषेऽपि नाकर्षणं भवेदस्ति चैतदिति तुल्यम् । वाद्यन्तरं प्रत्येवास्य योग्यतेति **चेत्**, किमेतदेवान्यत्रापि न पश्यसि । किं च कुतोऽयसः समाकर्षणान्यथानुपपत्तिः । कारकत्वाख्याद्धेतोरिति **चेत्** । अयमभिसन्धिः । सकलं कारकं प्राप्त एव वस्तुनि फलमुत्पादयदवलोकितं कारक एवायस्कान्त इति । तदसुन्दरम् । इतरेतराश्रयप्रसङ्गात् । कारकत्वस्य हेतुत्वसिद्धावयस्कान्तस्य प्राप्तार्थसमाकर्षणसिद्धिस्तत्सिद्धौ च कारकत्वस्य हेतुत्वसिद्धिरिति । यदि च वायुद्वारेण तदाकर्षणमुच्यते । तदा तिर्यगेव तदाकर्षणं भवेन्न पुनरूर्ध्वम् । वायोस्तिर्यक्पवनस्वभावत्वात् । वात्यादौ तु विरुद्धदिक्क्रियवायुद्वयसंयोगनिमित्तत्वेनोर्ध्वगतेर्भवद्भिर्व्यवस्थापितत्वात् । **न चा**त्रापि तथाविधा कल्पना ज्यायसी । तथाननुभवात् । अनुमानबाधितं च तत्र वायुपरिकल्पनम् । तथा हि चुम्बको नायसो वायुद्वारेणाकर्षकस्तत्रावस्थितलघुतरतृणतूलाद्यनाकर्षणान्यथानुपपत्तेः । कथं च तिलकादिना कान्तादीनामाकर्षणम् । तत्रापि पवनोऽस्तीति महासाहसिकस्योल्लापः । न खलु यथा वात्यादिना परवशीभूता कान्ता समानीयते । तथात्रापि पवनविशेषेणेति प्रतीतिरस्तीति ।

यदप्यवादि प्रथमतो हि चक्षुः सन्निहितमित्यादि, यदपि च संसर्गिद्रव्यतया निःसरदेव नायनं तेजो बाह्यालोकेनैकताङ्गतं युगपदेव तावदर्थैः संसृष्टमिन्द्रियमुत्पादितवदिति भूधरशशधरयोस्तुल्यकालग्रहणमुपपद्यत इति केनचित् उच्यते तदपि चक्षुषो रश्मिवत्त्वपराकरणादपाकृतम् । उत्तरमते च पृष्ठस्थितस्य व्यवहितस्य चार्थस्योपलम्भः । प्रसज्यते । **अथा**नार्जवावस्थितस्य व्यवहितस्य कथं ग्रहणमस्तु । **मैवम्** । आर्जवावस्थितस्य व्यवधानाश्रयणस्येन्द्रियप्राप्त्यर्थत्वात्तस्याच्च तथास्थितेऽप्यर्थे सञ्जातत्वात् ।

यदि च चक्षुः प्राप्यकारि । तदा कथं संशयविपर्ययप्रादुर्भावः । सामान्यवद्विशेषाणामपि सन्निकृष्टानामुपलम्भसम्भवात् । तथा च कथं विशेषानुपलब्धिनिबन्धनौ संशयविपर्ययौ स्याताम् । **यत्पुनरात्रेयभाष्यकारः** प्राह ।

"**यथा सामान्यस्य विशेषाणां च प्रदीपालोकेन सन्निकृष्टत्वेन दूरात्सामान्यमुपलभ्यते न विशेषा इति प्रदीपालोककारितौ संशयविपर्ययौ भवतः तथा सामान्यस्य विशेषाणां च चक्षुषा सन्निकृष्टत्वेऽपि दूरात्सामान्यमुपलभ्यते न विशेषा इति चाक्षुषौ संशयविपर्ययौ भवतः । तत्र महाविषयत्वात्सामान्यं दूरादप्युपलभ्यतेऽल्पविषयत्वात्तु विशेषान दूरादुपलभ्यन्त इति संशयविपर्यययोरुपपत्तिः**" इति । **तदपि न क्षोदक्षमम्** । महाविषयत्वस्योपलम्भं प्रत्यप्रयोजकत्वात् । न खलूपलभ्यमानादितरे विषयाः कणिकयापि तत्सामान्यज्ञप्तावुपयुज्यन्ते । यतस्तद्भूयस्त्वं दूरात्तत्स्थसामान्योपलब्धौ निमित्तं स्यात् । यस्तु प्रदीपो दृष्टान्ततयोपदिष्टः सोऽपि न श्रेष्ठः । येन हि सन्निकर्ष उपलम्भकारणतया कथ्यते तस्य प्रदीपेऽपि सामान्यवद्विशेषाणामुपलम्भकत्वप्रसक्तिर्दुर्निवारा । अस्माभिस्तु प्रदीप एवोपलम्भं प्रति निमित्तमुच्यते । स च स्वयोग्यतावशेन दूरात्सामान्यमेवोपलम्भयतीति युक्तम् । तद्वदेव यदि चक्षुषोऽपि योग्यता स्वीक्रियते कृतं सन्निकर्षेण । संन्निकर्षाभावे योग्यमपि कथमुपलम्भं करोति चक्षुः । न हि योग्योऽपि प्रदीपोऽप्राप्तं पटादि प्रकटयतीति **चेत्,** ननु कुत एतत् । तस्य व्यवहिताप्रकाशकत्वादिति । **चेत्** । **न** । अस्य निराकृतत्वात् । अनुमानबाधितं च चक्षुषः प्राप्तार्थप्रकाशनम् । तथा हि चक्षुरप्राप्तार्थप्रकाशकं व्यवहितस्यापि प्रकाशकत्वात् यत्तु नैवं न तदेवं यथा श्रोत्रं तथा चेदं ततस्तथा । प्रसाधितं च काचादिव्यवहितस्यापि चक्षुषः प्रकाशकत्वमिति न साधनासिद्धिः ।

योग शाम्यतु तवैष दोहदः प्राप्यकारिणि तदीक्षणे क्षणात् ॥
हन्त यत्किमपि कर्कशोत्तरैः कीलिता सकलयुक्तिमण्डली ॥ (३१८)

॥ **रत्नाकरावतारिका** ॥

यदि च रूपं सहकारि कल्प्यते, तदा समाकलितसकलनेत्रगोलकस्य दूराऽऽसन्नतिमिररोगावयविनः कथं नोपलब्धिः ?। **अथा**ऽत्यन्ताऽऽसत्त्यभावोऽपि सहकारी, न चासौ तिमिरेऽस्तीति **चेत्** । **नन्वि**यमासत्तिरात्मापेक्षया, शरीरापेक्षया, लोचनापेक्षया, तदधिष्ठानापेक्षया वा विवक्षांचक्रे प्रेक्षादक्षेण ? । **आद्ये कल्पे,** कथं कस्यापि पदार्थस्योपलब्धिः ?, व्यापकस्याऽऽत्मनः सर्वभावैरासत्तिसंभवात् । **द्वितीये,** कथं करतलतुलितमातुलिङ्गादेरुपलम्भः ?। **तृतीये,** कथं क्वापि चाक्षुषप्रत्यक्षमुन्मज्जेत् ?, चक्षुषः प्राप्यकारित्वकक्षीकारेण सर्वत्र स्वगोचरेणाऽऽसत्तिसद्भावात् । **तुरीये,** कथमधिष्ठानसंयुक्ताञ्जनशलाकायाः समुपलब्धिः ? । **अथ** येनांशेन तस्यास्तत्र संसर्गः स नोपलभ्यत

एव । **नैवम्,** अवयविनो निरंशत्वेन स्वीकारात् । अपि च, कथमुदीचीं प्रति व्यापारितनेत्रस्य प्रमातुर्न कांचनं काञ्चनाऽचलोपलब्धिमनुभवामः ? । **न च** दवीयस्त्वाद् न तत्र नेत्ररश्मयः प्रसर्तुं शक्ताः, तेषां शशाङ्केऽपि प्रसरणाभावापत्तेः । **अथ** तदालोकमिलितास्ते वर्धन्ते, **तर्हि** खरतरकरनिकरनिरन्तरा-ऽऽपूरितविष्टपोदरे मरीचिमालिनि सति सुतरां सुराद्रिमभिसर्पतां तेषां वृद्धिर्भवेत् । **न च** दिनकरमरीचीनां नितरां कठोरत्वेन तैस्तेषां प्रतिघातः, तदाऽऽलोककलापाऽऽकलितकलशकुलि-शादिपदार्थानामप्यनुपलम्भापत्तेः । ततो न सन्निकर्षसद्भावेऽप्यवश्यं संवेदनोदयोऽस्ति ।

इदमिदानीं मनाग् मीमांसामहे प्राप्यकारीणीन्द्रियाणि, अप्राप्यकारीणि वेति । तत्र प्राप्य-कारीण्येवेति ***कणभक्षाऽक्षपादमीमांसकसांख्याः*** *समाख्यान्ति । चक्षुःश्रोत्रेतराणि तानि तथेति* **ताथागताः** । चक्षुर्वर्जानीति तु तथा स्याद्वादाऽवदातहृदयाः । तत्र प्रथमे प्रमाणयन्ति–

चक्षुः प्राप्य मतिं करोति विषये बाह्येन्द्रियत्वादितो;
*यद् बाह्येन्द्रियताऽऽदिना परिगतं तत् प्राप्यकारीक्षितम् ।*

जिह्वावत् प्रकृतं तथा च विदितं तस्मात् तथा स्थीयतां;
नाऽत्राऽसिद्धिमुखश्च दूषणकणस्तल्लक्षणाऽनीक्षणात् ॥ १ ॥

अद्रिचन्द्रकलनेषु या पुनर्यौगपद्यधिषणा मनीषिणाम् ।
पद्मपत्रपटलीविलोपवत् सत्वरोदयनिबन्धनैव सा ॥ २ ॥

प्रथमतः परिसृत्य शिलोच्चयं निकटतः क्षणमीक्षणमीक्षते ।
तदनु दूरतराम्बरमण्डलीतिलकान्तमुपेत्य सितत्विषम् ॥ ३ ॥

कुर्महेऽत्र वयमुत्तरकेलीं कीदृशी दृगिह धर्मितयोक्ता ? ।
किं नु मांसमयगोलकरूपा, सूक्ष्मताभृदपरा किमु काऽपि ? ॥ ४ ॥

आदिमा यदि तदाऽपि किमर्थो लोचनाऽनुसरणव्यसनी स्यात् ? ।
लोचनं किमुत वस्तुनि गत्वा संसजेत् प्रिय इव प्रणयिन्याम् ? ॥ ५ ॥

प्रत्यक्षबाधः प्रथमप्रकारे प्राकारपृथ्वीधरसिन्धुरादिः ।
संलक्ष्यते पक्ष्मपुटोपटङ्की प्रत्यक्षकाले कलयाऽपि नो यत् ॥ ६ ॥

पक्षे परत्रापि स एव दोषः सर्पद् न वस्तु प्रतिवीक्ष्यतेऽक्षि ।
संसर्पणे वाऽस्य सकोटरत्वप्राप्त्या पुमान् किं न जरद्द्रुमः स्यात् ? ॥ ७ ॥

चक्षुषः सूक्ष्मतापक्षे सूक्ष्मता स्यादमूर्तता ।
यद्वाऽल्पपरिमाणत्वमित्येषा कल्पनोभयी ॥ ८ ॥

स्याद् व्योमवद् व्यापकताप्रसक्त्या सर्वोपलम्भः प्रथमप्रकारे।
प्राकारकान्तारविहारहारमुख्योपलम्भो न भवेद् द्वितीये ॥ ९ ॥

न खलु नखलु शस्त्रं स्वप्रमाणात् प्रथिष्ठे;
पटकटशकटादौ भेदकारि प्रसिद्धम्।

अथ निगदसि तस्मिन् रश्मिचक्रं क्रमेण;
प्रसरति तत एतत् स्यादनल्पप्रकाशम् ॥ १० ॥

तथाहि-

प्रोद्दाममाणिक्यकणानुकारी दीपाङ्कुरस्त्वट्पटलीप्रभावात्।
किं नैव कश्मीरजकज्जलादीन् प्रथीयसोऽपि प्रथयत्यशेषान् ? ॥ ११ ॥

नन्वेवमध्यक्षनिराक्रिया स्यात् पक्षे पुरस्तादुपलक्षितेऽस्मिन्।
प्रौढप्रभामण्डलमण्डितोऽर्थो नाऽऽभासते यत्प्रतिभासमानः ॥ १२ ॥

अथाऽप्यनुद्भूततया प्रभायाः पदार्थसंपर्कजुषोऽप्यनीक्षा।
सिद्धिस्तदानीं कथमस्तु तस्या ब्रवीषि चेत् तैजसताख्यहेतोः ॥ १३ ॥

रूपादिमध्ये नियमेन रूपप्रकाशकत्वेन च तैजसत्वम्।
प्रभाषसे चक्षुषि संप्रसिद्धं यथा प्रदीपाङ्कुरविद्युदादौ ॥ १४ ॥

तदिदं घुसृणविमिश्रणमन्ध्रपुरन्ध्रीकपोलपालीनाम्।
अनुहरते व्यभिचाराद् रूपेक्षणसन्निकर्षेण ॥ १५ ॥

द्रव्यत्वरूपेऽपि विशेषणे स्याद् हेतोरनैकान्तिकताऽञ्जनेन।
तस्यापि चेत् तैजसतां तनोषि तन्वादिना किं नु तदाऽपराद्धम् ? ॥ १६ ॥

सौवीरसौवर्चलसैन्धवादि निश्चिन्वते पार्थिवमेव धीराः।
कृशानुभावोपगमोऽस्य तस्मादयुक्त एव प्रतिभात्यमीषाम् ॥ १७ ॥

तथा च-

सौवीरसौवर्चलसैन्धवादिकं स्यादाकरोद्भूतिवशेन पार्थिवम्।
मृदादिवद्, न व्यभिचारचेतनं चामीकरेणाऽनुगुणं निरीक्ष्यते ॥ १८ ॥

चामीकरादेरपि पार्थिवत्वं लिङ्गेन तेनैव निवेदनीयम्।
शाब्दप्रमाणेन न चात्र बाधा पक्षस्य यद् नास्ति तदत्र सिद्धम् ॥ १९ ॥

अञ्जनं मरिचरोचनादिकं पार्थिवं ननु तवाऽपि संमतम् ।
अञ्जनेऽपि तदसौ प्रवृत्तिमानप्रयोजकविडम्बडम्बरी ॥ २० ॥

हनूमल्लोललाङ्गूललम्बात् ते साधनादतः ।
न सिद्धस्तैजसत्वस्य दृष्टसुस्पष्टदूषणात् ॥ २१ ॥

चक्षुर्न तैजसमभास्वरतिग्मभावा-
दम्भोवदित्यनुमितिप्रतिषेधनाच्च ।

सिद्धिं दधाति नयनस्य न तैजसत्वं;
तस्मादमुष्य घटते किमु रश्मिवत्ता ? ॥ २२ ॥

अपि च,

प्रत्यक्षबाधः समलक्षि पक्षे न रश्मयो यद् दृशि दृष्टपूर्वाः ।
तथा च शास्त्रेण तवैव कालातीतत्वदोषोऽप्युदपादि हेतोः ॥ २३ ॥

अनुद्भवद्रूपजुषो भवेयुश्चेद् रश्मयस्तत्र ततो न दोषः ।
नन्वेवमेतस्य पदार्थसार्थप्रकाशकत्वं न सुवर्णवत् स्यात् ॥ २४ ॥

आलोकसाचिव्यवशादथाऽस्य प्रकाशकत्वं घटनामियर्ति ।
नन्वेवमेतत्सचिवस्य किं स्यात् प्रकाशकत्वं न कुटीकुटादेः ? ॥ २५ ॥

अथाऽस्तु कामं, ननु तैजसत्वमुत्तेजितं किं न भवेत् त्वयाऽस्य ? ।
तथा च नव्यास्त्वदुपज्ञ एषोऽद्वैतप्रवादोऽजनि तैजसत्वे ॥ २६ ॥

उत्पद्यन्ते तरणिकिरणश्रेणिसंपर्कतश्चेत्;
तत्रोद्भूताः सपदि रुचयो लोचने रोचमानाः ।

यद् गृह्यन्ते न खलु तपनालोकसंपत्प्रतान-;
स्तस्मिन् हेतुर्भवति हि दिवा दीपभासामभासः ॥ २७ ॥

अत्रेयं प्रतिक्रिया-

मुष्टिग्राह्ये कुवलयदलश्यामलिम्नाऽवलिप्ते;
स्फीते ध्वान्ते स्फुरति चरतो घूककाकोदरादेः ।

किं लक्ष्यन्ते क्षणमपि रुचो लोचनेनैव यस्मा-;
दालोकस्य प्रसरणकथा काचिदप्यत्र नास्ति ? ॥ २८ ॥

उत्पत्तिरुद्भूततयाऽथ तासां तत्रैव यत्राऽस्ति रविप्रकाशः ।
काकोदरादेरपि तर्हि नैताः कीटप्रकाशे कुशला भवेयुः ॥ २९ ॥

अविवरतिमिरव्यतिकरपरिकरिताऽपवरकोदरे क्वचन ।
वृषदंशदृशि न दृष्टा मरीचयः किमु कदाचिदथ ? ॥ ३० ॥

अत एव विलोकयन्ति सम्यक् तिमिराङ्कूरकरम्बितेऽपि कोणे ।
मूषकपरिपन्थिनः पदार्थाञ्ज्वलनालोकविजृम्भणं विनैव ॥ ३१ ॥

अत्रोत्तरम्–

चाकचिक्यप्रतीभासमात्रमत्रास्ति वज्रवत् ।
नांशवः प्रसरन्तस्तु प्रेक्ष्यन्ते सूक्ष्मका अपि ॥ ३२ ॥

मार्जारस्य यदीक्षणप्रणयिनः केचिद् मयूखाः सखे !
विद्येरन् न तदा कथं निशि भृशं तच्चक्षुषा प्रेक्षिते ।

प्रोन्मीलत्कुरपुञ्जपिञ्जरतनौ संजातवत्युन्दुरे,
प्रोज्जृम्भेत तवाऽपि हन्त ! धिषणा दीप्रप्रदीपाद् यथा ? ॥ ३३ ॥

कृशतरतया तेषां नो चेदुदेति मतिस्तव,
प्रभवति कथं तस्याऽप्यस्मिन्नसौ निरुपप्लवा ? ।

घटननिपुणा साक्षात् प्रेक्षाविधौ हि ततिस्त्विषां,
न खलु न समा धीमन् ! सा चोभयत्र विभाव्यते ॥ ३४ ॥

अमूदृग्मूषिकारीणां तस्मादस्ति स्वयोग्यता ।
यया तमस्यपीक्षन्ते न चक्षू रश्मिवत् पुनः ॥ ३५ ॥

इत्थं न चक्षुषि कथञ्चिदपि प्रयाति,
संसिद्धिपद्धतिमियं खलु रश्मिवत्ता ।

तस्मात् कथं कथय तार्किक ! चक्षुषः स्यात्,
प्राप्यैव वस्तुनि मतिप्रतिबोधकत्वम् ? ॥ ३६ ॥

बहिरर्थग्रहौन्मुख्यं बहिष्कारणजन्यता ।
स्थायित्वं वा बहिर्देशे किं बाह्येन्द्रियता भवेत् ? ॥ ३७ ॥

तत्रादिमायां भिदि चेतसा स्यादेतस्य हेतोर्व्यभिचारचिह्नम् ।
अप्राप्यकारि प्रकरोति यस्माद् मन्दाकिनीमन्दरबुद्धिमेतत् ॥ ३८ ॥

दोषः स एवोत्तरकल्पनायां यदात्मनः पुद्गल एष बाह्यः ।
चेतश्च तस्मादुपजायमानमेतद् बहिष्कारणजन्यताभृत् ॥ ३९ ॥

चेतः सनातनतया कलितस्वरूपं;
सर्वापकृष्टपरिमाणपवित्रितं च ।

प्रायः प्रियः प्रणयिनीप्रणयातिरेका-;
देतत् करोति हृदये न तु तर्कतज्ज्ञः ॥ ४० ॥

एतदत्र विततीक्रियमाणं प्रस्तुतेतरदिव प्रतिभाति ।
विकाराय च भवेदिति चिन्त्यं तद् विलोक्य गुरुगुम्फितवृत्तिम् ॥ ४१ ॥

पक्षे तृतीये विषयप्रदेशः शरीरदेशो यदि वा बहिः स्यात् ? ।
स्थापित्यमाद्ये विषयाश्रितत्वं यद्वा प्रवृत्तिर्विषयोन्मुखी स्यात् ? ॥ ४२ ॥

प्राचीनपक्षे प्रतिवाद्यसिद्धिकलङ्कःपङ्कः समुपैति हेतोः ।
स्याद्वादिना यत् प्रतिवादिनाऽस्य नाऽङ्गीकृतं मेयसमाश्रितत्वम् ॥ ४३ ॥

पक्षे तथा साधनशून्यताऽस्मिन् दृष्टान्तदोषः प्रकटः पटूनाम् ।
जिह्वेन्द्रियं नार्थसमाश्रितं यद् विलोकयामासुरमी कदाचित् ॥ ४४ ॥

द्वितीयकल्पे किमसौ प्रवृत्तिरर्थाभिमुख्येन विसर्पणं स्यात् ? ।
आश्रित्य किं वा विषयप्रपञ्चं प्रतीतिसंपत्प्रतिबोधकत्वम् ? ॥ ४५ ॥

पक्षे पुरश्चारिणि सिद्धिवन्ध्यं स्यात् साधनं जैनमतानुगानाम् ।
यस्माद् न तैर्लोचनरश्मिचक्रमङ्गीकृतं वस्तुमुखं प्रसर्पत् ॥ ४६ ॥

निदर्शनस्य स्फुटमेव दृष्टं वैकल्यमत्रैव हि साधनेन ।
पदार्थसार्थं प्रति यद् न सर्पज्जिह्वेन्द्रियं केनचिदिष्टपूर्वम् ॥ ४७ ॥

पक्षान्तरे तु व्यभिचारमुद्रा किं चेतसा नैव समुज्जजृम्भे ? ।
यस्मात् तदप्राप्य सुपर्वशैलस्वर्गे समुत्पादयति प्रतीतिम् ॥ ४८ ॥

शरीरस्य बहिर्देशे स्थायित्वं यदि जल्प्यते ।
बाह्येन्द्रियत्वमत्र स्यात् संदिग्धव्यभिचारिता ॥ ४९ ॥

अप्राप्तार्थपरिच्छेदेनाऽपि सार्धं न विद्यते ।
हेतोर्बाह्येन्द्रियत्वस्य विरोधो बत कश्चन ॥ ५० ॥

क्वचित् साध्यनिवृत्त्या तु हेतुव्यावृत्तिदर्शनात् ।
प्रतिबन्धप्रसिद्धिश्चेत् तदाऽत्रापि कथं न सा ? ॥ ५१ ॥

रसनस्पर्शनघ्राणश्रोत्रान्येन्द्रियताबलात् ।
चक्षुरप्राप्यविज्ञातृ मनोवत् प्रतिपद्यताम् ॥ ५२ ॥

साध्यव्यावृत्तितोऽत्रापि हेतुव्यावृत्तिरीक्षिता ।
न च कश्चिद् विशेषोऽस्ति येनैकत्रैव सा मता ॥ ५३ ॥

बाह्येन्द्रियत्वं सकलङ्कमेवं न तार्किकान् प्रीणयितुं तदीष्टे ।
भ्रूविभ्रमो दुर्भगभामिनीनां वैदग्ध्यभाजो भजते न चेतः ॥ ५४ ॥

किञ्चाऽत्र संसूचितमादिशब्दाद् वृत्ते पुरश्चारिणि कारकत्वम् ।
यत् प्राप्यकारित्वसमर्थनाय नेत्रस्य तत् काणदृगञ्जनाभम् ॥ ५५ ॥

यस्मादिदं मन्त्रजपोपसर्पत्प्रोद्दामरामाव्यभिचारदोषात् ।
उत्तालवेतालकरालकेलीकलङ्कितश्रीकमिवाऽवभाति ॥ ५६ ॥

तथाहि-

कनकनिकषस्निग्धां मुग्धां मुहुर्मधुरस्मितां;
चटुलकुटिलभ्रूविभ्रान्ति कटाक्षपटुच्छटाम् ।
त्रिजगति गतां कश्चिद् मन्त्री समानयति क्षणात्;
तरुणरमणीमाराद् मन्त्रान् मनोभुवि संस्मरन् ॥ ५७ ॥

कश्चिदत्र गदति स्म यत् पुनर्मन्त्रमन्त्रणगवी समानयेत् ।
युक्तमेव मदिरेक्षणादिकं तेन नाऽभिहितदूषणोदयः ॥ ५८ ॥

मन्त्रस्य साक्षाद् घटना प्रियादिना परम्परातो यदि वा निगद्यते ? ।
साक्षाद् न तावद् यदयं विहायसो ध्वनिस्वरूपस्तव संमतो गुणः ॥ ५९ ॥

ततोऽस्य तेनैव समं समस्ति संसक्तिवार्ता न तु पक्ष्मलाक्ष्या ।
अथाऽक्षरालम्बनवेदनं स्याद् मन्त्रस्तथाऽप्यस्त्वयमात्मनैव ॥ ६० ॥

अथापि मन्त्रस्य निवेद्यते त्वया संसक्तिरेतत्पतिदेवताऽऽत्मना ।
संतोषपोषप्रगुणा च सा प्रियां प्रियं प्रति प्रेरयति स्वयोगिनीम् ॥ ६१ ॥

ब्रूमहेऽत्र ननु देवताऽऽत्मना मन्त्रवर्णविसरस्य का घटा ? ।
अम्बरस्य गुण एष तत् कथं देवताऽऽत्मनि भजेत सङ्गतिम् ? ॥ ६२ ॥

आश्रयद्वारतोऽप्यस्य संसर्गो नास्ति सर्वथा ।
व्यापकद्रव्ययोर्यस्मात् संसर्गो नाऽमुना मतः ॥ ६३ ॥

व्यापकेषु वदति व्यतिषङ्गं यस्तु तेन मनसा ध्वनिना च ।
वीतवस्तुविषयेण विमृश्यः स्पष्ट एव विलसन् व्यभिचारः ॥ ६४ ॥

अयस्कान्तादनेकान्तस्तथाऽत्र परिभाव्यताम् ।
आक्षेपश्च समाधिश्च ज्ञेयौ रत्नाकरादिह ॥ ६५ ॥

कारकत्वमपि तद न शोभते प्राप्यकारिणि यदीक्षणे मतम् ।
प्राप्य वस्तु वितनोति तद् मतिं नैव चक्षुरिति तत्त्वनिर्णयः ॥ ६६ ॥

अद्रिचन्द्रकलनेषु चेत्यदः प्राक् प्ररूपितमुपैति नो घटाम् ।
रश्मिसंचयविपश्चितं हि तत् ते च तत्र नितरां व्यपाकृताः ॥ ६७ ॥

किञ्च,

चक्षुरप्राप्यधीकृद् व्यवधिमतोऽपि प्रकाशकं यस्मात् ।
अन्तःकरणं यद्वद् व्यतिरेके स्यात् पुनारसना ॥ ६८ ॥

अथ द्रुमादिव्यवधानभाजः प्रकाशकत्वं ददृशे न दृष्टौ ।
ततोऽप्ययं हेतुरसिद्धतायां धौरेयभावं बिभराम्बभूव ॥ ६९ ॥

एतद् न युक्तं शतकोटिकाचस्वच्छोदकस्फाटिकभित्तिमुख्यैः ।
पदार्थपुञ्जे व्यवधानभाजि संजायते किं नयनाद् न संवित् ? ॥ ७० ॥

दम्भोलिप्रभृतिप्रभिद्यभिदुराश्चेद् रोचिषश्चक्षुषः
संसर्गोपगताः पदार्थपटलीं पश्यन्ति तत्र स्थिताम् ।
एवं तर्हि समुच्छलन्मलभरं भित्त्वा जलं तत्क्षणात्
तेनाऽप्यन्तरितस्थितीननिमिषानालोकयेयुर्न किम् ? ॥ ७१ ॥

विध्यातास्तेन ते चेद् विमलजलभरात् किं भजन्ते न शान्ति ?
किञ्चाऽम्भः काचकूपोदरविवरगतं निष्पतेत् तत् तदानीम् ।
दोषश्चेद् नैष तूर्णं यदयमुदयते नूतनव्यूहरूपः
सर्पेयुस्तर्हि नैताः कथमपि रुचयो लोचनस्यापि तस्मिन् ॥ ७२ ॥

भवति परिगमश्चेद् वेगवत्त्वादमीषां
कतिपयकलयाऽस्तु क्षीरपातस्तदानीम् ।

न च भवति कदाचिद् बुद्बुदस्यापि तस्मात्
प्रपतनमिति युक्तस्तस्य नाशः किमाशु ? ॥ ७३ ॥

किञ्च,

कलशकुलिशप्राकारद्यत्रिविष्टपकन्दरा-
कुहरकलितं विश्वं वस्तु प्रतिक्षणभङ्गुरम् ।
ज्वलनकलिकावत् किन्त्वस्मिन् निरन्तरताभ्रमः
प्रभवति, वदन्नित्थं शाक्यः कथं प्रतिहन्यते ? ॥ ७४ ॥

तस्थौ स्थेमा तदस्मिन् व्यवधिमदमुना प्रेक्ष्यते येन सर्वं
तत् सिद्धा नेत्रबुद्धिर्व्यवधिपरिगतस्यापि भावस्य सम्यक् ।
कुड्यावष्टब्धबुद्धिर्भवति किमु न चेद् नेदृशी योग्यताऽस्य
प्राप्तस्यापि प्रकाशे प्रभवति न कथं लोचनाद् गन्धबुद्धिः ? ॥ ७५ ॥

किं वा न प्रतिभासते शशधरे कर्मापि तद्रूपवद् ?
दूराच्चेद् विलसत् तदस्य हृदये लक्ष्येत किं लाञ्छनम् ? ।
तस्माच्चक्षुषि योग्यतैव शरणं साक्षी च नः प्रत्यय-
स्तत् तर्कप्रगुण ! प्रतीहि नयनेष्वप्राप्यधीकर्तृताम् ॥ ७६ ॥

**॥ सम्मति टीका वादमहार्णवापरनामा तत्त्वबोधविधायीनी ॥**

इन्द्रियं यदि चक्षुर्गोलकादिकमवयविरूपमभ्युपगम्यते तदा तस्य स्वविषयेण व्यवहितदेशेन पर्वतादिना सन्निकर्षोऽसिद्धः । न ह्यत्यन्तव्यवहितयोर्हिमवद्विन्ध्ययोरिव चक्षुर्गोलकतदर्थयोः सन्निकर्षः संयोगादिलक्षणः सिद्धः । **न** चावयविलक्षणं गोलकादि वस्तु **सिद्धम्** तद्ग्राहकाभिमत-प्रमाणस्य निषिद्धत्वात् । न च तदाधारः संयोगादिकः सम्बन्धः समस्ति पराभ्युपगतस्य तस्य निषिद्धत्वात् निषेत्स्यमानत्वाच्च । योऽपि कथंचित् पदार्थाव्यतिरिक्तः संश्लेषलक्षणः काष्ठः-जतुनोरिव सम्बन्धः प्रसिद्धः, सोऽपि व्यवहितेन पर्वतादिना स्वविषयेण सह चक्षुर्गोलकस्यानुपपन्नः तत्प्रसाधक-प्रमाणाभावात् । **अथास्ति** तत्प्रसाधकं प्रमाणम् । **ननु** तत् किं प्रत्यक्षम्, उतानुमानम् ? न तावत् प्रत्यक्षमत्र विषये प्रवर्तितुमुत्सहते न हि 'देवदत्तचक्षुस्तद्विषयेण पर्वतादिना सम्बद्धम्' इत्यस्मदादेरक्षप्रभवा प्रतिपत्तिः । **अथा**नुमानं तत्सन्निकर्षप्रसाधनाय प्रवर्तते । **ननु किं** तदनुमानमिति वक्तव्यम् ? **अथ** 'चक्षुः प्राप्तार्थप्रकाशकम् बाह्येन्द्रियत्वात् त्वगादिवत्' इत्येतदनुमानं तत्सन्निकर्ष-प्रसाधनम्, **न**; चक्षुर्गोलकतदर्थयोरध्यक्षेणैवासन्निकृष्टयोः प्रतिपत्तेरध्यक्षबाधितकर्मनिर्देशानन्तर-

प्रयुक्तत्वेनास्य हेतोः कालात्ययापदिष्टत्वात् अवयविलक्षणस्य च चक्षुषोऽसिद्धेराश्रयासिद्धश्च हेतुः । अत एव स्वरूपासिद्धश्च न ह्यविद्यमानस्यावयविनो बाह्येन्द्रियत्वमुपपन्नम् 'त्वगादिवत्' इति निदर्शनमपि साध्यसाधनविकलम् । **अथ** चक्षुःशब्देनात्र तद्रश्मयोऽभिधीयन्त इति न प्रागुक्तदोषावकाशः, **न**; तेषामसिद्धेः इतरथाऽस्यानुमानस्य वैफल्यापत्तेराश्रयासिद्धो हेतुः । **अथात** एवानुमानात् तत्सिद्धेर्नायं दोषः, **न** इतरेतराश्रयदोषप्रसक्तेः । तथाहि–तद्रश्मिसिद्धावाश्रयासिद्धत्वदोषपरिहारः तस्मिंश्च सत्यतो हेतोस्तत्सिद्धिरिति व्यक्तमितरेतराश्रयत्वम् अत एव स्वरूपासिद्धिरपि हेतोः तेषामसिद्धौ तदाश्रयबाह्येन्द्रियत्वासिद्धेः । यदि पुनर्गोलकाद् बहिर्भूता रश्मयश्चक्षुःशब्दवाच्या अर्थप्रकाशकास्तर्हि गोलकस्याञ्जनादिना संस्कार उन्मीलनादिकश्च व्यापारो वैयर्थ्यमनुभवेत् । अथ गोलकाश्रयास्त इति तन्निमीलने असंस्कारे वा तेषामपि स्थगनमसंस्कृतिश्चेति विषयं प्रति गमनं तत्प्रकाशनं च न स्यात् अतस्तदर्थं तदुन्मीलनं तत्संस्कारश्च न वैयर्थ्यमनुभवेत् तर्हि गोलकानुषक्तकामलादेः प्रकाशकत्वं तेषां स्यात् न हि प्रदीपः स्वलग्नं शलाकादिकं न प्रकाशयतीति दृष्टम् । **यैर**पि 'गोलकान्तर्गतं तेजोद्रव्यमस्ति तदाश्रितास्ते' इत्य**भ्युपगतं** तेषामपीदं दूषणं समानम् न हि काचकूपिकान्तर्गताः प्रदीपादिरश्मयस्ततो निर्गच्छन्तस्तद्योगिनमर्थं न प्रकाशयन्ति । तदेवं रश्मीनामसिद्धेर्न ते चक्षुःशब्दाभिधेयाः । **अथ** रसनादयो बाह्येन्द्रियत्वात् प्राप्तार्थप्रकाशका उपलब्धाः बाह्येन्द्रियं च चक्षुः ततस्तदपि प्राप्तार्थप्रकाशकम् न च गोलकस्य बाह्यार्थप्राप्तिः सम्भविनीति पारिशेष्यात् तद्रश्मीनां तत्प्राप्तिरिति रश्मिसिद्धिः, **न**; अत्यासन्नमलाञ्जनशलाकादेः प्रकाशप्रसक्तेः । किञ्च, यदि गोलकान्निर्गत्य बाह्यार्थेनाभिसम्बध्य तद्रश्मयोऽर्थं प्रकाशयन्ति तर्ह्यर्थं प्रत्युपसर्पन्तस्त उपलभ्येरन् रूपस्पर्शविशेषवतां तैजसानां वह्न्यादिवत् सतामनुपलम्भे निमित्ताभावात् न चोपलभ्यन्त इत्युपलब्धिलक्षणप्राप्तानामनुपलम्भादसत्त्वम् । अनुद्भूतरूपस्पर्शत्वादनुपलभ्यास्त इति **चेत्,** किं पुनरनुद्भूतरूपस्पर्शं तेजोद्रव्यमुपलब्धं येनैवं कल्पना भवेत्? **अथ** दृश्यते सतोरपि तैजसरूपस्पर्शयोर्नीरहेम्नोरनुद्भूतिः, **न**; स्वर्णतप्तोदकयोस्तेजस्त्वासिद्धेः दृष्टानुसारेण चानुपलभ्यमानभावप्रकल्पनाः प्रभवन्ति अन्यथा रात्रौ भास्करकराः सन्तोऽपि नोपलभ्यन्ते अनुद्भूतरूपस्पर्शत्वान्नायनरश्मिवदित्यपि कल्पनाप्रसक्तेः । **अथ** यद्यपि नायना रश्मयोऽध्यक्षतो न प्रतीयन्ते तथाप्यनुमानतः प्रतीयन्ते अनुमानं च तेजोरश्मिवत् चक्षू रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात् प्रदीपकलिकावदिति तद्रश्मिसत्त्वप्रतिपादकम् नैवं भास्करकरसत्त्वप्रतिपादकं क्षपायामनुमानमस्ति, **न**; निशायां बहुलान्धकारायां वृषदंशचक्षुर्बाह्यालोकसव्यपेक्षमर्थप्रकाशकं चक्षुष्ट्वात् दिवा पुरुषचक्षुर्वदित्यस्यानुमानस्य रात्रौ तत्सत्त्वप्रतिपादकस्य भावात् । **अथ** वृषदंशादेश्चाक्षुषं तेजोऽस्तीत्यर्थसिद्धेर्न किञ्चिद् भास्करज्योतिषाऽनुद्भूतरूपेण प्रकल्पितेन तर्हि मनुष्यादीनामपि तदस्तीति किमुद्भूतरूपेण बाह्यतेजसा तेषां कृत्यम्? **अथ** यद् यथा दृश्यते तत् तथाऽभ्युपगम्यत इति मनुष्यादीनां नायनं सौर्यं च तेजो

विज्ञानकारणं दृश्यते ततस्तथैव तत् कल्प्यते क्षपायां मार्जारादेर्नायनमेव दृश्यते अतस्तदेव तत्कारणं प्रकल्प्यते न सौर्यम् भवेदेवं यदि तथादर्शनं स्यात् यावता यथा रात्रौ भास्करकरादर्शनं तथा दिवा चाक्षुषरश्म्यदर्शनम् यथा वा दिवा भास्करकरावभासनं तथा क्षपायां वृषदंशनेत्रालोकावलोकनम् विशेषस्त्वयम्-एकदा भास्कररश्मयोऽन्यदा नायनास्तेऽनुमेया इति । **अथा**न्धकारावष्टब्धनिशीथिनीसमयेऽपि भास्करकरसम्भवे नक्तञ्चराणामिव नराणामपि रूपदर्शनं स्यात्, **न**; सन्तोऽपि तदा तत्करा न नराणां रूपदर्शनजननप्रत्यला: यथा त एव वासरे उलूकादीनाम् भावशक्तीनां विचित्रत्वात्। तस्मादनुपलम्भात् क्षपायां यथा न भास्करकरास्तथा नायना रश्मयोऽन्यदेति स्थितम् । **यदपि परेणात्रोक्त**म् 'दूरस्थितकुड्यादिप्रतिफलितानामन्तराले गच्छतां प्रदीपरश्मीनां सतामप्यनुपलम्भदर्शनात्रानुपलम्भात् तदभावसिद्धि:' इति, **तदप्यनेनैव निरस्तम्**; रविरश्मीनामपि क्षपायामभावसिद्धिप्रसक्ते: । किञ्च, योगिन आत्ममन:संयोगो यदा सदसद्वर्गालम्बनमेकं ज्ञानं जनयति तदा सकलसदसद्वर्गस्तस्य चेन्न सहकारी तर्हि "**अर्थवत् प्रमाणम्**" (वात्स्या० भा०पृ०१) इत्यत्र "अर्थ: सहकारी यस्य विशिष्टप्रमितौ प्रमातृप्रमेयाभ्यामर्थान्तरं तदर्थवत् प्रमाणम्" इति विरुध्यते । सहकारी चेदसौ देशाद्यन्तरितोऽपि तर्हि तत्कुड्यादे: प्रभासुरतयोत्पत्तौ प्रदीपो देशव्यवहितोऽपि सहकारीति नान्तराले तद्रश्मिसिद्धि: । ततो न तैरनुपलम्भव्यभिचार: अत एव नाप्यनुमानम् उदकं तेज उखादिव्यवहितमप्युष्णस्पर्शं जनयिष्यतीति नोदके उष्णस्पर्शोपलम्भादनुद्भूतभास्वररूपस्य तेजस: सिद्धि: । यदपि चक्षु: स्वरश्मिसम्बद्धार्थप्रकाशकं तैजसत्वात् प्रदीपवद्वित्यनुमानम् अनेन किं चक्षुषो रश्मय: साध्यन्ते उतान्यत: सिद्धानां ग्राह्यार्थसम्बन्धस्तेषां साध्यत इति ? **आद्ये पक्षे** तरुणनारीनयनानां दुग्धधवलतया भासुररश्मिरहितानामध्यक्षत: प्रतीतेरध्यक्षबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेन कालात्ययापदिष्टो हेतु: । **अथ** यदध्यक्षग्रहणयोग्यं साध्यमध्यक्षत एव तत्र नोपलभ्यते तत्र तद्बाध: कर्मण: यथाऽनुष्णोऽग्नि: सत्त्वादिति न चाध्यक्षग्रहणयोग्या नायना रश्मय: सदा तेषामदृश्यत्वात्, **न**; पृथिव्यादिद्रव्येऽपि तेषां साध्यत्वप्रसक्ते: । तथाहि-रश्मिवन्तो भूम्यादय: सत्त्वात् प्रदीपवदित्यनुमातुं शक्यत्वात् यथैव हि तैजसत्वं प्रदीपे रश्मिवत्तया व्याप्तमुपलब्धं तथा सत्त्वमपि । अस्याऽन्यथाऽपि संभावना न तैजसत्वस्येति कुतो विभाग: ? **अथ भूम्या**देस्तत्साधनेऽध्यक्षबाध:, **न**; दुग्धधवलक्षाबलालोचनानामपि तत्साधने तद्विरोध: समान: । **अथ** वृषदंशचक्षुषोऽध्यक्षतो वीक्ष्यन्ते रश्मय इति कथं तद्विरोध: ? **ननु** यदि तत्र त ईक्ष्यन्तेऽन्यत्र किमायातम् ? तत एवान्यत्र तत्साधने हेम्नि पीतत्वप्रतीतौ रजते पीतत्वप्रसङ्ग:स प्रमाणबाधनमुभयत्र तुल्यम् । अथ तत्र तत्प्रतीतेर्नान्यत्र सत्त्वेन ते साध्यन्ते अपि त्वनुमानत: तत् तु दृष्टान्तमात्रम्; **नन्वत्र** 'नेत्रत्वात्' इति यदि हेतु: 'तैजसत्वात्' इत्यस्याऽऽनर्थक्यम् । अत एव प्रकृतसिद्धे: अध्यक्षबाधा चात्रापि तदवस्थैव 'तैज-सत्वात्' इत्यस्य हेतुत्वे प्रदीपदृष्टान्तेनैवार्थसिद्धेर्वृषदंशनेत्रनिदर्शनमनर्थकम् । **न च** तस्य

तैजसत्वं परं प्रति सिद्धमिति तत्साधनविकलता तदपेक्षया दृष्टान्तदोषः । **न च** रश्मिवत्त्वाद् बिडाललोचनस्य तैजसत्वं सिद्धम् मण्यादीनामपि तत्प्रसक्तेः । **न च** रश्मिवत्त्वान्मण्यादीनामपि तैजसत्वम् मूलोष्णप्रभाया एव तैजसत्वात् अन्यथा तरुणतरुकिसलयानामपि तैजसत्वं स्यात् । न च नारीनयनानां तेजसत्वं सिद्धमित्यसिद्धो हेतुः । **न च** रश्मिवत्त्वादेव तेषां तत् साध्यते इतरेतराश्रयदोषप्रसक्तेःसिद्धे भास्वरप्रभावत्त्वे तैजसत्वसिद्धिस्ततश्च भास्वरप्रभावत्त्वसिद्धिरिति कथं नेतरेतराश्रयदोषः ? **अथ** तैजसं चक्षू रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात् प्रदीपवदित्यतोऽनुमानात् तैजसत्वसिद्धेर्नेतरेतराश्रयदोषः । **नन्वत्र** भास्वररूपोष्णस्पर्शतेजोद्रव्यसमवेतगोलकस्वभावं कार्यद्रव्यं यदि 'चक्षुः'शब्दवाच्यं तस्य तैजसत्वसाधने अध्यक्षविरोधः तद्विपरीतरूपस्पर्शाधारतयाऽध्यक्षतः प्रतिपत्तेः । तथाहि–अबलापारावतबलीवर्दादीनां चक्षुषो धवल–लोहित–नीलरूपतयोष्णस्पर्शविकलतया चाध्यक्षतः प्रतिपत्तिः सिद्धैव । **न च** गोलकव्यतिरिक्तं चक्षुस्तद्ग्राहकप्रमाणाभावात् सिद्धमित्याश्रयासिद्धः स्वरूपासिद्धश्च, रूपस्यैव प्रकाशकत्वादिति हेतुरनैकान्तिकश्च तुहिनकरनिकरेण तस्य रूपस्यैव प्रकाशकत्वेऽप्यतैजसत्वात् । **न चा**स्यापि पक्षीकरणाददोषः व्यभिचारविषयस्य पक्षीकरणादैकान्तिकत्वे सर्वत्रानैकान्तिकहेत्वभावप्रसक्तेः । **न चैवं** जलानलयोर्विशेषगुणसङ्करात् भेदः सिध्येत् । न च तन्निकरान्तर्गतं तेजस्तत्रापि रूपप्रकाशकमिति न व्यभिचारः प्रदीपेऽप्यन्यस्य तदन्तर्गतस्य तत्प्रकाशकस्य प्रकल्पनात् दृष्टान्तासिद्धिप्रसक्तेः । प्रत्यक्षबाधोभयत्र चक्षूरूपसम्बन्धेन प्रकाशकेन च व्यभिचारः । न चासौ रसादेरपि प्रकाशकः इन्द्रियान्तरपरिकल्पनावैफल्यप्रसक्तेः । रूपप्रकाशकत्वं च रूपज्ञानजनकत्वम् तच्च नीलरूपेऽपि विद्यते अन्यथा "अर्थवत् प्रमाणम्" (वात्स्या०भा०पृ०१) इत्यत्रार्थसहकारित्वं तस्य न स्यादिति तेन व्यभिचारः । **अथ** द्रव्यत्वे सति करणस्य रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वादिति विशेषणात्र सम्बन्धरूपाभ्यामनेकान्तः । **ननु** यथा सम्बन्धा–देरद्रव्यादेरप्यतैजसस्य रूपज्ञानजननं तथा चक्षुषोऽपि किं न स्यात् ? **न च** 'अदर्शनात्' इत्युत्तरम् असर्वदर्शिदर्शननिवृत्तेर्भावानिवर्तकत्वात् । प्रदीपवदिति दृष्टान्तस्यापि रूपप्रकाशकत्वासिद्धेः साधन-विकलता दृष्टान्तस्य । **न च** प्रदीपे सति प्रतिनियतप्राणिनां रूपदर्शनसम्भवात् तस्य रूपप्रकाशकत्वम् अञ्जनादिसंस्कृतचक्षुषां तदभावेऽपि रूपदर्शनसद्भावात् । न च यदन्तरेणापि यद् भवति तत् तत्कार्यम् इतरत् तत्कारणम्, अन्वयव्यतिरेकनिबन्धनत्वात् तद्भावस्य । अथ प्रदीपे सति यद् दर्शनं तत् तद्भावे न भवति यत्तु तदभावे भवति न तत् तत्रापि तत्सदृशम् । न चान्यस्य व्यभिचारे अन्यस्यासौ अतिप्रसङ्गात्, **असदेतत्**; यतो यादृशमेव रूपदर्शनमालोके संस्कृतचक्षुषाम् तदभावेऽपि तादृशमेव तद्भेदानवधारणात् । तथा हि तद्भेदकल्पने न किञ्चित् कस्यचिद् वस्तुनः सदृशमिति सौगतमतानुप्रवेशः स्यात् । रूपप्रदीपयोश्च सहोत्पन्नयोर्युगपद्दर्शने प्रदीपवत् रूपस्यापि प्रदीपप्रकाशकत्वाद् रूपं तैजसं

भवेत् अन्यथा न प्रदीपोऽपि तैजसः स्यात् तज्जनकत्वाविशेषात् तयोः । न चान्यदा प्रदीपस्यैव रूपप्रकाशकत्वोपलब्धेः स एव तदापि प्रकाशकोऽन्यदाऽप्यञ्जनादिसंस्कृतचक्षुषां तदभावेऽपि रूपदर्शनसद्भावात् तस्य तत्प्रकाशकत्वासिद्धेः । **अथ** तस्मिन् सति कदाचित् कस्यचित् रूपदर्शनात् तस्य तत्प्रदर्शकत्वं **तर्हि** नक्तञ्चराणां सन्तमसे रूपदर्शनात् तदभावे च तदभावात् हेतुफलभावस्य सर्वत्र तन्निबन्धनत्वात् तमोऽपि रूपप्रकाशकत्वात् प्रदीपवत् तैजसं भवेत् । अन्यथा हेतोरनेनैव व्यभिचारः स्यात् ।

आलोकाभाव एव तम इति **चेत्, न**; आलोकस्यापि तमोऽभावरूपताप्रसक्तेः । आलोकस्य तरतमादिरूपतयोपलम्भात् नाभावरूपतेति चेत् न, तमस्यप्यस्य समानत्वात् । यथा चालोकः प्रतिभासविषयस्तथा तमोऽपि तद्विषयः । **न च**ालोकप्रतिभासाभाव एव तमःप्रतिभासः इतरत्राप्यस्य समानत्वात् । **न च** चक्षुर्व्यापाराभावेऽपि तत्प्रतिभाससंवेदनादालोकप्रतिभासाभाव एव तमःप्रतिभासः प्रतिनियतसामग्रीप्रभवविज्ञानावभासित्वात् प्रतिनियतभावानां तमसस्तदतत्प्रभवविज्ञानावभासित्वात् आलोकस्य च तद्विपर्ययात् यद्वा आलोकस्याप्यचक्षुर्जे सत्यस्वप्नज्ञाने प्रतिभासनात् तमोज्ञानाभाव-रूपता भवेत् । **अथा**लोकस्य रूपप्रतिपत्तौ हेतुभावान्नाभावरूपता **तर्हि** तमसोऽपि नक्तंचररूपप्रतिपत्तौ हेतुभावो विद्यत इति नाभावरूपता भवेत् । तदेवमालोकस्य वस्तुत्वे तमसोऽपि तदस्त्विति तेन हेतोर्व्यभिचारः । भवतु वा आलोकाभाव एव तमस्तथापि व्यभिचारापरिहारः तदभावस्यातैजस-स्यापि तत्प्रकाशकत्वात् । **अथ** तमोऽभावेऽपि रूपदर्शनान्न तस्य तत्प्रकाशकत्वं **तर्हि** नक्तञ्चराणा-मालोकाभावेऽपि रूपदर्शनादालोकस्यापि न तत्प्रकाशकत्वं भवेत् । **अथा**स्मदादीनां किमित्या-लोकाभावे रूपदर्शनं न भवति ? भवत्येव कथमन्यथान्धकारसाक्षात्कारणम् ? घटरूपदर्शनं किं नेति चेत् बहलतमोव्यवधानात् तीव्रालोकतिरोहिताल्परूपवत् । प्रदीपोपादानं तु तस्य व्यवच्छेदार्थम् । अत एवान्यत्रोक्तम्-

"**तमोनिरोधे वीक्षन्ते तमसानावृत्तं ( वृतं ) परम् । घटादिकम्**" इत्यादि ।

प्रदीपस्य च घटरूपव्यवधायकतमोऽपनेतृत्वे 'तैजसं चक्षू रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात् प्रदीपवत्' इति साधनविकलत्वाद् दृष्टान्तस्य निरस्तं द्रष्टव्यम् ।

**न चा**न्यत एव तस्य रश्मयः सिद्धाः केवलमनेन प्राप्तार्थप्रकाशकत्वं तेषां साध्यत इति **वक्तव्यम्** तत्सद्भावप्रतिपादकस्य प्रमाणस्याभावात् । **अथ** यद्यप्राप्तार्थप्रकाशकं चक्षुः अविशेषेण सर्वं प्रकाशयेत्, **न**; भावानां नियतशक्तित्वात् । यतो य एव यत्र योग्यः स एव तत् प्रकाशयति अन्यथा संयुक्तसमवायाविशेषाच्चक्षुर्यथा कुवलयरूपं प्रकाशयति तथा तद्गन्धमपि प्रकाशयेत् तथा चेन्द्रियान्तरवैफल्यम् । **अथ** योग्यताऽभावान्न तत् तद्गन्धमवभासयति **तर्हि** योग्यताऽभावात्

प्राप्त्यभावेऽपि नातिव्यवहितमतिसन्निकृष्टं वा तद्रूपं प्रकाशयतीति सर्वत्र योग्यतैवाश्रयणीया नापरं सम्बन्धप्रकल्पनेन कृत्यम् 'रश्मयो वा कुतो न लोकान्तमुपयान्ति' ? इति प्रेरणायां परेणाप्ययोग्यतैव तत्र इतरत्र तु योग्यता प्रतिविधानत्वेन वक्तव्या । तथा, यस्य कारणाद् भिन्नमेव कार्यं तस्य भेदाविशेषात् सर्वं सर्वस्मात् कुतो नोत्पद्यत इति चोद्ये योग्यतातो नापरमुत्तरमिति सैवात्राप्यभ्युपगमनीया । किञ्च, यदि प्राप्तार्थप्रकाशकं चक्षुः स्फटिकाद्यन्तरितवस्तुप्रकाशकं न स्यात् तद्रश्मीनां विषयं प्रतिगच्छतां स्फटिकादिना प्रतिबन्धात् । न च तैस्तस्य ध्वस्तत्वादयमदोषः तद्व्यवहितवस्तुदर्शनसमये स्फटिकादेर्व्यवधायकस्यादर्शनप्रसङ्गात् तदुपरि व्यवस्थापितस्य चाधारविनाशात् पातप्रसक्तेश्च न हि परमाणवो दृश्याः कस्यचिदाधारभूता वा अवयविकल्पना-वैयर्थ्यप्रसक्तेः । अन्यस्यावयविन आशूत्पत्तेरदोषश्चेत्, न; तदा तद्व्यवहितस्यादर्शनप्रसक्तेः । तथा च यदा व्यवधायकदर्शनं न तदा व्यवहितदर्शनम् यदा च व्यवहितदर्शनं न तदा व्यवधायकदर्शनमिति प्रसज्येत । न चैवम् युगपद् द्वयोर्दर्शनात् । **अथा**शूत्पत्तेर्निरन्तरं व्यवहितप्रतिपत्तिविभ्रमस्तर्हि तद-भावस्यापि आशुवृत्तेरभावप्रतिपत्तिविभ्रमस्तथा किं न भवेत् ? भावपक्षस्य बलीयस्त्वादिति **चेत्, न;** भावाभावयोः परस्परं स्वकार्यकरणं प्रत्यविशेषात्। किञ्च, कलुषजलाद्यावृतस्यार्थस्य किं न ते प्रकाशकाः स्फटिकादेरिव जलादेरपि भेदे तेषां सामर्थ्याप्रतिघातात् ? **न च** जलेन ते प्रतिहन्यन्ते स्वच्छजलेनापि तेषां प्रतिघातात् तद्व्यवहितस्याप्यप्रकाशनप्रसङ्गात् । **अथ** तेषां तत्र प्रकाशनयोग्यता तर्हि तत एव तेऽप्राप्तमप्यर्थं प्रकाशयिष्यन्तीति व्यर्थं संयुक्तसमवायादिसन्निकर्षप्रकल्पनम् । अपि च, समवायसम्बन्धनिषेधे चक्षुषो घटरूपेण संयुक्तसमवायप्रतिबन्धस्याभावात् तद्रूपाप्रकाशकत्वात् कथं नासिद्धो हेतुः 'रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात्' इति ? **अथ** 'इह तन्तुषु पटः' इति बुद्धिः सम्बन्धनिबन्धना तद्बुद्धित्वात् 'इह कुण्डे दधि' इति बुद्धिवत् इत्यतोऽनुमानात् समवायसिद्धेः न संयुक्तसमवायसम्बन्धाभावः, **न;** 'इह' बुद्ध्या सम्बन्धमात्रसाधने घटतद्रूपयोः कथञ्चित्तादात्म्य-सम्बन्धाभ्युपगमात् सिद्धसाध्यताप्रसङ्गात् । **अथ** कथञ्चित्तादात्म्यसम्बन्धः तद्बुद्धिनिमित्तत्वेन न प्रतिपन्न इति कथमतोऽसौ साध्य**स्तर्हि** समवायेऽप्येतत् समानम् । तथापि ततस्तत्साधनेऽन्यत्र कः प्रद्वेषः ? **अथ** घटतद्रूपयोः कथञ्चित्तादात्म्यसम्बन्धो विरोधान्नेष्यते **तर्हि** भावाभावयोः कथञ्चित्तादात्म्याभावे समवायादेरसम्भवादसम्बन्धः स्यात् तथा च अभावेनाक्षाणां सन्निकर्षा-भावान्नाक्षतस्तत्प्रतिपत्तिः स्यात् । विशेषणविशेष्यभावस्य भावाभावयोः सम्बन्धस्य भावान्नायं दोष इति चेत्, न; भावाभावाभ्यां तस्यानर्थान्तरत्वे तावेव स एव वा स्यात् । अर्थान्तरत्वे भावाभावयोः सद्भावेऽपि न विशेषणविशेष्यरूपता ताभ्यां तस्यासम्बन्धात् सम्बन्धे वा ताभ्यां तस्यापरेण सम्बन्धनिमित्तेन विशेषणविशेष्यभावेन भवितव्यम् । तस्यापि सम्बन्धनिमित्तेनापरेण तेनेत्यनवस्था भवेत् । तस्मात् कथञ्चित् तयोस्तादात्म्यमभ्युपगन्तव्यम्। अन्यथाऽभावस्याध्यक्षप्रमाणग्राह्यता न भवेत्। तदेवं समवायासिद्धेर्नाक्षस्य रूपेण सम्बन्ध इति न तेन तस्य ग्रहणं परपक्षे भवेदिति "चक्षुषो

घटेन संयोग एव युतसिद्धत्वात् द्रव्यसमवेतानां गुणादीनां संयुक्तसमवाय एव" इत्यादि षोढा सन्निकर्षप्रतिपादनमयुक्तम् संयोग-समवायविशेषणविशेष्यभावसम्बन्धानामभावेन तदनुपपत्तेः संयोगादेश्चाभावः प्रतिपादित एव यथावसरमिति न पुनः प्रतिपाद्यते।

**अथ** यथाऽस्माकं चक्षुषः प्राप्तार्थप्रकाशकत्वं प्रमाणाभावान्न सिद्धं तथा भवतोऽप्यप्राप्तार्थप्रकाशकत्वं तस्य तत एव न सिद्धमिति कथम्-

**"रूवं पुण पासइ अपुट्ठं तु" ( आवश्यकनि० गा० ५ )**

इत्यभिधानं युक्तिसङ्गतम्, **न**; तस्याप्राप्तार्थप्रकाशने अनुमानसद्भावात्। तथाहि-अप्राप्तार्थप्रकाशकं चक्षुः, अत्यासन्नार्थाप्रकाशकत्वात्, यत् पुनः प्राप्तार्थप्रकाशकं तदत्यासन्नप्रकाशकमुपलब्धम् यथा श्रोत्रादि अत्यासन्नार्थाप्रकाशकं च चक्षुस्तस्मादप्राप्तार्थप्रकाशकमिति व्यतिरेकी हेतुः। **न चा**यमसिद्धो हेतुः गोलकस्थस्य कामलादेः पक्ष्मपुटगतस्य चाञ्जनादेस्तेनाप्रकाशनात् कथमन्यथा दर्पणादेः परोपदेशस्य वा तत्प्रतिपत्त्यर्थमुपादानं भवेत्? **अथ** साध्यनिवृत्तौ नियमेन यतः साधनं निवर्तते स वैधर्म्यदृष्टान्तः जीवच्छरीरस्य सात्मकत्वे साध्ये घट इव आत्मशरीरसंयोगविशेषे सात्मकत्वे निवर्तमाने नियमेन ततः प्राणादिमत्त्वनिवृत्तेः। **न च** श्रोत्रादेरप्राप्तार्थप्रकाशकत्वे निवर्तमानेऽत्यासन्नार्थाप्रकाशकत्वं नियमेन व्यावर्तते चक्षुष इव तस्याप्यत्यासन्नार्थाप्रकाशकत्वात् ततो नायं व्यतिरेकी हेतुः, **न**; कर्णशष्कुलीप्रविष्टमशकादिशब्दस्य तेन प्रकाशनात् स्पर्शनादौ त्वविवाद एव। **"चक्षुः-श्रोत्र-मनसामप्राप्तार्थकारित्वम्"** इति वचनादप्राप्तार्थप्रकाशकं श्रोत्रमिति न साध्यनिवृत्तौ साधननिवृत्तिस्तत इति नायं व्यतिरेकी हेतुरिति **सौगतः**, यथा सर्वगतात्मपक्षे सात्मकं जीवच्छरीरं प्राणादिमत्त्वादिति हेतुः, **न**; अप्राप्तकारित्वे श्रोत्रस्य चक्षुष इवात्यासन्नविषयप्रकाशकत्वं न स्यादिति मशकादिशब्दस्य प्राप्तस्य प्रत्यक्षतः प्रकाशकत्वेन प्रतीयमानस्याप्राप्तार्थप्रकाशकत्वं तस्याध्यक्ष-बाधितम् अग्नावनुष्णत्ववत्। **अथ** 'दूरे शब्दो निकटे शब्दः' इति प्रतीतेः प्राप्तार्थाप्रकाशकम् प्राप्तार्थप्रकाशकं च श्रोत्रमिष्यते, **न सदेतत्**; यतः साकारज्ञानपक्षेऽनाकारज्ञानपक्षे वाऽयमभ्युपगम इति वाच्यम्? न तावत् **प्रथमः पक्षः** शब्दाकारस्य ज्ञानगतस्यावभासे दूरनिकटव्यवहारानुपपत्तेः अन्यथा स्वसंवेदनाकारेऽपि तत्प्रसक्तिर्भवेदिति सर्वत्रासन्नदूरव्यवहारोऽघटमानकः स्यात्। अथाकाराधायकस्यासन्नादित्वात् तद्व्यवहारस्तर्हि परपक्षेऽप्येतदुत्तरं समानं भवेदिति किं तत्प्रतिक्षेपः? शक्यं हि परेणाप्येवमभिधातुम् कर्णशष्कुल्यनुप्रविष्टस्य शब्दस्य ग्रहणेऽपि तत्प्रथमकारणस्य दूरत्वाद् दूरव्यवहारो विपर्ययाच्च विपर्यय इति। **द्वितीयपक्षस्त्व**युक्तः **सौगत**स्यानभिमतत्वात्। अथ परापेक्षयाऽप्राप्तार्थप्रकाशकं श्रोत्रमित्यभिधीयते दूरादिव्यवहारात् तद्विषये चक्षुर्वदिति, न; एवं परसिद्धेनानुमानेन प्रमाणेतरसामान्यव्यवस्थादेश्चार्वाकस्योत्पत्त्य-

नित्यत्वादिना सुखादेरचेतनत्वप्रसाधनं सांख्यस्य चानिषिद्धं भवेत् **बौद्धाभ्युपगतेना-**नुमानेनोत्पत्त्यादिना च तेनापि स्वाभिप्रेतसाध्यस्य साधयितुं शक्यत्वात् । यश्च बाणादेरागतस्य ग्रहणेऽपि दूरादिव्यवहारं प्रतिपद्यते परः स कथं तत एव त्वदीयं साध्यं प्रतिपद्येत ? यदि च स्वोत्पत्तिदेशस्थ एव शब्दः श्रोत्रेण गृह्येत नागतस्तर्हि कथमनुवाते शब्दस्य तद्देशोत्पत्तिकस्यैव श्रवणम् प्रतिवातेऽश्रवणम् मन्दवाते मनाक् श्रवणं भवेत् ? न च प्रतिकूलवातेन शब्दस्य नाशितत्वात् श्रोत्रस्य वाभिहतत्वान्न श्रवणं शब्दविनाशे अनुकूलवातस्थस्यापि तदश्रवणप्रसक्तेः । शब्दस्य विनष्टत्वात् व्यवहितदेशस्थस्य च तस्य श्रोत्राभिघातहेतुत्वानुपपत्तेः अन्यथा भस्त्रादिव्यवस्थितस्यापि तस्य तदुपघातकत्वं स्यात् । अनुकूलवातेन तस्य तं प्रति प्रेरणात् तेन तच्छ्रवणे 'प्राप्तः शब्दः श्रूयते' इति प्राप्तम् तथापि तत्र दूरादिव्यवहारे न श्रोत्रमप्राप्तप्रकाशकमतः सिध्यतीति कथं न व्यतिरेकी हेतुः ? **न च** 'चक्षुः'शब्देन नायनरश्म्यभिधानादत्यासन्नप्रकाशकत्वाच्च तेषाम् 'अत्यासन्नाप्रकाशकत्वात्' इति हेतुरसिद्धः तेषां प्रत्यक्षादिप्रमाणाविषयत्वेन सद्भावासिद्धेरिति प्रतिपादनात् । तदसिद्धतादिदोषविकलादतो हेतोरप्राप्तार्थप्रकाशकत्वं चक्षुषः सिद्धमिति **'रूवं पुण पासइ अपुट्ठं तु'** इति न युक्तिविकलं वचः तदेवमिन्द्रियार्थसन्निकर्षोत्पन्नत्वं प्रत्यक्षस्यासिद्धम् ।

## सम्मति

एतेनेन्द्रियसन्निकर्षोत्पन्नं प्रत्यक्षमिति प्रत्यक्षलक्षणभावात् पूर्वं व्यवसायात्मकज्ञानेन सहेन्द्रियसन्निकर्षस्याभावात्कथं तत्प्रत्यक्षमित्यपि निरस्तम्, चक्षुषः प्राप्यकारित्वाऽसिद्धेस्तस्याऽर्थेन सह सन्निकर्षाभावाच्चाक्षुषसंवेदने तस्य लक्षणस्याऽघटमानत्वेनाऽव्यापकत्वात्, तथाहि चक्षुरप्राप्तार्थप्रकाशकं अधिष्ठानाऽसम्बद्धार्थग्राहकेन्द्रियत्वात् मनोवदित्यनुमानेन चक्षुषोऽप्राप्तार्थ-प्रकाशकत्वे सिद्धे तस्यार्थेन सन्निकर्षाभावेऽपि प्रत्यक्षज्ञानोत्पादकत्वसिद्धयोक्तलक्षणमव्याप्तिदोष-संवलितत्वान्नयुक्तम्, न च चक्षुषोऽसन्निकृष्टार्थप्रत्यक्षजनकत्वे प्रत्यक्षस्य प्रतिनियतविषयकत्वं न स्यादिति स्वजनकसन्निकर्षाश्रयत्वं प्रत्यक्षविषयत्वे तन्त्रं वाच्यमिति चक्षुषोऽर्थेन सह सन्निकर्षः प्रत्यक्षविषयत्वप्रयोजकोऽवश्यमभ्युपगन्तव्य इति नोक्तलक्षणमव्यापकमिति वाच्यम्, तत्तत्प्रति-नियतविषयत्वे स्वावरणकर्मक्षयोपशमादिलक्षणयोग्यताया एव तन्त्रत्वात्, तथा च प्रत्यक्षज्ञानस्य यद्विषयत्वावच्छेदेन साऽऽविर्भवति तद्विषयकत्वमेव भवति, नान्यविषयकत्वम्, एवं विषयस्यापि स्वावच्छेद्याविर्भूतावरण कर्मक्षयोपशमादिलक्षणयोग्यताविशिष्टं जन्यतासम्बन्धेन यज्ज्ञानं तद्विषय-त्वमेव, नान्यज्ञानविषयत्वमित्युक्तं प्राक् ए अत एव परोक्षज्ञानस्यार्थसन्निकर्षाद्यऽजन्यतया परेणाभिप्रेतस्य प्रतिनियतविषयकत्व व्यवस्थोपपत्तिस्सङ्गच्छते । एतेनार्थाजन्यत्वे ज्ञानस्य कथं प्रतिकर्मव्यवस्था ? तदुत्पत्तितदाकारताभ्यां हि सोपपद्यते, अर्थाऽनुत्पन्नस्यातदाकारस्य च ज्ञानस्य

सर्वार्थान् प्रत्यविशिष्टत्वादिति **बौद्धमतमपि** निरस्तम्, अर्थोत्पत्तिमन्तरेणाप्यावरणक्षयोपशम-लक्षणया योग्यतयैव प्रतिनियतार्थप्रकाशकत्वोपपत्तेः, अर्थाद् ज्ञानोत्पत्तावपि च कारणीभूता तादृश योग्यताऽवश्यमाणश्रयणीया, अन्यथाऽशेषार्थसान्निध्येऽपि कुतश्चिदेवार्थात् कस्यचिदेव ज्ञानस्य जन्मेति कौतस्कुतोऽयं विभाग इति । यदि च चक्षुषः प्राप्तार्थप्रकाशकत्वं स्यात्तर्हि वह्निखड्गाद्यर्थेन सहसंयोगे तस्य दाहच्छेदापत्तिस्स्याद्, हस्तादेरिव, जलादिसंयोगे च शीतत्वं स्यात्, ननु मुहुर्मुहुस्सूर्यकिरणजलावलोकने दाहशैत्ये अपि भवत एवेतीष्टापत्त्या ततश्चक्षुषः प्राप्यकारित्वमेव सिद्ध्यतीति चेत्, मैवम्, यतश्चक्षुस्स्वयमुत्प्लृत्यादित्यमण्डलादिसमाक्रान्तप्रदेशं गत्वा समाश्लिष्य न रुपं परिच्छिनत्ति, किन्तु रविकिरणादिकमेव चक्षुर्देशमागच्छतीत्येतावन्मात्रेणैव दाहलक्षणो-पघातोपपत्तेः, शीतलजल-धृत-चन्द्राद्यवलोकने तु **"मणोज्जअणुग्गहं पिव उवधायाभावओ सोम्मं"** इत्युक्तेर्दाहलक्षणोपघाताभावत एव शैत्यलक्षणानुग्रह उपचर्यत इत्युपचरितस्यैवतस्य सद्भावाच्च । यच्च चक्षुर्देशं स्वतः प्राप्तेन मूर्तिमता चन्द्रकिरणेनेन्द्रनीलमणिकिरणेन च वस्तुगत्या शैत्यं भवति, तदपि चक्षुषस्तत्र गमनाभावेन सम्बद्धार्थग्राहकत्वाभावाद् विषयदेशमप्राप्तेनापि तेन रुपपरिच्छेदोपपत्तेश्च न तदऽप्राप्यकारित्वक्षतिमाहवति, यदि स्वत एव चक्षुरर्थेन सह संयुज्य तत्प्रत्यक्षं जनयेत्तर्हि चक्षुषस्सूर्यमरीचिदर्शनादुपघातो यथा तथा करवालदर्शनादपि स स्यात्, न चैवं भवतीति चक्षुप्राप्तार्थप्रत्यक्षं करोतीति सिद्धम् । तदिदमुक्तं भाष्यकृता - **"लोअणमपत्तविसयं मणोव्वजमणुग्गहाइसुन्नंत्ति** ।" अनेन भाष्यगाथापूर्वार्द्धेन लोचनमप्राप्तग्राह्यार्थविषयक-बोधजनकं ग्राह्यवस्तुकृतानुग्रहोपघातशून्यत्वात् मनोवदित्यनुमानं प्रदर्शितम् । अत एवाग्रे **"गन्तुं न रुवदेसं पासइ"** इत्युक्तम् । अथ जाग्रदवस्थायां स्वप्नावस्थायां वा देहान्मनो निर्गत्य मेरुशिखरस्थजिनप्रतिमादिना ज्ञेयेन संश्लिष्यते, लोकेऽप्यनुभवसिद्धमेतत् यतस्तत्रापि वक्तारो वदन्ति - अमुत्र मे मनो गतमिति, अतो मनसः प्राप्यकारित्वान्मनोवदिति दृष्टान्तस्साध्यविकल इति, तदुक्तं पूर्वपक्षमाशङ्क्य भाष्ये-

**"गंतुं नेएण मणो संबज्झइ जग्गाओ व सिमिणे वा ।**
**सिद्धमिदं लोयम्मि वि अमुगत्थगओ मणो मेत्ति ॥ २१३ ॥"**

इति चेत्, उच्यते समाधिः - **"मनो न ज्ञेयेन सह संश्लिष्यते ज्ञेयकृतानुग्रहोपघाताभावात् लोचनवत्"** इतरथा तोयचन्दनादिचिन्तनकाले स्पर्शनेन्द्रियवन्मनोऽप्यनुगृह्येत, दहन-विष-शस्त्रादिचिन्तनसमये च तद्वदेवोपहन्येत, न चैवम्, तस्माल्लोचनवदप्राप्यकार्येव मनः । अमुत्र मे मनो गतमिति तुभ्रान्तिरेव । उक्तञ्चोत्तरपक्षमाश्रित्य भाष्ये-

**"नाणुग्गहो-वघायाभावाओ लोयणं व सो इहरा ।**
**तोय-जलणाइचिन्तणकाले जुज्जेज्ज दोहिं पि ॥ २१४ ॥"**

किञ्च मनस्तावद्द्विधा द्रव्यमनो भावमनश्चेति, तत्र किं द्रव्यमनो भावमनो वा मेर्वादिविषयसन्निधौ गच्छेत्, न तावद्द्वितीयविकल्पो युक्तः, भावमनसश्चिन्ताज्ञानपरिणामरूपत्वात् तस्य च जीवादव्यतिरिक्तत्वाज्जीव एव भावमनो भवति, जीवात्मकभावमनश्च देहमात्रव्यापित्वान्न देहाद्बहिर्निःसरत् प्रमाणगोचरम् । यद्देहमात्रवृत्ति न तस्य देहाद्बहिर्निःसरणमुपपद्यते, द्रुतरुपादिवत्, देहमात्रवृत्ति च जीवात्मकभावमनः, तस्मात्तन्नतद्बहिर्निस्सरति । उक्तञ्च भाष्ये–

**"दव्वं भावमणो वा वएज्ज जीवो य होइ भावमणो ।**

**देहव्वावित्तणओ न देहबार्हि तओ जुओ ॥ २१५ ॥"**

जीवस्य देहमात्रव्यापित्वञ्च प्रागेव निर्णीतमिति । अथैवंतर्हि द्रव्यमनो विषयदेशं व्रजतीत्यात्मकाद्यपक्षोऽस्तु, यतो बहिर्निर्गतं द्रव्यमनः प्राप्य विषयं परिच्छिनत्ति, करणत्वात्, प्रदीप-मणि-चन्द्र-सूर्यादिप्रभावदिति चेत्, सोऽपि पक्षोन युक्तः, यतः करणं द्विधा भवति, शरीरगतमन्तःकरणम्, तद्बहिर्भूतं बाह्यकरणञ्च, तत्रेदं द्रव्यमनोऽन्तःकरणमेवात्मनः, ततो यदन्तःकरणं तच्छरीरस्थमेव विषयं परिच्छिनत्ति, स्पर्शनवत्, अन्तःकरणञ्च द्रव्यमनः, प्रदीप-मणि-चन्द्रप्रभादिकं तु बाह्यकरणमात्मन इति साधनविकलो दृष्टान्तः । ननु शरीरस्थमपि मूर्त्तत्वेन सक्रियत्वात्पद्मनालतनतुन्यायेन तद्बहिर्निस्सरतु, कोऽत्र दोष इति चेत्, तर्हि स्पर्शनेन्द्रियादेरपि तद्वदेव बहिर्निर्गमनप्रसङ्गात्, तस्माद् यदन्तःकरणं तच्छरीराद्बहिर्न निर्गच्छति स्पर्शनेन्द्रियादिवदित्यभ्युपगन्तव्यम, युक्तञ्चैतत् अनन्तसंयोगाद्यऽकल्पनलाघावत् । सुखदुःखादिसाक्षात्कारोऽपि न मनस्संयुक्तसमवायादिसन्निकर्षात्, येन मनसः प्राप्यकारित्वं स्यात्, समवायस्स पूर्वमेव निरासकरणात्, किन्तु मनस्सहकृततदावरणीय कर्मक्षयोपशमलक्षणयोग्यतावशादेवेति । अभिहितञ्च भाष्ये—

**"अह करणभावओ तस्स तेण जीवो वियाणेज्जा ॥ २१७ ॥**

**करणत्तणओ तणुसंठिएण जाणिज्ज फरिसणेणं व ।**

**एत्तोच्चिय हेऊओ न नीइ बार्हि फरिसणं व ॥ २१८ ॥" इति**

ननु जाग्रदवस्थायां मा भूद् मनसो विषयप्राप्तिः, स्वापावस्थायां तु भवत्वसौ, अनुभवसिद्धत्वाद, तथाहि – "अमुत्र मेरूशिखरदिगतजिनायतनादौ मदीयं मनो गतम्" इति सुप्तैः स्वप्नेऽनुभूयत एवेति मनसः प्राप्यकारित्वमेवेति चेत्, मैवम्, उक्तानुभवस्य भ्रान्तिरूपत्वात्, वृत्ताकारतया भ्रम्यमाणालातचक्रानुभववत् तद्विवयस्याऽसत्यत्वात्, तथाहि – यथोल्मुकं वृत्ताकारतयाऽऽशु भ्रम्यमाणं भ्रान्तिवशादचक्रमपि चक्रतया प्रतिभासामानं न सत्यम्, अचक्ररूपताया एव तत्रावितथत्वात्, भ्रमणोपरमे स्वभावस्थस्य तथैव दर्शनात् । एवं स्वप्नानुभवोपलब्धं मनोमेरूगमनादिकमपि वस्तु न सत्यम्, स्वप्नोपरमे तदभावात्, तदभावश्च जाग्रदवस्थायां देहस्थस्यैव मनसोऽनुभूयमानत्वादिति । ननु स्वप्नावस्थायां मेर्वादौ गत्वा

जाग्रदस्वस्थायां निवृत्तं तद्भविष्यतीति चेत्, मैवम्, यथा कदाचिदात्मीयं मनः स्वप्ने मेर्वादौ गतं कश्चित् पश्यति तथा कोऽपि शरीरमात्मानमपि नन्दनतरूकुसुमावचयादि कुर्वन्तं तद्गतं पश्यति, न च तत्तथैव,इह स्थितैस्सुप्तस्य तस्यात्रैव दर्शनात्, द्वयोर्वपुयोर्द्वयोश्चात्मनोरसम्भवात्, कुसुमपरिमलाद्य-ध्वजनितपरिश्रमाद्यनुग्रहोपघाताभावाच्चेति । अभिहितञ्च -

**"सिमिणो न तहारूवो वभिचाराओ अलायचक्कं व ।**
**वभिचारो य सदंसणमुवघाया-णुग्गहाभावा ॥ २२४ ॥**

**इह पासुत्तो पेच्छइ सदेहमन्नत्थ, नय तओ तत्थ ।**
**न य तग्गयोवघाया-णुग्गहरूवं विबुद्धस्स ॥ २२५ ॥"**

अयम्भावः - स्वप्ने जिनस्नात्रदर्शनादिकं विज्ञानं स्वप्नानन्तरं जाग्रत्पुंसो हर्षादिकं तत्फलं भविष्यत्फलापेक्षया स्वप्नस्य निमित्तत्वञ्च तस्मात्स्वप्ननिमित्तादवश्यंभाविभविष्यत्फल ञ्चानुभव-सिद्धत्वाद्विज्ञैर्न निवारयितुं शक्यम्, किन्तु यदेव मनसो मेरूगमनक्रियादिकं युक्त्या नोपपद्यते तदेव निषिध्यते, न त्वेतानि विज्ञानादीनि, युक्त्युपपन्नत्वात् । न चैतैरभ्युपगतैरपि मनसः प्राप्यकारिता काचित्सिद्धयतीति । तदेवं भावमनसो द्रव्यमनसश्च बहिश्चारिताद्यभावादप्राप्यकार्येव मन इति मनोवदिति दृष्टान्तो न साध्यविकल इति सिद्धम् । नाप्युक्तदृष्टान्तो ग्राह्यवस्तुकृतानुग्रहो-पघातशून्यत्वहेतुविकलः, यतो यदि मनसो ज्ञेयेन सह सम्पर्कस्स्यात्तर्हि जल-चन्दनादिचिन्तनकाले पिपासानिवृत्तिशैत्सादिलक्षणानुग्रहः, वह्निविषयकरवालादिचिन्तनकाले च दाह-स्फोट-पाटनादि-लक्षणोपघातश्च स्यात् । न च तौ भवतः, तस्मान्न साधनविकलो मनोदृष्टान्त इति तस्मिन् दृष्टान्ते गृहीतव्याप्तिकेनोक्तेहेतुना लोचनमप्राप्यकार्येव सिद्धयति । अथ चक्षुषस्तेजस्त्वेन रश्मिमयत्वात्त-द्रश्मय एव निर्गत्य रविकिरणवत्तं तमर्थं संसृज्य तत्प्रत्यक्षमुपजनयन्ति, अनुद्‌भूतस्पर्शवत्तैजसत्वेन तेषां वह्नयादिवन्न दाहजनकत्वम्, दाहम्प्रति उद्‌भूतस्पर्शवत्तैजसत्वेनैव कारणत्वात्, न वा तेषां तैजसत्वेन रविरश्मीनामिव वह्न्यादिभिर्दाहादिरूपोपघात इति सिद्धं चक्षुषः प्राप्यकारित्वमिति चेत्, तदप्यसङ्गतमेव, चक्षुषस्तैजसत्वस्यैवाऽसिद्धेः, न च चक्षुस्तैजसं रूपादिषु मध्ये रूपस्यैवाभिव्य-ञ्जकत्वात् प्रदीपवदित्यनुमानात्तत्सिद्धिरिति वाच्यम्, रूपप्रत्यक्षजनके चक्षुस्संयुक्तसमवायसन्निकर्षे तैजसत्वसाध्याभाववत्युक्तहेतोस्सत्त्वेन व्यभिचारात् । तन्निवारणाय हेतौ द्रव्यत्वे सतीति विशेषणोपादानमपि न युक्तम्, भूमिनिहितनिध्यादिप्रत्यक्षजनकाऽञ्जनादिना व्यभिचारात् । ननु रूपस्यैवाभिव्यञ्जकत्वमिह रूपविषयकप्रमात्मकप्रत्यक्षजनकत्वम्, अञ्जनादिना तु निध्यादि-साक्षात्कारो न प्रमात्मक इत्यञ्जनादौ प्रमाघटितोक्तहेतोरभावान्न तत्र व्यभिचार इति चेद्, मैवम्, निध्यादिसाक्षात्कारे प्रमात्वस्य संवादिप्रवृत्तिजनकत्वहेतुना सिद्धेरूक्तहेतोर्व्यभिचारित्वात् । एतेन

रूपसाक्षात्काराऽसाधारणकारणं तैजसं रसाऽव्यञ्जकत्वे सति स्फटिकाद्यन्तरितार्थचाक्षुष-प्रत्यक्षजनकत्वात् प्रदीपदित्यपि निरस्तम्, अञ्जनविशेषेण व्यभिचारात् । अथाञ्जनादिभिन्नत्वे सतीति हेतौ विशेषणोपादानान्नोक्तव्यभिचार इति चेत्, तर्ह्यऽप्रयोजकोऽयं हेतुः प्रत्यक्षाजनकसुवर्णादौ भवदभ्युपगततैजसत्वाख्यजातेस्सत्त्वेनातिप्रसक्तत्वात्, चक्षुःप्रदीपयोरेकया तयाऽनुगतजात्या रूप-प्रत्यक्षम्प्रति कारणत्वाऽसिद्धेश्च, तम्प्रति चक्षुषः चक्षुष्ट्वेन प्रदीपस्य च प्रदीपत्वेनैव कारणत्वा-भ्युपगमात् । एतेन स्वप्नादिवञ्जनादिकं सहकृत्य मनसैव निध्यादिसाक्षात्कारः तत्र च चाक्षुषत्वारोप इत्यतो निध्यादिकं चक्षुषा साक्षात्करोमीति भ्रान्त एव प्रत्यय इत्युक्तानुमाने नाञ्जनादिना व्यभिचारः, हेतौ प्रमेति विशेषणीकृते सति प्रमात्मकचाक्षुषप्रत्यक्षाजनकत्वात्तस्य, तथा च हेतावञ्जनादिभिन्नत्वे सतीति विशेषणं न देयमित्यपिनिरस्तम्, व्यभिचारशङ्कानिवर्त्तकतर्काभावेनाप्रयोजकत्वादुक्तहेतोः । न च वस्तुगत्या तथाऽभ्युपगन्तुमपि शक्यम्, अञ्जनादेः पृथक्प्रमाणत्वापत्तेः, मनो यदसाधारणं सहकारिकारणं सभासाद्य बहिर्गोचरां प्रभां जनयति तस्य प्रमाणान्तरत्वनियमात् । किञ्च स्वसिद्धान्त-कदाग्रहावेशेन चक्षुषि पूर्वोक्तहेतुना तेजस्त्वस्य तेन च तत्र रश्मिवत्त्वस्याऽभ्युपगमेऽपि तद्रश्मयो विषयदेशं गताः किं गोलकेनाऽसम्बद्धाः प्रत्यक्षजनकतयाऽभ्युपगम्यन्ते, किं वा सम्बद्धाः, आद्यपक्षेऽपि किं निखिला रश्मयस्तथाविधा उत कतिपये इति विकल्पद्वयम् । तत्र नाद्यविकल्पो युक्तः, तथा सति चक्षुरपि निर्गतं स्यात्, यतोऽशेषवयवानां देशान्तरगमने तदविष्वग्भूतावयविनोऽपि तथात्वमेवं युक्तियुक्तम्, तथा च चक्षुर्विहीनस्य गोलकस्य निस्तेजस्त्वात्पुरूषाणामन्धत्वप्रसङ्गस्स्यात् । किञ्च वस्तुनि नेत्राभिमुके सत्यपि नेत्रदोषाद् यदेव पुराऽस्पष्टत्वेनाऽवभासते अञ्जनादिभिर्नियनसंस्कारे तदेवेदानीं यथाऽवस्थितस्वरूपेण स्पष्टं प्रकाशते इत्यविगानेन सर्वैरेवानुभूयते, गोलके विहितोऽञ्जनादिसंस्कारश्चक्षुश्शब्दवाच्यत्वेनाभ्युपगतानां गोलकस्थनेत्ररश्मी-नामुपकारं करोतीति तव युज्येत, सामस्त्येन विषयदेशस्थितानां तेषां प्रत्यक्षजनकत्वाभ्युपगमे तु तेषामेवाञ्जनादिना संस्कार उपयोगितामावहेत्, ते च रश्मयो गोलकाऽसंयुक्ता इति तदनधिष्ठानस्य गोलकस्य प्रत्यक्षाजनकत्वात्तत्राञ्जनादिना संस्कारस्य नैरर्थक्यमेव स्यात्, तथैव पक्ष्मपुटोन्मीलनस्यापि निरर्थकत्वमूह्यम् । यथा घटानयनकारणतनुसम्बद्धस्ते आनयनकार्याक्षमत्वापनोदाय तत्र संस्कारो विधीयमानस्साफल्यमनुभवति, न च छिन्नत्वेनासम्बद्धे तद्वयवे । अथ पूर्वं रश्मीनां नेत्रस्थत्वेन तत्राञ्जनादिसंस्कारपक्ष्मपुटोन्मीलनयोस्तद्गतिप्रयोजकत्वेन नापार्थकत्वमिति चेत्, स्यादेतद्रश्मीनां गोलकसम्बद्धत्वपक्षे, असम्बद्धत्वपक्षे तु न गोलकस्य कश्चिद्विशेषः । अथ तत्र गतानां रश्मीनां गोलके पुनरावर्त्तनाभ्युपगमेन नोक्तदोष इति चेत्, मैवम्, आवर्त्तमानानामपि तेषां गोलका-सम्बद्धत्वेऽन्धत्वप्रसङ्गस्य वारयितुमशक्यत्वात् । गोलकसम्बद्धत्वे च तैर्गोलकानुषक्तकामलादि-प्रत्यक्षापत्तिस्स्यात् । तदेवं खड्गधारासमानस्वच्छतरपुद्गलसमूहात्मकाऽभ्यन्तरनिर्वृत्तीन्द्रियगतोप-

करणेन्द्रियायाख्यशक्तियोगितया चक्षुषस्तत्तद्विषयकज्ञानावरणीयकर्मक्षयोपशमसहकृतस्य विषयमप्राप्तस्याऽपि प्रत्यक्षजनकत्वसम्भवेतैजसचक्षुःकल्पनमप्यनर्थकमेव । नन्वेवं तर्हि दूरवर्त्तिनां मेर्वादीनामपि किमिति न प्रत्यक्षमिति चेत्, उच्यते, यस्मिन् पदार्थे ज्ञानावरणकर्मक्षयोपशमलक्षणतद्ग्रहणयोग्यत्वं तस्यैव प्रत्यक्षं भवतीत्युक्तयोग्यत्वाभावादेवेति जानीहि । अथैतद्दोषभयादाद्यपक्षोक्तद्वितीयविकल्पपक्ष एवाश्रीयत इति चेत्, तदपि न मनोरथं पूरयितुं पारयति, यतो यावतो रश्मयो विषयसम्बन्धभाजस्तावन्तः पूर्वमपि गोलकेनाऽसम्बद्धा एवेति गोलकस्याञ्जनादिनोपकारे तत्रस्थरश्मय एवोपकृताः, न तु विषयसम्बन्धभाज इति तदीयाऽनुपकृतस्वभावस्य पूर्ववदविचलितस्य सत्त्वे सति न कश्चिदञ्जनादिना विशेषः । किञ्च तेऽवयवा रश्मयो यदि गोलकसंसक्तरश्मिभ्यस्सर्वथाऽसंयुक्ता एव तदा चक्षुषोऽपि नाश आपतितः, तेषां वा तदवयत्वाभावः, न ह्यवयविनः पदार्थस्यैकत्र स्थितस्यावयवानां खण्डीभूयासंयुक्तत्वेन परत्र गमने तस्य स्वरूपावस्थानं केनाप्यभ्युपगम्यते, न हि घटावयवकपालस्य परदेशगमने घटस्य स्वरूपावस्थानं पामरा अपि प्रतीयन्तीति । ननु तर्हि यथा सहस्रांशुरश्मयः प्रदीपरश्मयो वा तत्सम्बद्धा विषयदेशं गत्वा प्रकाशन्ते तथा नयनरश्मयोऽपीत्यर्थको द्वितीयपक्ष एवोररीक्रियत इति तेषां तत्तद्विषयं प्रति गमनस्य तत्तदर्थप्रकाशकत्वस्य चान्यथाऽनुपपत्त्याऽभ्युपगम्यमानस्य पक्ष्मपुटोन्मीलनस्य गोलकसंस्कृतेश्च तदुभयार्थत्वेन न वैयर्थ्यमिति चेत्, तदपि त्रपापात्रम्, तेषां गोलकानुषक्ततिमिररोगावयविनः प्रकाशकत्वापत्तेः, यतो न हि प्रदीपरश्मीनां स्वाधिष्ठानसंयुक्तशलाकाद्यऽप्रकाशकत्वं काचकूपिकान्तर्गतानां प्रदीपरश्मीनां ततो निर्गच्छतां काचकूपिकासम्बद्धार्थप्रकाशाजनकत्वं च दृष्टम् । अथाधिष्ठानापेक्षयाऽत्यन्तासत्यभावस्यापि कारणत्वान्नोक्तदोष इति चेत्, तर्हि गोलकसम्बद्धाञ्जनशलाकाया अग्रावच्छेदेनाप्यनुपलब्धिप्रसङ्गस्स्यात् । अथ यदंशेन तस्यास्तत्र संसर्गस्तदंसावच्छेदेनैवाप्रत्यक्षत्वम्, गोलकदेशावच्छेदेनैवाञ्जनशलाकासंसर्गस्य तत्प्रत्यक्षम्प्रति प्रतिबन्धकत्वादिति चेत्, मैवम्, प्रत्यक्षप्रतिबन्धकत्वप्रत्यक्षजनकत्वयोरेकस्मिन् वस्तुनि विरूद्धयोरपि भिन्नभिन्नदेशावच्छेदेनाविरोधं सम्पाद्यापेक्षिकयोस्तयोरभ्युपगमे तद्धर्मभेदेन कथञ्चित्तदभिन्नधर्मिणोऽपि भिन्नत्वं स्वस्वरूपतश्चैकत्वं स्वीकृतं स्यादिति भवतामपि स्याद्वादामृतरसास्वादप्रसङ्गस्स्यात्, स्याद्वादतत्त्वज्ञैरपि तथैवाभ्युपगमात् । किञ्च चक्षूरश्मीनामुदीचीम्प्रति गमने तद्दिगवस्थितसन्निकृष्टपदार्थसंयोगे यथा तत्प्रत्यक्षं तथा तद्दिग्वर्त्तिकाञ्चनाचलोपलम्भोऽपि स्यात्, उभाभ्यां तत्संयोगाऽविशेषात् । दूरत्वदोषस्य तद्रश्मिगतिप्रतिबन्धकत्वे च निशाकरस्याप्यप्रत्यक्षत्वं स्यात् । अथ शशधरांशुभिर्नेत्ररश्मीनां वृद्धिभावात्तत्र तेषां गमनेन तत्संयोगात्तत्प्रत्यक्षमिति चेत्, तर्हि तिग्मकरांशुभिरपि तद्रश्मिवृद्धिभावाऽविशेषात्तैरप्यभिवृद्धानां तेषां सुराद्रिं प्रत्यक्षिसर्पणात् कथं न तत्प्रत्यक्षं स्यात् । अथ रविकराणां तिग्मत्वेन नेत्ररश्मीनां प्रतिघातकत्वान्न तैस्तदभिवृद्धिरतो नोक्तदोष इति चेत्, तर्हि सहस्रांशुकिरणव्याप्तपदार्थ-

मात्रानुपलम्भप्रसङ्गस्स्यात्, यतो न हि रविकिरणेषु काञ्चनाचलापेक्षया नेत्ररश्मिप्रतिघातकत्वं घटपटाद्यपेक्षया तदभावश्चेति वक्तुं शक्यम्, शक्यत्वे वा स्याद्वादस्यैव साम्राज्यं स्यात् । अथ यद्यप्राप्तार्थप्रकाशकं चक्षुस्तर्ह्यप्राप्तत्वाऽविशेषात् सर्वमपि त्रिभुवनान्तर्वर्त्तिवस्तुनिकुरम्बं प्रकाशयेदिति चेत्, तदप्यसङ्गतम्, चक्षुषो योगार्थग्रहणस्वाभाव्यादेव यत्स्वयोग्यं तस्यैव तेन प्रकाशनात्, अन्यथा चक्षुस्संयुक्तसमवायसन्निकर्षो यथा कुवलयरूपे तथा तद्गन्धेऽपीति तच्चाक्षुषोदय-प्रसङ्गेनान्येन्द्रियाणां वैयर्थ्यं स्यात् । एतेन चक्षुषो विषयमप्राप्य प्रत्यक्षजनकत्वाभ्युपगमे कुडयादिव्यवहितस्यापि प्रत्यक्षं स्यादित्यपि निरस्तम्, विषयनिष्ठव्यवधानाऽभावकूटरूपयोग्यताया अपि अञ्जनाद्यजन्यचाक्षुषप्रत्यक्षम्प्रति कारणत्वेनाभ्युपगमात् । अञ्जनादिजन्यव्यवहितार्थ-चाक्षुषप्रत्यक्षम्प्रति चाञ्जनादिनिष्ठैव शक्तिलक्षणा योग्यता कारणमिति । किञ्च चक्षूरश्मीनां प्राप्तार्थप्रकाशकत्वाभ्युपगमे भित्त्यादेरिव स्फटिकादेरपि नेत्ररश्मिगतिप्रतिबन्धकत्वेन तद्व्यवहितार्था-नामप्युनुपलब्धिस्स्यात् । यदि च स्फटिकादेरतिस्वच्छत्वान्न नायनरश्मिगतिप्रतिबन्धकत्वमिति विभाव्यते, तदा प्राप्यकारित्वपक्षे तद्रश्मिगतितज्जन्यविभागपूर्वसंयोगनाशोत्तरदेशसंयोगादिकल्पनायां गौरवाल्लाघवाच्चाक्षुषज्ञानाऽप्रतिबन्धकत्वमेव स्फटिकादेः कल्प्यताम्, एवं भित्त्यादेरपि तद्रश्मिगति-प्रतिबन्धकत्वापेक्षया लाघवाच्चाक्षुषप्रत्यक्षं प्रत्येव प्रतिबन्धकत्वं कल्पनीयम्, एतेन चक्षुः प्राप्तार्थपरिच्छेदकं व्यवहितार्थाऽप्रकाशकत्वात्, यद् यद् व्यवहितार्थाऽप्रकाशकं तत्तनन्नाप्राप्तार्थ-परिच्छेदकम्, यथा प्रदीपः, व्यवहितार्थाऽप्रकाशकश्च चक्षुः, तस्मात्, प्राप्तार्थपरिच्छेदकमिति व्योमशिवमतमपि निरस्तम्, व्यवहिताऽर्थाऽप्रकाशकत्वहेतुसिद्धयर्थं व्यवहितार्थाऽप्रकाशकत्वं चक्षुषः कथमिति कथ ताप्रश्ने तदुत्तरतया व्यवधानस्य नेत्ररश्मिगतिप्रतिबन्धकत्वं वाच्यं स्यात् कथमन्यथा व्यवहितार्थप्रत्यक्षं न स्यात् । एवञ्च सति व्यवहितार्थाऽप्रत्यक्षस्याऽव्यवहितार्थप्रत्यक्षस्य चोपपत्तये व्यवधानस्य चाक्षुषज्ञानप्रतिबन्धकत्वं तदभावकूटस्य च चाक्षुषज्ञानकारणत्वेवाभ्युपगम्यताम्, येन क्लिष्टकल्पना परिहृता स्यात्, तयोः प्रतिबध्यप्रतिबन्धकभावस्त्वेवम् - स्वप्राचीस्थपुरूषस्य विषयतासम्बन्धेन घटादिचाक्षुषप्रत्यक्षम्प्रति स्वप्रतीचीवृत्तित्वसम्बन्धेन भित्त्यादीनां प्रतिबन्धकत्वम्, एवं स्वप्रतीचीस्थः पुरूषीयघटादिसाक्षात्कारम्प्रति स्वप्राचीवृत्तित्वसम्बन्धेन तेषां तत्त्वम्, यथा स्वोदीचीस्थपुरूषीयघटादिसाक्षात्कारम्प्रति स्वदक्षिणवृत्तित्वसम्बन्धेन तेषां तत्त्वमूह्यम, यदि च तत्तन्नयनादिक्रियातत्तदुत्तरदेशादीनामेव संयोगनियामकत्वेनानतिप्रसङ्गाद्भित्त्यादीनां न प्रतिबन्ध-कत्वमिति मतं तदापि तत्तन्नयनोन्मीलनस्य चाक्षुषज्ञानं प्रति परम्पराकारणत्वकल्पनापेक्षया "**तस्य हेतुत्वापेक्षया तद्धेतोरेव हेतुत्वम्**" इति न्यायेन लाघवाच्चाक्षुषज्ञानं प्रति तस्य साक्षात्कारणत्वकल्पनमेव ज्यायः, किमनन्तसंयोगादिकल्पनया । एतेनेन्द्रियसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति स्वसिद्धान्तसिद्धसामान्यलक्षणाऽनुगमाऽनुरोधेन प्रत्यक्षत्वावच्छिन्नम्प्रति इन्द्रिय-

सन्निकर्षत्वेनेन्द्रियसन्निकर्षस्य कारणत्वं "**यत्सामान्ययोः कार्यकारणभावस्तद्विशेषयोरपि सः**" इति न्यायावलम्बनेन चाक्षुषप्रत्यक्षम्प्रत्यनन्तसंयोगानां चक्षुस्संयोगत्वेनानुगमय्य तद्रूपेणानुगतं कारणत्वञ्चाभ्युपगम्यत इति तदुत्तरकालभाविगौरवं फलमुखं न दोषाय, तदुक्तं चिन्तामणिकारेण, "**प्रत्यक्षविशेषे इन्द्रियार्थसन्निकर्षविशेषो हेतुरनुगत एव**" इत्यपि निरस्तम्, प्रत्यक्षसिद्धसामीप्यसम्बन्धेनैव चाक्षुषप्रत्यक्षोपपत्तेरतीन्द्रियसंयोगकल्पनायां प्रमाणाभावात्, कार्यलिङ्गकेन कारणानुमानेन तत्सिद्ध्यभ्युपगमे वोक्तसम्बन्धेन तस्यान्यथासिद्धत्वात् । न चैवं तर्हि चक्षुरप्राप्यविषयं तत्प्रत्यक्षज्ञानकारीति स्वसिद्धान्तभङ्गप्रसङ्ग इति वाच्यम् चक्षुस्सन्निकर्षद्वारा प्रत्यक्षजनकमिति चक्षुस्स्वविषयं घटादिकं संयुज्य तत्प्रत्यक्षं करोतीति न्यायमतनिरास एवोक्तसिद्धान्तस्य तात्पर्यात् । किञ्च चक्षूरश्मीनां विषयैस्सह संयोगानन्तरं तत्प्रत्यक्षोत्पादकत्वाभ्युपगमे युगपदेव शाखानिशाकरयोः प्रत्यक्षं न स्यात्, युगपदुभयसंयोगाभावात् । अथ यद्यपि चक्षूरश्मीनामतिवेगाच्छाखासंयोगानन्तरमविलम्बेनैव शीतकरसंयोगादनुक्रमेणैव शाखायाश्चन्द्रमसश्च साक्षात्कारस्तथापि शतपत्रशूचीवेधदृष्टान्तबलेन तत्र यौगपद्याभिमान एवेत चेत्, तर्हि प्रथमे क्षणे शाखासंयोगः, द्वितीये च शाखानिर्विकल्पश्चन्द्रमस्संयोगश्च, तृतीये शाखासविकल्पज्ञानं चन्द्रमोर्विकल्पज्ञानञ्च, चतुर्थे शाखाज्ञानज्ञानत्वनिर्विकल्पज्ञानं चन्द्रमस्सविकल्पज्ञानञ्च, शाखानिर्विकल्पज्ञाननाशश्च, पञ्चमे शाखां साक्षात्करोमीत्यनुव्यवसायज्ञानं, चन्द्रज्ञानज्ञानत्वनिर्विकल्पज्ञानं, शाखासविकल्पज्ञाननाशश्च, चन्द्रनिर्विकल्पज्ञाननाशश्च, षष्ठक्षणे चन्द्रमसं साक्षात्करोमीत्यनुव्यवसायश्चन्द्रसविकल्पज्ञाननाशश्शाखाज्ञानत्वनिर्विकल्पज्ञाननाशश्चेति प्रक्रियया क्रमेणैव तदुभयानुव्यवसायोत्पत्त्यभ्युपगमाद युगपदेव शाखाचन्द्रमसौ साक्षात्करोमीत्यनुव्यवसायानुपपत्तिस्स्यात् । न च क्रमिकोत्पन्नशाखाचन्द्रसाक्षात्कारानुभवजनितक्रमिकसंस्कारद्वयस्य युगपदेव प्रबोधात्तदुत्पन्नायां शाखाचन्द्रोभयावगाहिन्यां स्मृतावेव साक्षात्कारत्वारोपाच्छाखाचन्द्रमसौ युगपदेव साक्षात्करोमीत्यनुव्यवसाय इति साम्प्रतम्, तादृगारोपादिकल्पनायां प्रमाणाभावात् । न च तिर्यग्भावावस्थितयोश्शाखाचन्द्रमसोर्युगपन्नेत्रतेजसा संयोगान्नोक्तानुपपत्तिरिति वाच्यम्, सन्निहितव्यवहितयोर्युगपत्संयोगेऽतिप्रसङ्गात् । अथ नेत्राब्दहिर्निर्गततेजसाऽर्थसंयोगसमकालमेव बाह्यालोकसहकारेणान्यचक्षुराम्भादेकस्य चक्षुषश्शाखयाऽन्यस्य च चन्द्रमसा संयोगाद् युगपच्छाखाचन्द्रमसोर्ग्रह इति चेत्, मैवम्, उद्भूतरूपवदालोकात्मकतेजःसंसर्गेणाऽनद्भूतरूपवत्तेजोविशेषात्मकचक्षुराऽऽरम्भस्यायोगात्, योगे वा बाह्यचक्षुषा पृष्ठावस्थितवस्तुग्रहप्रसङ्गादित्यधिकं गौरवमीत्या नोच्यते । तदेवं चक्षुर्मनसोः प्राप्यकारित्वाऽसिद्धथा इन्द्रियसन्निकर्षोत्पन्नं ज्ञानमिति प्रत्यक्षलक्षणाऽसङ्गतेः पूर्वं व्यवसायात्मकज्ञानेन सह मनस्संयुक्तसवायसन्निकर्षस्याभावेऽपि ज्ञानस्य स्वप्रकाशात्मकत्वादेवानुव्यवसाये मानोपपत्तेस्तत्प्रत्यक्षं भवत्येवेति स्वपरव्यवसायिज्ञानं प्रमाणमिति सिद्धम् ।

### ॥ प्रमाणमीमांसा ॥

सन्निकर्षोऽपि यदि योग्यतातिरिक्तः संयोगादिसम्बन्धस्तर्हि स चक्षुषोऽर्थेन सह नास्ति अप्राप्यकारित्वात्तस्य। दृश्यते हि काचाभ्रस्फटिकादिव्यवहितस्याप्यर्थस्य चक्षुषोपलब्धिः। **अथ** प्राप्यकारि चक्षुःकरणत्वाद्वास्यादिवदिति ब्रूषे; **तर्ह्य**यस्कान्ताकर्षणोपलेन लोहासन्निकृष्टेन व्यभिचारः। **न च** संयुक्तसंयोगादिः सन्निकर्षस्तत्र कल्पयितुं शक्यते, अतिप्रसङ्गादिति।

### ॥ प्रथमकर्मग्रन्थ टीका ॥

मनोनयनयोर्वर्जनं किमर्थम्! इति **चेद्** उच्यते मनोनयनयोरप्राप्तकारित्वात्, अप्राप्तकारित्वं च विषयकृतानुग्रहोपघातशून्यत्वात्, प्राप्तकारित्वे पुनरनलजलशूल्यादीनां चिन्तनेऽवलोकने च दहनक्लेदनपाटनादयः स्युः। अत्र च विषयदेशं गत्वा न पश्यति, प्राप्तं चार्थं नालम्बत इत्येतावन्नियम्यते, मूर्तिमता पुनः प्राप्तेन भवत एवानुग्रहोपघातौ दिनकरकिरणादिनेति।

**अन्यस्त्वाह**-व्यवहितार्थानुपब्धेरनुमानात् प्राप्तकारित्वं लोचनस्ये**ति**, एतदयुक्तम्, अनैकान्तिकत्वात्, काचाभ्रपटलस्फटिकान्तरितस्याप्युपलब्धेः। **स्यादेतत्**, नायना रश्मयो निर्गत्यतमर्थं गृह्णन्तीति दर्शनरश्मीनां तैजसत्वात् तेजोद्रव्यैरप्रतिस्खलनाददोष इति, **एतदप्ययुक्तम्**, महाज्वालादौ प्रतिस्खलनोपलब्धेरित्यत्र बहु वक्तव्यम् तत्तु नोच्यते, ग्रन्थगहनताप्रसङ्गात्।

### ॥ गर्गमहर्षि विरचित प्राचीन कर्म विपाक नामाकर्मग्रन्थस्य परमानन्दसूरिकृत वृत्तिः ॥

स च चतुर्विधो '**नयनमनो वर्ज्यम्**' इति वचनात्। तथाहि न चक्षुषाऽर्थो व्यज्यते गम्यते प्राप्यते, अप्राप्यकारित्वाच्चक्षुषः। किन्तु योग्यदेशस्थमेव चक्षुर्योग्यदेशस्थमर्थं गृह्णाति साक्षात्करोति, न पुनः प्राप्य गृह्णाति। प्राप्यग्रहणे चक्षुषः स्फोटादिरनिन्द्रियं चाधिष्ठानं स्यात्। तथा मनोऽप्येवमेव द्रष्टव्यम्, तस्याप्यप्राप्यकारित्वात्।

### द्रव्यलोक प्रकाशः

स्पृष्टार्थग्राहकत्वं यत्, परैरक्ष्णोऽपि कथ्यते। तदयुक्तं तथात्वे हि, दाहः स्याद्वन्ह्यवेक्षणात्॥ ३१॥

तथा-काचपात्राद्यन्तरसथं, दूरादेवेक्ष्यते जलम्। तद्भित्त्वान्तः प्रवेशे तु, जलश्रावः प्रसज्यते॥ ३२॥

इत्याद्यधिकं रत्नाकरावतारिकादिभ्योऽवसेयं, विस्तरभयान्नेह प्रतन्यते, यच्च सिद्धांते '**चक्खुप्फासं हव्वमागच्छइ**' इति श्रूयते, तत्र स्पर्शशब्देन इन्द्रियार्थसन्निकर्ष उच्यते, तथाहुः- '**सूरिएचक्खुप्फासं हव्वमागच्छइ**' इत्येतज्जम्बुद्वीपप्रज्ञप्तिप्रतीकवृत्तौ- "अत्र च स्पर्शशब्द इन्द्रियाथसन्निकर्षपर-श्चक्षुषोऽप्राप्यकारित्वेन तदसम्भवा" दिति।

॥ स्याद्वाद मुक्तावलिः ॥

असन्निकृष्टं प्रमितेर्हिचक्षुरप्राप्यकारित्वत एवं हेतोः ।
तदुद्भवः स्यात्खलु सन्निकर्षाभावेपि तस्यां न घटेत तत्ता ॥५७॥

चक्षुर्मनोवद्विषयोद्भवानुग्रहोपघातानुपलम्भतोपि ।
अप्राप्यकारीन्द्रियमण्डलेषु स्याद् व्यञ्जनावग्रहकश्चतुर्षु ॥५८॥

न विद्यते चक्षुषि तैजसत्वं न रश्मिवत्ता न च तद्गतिस्तु ।
अप्राप्तवस्तु प्रवर प्रकाशे तद्योग्यतैवं शरणं वदन्ति ॥५९॥

॥ युक्ति प्रकाशः ॥

**न संनिकर्षोऽपि भवेत्प्रमाणं । प्रमाकृतौ तद्व्यभिचारदर्शनात् ॥**
**अप्राप्यकार्यम्बकसंनिकर्षो । घटादिनाऽर्थेन कथं भवेत् पुनः ॥ ६ ॥**

अथ सुगतामतमपाकृत्य नैयायिकमतमपाकरोति, न सन्नि० चेत्प्राप्य० द्विधाप्य० न तैज० अग्रगकाव्यगतं यौगपदमध्याहृत्यात्र व्याख्येयं, हे यौग ! त्वया प्रमाणत्वेन कल्पितोऽपि सन्निकर्षः प्रमाणं न भवेत् कुत इति हेतुमाह **प्रमाकृतौ** प्रमाजनने **तदिति** तस्य सन्निकर्षस्य व्यभिचारदर्शनात्, भावार्थ स्त्वयं-प्रमासाधकतमं प्रमाणमिति प्रमाणलक्षणं त्वयाऽभ्युपगतं, यद्यस्मिन् सति भवत्येवाऽसति च न तत्तस्य साधकतमं क्वचित् सत्यपि संनिकर्षे प्रमाया अनुत्पादात्, क्वचिद् सत्यपि प्रमोत्पत्ते रित्यत्रान्वयव्यतिरेकाभ्यां व्यभिचारदर्शनात्, तथाहि गगनस्य विभुत्वेन सकलमूर्त्तद्रव्यसंयोगित्वं विभुत्वमिति वचनाद् गगनचक्षुषोर्घटचक्षुषोरिव सन्निकर्षेण घटविषयकप्रमाया अजननात्, **न च** तत्र योग्यताया अभावान्न सन्निकर्षस्तत्प्रमां जनयतीति **वाच्यं**, योग्यतांगीकारे किमन्तर्गडुना सन्निकर्षेण, योग्यताहि प्रति**बन्धका**ऽभावः, स च स्वावरणक्षयोपशमरूपं भावेंन्द्रियमेव, तथा चास्मत्कक्षा**पञ्जर**प्रवेशः, विशेषणज्ञानाद्विशेष्यप्रमायां जायमानायां क्वचिदसत्यपि **संनि**कर्षे प्रमोत्पत्तेरिति स्थितमेतन्न सन्निकर्षः प्रमाणमिति, अथ ग्रामो नास्ति कुतः सीमेति न्यायात् घटाद्यर्थैः **संनिकर्ष** एव न संभवति, तस्य प्रमाणाऽप्रमाणत्वविचारस्तु दूरेऽस्त्विति दर्शयति, अप्रपाप्येति अप्राप्यकारि यदम्बकं चक्षुस्तस्य घटादिनार्थेन सन्निकर्षः कथं भवेन्न कथमपीत्यर्थः, यदि चक्षुः प्राप्यकारि स्यात् तदाऽस्यार्थप्राप्त्या सन्निकर्षः संम्भवतीति भावार्थ इति वृत्तार्थः ॥६॥

**चेत्प्राप्यकार्यम्बकमस्ति यौगा-त्यासन्नमर्थं हि कथं न पश्यति ॥**
**तथाविधं सत्किमु तेषु गत्वा । गृह्णातिवायांत्यथ तेऽत्रदेशे ॥ ७ ॥**

अथ चक्षुःप्राप्यकारित्वं निरस्यति, चेत्प्राप्य० चेदम्बकं चक्षुः प्राप्यकारि हे यौग ! अस्ति तदात्या-सन्नमञ्जनादिकमर्थं कथं न गृह्णतीत्यर्थः । यद्यत् प्राप्यकारिदृष्टं तदत्यासन्नार्थग्राहकमपि, यथा

शब्दादेः श्रोत्रादि, तथा च तर्कोल्लेखःयदि चक्षुः प्राप्यकारिस्यात्तदात्यासन्नार्थग्राहकमपि स्यादिति तर्कोपजीवितप्रयोगोपि, यथा चक्षुर्न प्राप्यकारि अत्यासन्नार्थाग्राहकत्वात्, यन्नैवं तन्नैवं, यथा स्पर्शनं, अथ तुष्यतु दुर्जन इतिन्यायात्तावत्तवाङ्गीकृतं चक्षुःप्राप्यकारित्वमप्यङ्गीक्रियते यदि विकल्पसहं स्यात् । तथाहि-**तथाविधं** प्राप्यकारित्वं **किमु** कथं **तेषु** अर्थेषु गत्वा गृह्णाति, अथवा **तेऽर्था अत्र देशे** चक्षुःप्रदेशे आयान्तीति विकल्पद्वयमिति वृत्तार्थः ।।७।।

**द्विधाप्ययुक्तं हि गतस्य तस्य । वह्न्यादिकार्थेषु कथं न दाहः ॥**
**भूभूधराद्यर्थसमागमेऽपि । नाच्छादनं स्यात् किमु तस्य चक्षुषः ॥ ८ ॥**

अथ विकल्पद्वयमध्यन्यातरविकल्पाङ्गीकारेणाऽदक्षतां यौगस्य दर्शयति द्विधाप्य० **द्विधापि** उभयथापि अयुक्तं स्यात् न तु युक्तिमत्त्वं स्यात्, तत्कथमिति तावत् **प्रथमपक्षे** दोषं दर्शयति, यदि हि चक्षुस्तेषु गत्वा गृह्णाति तदा तस्य चक्षुषोवह्न्यादिकार्थेषु गतस्य **दाहो**दहनं कथं न स्यात्, अथार्था श्चक्षुःप्रदेशे समायान्ति इति **द्वितीयविकल्पं** दूषयति, **भूः** पृथ्वी **भूधराः** पर्वतास्तेषां चक्षूःप्रदेशे समागमे, भूभूधराद्यर्था यदि चक्षुःप्रदेशे समायान्ति तदा किं स्यादित्यत आह-तस्य चक्षुष आच्छादनं आवरणं किमु न स्यात् । ते ह्यागताश्चक्षुराच्छादयन्ति, तथा च लाभमिच्छतो मूलक्षतिस्तवायाति इति वृत्तार्थः ।।८।।

### ।। मार्गणाद्वारविवरणम् ।।

तत्र स्पृष्टमालिङ्गितं, बद्धं च तोयवदात्मप्रदेशैरात्मीकृतमालिङ्गितानन्तरमात्मप्रदेशैरागृहीतमित्यर्थः, तदुक्तं-"**बद्धमप्पकयं पएसेहिं पुट्ठं रेणुं च तणुम्मि**" इति वचनात् । रूपं त्वस्पृष्टमेव पश्यति, तदुक्तं-

**"पुट्ठं सुणेइ सद्दं, रूवं पुण पासई अपुट्ठं तु ।**
**गंधं रसं च फासं च बद्धपुट्ठं वियागारे ।।१।।" इति ।**

**ननु** स्पृष्टं शब्दं शृणोतीत्यत्र शब्दप्रयोगनिसृष्टान्येव केवलानि शब्दद्रव्याणि शृणोति यद्वाऽन्यानि तद्वासितानि मिश्राणि वा ? **उच्यते,** न तावत्केवलानि, यतो वासकानि शब्दद्रव्याणि, शब्दयोग्यानि च द्रव्याणि सकलव्यापीनि, ततोऽवश्यं तद्वासितानि शृणोति मिश्राणि वा, न केवलान्येवोत्सृष्टानि । तत्रापि भाषासमश्रेणिव्यवस्थितः पुरुषः पुरुषादिसम्बन्धिनं भेर्यादिसम्बन्धिनं वा शब्दं मिश्रमुत्सृष्टशब्दद्रव्यभावितापान्तरालस्थद्रव्यमिश्रं श्रृणोतीति, विश्रेणिस्थितस्तु नियमेन पराधाते सति शब्दं श्रृणोति, नान्यथा, एतदुक्तं भवति-उत्सृष्टशब्दद्रव्याभिघातेन यानि वासितानि शब्दद्रव्याणि तान्येव केवलानि श्रृणोति, न कदाचिदप्युत्सृष्टानि, कुत इति चेत् ?, तेषामनुश्रेणिगमनत्प्रतिघाताभावाच्चेति ।

**ननु** रूपमस्पृष्टं पश्यतीति कथमुक्तमिति **चेत्** ?, नयनेन्द्रियस्याप्यकारित्वात् । **ननु** कानीन्द्रियाणि प्राप्यकारीणि कानि चाप्राप्यकारिणीति **चेत्** ?, चक्षुर्वर्जानि सर्वाणीन्द्रियाणि

प्राप्यकारीणि, नयनं त्वप्राप्यकारीति । विषयीभूतं शब्दादिकं वस्तु प्राप्तं सत् संश्लेषद्वारेणासादितं कुर्वन्ति परिच्छिन्दन्तीति प्राप्यकारीणिस्पृष्टार्थग्राहीणीति यावत् । कथं पुनः चत्वार्येवः प्राप्यकारीणीति चेत् ?, उपघातानुग्रहभावात्, तथाहि-कर्कशकम्बलादिस्पर्शने त्वगिन्द्रियस्य, त्रिकटुकाद्यास्वादने रसनेन्द्रियस्य, अशुच्यादिपुद्गलाघ्राणे घ्राणेन्द्रियस्य, भेर्यादिशब्दश्रवणे श्रोत्रस्य च त्वक्खननाद्युपघातो भवति, चन्दनाङ्गनाहंसतूलादिस्पर्शने त्वगिन्द्रियस्य, क्षीरशर्कराद्यास्वादने रसनेन्द्रियस्य, कर्पूरपुद्गलाद्याघ्राणे घ्राणेन्द्रियस्य, मृदुमन्द्रशब्दाद्याकर्णने श्रवणस्य च शैत्याद्यनुग्रहो भवति । नयनस्य तु निशीथकरपत्रशैलमहाज्वालादिवीक्षणे न पाटनाद्युपघातो भवति, नापि चन्दनागुरुकर्पूरकस्तूरिकाद्यवलोकनेपि शैत्याद्यनुग्रहो भवति । एवं चिन्तने मनसोऽपि अनुग्रहोपघातौ न भवतः । **ननु** घ्राणेन्द्रियं प्राप्यकारि न भवति, यतो घ्राणेन्द्रियं विषयदेशं गत्वा न गन्धं गृह्णाति, तथानुभवाभावात्, नापि गन्धो घ्राणेन्द्रियं प्रविशन्नुपलभ्यते, न चाभ्यामन्येनापि प्रकारेण विषयस्पर्शनं घटते, अनुभूयते च निर्विवादं कर्पूरकुसुमकुङ्कुमादीनां दूरस्थानामपि गन्ध इति **चेत् ?, अत्रोच्यते**, स्पर्शनादिवदबाह्यकरणत्वेन घ्राणेन्द्रियं गन्धदेशं गत्वा गन्धं न गृह्णाति किन्तु गन्धः स्वयमागत्य घ्राणेन्द्रियं स्पृशति, पुद्गलमयत्वेन सक्रियत्वात्, **आर्हतमते** गगनादीनां सक्रियत्वेऽपि तत्र यथा गमनक्रियाभावः तद्वत् सक्रियस्यापि गन्धस्य गमनक्रिया न स्यात् अतस्तद्व्यावृत्त्यर्थं 'पुद्गलमयत्वं' हेतोर्विशेषणम् । यत्र पुद्गलमयत्वे सति सक्रियत्वं तत्र गमनक्रिया विद्यत एव यथा पुद्गलस्कन्धेषु । **ननु** पुद्गलमयत्वेऽपि गन्धे गमनक्रियाऽस्तीति कुतो निश्चीयते इति ? यथा पवनपटलेनोह्यमानत्वात् धूमो गमनक्रियावान् एवं गन्धोऽपि वायुनोह्यमानत्वात् तद्वान् । तथा संहरणतो गृहादिषु पिण्डीभवनात् तद्वदेव क्रियावान्, एवं विशेषेण द्वारादिविघाततस्तोयवत्, पर्वतनितम्बादिषु च प्रतिघातात् वायुवत् क्रियावान् गन्धः । अतोऽत्र गन्धः समागच्छतीति प्रत्ययोऽपि लोके सङ्गच्छते । घ्राणेन्द्रियेण सम्बद्धो गन्धो पूत्याद्युपघातमनुग्रहं वा जनयितुमलम्, नान्यथा, सर्वस्यापि तज्जननप्राप्तेरतिप्रसङ्गादिति । एवमेव श्रवणेन्द्रियस्यापि प्राप्यकारित्वं वाच्यम्, अग्रे विशेषतः प्रतिपादयिष्यामश्च ।

लोचनमपि मनोवदप्राप्तविषयम्, अनुग्रहोपघाताभावात् । **न च** नयनस्य चन्द्रदर्शनेनानुग्रहस्य रविदर्शनेन चोपघातस्य भावाद् व्यभिचार इति **वाच्यम्**, स्पर्शनादिवत् दाहपाटनादिरूपानुग्रहोपघाताभावात् । **ननु** नयनस्याप्राप्यकारित्वे मनोवत् कस्मात् दूरव्यवहितान् सर्वानपि पदार्थान् चक्षुर्न विषयीकरोति, प्राप्यकारित्वे तु यदेवानावृत्तमदूरदेशस्थं वा वस्तु तदेव गृह्णीयात् नावृत्तं दूरवर्त्ति वा, तत्र नयनांशूनां गमनासम्भवेन सम्पर्काभावात्, तदुक्तं-"**प्राप्यकारि चक्षुः, उपलब्ध्यनुपलब्ध्योरनावरणेतरापेक्षणात्, अदूरेतरापेक्षणाच्च, यदि हि चक्षुरप्राप्यकारि भवेत्तदाऽऽवरणभावादनुपलब्धिरन्यथोपलब्धिरिति न स्यात्, नहि तदावरणमुपघातकरणसमर्थम्, प्राप्यकारित्वे तु मूर्त्तद्रव्यप्रतिघातादुपपत्तिमान् व्याघातः, अतिदूरे च गमनाभावादिति**" ।

प्रयोगश्चात्र न चक्षुषो विषयपरिमाणम्, अप्राप्यकारित्वात्, मनोवत् इति **चेत् ?, न**, दृष्टान्तस्य साध्यविकलत्वात्, नहि मनोऽपि सर्वान् विषयान् गृह्णाति, तस्यापि सूक्ष्मेष्वागमगम्यादिपदार्थेषु मोहदर्शनात्, ततो यथा मनसोऽप्राप्यकारित्वेऽपि स्वावरणक्षयोपशमसापेक्षं विषयग्रहणमेवं नयनस्यापि स्वावरणक्षयोपशमसापेक्षं योग्यदेशावस्थितनियतविषयग्रहणं स्यात्, तेन न व्यवहितानां न वा दूरदेशस्थितानां ग्रहणं भवति, दृष्टं चेतदयस्कान्तेऽपि, न चाप्राप्यकारित्वेऽपि तस्य विश्ववर्त्तिनिखिललोहाकर्षणं युज्यते किन्तु योग्यदेशस्थितस्यैवेति । **यत्तु शङ्कराचार्यः** प्राह–"**अयस्कान्तोऽपि प्राप्यकारी अयस्कान्तच्छयाणुभिः सह समाकृष्यमाणवस्तुनः सम्बन्धभावात्, केवलं ते छयाणवः सूक्ष्मत्वान्नोपलभ्यन्ते**" इति, **तन्न सम्यक्**, तद्ग्राहकप्रमाणाभावात्, न च छायाणुसम्भवग्राहकं किञ्चित्प्रमाणमस्ति । यद् 'आकर्षणं तत्संसर्गपूर्वकं दृष्टं यथाऽयोगोलकस्य सन्दंशेन, आकर्षणं चायसोऽयस्कान्तेन तत्र साक्षात् संसर्गोऽयस्कान्ते प्रत्यक्षबाधित इत्यर्थात् छायाणुभिः सह द्रष्टव्य' इति **तदपि बालजल्पितम्**, मन्त्रेण व्यभिचारात्, तथाहि–स्मर्यमाणोऽपि मन्त्रो विवक्षितं वस्त्वाकर्षति, न च तत्र कोऽपि सम्बन्धः । किञ्च, यथा छायाणवः प्राप्तमयः समाकर्षन्ति तथैव संसर्गीभूतं काष्ठादिकं कथं नाकर्षन्ति ? शक्तिप्रतिनियमादिति **चेत्** ? अप्राप्तावपि शक्तिप्रतिनियमस्तुल्य एवेति छायाणुप्रकल्पनं व्यर्थम् । **ननु** नयनात् नायना रश्मयो निर्गत्य विषयं प्राप्य च रविबिम्बरश्मय इव वस्तु प्रकाशयन्तीति नयनस्य प्राप्यकारिता, सूक्ष्मत्वेन तैजसत्वेन च तेषां वह्न्यादिभिरिव दाहादयो न भवन्ति, भानुकिरणेषु तथादर्शनादिति **चेन्न**, तेषां प्रत्यक्षादिप्रमाणाग्राह्यत्वेन श्रद्दधितुमशक्यत्वात् तथाविधानां कल्पनेऽप्यतिप्रसङ्गात् । **न च** वस्तुपरिच्छेदान्यथानुपपत्तेस्तत्कल्पनमावश्यकमिति **वाच्यम्**, तानन्तरेणापि मनोवत् तत्परिच्छेदोपपत्तेः, नापि रविरश्म्युदाहरणमात्रेणाचेतनानां नयनरश्मीनां वस्तुपरिच्छेदो युज्यते, अन्यथा नखदन्तभालतलादिगतशरीररश्मीनामपि स्पार्शनविषयवस्तुपरिच्छेदप्रसङ्गात्, नयनरश्मीनामग्रे विस्तरेण निषेत्स्यमानत्वाच्च । **न चान्यत्र** गतं मे मन इत्याबालगोपालप्रसिद्धत्वेन मनो वस्तुदेशं गत्वा विषयं परिच्छिनत्तीति दृष्टान्तासिद्धिरिति **वाच्यम्**, तोयज्वलनादिविषयचिन्तनकाले स्पर्शनवदनुग्रहोपघाताभावात् । किञ्च द्रव्यमनो विषयदेशं प्रति गच्छति, उत भावमनः ?, न तावत् भावमनः, तस्य चिन्ताज्ञानपरिणामरूपत्वेनात्मनोऽनतिरेकात् आत्मैव भावमनो भवति स च देहमात्रव्यापित्वेन न बहिर्गमनं करोति, यथा शरीरवर्त्तिरूपादयः । **ननु** देहमात्रव्यापी आत्मा न भवति, अमूर्त्तत्वादाकाशवदिति **चेत्** ?, **अत्र समाधिः**, आत्मनः सर्वगतत्वे सति आबालगोपालप्रसिद्धाः कर्तृत्वादयो धर्मा न घटेरन्, तथा च–आत्मा न कर्त्ता, भोक्ता, नापि संसारी, न ज्ञानी, न सुखी, न वा दुःखी, सर्वगतत्वात्, आकाशवदित्यनिष्टापत्तिः स्यात् । ननु साङ्ख्यमते आत्मनो निष्क्रियत्वेनेष्टापत्तिरियमिति, तदुक्तं–"**अकर्त्ता निर्गुणो भोक्तात्मा**" इति चेत् ?, तदपि न युक्तम्, आत्मनो निष्क्रियत्वे प्रत्यक्षादिप्रमाणोपलब्ध-

भोक्तृत्वादिक्रियाविरोधप्रसङ्गात् । न च प्रकृतेरेव भोगादिकरणक्रिया न पुरुषस्येति वाच्यं, आदर्शप्रतिबिम्बोदयन्यायेन तत्र क्रियाणामिष्टत्वात्, "**चैतन्यं पुरुषस्य स्वरूपम्**" इति वचनात् प्रकृतेर्जडत्वेन भोगादिक्रियाऽयोगाच्च, अन्यथा घटादीनामपि तत्प्रसङ्गात् । किञ्चात्मनः सर्वगतत्वे तदव्यतिरिक्तभावमनसोऽपि सर्वगतत्वं स्यात्, तथा च सर्वार्थप्राप्तेः सर्वस्य सर्वज्ञत्वापत्तिः । **ननु** प्राप्तानपि सर्वार्थान् उक्तदोषभयात् न गृह्णातीति **चेत्** ?, तर्हि ग्राह्यत्वेनेष्टानप्यर्थान् मा गृह्णीत, भावमनसः प्राप्तत्वाविशेषात्, ग्राह्यत्वेनानिष्टार्थवदिति भावः । **ननु** प्राप्तत्वाविशेषेऽपि कांश्चिदर्थान् गृह्णाति कांश्चित् नेति **चेत्** ?, तर्हि तवाभिप्रायेणेश्वरचेष्टितमिति व्यक्तं जातम्, न चैतत् युक्तिघटकमिति । एवं सर्वगतत्वे दहनदाहवेदनापाटनक्लेदयोऽपि स्युः । **न च** यत्रैव शरीरं तत्रैव ते भवन्ति नान्यत्रेति **चेत्** ?, कुत इति वक्तव्यम्, आज्ञामात्रादेवेति **चेत्** ?, न, तस्या इहाविषयत्वात् । **ननु** शरीरस्य सहकारिभावेन तथात्वमिति **चेत्** ?, **न,** नित्यस्यात्मनः सहकारित्वापेक्षाया अयोगात्, तथाहि-अपेक्ष्यमाणेन सहकारिणा किमात्मनः कश्चित् उपकारविशेषः क्रियते न वा ? क्रियते **चेत्** ?, उपकारः किमात्मनोऽर्थान्तरभूतः, अनर्थान्तरभूतो वा ?, यदि **प्रथमः** पक्षस्तर्हि न किञ्चित्तस्य कृतं स्यात्, **द्वितीयश्चे**त् ?, तत्करणे तदव्यतिरिक्तस्यात्मनोऽपि कृतत्वप्रसङ्गः, आत्मनः कार्यत्वेनानित्यत्वापत्तिश्च, न क्रियत इति **चेत्** ?, **तर्हि** न तस्य सहकारित्वं, विशेषाकरणात् । **अथ** विशेषमकुर्वन्नपि सहकारीष्यते **तर्हि** विश्वविश्वस्यापि सहकारिताप्राप्तिः, विशेषाकरणत्वस्य तुल्यत्वादिति व्यर्था शरीरमात्रापेक्षेति । तस्मात् शरीरमात्रवृत्तिरेवात्मा न सर्वगत इति तदव्यतिरिक्तस्य भावमनसोऽपि शरीरात् बहिर्देशगमनं न युक्तमिति । नापि द्रव्यमनो विषयदेशं प्रति व्रजति, यतः काययोगसहकृतस्य जीवगृहीतचिन्ताप्रवर्त्तकमनोवर्गणान्तःपातिद्रव्यसमूहात्मकस्य द्रव्यमनसोऽचेतनत्वेन स्वयं विज्ञातृत्वं न भवति, घटवत्, ततस्तत्र गमनेऽपि न विषयं परिच्छिनत्ति । **ननु** वयं न ब्रूमो यत् स्वयं द्रव्यमनो गत्वा विषयं परिच्छिनत्ति किन्तु मनोद्वारेणात्मा, अत्रानुमानं 'बहिर्निर्गतेन द्रव्यमनसा आत्मा विषयं प्राप्य जानाति, स करणत्वात्, प्रदीपमणि चन्द्रसूर्यादिप्रभयेवे' ति **चेत्** ?, अर्थपरिज्ञाने द्रव्यमनसः करणत्वं को न मन्यते, किन्तु करणं द्विधा, तद्यथा-अन्तःकरणं, बाह्यकरणं च । तत्र द्रव्यमन आत्मनोऽन्तःकरणम्, बाह्यकरणं प्रदीपप्रभादिकम्, अन्तःकरणं तु शरीरस्थितमेव विषयं जानाति, स्पर्शनवत्, मणिप्रभादीनां च बाह्यकरणत्वेन दृष्टान्तस्य साधनविकलतेति । **न च** पद्मनालतन्तुन्यायेन द्रव्यमनसो बहिर्गमनं भवत्वित्यपि **वाच्यम्,** अन्तः करणस्य स्पर्शनवत् बहिर्गमनाभावात् । तदेवं भावमानसो द्रव्यमनसश्च बहिर्गमनाभावेन मनसोऽप्राप्यकारित्वं सिद्धं, तत्सिद्धौ च न दृष्टान्तासिद्धिः । **न चा**र्त्तादिध्यानातिशयात् हृद्रोगादिरूपस्योपघातस्य, पुत्रजन्मादिरूपाभीष्टप्राप्तिचिन्तासमुद्भूतहर्षादिरूपानुग्रहस्य सत्त्वेनानुग्रहोपघाताभावरूपो हेतुरसिद्ध इति **वाच्यम्,** विषयकृतानुग्रहोपघाताभावात् । पुत्रजननमरणकृतहर्षशोकौ तु द्रव्यमनस्कृतौ, हृदयदेशाश्रितनिबिडप्ररूढग्रन्थिवत्, ततो विषयकृता-

नुग्रहोपघातशून्यत्वेन हेतोरसिद्धतोद्भावनं मस्तकघातादिविह्वलीभूतेनासम्बद्धभाषिणा सह तुल्यं जातमिति । **ननु** द्रव्यमनस्कृतावनुग्रहोपघातौ नानुभवामः, तथाप्रतीतेरेवाभावादिति **चेत्** ?, ननु यथा इष्टानिष्टपुद्गलमयाहारानुभवात् जन्तुशरीराणां पुष्टिहानी भवतस्तथा द्रव्यमनसोऽनुग्रहोपघातौ भवताम्, भवतामत्र पुद्गलमयत्वे समानेऽपि का क्षतिः ?, तदुक्तं-"**चिन्तया वत्स ! ते जातं शरीरकमिदं कृशम्**" इति । **ननु** तर्हि चिन्तैवोपघातादिजनिकाऽस्त्विति **चेत् ?, न,** तस्या अपि द्रव्यमनःप्रभवत्वात्, अन्यथा चिन्ताया ज्ञानरूपत्वेन ज्ञानस्य चामूर्त्तत्वेनाकाशवदुपघातादिजनकत्वा-योगात्, "**जमणुग्गहोवघाया जीवाणं पुग्गलेहिंतो**" इति वचनप्रामाण्याच्च । ततो द्रव्यमनो न विषयदेशं गत्वार्थं परिच्छिनत्ति न वा शरीरस्थमेव हठात् समाकृष्यात्मनः समीपमानीय ज्ञेयमव-लम्बत इति ज्ञेयकृतावनुग्रहोपघातौ न भवतः । **ननु** शब्दादय इष्टानिष्टपुद्गलात्मका इति प्रत्यक्षादि-प्रमाणसिद्धत्वेन प्रतीमः, द्रव्यमनस्तु यदिदं किमपि भवद्भिरुद्घुष्यते तदिष्टानिष्टपुद्गलमयमस्तीति कथं श्रद्दध्महे इति **चेत्** ?, इत्थम्, योगिनां प्रत्यक्षतोऽर्वाग्दृशामनुमानतश्च तत्सिद्धेः, तथाहि-यदन्तरेण यद् नोत्पद्यते तद्दर्शनात् तदस्तीति स्वीकर्त्तव्यम्, यथा स्फोटदर्शनात् दहनस्य दाहिका शक्तिः, नोपपद्यते च द्रव्यमनोव्यतिरेकेणात्मनोऽनुग्रहोपघातौ ततस्तदन्यथानुपपत्तेः सिद्धं पुद्गलात्मकं द्रव्यमनः । **न च** चिन्तनीयवस्तुकृतौ ताविति वाच्यम्, दहनादिचिन्तने दाहादिप्रसङ्गात् । "**चिन्तया वत्स ! ते जातं शरीरकमिदं कृशम्**" इति लोकोक्तेः चिन्ताज्ञानसहकृतौ तावित्यपि **न,** चिन्ताज्ञानस्यामूर्त्तत्वेना-काशवत् कर्तृत्वायोगादित्युक्तमेव, "**चिन्तया वत्स**" इति लोकोक्तेस्तु कार्ये कारणशक्त्यध्यारोपेणौ-पचारिकत्वाच्च । **ननु** चिन्तया खेदादेरुद्भव इति चेत् ?, कोऽयं खेदादिर्नाम ? किं मनोद्रव्याण्युत चिन्ताज्ञानं वा ?, **आद्ये** सिद्धसाधनम्, **द्वितीये**ऽपि विहितोत्तरमेव । **न च** निर्हेतुकौ ताविति **वाच्यम्,** सर्वदा भावाभावप्रसङ्गात्, तदुक्तं-

**"नित्यं सत्त्व-मसत्त्वं वा, हेतोरन्यानपेक्षणात् ।**
**अपेक्षातो हि भावानां, कादाचित्कत्वसम्भवः ॥१॥"** इति ।

**न च** जीवादिकस्तयोरन्यः कोऽपि हेतुरिति **वाच्यम्,** तस्य नित्यत्वेन सर्वदा भवनप्रसङ्गात् । तत उक्तयुक्ति-सिद्धं पुद्गलमयं द्रव्यमनः स्वयमात्मनोऽनुग्रहोपघातौ कुर्यात् न तु ज्ञेयकृतौ ताविति तत्प्राप्यकारी न भवति । **ननु** मा भूत् मनसो जाग्रदवस्थायां प्राप्यकारिता, स्वप्नावस्थायामनुभूयमाना केन निवार्यते, शत्रुञ्जयादिगिरौ मदीयं मनो गतमिति प्रतीतेरिति **चेत् ?, अत्रोच्यते,** यथा वृत्ता-कारत्वेनाशु भ्राम्यमाणमचक्रमप्यलातचक्रं चक्रत्वेनोपलभ्यमानं दृश्यते परं न सत्यम्, तथा स्वप्नमपि न सत्यं, शत्रुञ्जयगिरिगमनाद्यर्थाभावात् । तदभावश्च स्वप्नोपरमे प्रबुद्धस्य शरीरस्थस्यैव मनसो-ऽनुभूयमानत्वात् । **ननु** स्वप्नावस्थायां शरीरान्निर्गत्य शत्रुञ्जयादिगिरौ मनो गच्छति, जाग्रदवस्थायां पुनरागत्य शरीरमनुप्रविशतीति न दोष इति चेत् तन्न युक्तिघटकम्, यथा कश्चित् स्वकीयं मनः

शत्रुञ्जयादिगिरौ गतं पश्यति तथा शरीरमात्मानमपि तत्र चैत्यवन्दनादिक्रियां कुर्वाणं पश्यति, न च तत्तथैव, यतोऽत्रस्थैः पुरुषैः सुप्तस्येहैव दर्शनात्, आत्मद्वयाऽसम्भवात्, गमनादिजनितपरिश्रमाद्यभावाच्च। **ननु** स्वप्नोपलब्ध्यनन्तरं जाग्रदवस्थायां तत्कार्यभूता हर्षविषादादयो दृश्यन्ते, यथा-

**"स्वप्ने दृष्टो मयाद्य त्रिभुवनमहितः पार्श्वनाथः शिशुत्वे,**
**द्वात्रिंशद्भिः सुरेशैरहमहमिकया स्नाप्यमानः सुमेरौ ।**
**तस्मान्मत्तोऽपि धन्यं नयनयुगमिदं येन साक्षात् स दृष्टः,**
**द्रष्टव्यो यो महीयान् परिहरति भयं देहिनां संस्मृतोऽपि ॥१॥"**

इत्यादिकः स्वप्नानुभूतसुखरोमहर्षः, तथा-

**"प्राकारत्रयतुङ्गतोरणमणिप्रेङ्खत्प्रभाव्याहता,**
**नष्टाः क्वापि रवेः करा द्रुततरं यस्यां प्रचण्डा अपि ।**
**तां त्रैलोक्यगुरोः सुरेश्वरवतीमास्थायिकामेदिनीं,**
**हा ! यावत् प्रविशामि तावदधमा निद्रा क्षयं मे गता ॥१॥"** इति,

स्वप्नानुभूतदुःखप्रद्वेषलिङ्गं विषादः, इति **चेत् ? अत्रोच्यते,** न वयं स्वप्नविज्ञानोद्भवान् हर्षविषादादीन् निवारयामः, किन्तु भोजनादिजनितान् तृप्त्यादीन्। यदि स्वप्नविज्ञानात् भोजनादिक्रियाफलं तृप्त्यादिकं स्यात् तदा विषयप्राप्तिरूपा प्राप्यकारिता मनसो युज्यते, न चैतदस्ति तथोपलम्भाभावात् । **ननु** स्वप्नानुभूतसुरतसङ्गमक्रियाजनितशुक्रपुद्गलसङ्घातरूपस्य फलविशेषस्य प्रत्यक्षतः कस्यचिद्दर्शनात् कामिनीसङ्गमक्रियाऽनुमीयते, तथाहि-स्वप्ने सञ्जातो योषित्सङ्गमः, शुक्रपुद्गलदर्शनात्, वासभवनादाविवेति **चेन्न,** व्यभिचारात्, तथाहि-जाग्रदवस्थायामपि प्रबलवेदोदययुक्तस्य कामिनीं स्मरतो दृढं ध्यायतः प्रत्यक्षामिव पश्यतोऽवबुध्य परिभुक्तामिव मन्यमानस्य तीव्रकामाध्यवसायात् यथा व्यञ्जनविसर्गो भवति तथा स्वप्नेऽपि कामिनीमन्तरेणापि तीव्रकामाध्यवसायात् व्यञ्जनविसर्गो भवति, अन्यथा प्रबुद्धस्य नितम्बिन्या दर्शनं स्यात्, तत्कृतानि च नखदन्तपदान्युपलभ्येरन्, न चैवम्, ततः सिद्धा हेतोरनैकान्तिकता। किञ्च स्वप्ने सुरतक्रियाया योऽसौ व्यञ्जनविसर्गः, स यदि कामिनीं प्राप्य स्यात्, तदा स्वप्नोपभुक्ताया युवतेरपि मयाऽमुकेन सह सुरतक्रियाऽनुभूतेति प्रतीतिः स्यात्, एवं गर्भाधानोदरवृद्धिदोहदपुत्रजन्मादिकमपि स्यात्, न च भवति, तस्मात् कामिनीमन्तरेणैव तीव्रकामाध्यवसायात् व्यञ्जनविसर्गः, अतो मनसः न प्राप्यकारिताऽत एव नासिद्धता दृष्टान्तस्य । **अत्र व्योमशिवः "चक्षुः प्राप्तार्थपरिच्छेदकं, व्यवहिताप्रकाशकत्वात्, यद्यद्व्यवहिताप्रकाशकं तत्तत्प्राप्तार्थपरिच्छेदकं यथा प्रदीपः, व्यवहिताप्रकाशकं च चक्षुः तस्मात्प्राप्तार्थपरिच्छेदकम्"** इति पक्षीकरोति, तत्र पृच्छ्यते, भावचक्षुरिन्द्रियं धर्मित्वेनोपादीयत उत

द्रव्यचक्षुरिन्द्रियम् ?, न तावत्**प्रथमपक्षः**, त्वयाऽनङ्गीकारात्, तथा च धर्म्यप्रसिद्ध्या हेतोराश्रयासिद्धिः, कक्षीकारे तु बुद्धिरूपो भावचक्षुरात्मगुणः, स च नार्थेन प्राप्यते, यतः प्राप्तिरपि संयोगस्वरूपा, संयोगश्च गुणः, न च गुणे गुणान्तरमस्ति, "निर्गुणा गुणा" इति वचनात् । द्रव्यचक्षुरपि गोलकरूपमन्यद्वा ?, नाद्यः, प्रत्यक्षबाधात्, बाधश्चैवं प्रत्यक्षेण परिच्छित्तिकाले पदार्थासम्बद्धस्यैव गोलकस्योपलब्धेः, अन्यथा तदानीं पुंसः पक्ष्मप्रदेशे प्रकटकोटरोपलम्भः स्यात्, पदार्थस्य वा गोलकदेशे प्रतीतिः स्यात् । किञ्च नयनस्य स्वविषयेण व्यवहितदेशेन पर्वतादिना सन्निकर्षोऽप्यनुपपन्नः, न खल्वत्यन्तव्यवहितयोः हिमवद्विन्ध्याचलयोरिव नयनगोलकतदर्थयोः संयोगादिलक्षणः सन्निकर्षः सम्भवति, तद्ग्राहकप्रमाणाभावात् । **अथ** विद्यते तत्प्रसाधकं प्रमाणमिति **चेत्** ?, ननु तत्किं प्रत्यक्षमनुमानं वा ?, **नाद्यं** तद्विषये प्रवर्त्तितुमुत्सहते, न खलु देवदत्तनयनं तद्विषयेण पर्वतादिना सम्बद्धमित्यस्मदादेरक्षप्रभवा प्रतिपत्तिः स्यात् । **अथ** सन्निकर्षप्रसाधकमनुमानमस्तीति **चेत्** ?, किं तदनुमानमिति वक्तव्यम्, 'चक्षुःप्राप्तार्थप्रकाशकं, बाह्येन्द्रियत्वात्, त्वगादिवदि'ति **चेत्** ? तन्न, नयनगोलकतदर्थयोरसन्निकृष्टयोः प्रत्यक्षेण प्रतिपत्तेः प्रत्यक्षबाधः, **सम्मतौ** अवयविलक्षणस्य नयनस्यासिद्धेः प्रतिपादितत्वेनाश्रयासिद्धिः, अत एव स्वरूपासिद्धिश्च, नह्यविद्यमानावयविनो बाह्येन्द्रियत्वमुपपन्नम् । **अथ** चक्षुःशब्देन तद्रश्मयोऽत्राभिधीयन्त इति **चेन्न**, तेषामप्यसिद्धेरनुमानवैकल्यादाश्रयासिद्धिश्च हेतोर्दुर्निवारा स्यात् । अत एवानुमानात्तत्सिद्धौ नायं दोष इत्यपि **न वाच्यम्,** परस्पराश्रयप्रसङ्गात्, तद्रश्मिसिद्धौ चाश्रयासिद्धिदोषपरिहारः, तस्मिंश्च सति अस्य हेतोः सिद्धिः । **ननु** गोलकात् बहिर्भूता रश्मयश्चक्षुःशब्दवाच्या अर्थप्रकाशका इति **चेत् ?, तर्हि** नयनस्याञ्जनादिना संस्कार उन्मीलनादिकश्च व्यापारो वैयर्थ्यमनुभवेत् । **अथ** नयनगोलकाश्रयीभूता रश्मयो भवन्ति इति तन्निमीलनेऽसंस्कारे वा तेषामपि स्थगनमसंस्कृतिश्चेति विषयं प्रति गमनं तत्प्रकाशनं च न स्यात्, अत एव तदर्थं संस्कार उन्मीलनादिव्यापारश्च निष्फलत्वं नानुभवेदिति **चेत्** ? ननु तर्हि नयनगोलकानुषक्तकामलादेरपि प्रकाशकत्वं स्यात्, नहि प्रदीपः प्रलग्नशलाकादिकं न प्रकाशयतीति दृष्टम्, एतद् दूषणं च "**गोलकान्तर्गतं तेजो द्रव्यमस्ति, तदाश्रितास्त**" इत्यभ्युपगन्तृणामपि समानम्, नहि काचकूपान्तर्गताः प्रदीपरश्मयस्ततो निर्गत्य तद्योगिनमर्थं न प्रकाशयन्तीत्यतस्तेषामसिद्धत्वेन चक्षुःशब्दाभिधेया न ते । **एतेन "द्वितीयपक्षे सूक्ष्मं किञ्चिच्चक्षुरिन्द्रियं धर्मितया ह्यधिष्ठाननिष्ठमेव पटिष्ठमर्थपरिच्छेदे स्वीक्रियते"** इत्यपि **निरस्तम्,** तदुपलम्भाभावात् । अत्र सूक्ष्मत्वं नाम किममूर्त्तत्वमाकाशवत् ? यद्वाल्पपरिमाणत्वं परमाणुवत् ?, आद्ये सर्वोपलम्भः स्यात्, द्वितीये तु कान्तारे विहारमुख्योपलम्भो न स्यात्, न खलु शस्त्रविशेषं स्वप्रमाणादधिकप्रमाणविशिष्टघटपटादौ भेदकारि प्रसिद्धम् । **एतेन "न खलु न खलु शस्त्रं स्वप्रमाणात्प्रतिष्ठे पटकटशकटादौ भेदकारि प्रसिद्धम्"** इति पूर्वपक्षमुपन्यस्य **"स्वाधिकपरिमाणग्राहित्वं चास्य गोलकनिर्गतस्य चक्षुषः**

**प्रदीपप्रभावदेवोपपत्तेः**" इति यत् **बंशीधरेणोत्तरितं** तत्स्वकीयमसमीक्षिताभिधायित्वं सूचयतीति द्योतितम्, यतः परमाणुवदल्पपरिमाणत्वपक्षस्वीकारे एतद् दूषणं ग्रन्थकृद्भिरभ्यधायि न प्रदीपप्रभावद् रश्मिचक्रप्रसरणपक्षे, तत्र तु "**नन्वेवमध्यक्षनिराक्रिया स्यात् पक्षे पुरस्तादुपलक्षितेऽस्मिन्**" इत्यादिश्लोकैरन्यदेव दूषणजालं समुपन्यस्तमस्ति । **ननु** बाह्येन्द्रियत्वेन यथा रसनादयः प्राप्तार्थ-प्रकाशका दृष्टास्तद्वन्नयनमपि बाह्येन्द्रियत्वेन प्राप्तार्थप्रकाशकं स्यात्, **न च** नयनगोलकस्य बाह्यार्थ-प्राप्तिः सम्भवतीति पारिशेष्यात् तद्रश्मीनां तत्प्राप्तिरिति रश्मिसिद्धिरिति **चेत् ?, न,** अत्यासन्नवर्ति-मलाञ्जनशलाकादीनां प्रकाशकत्वापत्तेः, चक्षुः प्रसृत्य नार्थेन सह सम्बध्यते, इन्द्रियत्वात्, त्वगादि-वदित्यनुमानेन बाधापत्तेश्च । किञ्च, यदि गोलकात् नायना रश्मयो निर्गत्यार्थं प्रकाशयन्ति तर्ह्यर्थं प्रत्युपसर्पन्तः कथं नोपलभ्येरन् ? रूपस्पर्शविशेषगुणवतां तैजसानां चित्रभानुवत् सतामनुपलम्भे निमित्ताभावात्, न चोपलभ्यन्त इत्युपलब्धिलक्षणप्राप्तानामनुपलम्भादसत्त्वं तेषाम् । **नन्वनुद्भूतरूप-**स्पर्शवत्त्वात्तेषामनुपलम्भो नासत्त्वात्, न च किमनुद्भूतरूपस्पर्शवदन्यत्किञ्चित्तेजो द्रव्यमुपलब्धं येनैवं कल्पना क्रियत इति **वाच्यं,** सतोऽपि तैजसरूपस्पर्शयोरुष्णजलसुवर्णयोरनुपलम्भ इति **चेत्** ?, **न,** तयोस्तैजसत्वे मानाभावात्, दृष्टानुसारेण चानुपलम्भमानभावानां प्रकल्पनाः प्रभवन्ति, अन्यथा रजन्यां भास्करकिरणाः सन्ति, अनुद्भूतरूपस्पर्शवत्त्वात् नायनरश्मिवन्नानुभूयन्त इत्यपि कल्पना स्यात् । **ननु** यद्यपि प्रत्यक्षेण लोचनकिरणा नावलोक्यन्ते तथाप्यनुमानतः प्रतीयन्ते, अनुमानं चेत्थं 'रश्मिवच्चक्षुस्तैजसत्वात् यदित्थं तदित्थं यथा ज्योतिस्तथा चेदं तस्मात्तथे'त्यतस्तत्सिद्धिः, 'तेजोरश्मिवच्चक्षू रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात् प्रदीपकलिकावदि'त्यनुमानमपि **केचिद्व-दन्ति, न च** एवं नयनकिरणप्रतिपादकानुमानवत् क्षपायां भास्करकरसत्त्वप्रतिपादकमनुमानमस्तीति **चेत् ?, न,** तत्प्रतिपादकस्यानुमानस्य सत्त्वात्, तथाहि–बहलान्धकारायां क्षपायां वृषदंशचक्षुर्बाह्या-लोकसव्यपेक्षार्थप्रकाशकम्, चक्षुष्ट्वात्, दिवा पुरुषचक्षुर्वदिति । **ननु** निशायां वृषदंशादेर्नायन-तैजसादेवार्थप्रकाशकत्वे सिद्धे किमनुद्भूतभास्करकरकल्पनेन प्रयोजनमिति **चेत्** ? एवं तर्हि दिवापि मनुष्यादीनां नायनतैजसात्तदर्थप्रकाशकत्वे सिद्धे किमुद्भूतरूपेण बाह्यतेजसा तेषां कृत्यम् ? । **अथ** यथा दृश्यते तथा स्वीक्रियते 'यथा दिवा मनुष्यादीनां नायनं सौर्यं च तेजः, रजन्यां च वृषदंशादेर्ना-यनमेव केवलमर्थप्रकाशकमि'ति यदि ब्रूयते तर्हि यथा निशायां भास्करकिरणादर्शनं तथा दिवा नयनकिरणादर्शनम्, यथा वा दिवा भास्करकरावभासनं तथा निशायां वृषदंशनयनालोकाव-लोकनमिति कथं नाभ्युपगम्यते ? । **ननु** क्षपायां भास्करकरसम्भवे यथा वृषदंशादीनां रूपदर्शनं तद्वद् मनुष्याणामपि रूपदर्शनं स्यादिति **चेत् ?, न,** निशायां तादृशशक्तेरभावात्तेषां न तथा, यथा दिवाप्युलूकादीनां रूपप्रकाशका दिनकरकरा न भवन्ति, भावानां विचित्रशक्तिमत्त्वादित्यपि कल्पयितुं को निवारयति ?, तस्मात् यथा निशायामनुपलम्भात् भास्करकराभावः प्रतीयते तथैव नायनरश्मीना-

मप्यनुपलम्भभावादभावो निश्चीयत इति । **एतेन** "दूरस्थितं कुड्यादिप्रतिफलितानामन्तराले गच्छतां प्रदीपरश्मीनां सतामप्यनुपलम्भदर्शनात् नानुपलम्भात्तदभावसिद्धिः" इत्यपि केनचिदुक्तं **तदपास्तं द्रष्टव्यम्,** भास्करकराणामपि निशायामभावासिद्धिप्रसक्तेः ।

**ननु** चक्षुः स्वरश्मिसम्बद्धार्थप्रकाशकं, तैजसत्वात्, प्रदीपवदिति चेदत्रानुमानेन नयनस्य किं किरणाः साध्यन्ते उतान्यतः सिद्धानां ग्राह्यार्थ-सम्बन्धस्तेषां साध्यत इति प्रश्नद्वयं समवतरति । प्रथमकक्षायां तरुणनरनारीनयनानां दुग्धधवलतया भासुरकिरणरहितानां प्रत्यक्षेण प्रतीतेः प्रत्यक्षबाधः । **ननु** यत्प्रत्यक्षग्रहणयोग्यं साध्यं तदपि न प्रत्यक्षत एवोपलभ्यते तत्रापि तद्बाधककर्मणः सत्त्वात् यथाऽनुष्णोऽग्निः, **न च** नायनरश्मयः प्रत्यक्षयोग्या भवन्ति, सदा तेषामप्रत्यक्षत्वादिति **चेत्** ?, तदपि न सम्यक्, पृथिव्यादिद्रव्येष्वपि रश्मीनां साध्यत्वप्रसक्तेः, तथाहि-रश्मिवन्तो भूम्यादयः, सत्त्वात्, प्रदीपवदित्यनुमातुं शक्यत्वात् । यथा प्रदीपे रश्मिवत्त्वेन तैजसत्वं व्याप्तं दृष्टं तथैव सत्त्वमप्युपलभ्यते । न च सत्त्वस्यान्यथापि सम्भावयितुं शक्यते न तैजसत्वस्येत्यपि विभागीकर्तुं शक्यते । **ननु** भूम्यादौ रश्मिवत्त्वसाधने प्रत्यक्षबाध इति **चेत्** ?, नारीलोचनेऽपि स एव बाधो विलोक्यते । **ननु** मार्जारनयनस्य रश्मयः प्रत्यक्षतो विलोक्यन्त इति कथं तद्विरोधः ? ननु यदि तत्र त ईक्ष्यन्ते तर्ह्यन्यत्र तेन किमायातम् ?, तत एवान्यत्रापि साध्यत इति **चेत्** ?, तर्हि सुवर्णे पीतिमत्त्वप्रतीतौ रजतेऽपि पीतिमत्त्वप्रसङ्गः स्यात् । **न च** रजते बाधकप्रमाणसद्भावो नारीनयने तु नेति **वाच्यम्,** बाधकप्रमाणस्योभयत्रापि तौल्यात् । **अथ** मार्जारनयने रश्मिवत्त्वसत्त्वप्रतीतेर्नान्यत्रापि सत्त्वहेतुना ते प्रसाध्यन्ते किन्त्वनुमानतः, तत्तु निदर्शनमात्रमिति**चेत्** ?, कोऽत्र हेतुः ?, नेत्रत्वादिति **चेत्** ?, तैजसत्वादित्यस्यानर्थक्यं सञ्जातम्, अत एव प्रकृतसाध्यसिद्धेः । अत्रापि प्रत्यक्षबाधः पुनः तदवस्थ एवेति । तैजसत्वहेतौ प्रदीपनिदर्शनेनैव निर्वाहे मार्जारनयननिदर्शनमपि निरर्थकं परं प्रति च तस्य तैजसत्वमप्यसिद्धमिति तस्य निदर्शनं साधनशून्यमपि । **न च** रश्मिवत्त्वेन बिडालनयनस्य तैजसत्वं सिद्धमिति **वाच्यम्,** मण्यादीनामपि तत्प्रसक्तेः । **न च** रश्मिवत्त्वेन तत्रापीष्टापत्तिः कर्तुं शक्यते, मूलोष्णप्रभाया एव तैजसत्वात्, अन्यथा तरुणतरुकिसलयानामपि तैजसत्वप्रसक्तेः । **ननु** रश्मिवत्त्वेन तेषां तत्साध्यत इति **चेत् ?, न,** अन्योन्याश्रयप्रसङ्गात्-सिद्धे च भास्वरप्रभावत्त्वे तैजसत्व-सिद्धिस्तस्यां च भास्वरप्रभावत्त्वसिद्धिरिति ।

**अथ "चक्षुः तैजसं, रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात्, प्रदीपवत् । मनसि व्यभिचारवारणायैवकारः, तस्य गन्धादीनामप्यभिव्यञ्जकत्वात् । एवमपि रूपवद्द्रव्या-दिव्यञ्जकत्वोपलब्धेरसिद्धत्वं तद्वारणाय रूपादीनां मध्य इत्युक्तम् । अथवा चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत्, प्रदीपस्य स्वकीयस्पर्श-**

**व्यञ्जकत्वात्तदत्र दृष्टान्तेऽव्याप्तिवारणाय प्रथमं परकीयमिति । घटादेः स्वकीयस्य-व्यञ्जकत्वात् व्यभिचारवारणाय द्वितीयं परकीयमिति । अथवा प्रभायाः दृष्टान्तत्व-संभवादाद्यं परकीयमिति न देयम्''** इति **विश्वनाथीयाभ्याम**नुमानाभ्यां तैजसत्वसिद्धेर्नान्योन्याश्रयदोष इति चेत् ?, नन्वत्र यदि चक्षुःशब्देन भास्वररूपोष्णस्पर्शवत्तेजोद्रव्यसमवेतगोलकस्वभावं कार्यद्रव्यमुच्यते तर्हि तस्य तैजसत्वसाधने प्रत्यक्षविरोधः स्यात्, प्रत्यक्षेण तद्विरुद्धरूपस्पर्शोपलब्धेः, तथाहि-नारीपारापतवृषभादीनां नयनस्योष्णस्पर्शविकलत्वेन धवलरक्तनीलरूपत्वेन चाध्यक्षतः प्रतिपत्तिः सिद्धैव । यदि च गोलकव्यतिरिक्तं चक्षुस्तर्हि तद्ग्राहकप्रमाणाभावादाश्रयासिद्धिः स्वरूपासिद्धिश्च । निशाकरकिरणे तस्य रूपस्यैव प्रकाशकत्वेऽपि तैजसत्वाभावात् व्यभिचारेणानैकान्तिको हेतुरपि । न च तत्करान्तर्गतं तेजस्तत्रापि रूपप्रकाशकमिति न व्यभिचार इति वाच्यम्, प्रदीपेऽपि तदन्तर्गतस्यान्यस्य रूपप्रकाशकत्वप्रकल्पनेन दृष्टान्तासिद्धिप्रसक्तेः। प्रत्यक्षबाधस्तूभयत्रापि समानः । किं च नयने उष्णस्पर्शशून्यत्वेनापि तैजसत्वासम्भवो विलोक्यते, यत उक्तं **वैशेषिकभाष्ये**-''उष्ण एव स्पर्श'' इति। **अत्रोदयनो** यद्वदति ''एवकारश्चन्द्रचामीकरचक्षुरादिष्वनुपलम्भहेतुकां विप्रतिपत्तिमपनेतुम्, तेषां तैजसत्वेनोष्णत्वानुमाना**दिति'' तदपि न सुन्दरम्,** अद्यापि शशधरादिषु तैजसत्वासिद्धेः । **ननु शशधरे** प्रस्तुतहेतुत एव तैजसत्वं सेत्स्यतीति **चेत्** ?, अस्यानुमानबाधितपक्षानन्तरोपन्यस्तत्वेन कालात्ययापदिष्टत्वात्, तथाहि-न चन्द्रस्तैजसः शैत्यहेतुत्वात् पाथोवदितीन्दोरतैजसत्वे तन्मरीचीनां तु सुतरामतैजसत्वमिति । **यत्तु** कस्यचिदागमः-''**जलकल्लोलश्चन्द्रः, तत्र तत्र प्रतिहतास्तपनांशवः प्रद्योतन्ते शिशिराश्च भवन्ति, तत एव शैत्यहेतव**'' इति तदप्यप्रामाणिकं यतः कस्यायं जलनिधेः कल्लोलः ?, कथं वा तं विहायाकाशतलमवलम्बते ?, कुतः परिमण्डले एव ?, कथं न स्पन्दते ?, कथं वा काठिन्यं प्राप्तः ? कथं च तत्प्रतिफलितास्तपनांशाः शिशिराः सुखावलोकाः सकलदिक्प्रसारिणश्च भवन्ति ?, कथं च न दिवापि तत्प्रतिफलमित्यादयो विकल्पा निरुत्तरीकर्तुमशक्याः । प्रस्तुते पुनः तेजोरूपनयनसन्निकर्षस्यापि रूपादिषु रूपस्यैव प्रकाशकत्वेन व्यभिचारी प्रकृतहेतुः । **ननु** द्रव्यत्वे सतीति हेतुविशेषणात् न व्यभिचार इति **चेत्** ?, तर्हि अञ्जनादौ व्यभिचारः, अञ्जनसंस्कृतचक्षुषां प्रदीपाभावेऽपि रूपदर्शनात्। **न च** यदन्तरेणापि यद्भवति तत्तत्कार्यमितरत्तत्कारणमिति **वाच्यम्,** अन्वयव्यतिरेकनिबन्धनत्वात् तद्भावस्य। **ननु** प्रदीपे सति यद्दर्शनं तत्तदभावे न भवति, यत्तु तदभावे भवति न तत्रापि तत्सदृशम्, न चान्यस्य व्यभिचारेऽन्यस्यासावतिप्रसङ्गादिति **चेत् ?, तन्न,** यतो यादृशमेव रूपदर्शनमालोके संस्कृतचक्षुषां तदभावेऽपि तादृशमेव, तद्भेदानवधारणात्, तद्भेदकल्पने तु '**न किञ्चित्कस्यचिद्वस्तुना सदृश**'मिति सौगतमतानुप्रवेशः स्यात् । **एतेन ''अञ्जनादेरन्यत्र क्लृप्तनियतपूर्ववर्तिभिरेव कार्यसम्भव इत्याद्यन्यथासिद्धत्वेन रूपग्राहित्वस्यैवासम्भवात्, किन्तु चक्षुर्गत-**

**दोषव्यावर्त्तकत्वेन बाधस्थले भ्रमत्वशङ्काविघटनद्वारा प्रामाण्यज्ञानवदञ्जनादिकमपि चाक्षुषादौ क्वचिदुपयुज्यते, न तु कारणत्वं तस्य**'' इति **यत्केनचि**दुक्तं तद**प्यपास्तं द्रष्टव्यम्,** मण्यादीनां तथाभावेऽप्यञ्जनस्योक्तप्रकारेण कारणत्वावधारणात् व्यभिचारस्तदवस्थ एव । **न चाञ्जनं** तैजसमेव न पुनः पार्थिवम्, तत्रानुद्भूतस्य तेजोद्रव्यस्य भावादिति **वाच्यम्,** प्रमाणाभावात्। **ननु** 'तैजसमञ्जनं, रूपावभासने नयनस्य सहकारित्वात्प्रदीपवदिति' **चेत् ?, न,** मनसि व्यभिचारात्। **ननु** रूपस्यैवावभासने नयनस्यैव वा सहकारित्वादित्यवधारणगर्भसाधनोपदर्शनेन सकलानां विषयाणा-मिन्द्रियाणां वा साधारणस्य मनसो व्यवच्छेदेन व्यभिचारपरिहारः क्रियते इति यदाक्षिप्यते तदा**द्यपक्षे** हेतुरसिद्धः, द्रव्यादेरपि व्यञ्जनेऽञ्जनस्य नयनसहकारित्वात्, **द्वितीये** तु दृष्टान्तस्य साधनशून्यत्वम्, स्वविषयावभासं जनयति रूपेऽपि प्रदीपस्य सहकारितया नयनं प्रत्येव सहकारित्वायोगात् । **ननु 'तैजसमञ्जनं, रूपादिषु मध्ये रूपस्यैवाभिव्यञ्जकत्वात्, प्रदीपवदिति' चेत् ?, न,** हेतुशून्यं निदर्शनम् । **ननु** किं प्रदीपोऽपि गन्धादीनभिव्यनक्तीति **चेत् ?,** ओमिति ब्रूमः, नागकर्णिकादेः परिमलं नागकर्णिकाविमर्द्दककरतलमिव स्वान्तर्निमग्नानामगरुमृगमदकर्पूरचन्दीनादीनां सुरभि-परिमलोद्गारमभिव्यनक्त्येव प्रदीपः । एवं चक्षुषस्तैजसत्वानुमानेऽपि साधनविकलता निदर्शनस्य वाच्या । किञ्चाञ्जनादेस्तैजसत्वस्वीकारे घटादिना किमपराद्धम् ?, तत्र बाधकप्रमाणसद्भाव इति चेत् ?, अन्यत्रापि तत्समानम्, तथाहि–अञ्जनं पार्थिवमाकरोद्भवत्वात् मृत्तिकावदिति । **न च** सुवर्णे व्यभिचारः, तस्यापि तत्त्वमेवेत्यञ्जनस्य पार्थिवत्वेन तवानुमानेऽस्मत्प्रदत्तव्यभिचारस्य दुष्प्रतिकार्यत्वं सञ्जातम् । किञ्च सहोत्पन्नयो रूपप्रदीपयोर्युगपद्दर्शन इति **वाच्यम्,** तमःप्रतिभासाभाव एवालोकप्रतिभास इत्यपि कलयितुं शक्यत्वात् । **अथा**लोकप्रतिभासाभाव एव तमःप्रतिभासो नयनव्यापाराभावेऽपि तत्प्रतिभाससंवेदनादिति **चेत् ?,** न, तस्यापि प्रतिनियतसामग्रीप्रभवविज्ञानाव-भासित्वात्, यद्वाऽऽलोकस्याप्यचक्षुर्जे सत्यस्वप्नज्ञाने प्रतिभासनात् तमोज्ञानाभावता स्यात् । **ननु** रूपज्ञाने आलोकस्य हेतुत्वेन नाभावरूपतेति **चेत्** ?, तर्हि नक्तञ्चराणां रूपविज्ञाने हेतुभावेन नाभावरूपता तमसः । तत आलोकवत्तमसोऽपि वस्तुत्वेन व्यभिचारः स्फुट एव । यद्वालोकाभाव एव तमोऽस्तु तथापि व्यभिचारापरिहारः, अतैजसस्याप्यालोकाभावस्य रूपप्रकाशकत्वेन तत्र व्यभिचारः स्यादेव । **ननु** तमसोऽभावेऽपि रूपदर्शनात् न तमसः रूपप्रकाशकत्वमिति **चेत् ?, तर्हि** आलोकाभावेऽपि नक्तञ्चराणां रूपदर्शनात् नालोकस्यापि रूपप्रकाशकत्वम् । नन्वालोकाभावे-ऽस्मदादीनां कथं रूपदर्शनं न भवतीति **चेत्** ?, भवत्येव, कथमन्यथान्धकारसाक्षात्करणं स्यात्। **ननु** तमसि घटरूपदर्शनं कथं न भवतीति **चेत्** ?, बहलतमो व्यवधानात्, तीव्रालोकतिरोहितात्परूपवत्। प्रदीपानयनं तु तमोव्यवच्छेदार्थम्, अत एवान्यत्रोक्तम् ''**तमोनिरोधं वीक्षन्ते तमसा नावृतं परं घटादिकम्**'' इत्यादि, ततः प्रदीपस्य च घटरूपव्यवधायकतमोऽपनेतृत्वेन 'चक्षुस्तैजसं रूपादीनां

मध्ये रूपस्यैवाभिव्यञ्जकत्वात् प्रदीपवत्' इत्यत्र पुनः साधनविकलता निदर्शनस्य स्यादिति। किञ्च, नयनस्य तैजसत्वस्वीकारे कथं तत्र न भास्वररूपोपलम्भः, तेजसि तस्य स्वाभाविकत्वात् ?, अनुद्भूतत्वेनानुपलब्धिरित्यपि न, एवं सति रूपाभिव्यञ्जकत्वमस्य दुरुपपाद्यम्, तथाहि–यदुद्भूतभा-स्वररूपरहितं तन्न रूपाभिव्यञ्जकं यथा जल-संयुक्ताग्निः सुवर्णं वा तथा नयनमपि त्वया कक्षीकृतमिति। यत्तु **"कथमनुद्भूतरूपाणामर्थप्रकाशकत्वमिति चेत् ?, न, प्रदीपादिप्रकाश-सहितानां तदुपपत्तेः, अत एव येषामदृष्टसामर्थ्यादुद्भूतरूपा नायना रश्मय उत्पन्नास्तेषां बाह्यप्रकाशनिरपेक्षा एवार्थं प्रकाशयन्ति यथा नक्तञ्चराणां; तथा केषाञ्चिन्नक्तञ्चराणां नायना रश्मयः प्रत्यक्षेणैव दृश्यन्त"** इति **भूषणोक्त**मपि भूषणं न भूषयति, घटादेरप्यनुद्भूत-भास्वररूपपरिकल्पनया प्रदीपादिसहकृतस्य प्रकाशकत्वोपपत्तेः। **ननु** घटादौ तैजसत्वाभावात् भास्वररूपमेव नास्तीति कुतस्तत्रानुद्भूतत्वकल्पनापि युक्तिमतीति **चेत्** ?, तर्हि नयनस्यापि कुतः तैजसत्वसिद्धिः ?, रूपादिषु मध्ये नियमेन रूपस्याभिव्यञ्जकत्वादित्युक्तमेवेति **चेत् ?, न,** विहितोत्तरत्वेन तदसिद्धेः। **यत्** "केषाञ्चिन्नक्तञ्चराणां नायना रश्मयः प्रत्यक्षेणैव दृश्यन्त" इत्युक्तं **तदपि बालजल्पितम्,** अस्मदादीनां तत्रादृश्यमानत्वात्। मार्जारादिनयनानां रश्मयः प्रतीयन्त एवेति **चेत् ?, न,** तद्गोलकप्रदेशविशेषाणामेव तत्र प्रतिभासनात्। यदि मार्जारादिनयनानां रश्मयः स्युस्तर्हि प्रदीपादिवत्तेऽपि प्रसरन्तः कथं न दृश्येरन् ? **ननु** निशि नक्तञ्चराः पश्यन्तीति **चेत्** ?, तर्हि मनुष्याः कथं न पश्यन्ति ?, **न च** नरान् प्रति नयनरश्मीनामतितनुतरत्वेन नाभिव्यञ्जकत्वं भवतीति **वाच्यम्,** नक्तञ्चरान् प्रत्यपि तदभिव्यञ्जकत्वविरोधात्। उद्भूतभास्वररूपत्वेन तेषामभिव्यञ्जकत्वं **चेत्** तच्चोभयत्रापि तुल्यमिति। यद्वा वृषदंशनयनयोर्निशि किञ्चित् चाकचिक्यभावेन सन्तु मरीचयः परं गृहगोधिकादीनां नयनेषु किञ्चिदपि निशि न चकास्तीति तत्र कथमुद्भूतभास्वररूपा रश्मयः स्वीक्रियन्ते ? यतो दर्शनयोग्यमुद्भूतमुच्यते, अन्यथा मनुष्यनयनेषु तदनुद्भूतताभ्युपगमः किं निमित्तकः स्यात् ? अनुद्भूतताभ्युपगमे तु गृहगोधिकादिनयनरश्मीनामालोकनिरपेक्षाणामेव प्रकाश-कत्वमवलोकितमिति कथमालोकसहकृतानां नयनरश्मीनां प्रकाशकत्वमुपपद्यत इति यत्किञ्चिदेतत्। **एतेन "चक्षुषि भास्वरशुक्लरूपस्य सत्त्वात्, अनुपलब्धिस्त्वनुद्भूततयापि सङ्गच्छत"** इति परोक्तम**पास्तं द्रष्टव्यम्,** पारापतादिनयनेषु रक्तादिदर्शनेन भास्वरशुक्लरूपाभावस्यापि दर्शनाच्च। **"अथवाऽऽलोकावयवसहितेभ्यस्तदवयवेभ्य उद्भूतरूपा नायना उत्पद्यन्ते, दृष्टौ हि तेजसामाशुतरविनाशोत्पादौ, रूपस्पर्शौ चोद्भूतत्वधर्मविकल्पोपेतावित्युद्भूतरूपत्वेनोत्पन्ना-नामपि रश्मीनामन्यस्मिन् समावेशाद्विवेकेनाग्रहणम्, यथाऽनेकप्रदीपरश्मीनामेकार्थ-सम्बद्धानाम्"** इत्यपि **भूषणोक्तमभूषणमेव** मन्तव्यम्, यत आलोकमीलितेषु मनुष्यनयनेष्वेव-मस्तु तथापि निबिडतरघनपटलावृतायां कुहूनिशि पिहितनिरन्ध्रकपाटसम्पुटापवरकक्रोडे विचरतां

गृहगोधादिपापानां प्राणिनां साक्षात् पश्यतां कथं तेषां मरीचीनामुपलम्भो न स्यात्, ?, तत्रालोकमीलनासम्भवात्, यत्रैवालोकमीलनं तत्रैव तेषामुद्भूतानामुत्पत्तिरिति चेत् ?, तर्हि गृहगोधादिनयनरश्मीनामप्रकाशकत्वं स्यात्, अनुद्भूतभास्वररूपत्वात्, ततोऽनुद्भूतभास्वररूपाव्यञ्जकत्वेन रूपाभिव्यञ्जकत्वमसिद्धं नयनस्येति । नयनस्य च तैजसत्वमनुमानबाधितम्, तथा च प्रयोगः **'चक्षुस्तैजसं न भवति तमः प्रकारशकत्वात् यन्नैवं न तदेवं यथा प्रदीपः तथा चेदं तस्मात्तथे'** ति । **न च** तमसोऽभावरूपत्वेन तत्प्रकाशकत्वासम्भव इति **वाच्यम्**, पुद्गलपरिणामत्वेन तस्य द्रव्यत्वसिद्धेः । **न च** पुद्गलपरिणामोऽसिद्धः, कुड्यादिवत् दृष्टिप्रतिबन्धकत्वेन पटादिवदावरकत्वेन च तत्सिद्धेः । एवं **'तमो द्रव्यं रूपवत्त्वात् घटवत्'** । **न** चायमसिद्धो हेतुः, तमो नीलमिति प्रतीतेः सर्वजनप्रसिद्धत्वात्, नापि सा भ्रमात्मिका, बाधकाभावात् । **ननू**द्भूतरूपमुद्भुतस्पर्शव्याप्यमिति नियमो विरुध्येतेति **चेत् ?, न,** तादृशनियमे मानाभावात् प्रभायां व्यभिचाराच्च । **न चो**द्भूतनीलरूपवत्त्वमेवोद्भूतस्पर्श व्याप्यमित्यपि **वाच्यम्,** धूमे व्यभिचारात्, तत्रोद्भूतस्पर्शवत्त्वकल्पने न व्यभिचार इत्यापि प्रमाणशून्यम्, न च तत्संयोगादश्रुपात एव प्रमाणमित्याश**ङ्कनीयम्,** नयनधूमसंयोगत्वेनैवाश्रुपातजनकत्वात् धूमे उद्भूतस्पर्शासिद्धेर्नीलत्रसरेणौ व्यभिचाराच्च, तत्राप्युद्भूतस्पर्शकल्पने तत्स्पर्शस्य स्पार्शनापत्तिः प्रसज्येत । अस्तु वात्र स्पर्शवत्त्वम्, तथा च **साम्प्रदायिकाः-'तमसि पवनाभिव्यज्यमानः शीतस्पर्शोऽप्यनुभूयत एव, अत उद्भूतस्पर्शवत्त्वमपि तत्र'** इति । **ननु** तमसो जन्यत्वे स्पर्शवदवयवारब्धत्वापत्तिः स्यादिति **चेत् ?, न,** तमसः स्पर्शवदवयजन्यत्वस्येष्टत्वात् शक्त्याख्यातिशयस्यैव द्रव्यजनकत्वाच्च । **ननु** तमसो द्रव्यत्वे आलोकनिरपेक्षचक्षुर्ग्राह्यत्वं न स्यात्, द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्यालोकसंयोगत्वेन हेतुत्वादिति **चेत् ?, न,** आलोकं विनापि घूकादीनां द्रव्यचाक्षुषोदयेन व्यभिचारात् । **एतेन ''न चैवं सुवर्णवच्चक्षुषोऽपि रूपादिप्रकाशकत्वं न स्यादिति वाच्यम्, चाक्षुषलौकिकप्रत्यक्षं प्रत्युद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नालोकसंयोगावच्छिन्नचक्षुः-संयोगस्य कारणत्वात्, आलोकश्चान्धकारप्रतियोगी तेज'' इत्यादिद्यपि निरस्तम्** । **न च** मनुजादिचाक्षुष एव हेतुत्वान्न व्यभिचार इति **वाच्यम्,** अञ्जनादिसंस्कृतनयनानां तस्करादीनां नायने व्यभिचारात् । **न चा**ञ्जनाद्यसंस्कृतमनुजनयनजन्यनायने आलोकसंयोगत्वेनाञ्जनादिसंस्कृतनयनानां स्वातन्त्र्येण च चाक्षुषहेतुत्वमित्यपि **वाच्यम्,** अननुगमात्, किं वा आलोकाद्युद्बोध्यक्षयोपशमरूपयोग्यताया एवानुगतत्वेन तस्या एव हेतुत्वौचित्यात्, किञ्च तमसोऽभावस्वरूपत्वे तेजोज्ञानं विना तस्य ज्ञानं न स्यात्, अभाव-ज्ञानेऽन्वयव्यतिरेकाभ्यां प्रतियोगिज्ञानस्य हेतुत्वावधारणात्, **न च 'गिरिदरीविवरवर्त्तिनो यदि योगिनो न ते तिमिरावलोकिनः, तिमिरावलोकिनश्चेत्, नूनं स्मृताऽऽलोका'** इत्यनेनेष्टापत्तिरपि कर्तुं शक्यते, तेजसोऽप्रतिसन्धानेऽपि तमोऽनुभवस्य प्रत्यक्षसिद्धत्वात् । किञ्चैकालोकवत्य-

प्यालोकान्तराभावसत्त्वेनालोकप्रतियोगिकाभावमात्रं न तमो व्यवहारविषयः, आलोकवत्यपि सम्बन्धान्तरेणालोकसामान्याभावसत्त्वेनालोकसामान्याभावोऽपि न तमोव्यवहारविषयः । नापि संयोगसम्बन्धावच्छिन्नालोकाभावस्तमः, आलोकेऽपि तत्सत्त्वात्, आलोकान्यवृत्तित्वविशिष्ट-तदभावोऽपि न तमोव्यवहारविषयः, अन्धकारेऽन्धकारापत्तेः । नाप्यालोकान्यद्रव्यवृत्तित्वविशिष्ट-स्तमोव्यवहारविषयः, अन्धकारेऽन्धकारापत्तेस्तदवस्थत्वात्, त्वदात्मन्यपि तत्प्रसङ्गाच्च । नापि कदाचिदालोकसंसर्गात्तद्वृत्तित्वविशिष्टालोकाभावः तमोव्यवहारविषयः, कदाप्यालोकसंसर्गो यत्र नास्ति तत्रापि घोरनरकादौ तमःश्रवणात् । किञ्चैतावद्घटकाप्रतिसन्धानेऽपि तमस्त्वप्रतिसन्धानात् घटत्ववत् जातिरूपं तमस्त्वमित्येव न्याय्यम् । **एतेन "यावदालोकासत्त्वेनान्धकारव्यवहार-स्तावन्निष्ठबहुत्वविशेषावच्छिन्नप्रतियोगिताकाभावस्तम"** इत्यप्यपास्तं बहुत्वस्य बुद्धि-विशेषादिना विनिगमनाभावाच्च । **"अखण्डाभाव एव तमः, अखण्डं वा तमस्त्वम्"** इति कल्पनापेक्षयातितिरिक्ततमोद्रव्यकल्पने का क्षतिः ?, अपि च तमसोऽभावस्वरूपत्वे उत्कर्षा-पकर्षासम्भवेनान्धतमसाल्पतमसादिविशेषोऽपि न स्यात्, किञ्चालोकात्यन्ताभावः तम इति स्वीकारे तमस उत्पन्ननाशादिप्रतीतीनां भ्रमत्वं स्यात् । "आलोकसंसर्गाभावसमुदाय एवान्धकारः तत्र राशिष्विव किञ्चित्समुदायव्यतिरेकप्रयुक्त एव विनाशः, एवमुत्पत्तिप्रत्ययोऽप्यूह्य" इति **शशधर-शर्मणोऽपि** वचनं न शोभनम्, राशिषु बहुत्वविशेषनाशोत्पादाभ्यां तदाश्रयनाशोत्पाद-प्रतीत्युपपत्तावपि प्रकृते तदयोगात्, समूहविलक्षणमहदेकोत्पादाद्यनुभवाच्च । **यत्तु "तमसो द्रव्यत्वे प्रौढालोकमध्ये सर्वतो घनतरावरणे तमो न स्यात्, तेजोऽवयवेन तत्र तमोऽवयवानां प्रागनवस्थानात्, सर्वतः तेजःसङ्कुले वाऽन्यतोऽप्यागमनासम्भवात्"** इति **वर्धमानोक्तमपि** न रमणीयम्, **"यद् द्रव्यं यद् द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयम्"** इति व्याप्तेस्तेजोऽणुभिरेव तत्रान्धकारारम्भस्वीकारात् । **न च** तेजसः तेजस एवारम्भकत्वादयुक्तमेतदिति **वाच्यम्,** नियतारम्भकत्वास्वीकारादिति । एवं तमसोऽभावत्वे गतिमत्त्वपरत्वापरत्वविभागादिप्रत्ययानामप्य-नुपपत्तिः । **"तमो द्रव्यम् घनतरनिकरलहरीप्रभृतिशब्दैर्व्यपदेश्यमानत्वात् किरणादिवत्"** इत्यपि **वदन्ति** । **"नात्रालोकः किन्त्वन्धकार"** इति व्यवहारादप्यालोकाभावात् भिन्नं तमः । **'नात्र घटः किन्तु तदभावः'** इतिवत् विवरणपरतां विनापि स्वारसिकप्रयोगदर्शनात्, अपकृष्टालोक-सत्त्वेऽप्यन्धकारव्यवहाराच्च आलोकवत् भिन्नं तम इति । **न च** उत्कृष्टालोकाभावोऽन्धकार इत्यपि **वाच्यम्,** तदुत्कर्षप्रतियोग्यपकर्षशालितयैव तमसि द्रव्यत्वसिद्धेः ।

**प्राभाकरास्तु-"तेजोज्ञानाभाव एव तमः, नीलं तम इति धीस्तु स्मृतनीलिम्ना समालोकज्ञानाभावस्यासंसर्गाग्रहात्, अत एवालोकवद् गर्भगृहं प्रविशतः प्रथम-मालोकाग्रहे 'नीलं तम' इति धीः, तदुक्तं-'अप्रतीतावेव प्रतीतिभ्रमो मन्दानाम्'"** इत्याहुः,

**तन्न** सम्यक्, **'तमः पश्यामि'** इति प्रतीत्या तमसश्चाक्षुषत्वात् ज्ञानाभावस्य चातथात्वात्। निमीलितनयनस्य नान्धकारप्रतीतिरस्ति किन्त्वर्थान्तरप्रतीतिरेव, अन्यथा **'गृहे तमोऽस्ति न वा ?'** इति संशयानुपपत्तेः, गर्भगृहे च तमःप्रत्ययो भ्रम एव, आलोकज्ञानप्रतिबन्धकदोषस्य तत्र स्वीकारावश्यकत्वादिति दिक् । **कन्दलीकारस्तु 'आरोपितं नीलं रूपं तम'** इत्याह, **तन्न,** नीलद्रव्योपरक्तेषु वस्त्रचर्मादिषु तमोव्यवहारप्रसङ्गादिहान्धकार इति प्रतीतेर्भ्रमत्वापत्तेस्तमो नीलं न तु नीलिमा इति प्रत्ययाभावप्रसङ्गाच्च । **'नीलारोपित( ?प )विशिष्टस्तेजःसंसर्गाभावस्तम'** इति **शिवादित्यः,** तदपि **न सुन्दरम्,** नीलारोपाद्यग्रहेऽपि तमस्त्वग्रहात्, तादृशतमस्त्वावच्छिन्न-धर्मिकनीलारोपायोगाच्चेत्यधिकं **कल्पलता**दितोऽवसेयम् । तदेवं तमसो द्रव्यत्वे सिद्धे न प्रकाशकत्वमसिद्धम् ।

**एतेन "अन्धकारस्य पुद्गलकार्यत्वे मानाभावात् क्लिष्टकल्पनापत्त्यादिरूपानेकदोष-दुष्टत्वाच्चैतत्कल्पनाया"** इत्यविचारितपरोक्तमपि **निरस्तम्,** अन्धकारस्य द्रव्यात्मकस्य साधितत्वात् । ततस्तैजसत्वाद्धिया नयने न रश्मिवत्त्वसिद्धिर्द्धिनिबन्धनत्त्वम् । **नन्व**तिनिबिडतमसि जरन्मार्जारस्येक्षणे प्रत्यक्षतो रश्मिवत्त्वप्रतीतेः तन्निदर्शनेनान्यत्रापि नयनत्वहेतुना तत्सिद्धिरभिधीयते, एवं तर्हि तरुणरमणीवीक्षणे कटाक्षलक्षप्रक्षेपाः प्रेक्ष्यन्ते तत एव करभादिनयनेऽपि तत्सिद्धिः कथं न स्यात् ? तस्मात्साधर्म्यमात्रेण हेतोर्न गमकत्वं किन्त्वन्यथानुपपन्नत्वेन, न च तदस्ति तद्ग्राहकप्रमाणाभावात्, अस्माकं तु मार्जारनयनेऽपि रश्मिवत्त्वमसिद्धमिति । तदेवं दृशो रश्मिवत्त्वाप्रसिद्धितो **'अधिष्ठानदेशान्निःसृत्य प्रसरद्रश्मिरूपावयवसमवेतं चक्षुः प्रसृत्यार्थेन सम्बध्यते, सम्बद्धं चोपलम्भयती'**त्यप्ययुक्तम्। नयनस्य प्राप्तार्थपरिच्छेदकारित्वं चानुमान-बाधितम् । प्रयोगः **'चक्षुः प्राप्तार्थपरिच्छेदि न भवति, अत्यासन्नार्थाप्रकाशकत्वात्'** । नात्र हेतोरसिद्धता, गोलकसम्बद्धाञ्जनस्याप्रकाशकत्वात् । **नन्वत्यासन्नार्थः** योग्यदेशावस्थितोऽयोग्य-देशावस्थितः । सामान्यतो वा विवक्षितः ?, न **प्रथमपक्षो,** योग्यदेशावस्थितस्य सर्वस्यापि वस्तुनः नयनेन प्रकाशनात्, अञ्जनं त्वयोग्यदेशावस्थितत्वेन न प्रकाशयति । **ननु** गोलकवर्त्तित्वेऽपि किमयोग्यदेशावस्थितत्वमुच्यत इति **चेत्** ?, ओम् । **नन्वत्र** को हेतुरिति **चेत्** ?, पक्ष्मपुट-तटोट्टङ्कितत्वेन गोलकान्तर्निःसरता रश्मिसमूहेन साकं संसर्गाभाव इति । **नापि द्वितीयः पक्षः** क्षेमङ्करः, स्पर्शनादीनामत्यासन्नानामाकाशपरमाण्वादीनामयोग्यपदार्थानामप्रकाशकत्वेऽपि प्राप्तार्थ-प्रकाशकत्वेन व्यभिचारात् । नापि **तृतीयः,** द्वितीयपक्षोक्तव्यभिचारेण दूषितत्वादिति **चेत् ?, अत्रोच्यते,** यद्यपि त्वया स्वकीयालीककल्पनयाऽञ्जनमयोग्यं पर्यकल्पि तथापि काचकूपि-काद्यन्तर्गतप्रदीपरश्मीनां काचकूपिकादिवत् नयनरश्मियोग्यदेशस्थितेषु सकलगोलकव्यापितिमिर-कामलादिषु कः प्रतीकारः ?, नापि स्पर्शनादीन्द्रियेष्वनैकान्तिको हेतुर्यतः स्पर्शाभावान्नाकाशं

स्पृशति, परमाण्वादिकं त्वत्यन्तग्रहणायोग्यत्वेन स्पर्शनेन्द्रियेण साकं तादृक् संयोगाभावान्न तथा। **नन्वभ्यन्तरस्थितशरीरावयवानामतिप्रत्यासन्नवर्तित्वेनापि** स्पर्शनेन्द्रियेणाग्रहणाद् व्यभिचारस्तदवस्थ एवेति **चेत् ?, न,** अभ्यन्तरवर्त्तिशरीरावयवानां स्पर्शनेन्द्रियकारणत्वेन तत्सम्बन्धिस्पर्शस्य तदविषयत्वात्, अकारणस्य तु पीयमानस्य जलादेः शीतस्पर्शोऽन्तरनुभूयत एव। **न च** व्यवहितार्था-प्रकाशकत्वहेतुनापि नयनस्यप्राप्यकारित्वसिद्धिरिति **वाच्यम्,** कुलिशकाचा- भ्रपटलस्वच्छ-सलिलस्फटिकोपलान्तरितानामपि पदार्थोपलम्भात् । **ननु** कुलिशादिकं विभेद्य नायनरश्मयः विषयदेशमुपसर्प्पन्ति ततस्तदुपलम्भ इति **चेत् ?, न,** तूलपटलादेः सुतरां सुभेद्यत्वेन तूलपटलान्तरितस्यापि ग्रहणप्रसङ्गात् । यत्पुन**रुदयन** उदचीचरत्-"**स्फटिकाद्यन्तरितोपलब्धिः प्रसादस्वभावतया स्फटिकादीनां तेजोगतेरप्रतिबन्धकतया प्रदीपप्रभावद्धवेदुपपन्ना**" इति **तदपि न मनीषिमान्यम्,** यतो न क्वापि दृष्टो मूर्तद्रव्यस्य मूर्तद्रव्यान्तरेण गतेरप्रतिबन्धः प्रसन्नतानिमित्तकः किन्तु तुलादिना जलादिगत्यप्रतिबन्धः प्रशिथिलावयवारब्धत्वनिमित्तकः। स्फटि-कान्तर्गतप्रदीपरश्मयस्तु न तं भित्त्वा प्रसरन्ति किन्तु तत्सम्पर्कमासाद्य स्फटिकपरमाणुपुञ्ज एव तथा परिणतः सर्वतः प्रसरति। अत एव पीतरक्तादिकाचकूपिकातो रश्मयोऽपि तद्वर्णाः प्रसरन्तो दृश्यन्ते। एवं रविरश्मयोऽपि न काचकूपिकां भित्त्वाऽन्तःप्रविश्य जलमुष्णीकुर्वन्ति किन्तु रविरश्मिसम्पर्कं समासाद्य काचकूपिकापरमाणव उष्णीभूता जलमुष्णीकुर्वन्ति। **एतेन**-"**जलापेक्षया तच्छिद्राणा-मत्यन्तं सूक्ष्मतरत्वकल्पनात्, कथमन्यथा काष्ठादिना गाढतरं पिहितमुखस्यापि काचकूपा-देरन्तर्गतस्य जलादेरातपादिना सर्वानुभवसिद्धमुष्णत्वं संगच्छेत, तत्रापि सूर्यरश्मीनां जलादेः सम्बन्धोऽवश्यं स्वीकर्त्तव्यः, स च सम्बन्धः काचकूपादौ छिद्रानङ्गीकारे न सम्भवतीत्यकामेनापि काचकूपादेः सच्छिद्रत्वं स्वीकर्त्तव्यम्, सच्छिद्रत्वे च तस्य जलादीनां ततो बहिः प्रपातापत्त्या तच्छिद्राणां जलापेक्षयातिसूक्ष्मत्वं रश्म्यपेक्षया च स्थूलत्वं भवतापि स्वीकर्त्तव्यमेव**" इति कस्यचित् कपोलकल्पनापि **निरस्ता,** छिद्रस्यानङ्गीकारेण स्थूलत्वसूक्ष्मत्व-कल्पनाया निष्फलत्वापत्तेश्च । **ननु** यथा पारदस्यायस्पात्रभेदे सामर्थ्यं न पुनरलाबुपात्रभेदे तथा लोचनरोचिषामपि स्फटिकादिभेदे शक्तिर्भविष्यति न तुलपटलभेद इति **चेत् ?, न,** सोऽयं स्फटिकादिरिति प्रत्यभिज्ञाबाधात्, विनाशव्यवहारस्य तत्र कस्यचिदभावात्। **ननु** निरन्तरताप्रतीतिस्तु भ्रमात्मिकैव, प्रदीपज्वालावत् पूर्वपूर्वकाचादिव्यूहव्यावृत्तावुत्तरोत्तरतद्रूपव्यूहान्तरस्योपपत्तेरिति **चेत्** ?, तर्हि, प्रतिक्षणं क्षणभङ्गुरं विश्वं स्वीकुर्वाणाः त्वया कथं प्रतिहन्यन्ते ? । **नन्वा**त्मादिपदार्थानां क्षणिकत्वं व्याचक्षाणं भिक्षुं प्रत्यभिज्ञैव प्रतिक्षेप्स्यतीति **चेत्** ?, स्फटिकादावप्यस्त्येव सा प्रत्यभिज्ञा। **नन्वा**त्मादौ प्रत्यभिज्ञा दृढेति **चेत्** ?, किंकृतं तत्र दार्ढ्यम् ? बाधाभावकृतमिति चेत् ?, तत्प्रकृतेऽपि समानम्, न खलु आत्मादिवत् स्फटिकादावपि एकत्वपरामर्शिनः प्रत्यभिज्ञानस्य

किञ्चिद्बाधकं प्रमाणं समस्ति । **ननु** एकत्वपरामर्शिप्रत्यभिज्ञायाः स्फटिकान्तरितार्थोपलम्भेन तद्भेदसिद्धेर्बाध इति **चेत् ?, न,** अन्योन्याश्रयप्रसङ्गात्, भेदसिद्धौ स्फटिकाद्यन्तरितार्थोपलम्भः सिध्यति तत्सिद्धौ च भेदसिद्धिरिति । स्फटिकादौ चाशूत्पादविनाशयोः स्वीकारे दर्शनान्तरितमदर्शनमपि स्यात्, न च तत्र तत्कदाचिदप्यनुभूयते । **नन्वा**शुभाविभ्यां पूर्वोत्तरोत्पादाभ्यां विनाशस्य तिरोधानात् न तत्रादर्शनं स्यादिति **चेत् ?, तर्हि,** आशुभाविभ्यां पूर्वोत्तराभ्यां विनाशाभ्यामुत्पादस्यापि तिरोधानात् दर्शनमपि मा भूत् । **ननु** तदुत्पादयोः स्वमध्यगतविनाशतिरोधाने सामर्थ्यमस्ति, भावस्वभावत्वेन बलीयस्त्वात्, न तु निःस्वभावयोः तद्विनाशयोः स्वमध्यगतोत्पादतिरोधाने सामर्थ्यम्, अभावस्वभावत्वेन दुर्बलत्वादिति **चेत् ?, न,** भावाभावयोः समानबलत्वात्, तयोरन्यतरबलीयस्त्वे युगपद्भावाभावात्मकवस्तुप्रतीतिविरोधः स्यात् । **न च** वस्तुनो भाव एवानुभूयत इति **वाच्यम्,** स्वरूपादिचतुष्टये पररूपादिचतुष्केनाभावस्यापि प्रतीतेः । **एतेन** स्याद्वादमुद्गरेशेन **"नैकस्मिन्नसम्भवात्"** इति यदज्ञानविलसितं **व्यासवचनम्, "नायमभ्युपगमो युक्तः एकस्मिन्नसम्भवात्, नह्येकस्मिन् धर्मिणि युगपत् सत्त्वासत्त्वादिविरुद्धयोः समावेशः सम्भवति शीतोष्णवत्"** इति यच्च **शाङ्करभाष्यवचनं** सत्सर्वं **खण्डशः चूर्णितम्,** सर्वदा भावाभावात्मकस्य वस्तुनः प्रतिभासनात्, सर्वथोत्पादे विनाशे च पुनः पुनः स्फटिकादौ दर्शनसान्तरस्यादर्शनस्य प्रसञ्जनं दुर्निवारमिति स्थितम् । एवं प्रदीपेऽपि कथं नैरन्तर्यभ्रम इति नाशङ्कनीयम्, तत्रापि सर्वथोत्पादविनाशयोरघटमानत्वादित्यलं प्रसङ्गेन ।

अप्राप्तार्थपरिच्छेदित्वेऽपि नयनस्य व्यवहितार्थाप्रकाशकत्वाविरोधात् तव व्यवहितार्थाप्रकाशकत्वहेतुरपि सन्दिग्धव्यतिरेकी । **नन्व**प्राप्तत्वाविशेषादव्यवहितवत् कुड्यादिव्यवहितमपि किं न गृह्णीयादिति **चेत्** ?, न गृह्णीयात्, योग्यताभावात् । **ननु** अप्राप्तत्वाविशेषेऽपि कथं स्फटिकान्तरितप्रकाशने योग्यता भित्त्याद्यन्तरितप्रकाशने चायोग्यता इति चेत् ?, शृणु, यथा भवन्मते स्वच्छजलान्तरितार्थप्रकाशने योग्यता समलजलान्तरितभावप्रकाशने चायोग्यता तद्वदत्रापि । **ननु** नायनरश्मयः समलं जलं भित्त्वार्थं न प्रकाशयन्तीति **चेत् ?, तर्हि** ते स्वच्छजलान्तरितमर्थमपि न प्रकाशयिष्यन्ति, जलकृतप्रतिघातस्याविशेषात् । **एतेन "तत्र कुम्भादिभिर्नेत्रकिरणानां प्रतिघातत्वस्वीकारात्, कथमन्यथा घटाद्यन्तर्गतस्य व्यवधिमतो जलादेः दीपाद्यालोकेनापि प्रकाशो नानुभूयत इत्यतो दृष्टे किञ्चिन्नानुपपन्नं नामेति न्यायेनेदृश एव तेजसः स्वभावो यत्खलु कुत्रचित्तत्प्रतिघातः कुत्रचिच्चाप्रतिघातः"** इत्यन्वयार्थदीपिकाकारोक्तं **निरस्तम्,** नायनरश्मिभिश्च कुड्यादेः कथं न भेदः, तेजोऽविरोधात्, विरोधे तु स्फटिकादावपि विरोधत्वापत्तेः, प्रसन्नतानिमित्तको भेदस्तु प्रागेव प्रतिषिद्धः । किञ्च योग्यताऽस्वीकारे संयुक्तसमवायाविशेषात् चक्षुर्यथा कुवलयरूपं प्रकाशयति तथा तद्गन्धमपि प्रकाशयेत्, तथा चेन्द्रियान्तरवैफल्यं स्यात् । **ननु**

यद्ययोग्यत्वेन तद्गन्धं न प्रकाशयति तर्हि योग्यताभावादेवाप्राप्यत्वेऽपि व्यवहितमतिसन्निकृष्टं वा तद्रूपं न प्रकाशयतीति को विरोधः ?, त्वयाऽपि सर्वत्र योग्यतैव समाश्रयणीया, यतः कुतो न रश्मयो लोकान्तमुपसर्पन्तीति प्रेरणायां त्वया यथा योग्यता स्वीकृता तथैवेतरत्र सैव वक्तव्या भवति । किञ्च प्राप्यकार्यपि घ्राणं यथा कुङ्कुमादेर्गन्धं प्रकाशयति तद्वत् परमाणोरपि गन्धं कथं न प्रकाशयेत् ?, अथ प्रकाशयत्येव योगिनो घ्राणं परमाणुगन्धमपि नास्मदादेः, तादृशादृष्टविशेषाभावात्, महत्त्वाद्युपेतद्रव्यगन्धादि त्वस्मदादीनामपि प्रकाशयति, तादृशादृष्टविशेषस्य सद्भावात्, इत्यदृष्टवैचित्र्यात्तद्विज्ञानाभावाभाववैचित्र्यमिति **चेत्** ?, स्याद्वादिनामप्येतत्तुल्यम्, यतः तादृशक्षयोपशमवतामतिशयज्ञानिनामस्मदाद्यगोचरविप्रकृष्टस्वविषयं चाक्षुषं भवति, अस्मदादीनां तु स्वानुरूपतदावरणक्षयोपशमविशेषात् चाक्षुषं यथाप्रतीतिपदार्थप्रकाशकत्वं भवतीत्युभाभ्यां योग्यताऽभ्युपगन्तव्यैव । **एतेन-"योग्यताभावाद् व्यवहिताग्रहणमिति चेत् ?, इन्द्रियस्य तावद्योग्यताविषयग्रहणसामर्थ्यमस्त्येव, तदानीमव्यवहितग्रहणात्, विषयस्यापि योग्यतामहत्त्वानेकद्रव्यत्वरूपविशेषाद्यात्मिका व्यवधानेऽप्यनिवृत्तैव, आर्जवावस्थानमपि तदवस्थम्"** इति **कन्दलीकारोक्तमप्यपास्तम्,** प्रमातुस्तादृशक्षयोपशमरूपतद्ग्रहणयोग्यताया अभावात्, कथमन्यथा शशधरस्येव तद्गतेरुपलम्भो न स्यात् । **ननु** गतौ भास्वररूपाभावान्नोपलम्भः, निशाकरे तु तद् वैपरीत्यमिति **चेत् ?**, तदुत्सङ्गस्थकुरङ्गकलङ्को राहुविमानैकदेशश्च कथमुपलभ्येत ?, उद्भूतरूपाभावात् कृष्णत्वाच्च, तस्मात् बाह्येन्द्रियत्वेनापि प्राप्तार्थप्रकाशकत्वं न सिध्यति । किञ्च किं नाम नयनस्य बाह्येन्द्रियत्वम् ?, बहिरर्थग्रहणाभिमुखत्वमुत बहिर्देशावस्थायित्वं बहिष्कारणप्रभवत्वं वा स्यादिति त्रयी गतिः । **आद्यकक्षायां** मनसा व्यभिचारि, मनसः बहिरर्थग्रहणाभिमुख्येन बाह्येन्द्रियत्वप्रसङ्गात् । **द्वितीयकक्षायां** विकल्पद्वयमुत्तिष्ठते, तथाहि-बहिर्देशावस्थायित्वमित्यत्रार्थदेशो बहिर्देशो विवक्षितः शरीराद्वा बहिः बहिर्देशो विवक्षितः, **पौरस्त्यपक्षे**ऽर्थदेशाश्रितत्वमर्थाभिमुख्येन व्यवस्थायित्वं प्रवृत्तिर्वा विवक्षिता ?, **आद्ये** उभयासिद्धिः, वादिप्रतिवादिभ्यां गोलकान्तर्देशसमाश्रितत्वेनाभ्युपगमात्, साधनविकलता च दृष्टान्तस्य त्वगिन्द्रियस्यार्थदेशेऽनाश्रितत्वात्, **द्वितीये**ऽपि अर्थाभिमुख्येन प्रवृत्तिः किं प्रसर्पणरूपो व्यापारः प्रतीत्युत्पादकत्वं वा ?, **आद्ये** प्रतिवाद्यसिद्धिः, नयनकिरणानां तैजसत्वाभावेनार्थदेशे प्रसर्पणानभ्युपगमात्, तैजसत्वसाधकप्रमाणस्य निराकृतत्वेन बाधकस्य चोपन्यस्तत्वेनोभयासिद्धिर्वा, निदर्शनस्य च साधनविकलता अत्रापि स्पष्टैव, अर्थाभिमुख्येन प्रतीत्युत्पादकत्वे च पुनर्मनसानैकान्तिकम् । **ननु** शरीरात् बहिर्देशे गोलकस्वरूपे समाश्रितत्वं बहिर्देशावस्थायित्वम्, मनसि व्यभिचारवारणाय च बाह्येति विशेषणम्, तद्धि देहान्तर्देशसमाश्रितमिति **चेत्** ?, तदपि न, इन्द्रियबाह्यत्वस्याप्राप्तार्थपरिच्छेदेनाप्यविरुद्धत्वात्, न चाविरुद्धं विशेषणं विपक्षाद्धेतुं व्यावर्त्तयति, न च तत्र विरोधसाधकं किञ्चित् प्रमाणमप्यस्ति । **ननु**

मनसि प्राप्तार्थपरिच्छेदव्यावृत्त्या बाह्येन्द्रियत्वस्यापि व्यावृत्तेर्विरोधसिद्धिरुद्भाव्यत इति **चेत् ?, न,** क्वचित् साध्यनिवृत्तौ सत्यां साधननिवृत्तावपि विरोधासिद्धेः, अन्यथा चक्षुरप्राप्तार्थपरिच्छेदि, स्पर्शनरसनघ्राणश्रोत्रान्येन्द्रियत्वात्, मनोवदित्यनुमानतः कश्चिच्चक्षुषोऽप्राप्तार्थपरिच्छेदं प्रसाधयन् कथं प्रतिरोत्स्यते ? समस्ति चात्राप्राप्तार्थपरिच्छेदव्यावृत्त्या स्पर्शनरसनघ्राणश्रोत्रान्येन्द्रियत्वस्यापि व्यावृत्तिः स्पर्शनादाविति । **नापि तृतीयः,** मनसैव व्यभिचारात्, आत्मापेक्षया बहिष्कारणं पुद्गलतत्त्वं तत्प्रभवत्वं च मनसः साधितमेवेति । तस्माद् व्यतिरेकानिश्चयात् सन्दिग्धव्यतिरेकी हेतुः ।

**अथ 'चक्षुः प्राप्यकारि भौतिकत्वात् परशुवदि'**त्यपि **न सम्यक्,** यतः प्राप्यसंयुज्य स्वकार्यं करोतीति प्राप्यकारीति वक्तव्ये प्राप्तिरपि स्वकार्यं भवति, तदपि च प्राप्य करोत्यन्यथा वा ?, प्राप्य **चेत्** ?, सापि प्राप्तिः प्राप्यैव कर्त्तव्येति प्राप्तिपरम्परोत्पादन एव क्षीणशक्तिकत्वेन प्रस्तुतकार्याकरणादनवस्था, **द्वितीये** त्वनयैव व्यभिचारः । **अथ** ज्ञानस्वरूपकार्यापेक्षया चक्षुषः *प्राप्यकारित्वसाधनात् नोक्तदोष इति* **चेत्, तन्न,** *प्राप्यकारीति शब्दस्य प्राप्तिपूर्वक्रियामात्राभिधान-*पर्यवसितत्वात्, निदर्शनस्य साधनशून्यत्वापत्तेश्च, यतः परशुधारापि पादपं प्राप्य द्वैधीभावं विधत्ते न तु ज्ञप्तिमिति । **ननु** स्वविषयज्ञप्तिकरणापेक्षया परशोर्निदर्शनमुक्तं न द्वैधीभावापेक्षया, तथा च न साध्यविकलता निदर्शनस्येती**चेत्,** अत्र तर्क्यते, चाक्षुषीं ज्ञप्तिमाश्रित्यैतदुच्यते स्पार्शनीं वा ? चाक्षुषीमाश्रित्येति **चेत्** ?, अद्यापि नयनार्थयोः प्राप्यकारित्वासिद्धेः सैव साध्यविकलता निदर्शनस्य । **अथ** स्पार्शनीमपेक्ष्योच्यते तर्हि, अस्त्येवं किन्तु मनःपरिच्छेद्येन सुरगिरिणा व्यभिचारः, भौतिकेनापि तेन मनसाऽप्राप्तेनैव स्वपरिच्छित्तिकरणात् । **ननु** येन करणभूतेन परिच्छित्तिर्जन्यते स एवेह प्राप्यकारिसम्मतो न विषयत्वेनापीति **चेत्** ?, तर्हि निदर्शनान्तरं वाच्यं न प्रकृतम् । **न च** प्रदीपादिकमत्र निदर्शनं यतः प्रदीपः करणभूतेन रश्मिद्वारेण प्राप्तः सन्नर्थं प्रकाशत इति **वाच्यम्,** एवमपि हेतोः व्याप्त्यनिश्चयात्, न च साधर्म्यमात्रेण व्याप्तिनिश्चयो भवति, अप्राप्यकारित्वमपि स्पृशतो भौतिकस्य न किञ्चित्प्रतिद्वन्द्वि प्रमाणं समस्तीति ।

**एतेन** 'कारकत्वसाधनम'पि **परास्तम्,** अप्राप्तलोहाकर्षकायस्कान्तेन व्यभिचारात् । **ननु** यथा पुरुषः नालान्तर्वायुप्रयोगेण जलादिकमाकर्षति संयुक्तसंयोगत्वाच्च नाप्राप्तिस्तथाऽयस्कान्तोऽपि वायुद्वारेण प्राप्तलोहमेवाकर्षतीति **चेत्** ?, तन्न, तत्र वायुसद्भावे प्रमाणाभावात् । **ननु** समाकर्षणस्यान्यथानुपपत्तिः प्रमाणमिति **चेत्** ?, न, अप्राप्तस्याप्याकर्षणोपपत्तेः । **न चा**प्राप्तस्या-कर्षणे कथं न विश्ववर्त्ति सकललोहाकर्षणम्, अप्राप्तत्वाविशेषादिति **वाच्यम्,** प्राप्तस्य तवाभि-प्रायेणाकर्षणेऽपि तद्देशवर्त्तितृणतुलादिसमाकर्षणं कथं न स्यात् ?, योग्यताऽभावादिति चेत् ?, अप्राप्तत्वाविशेषेऽपि सकललोहानामत्रायोग्यत्वान्नाकर्षणम् । अपि चायसः समाकर्षणान्यथानुपपत्तिः कुतोऽवसिता ?, **न च** कारकत्वाख्यहेतोर्यतः सकलं च कारकं प्राप्त एव वस्तुनि फलमुत्पादय-

दवलोकितं कारक एवायस्कान्तस्तस्मात्तथेति **वाच्यम्**, परस्पराश्रयात्, तथाहि-कारकत्वस्य हेतुत्वे सिद्धे प्राप्तार्थसमाकर्षणसिद्धिस्तत्सिद्धौ च कारकत्वस्य हेतुत्वसिद्धिरिति । अन्यच्च वायुद्वारेणाकर्षणसम्भवे तिर्यगेवाकर्षणं स्यात्, वायोस्तिर्यक्गमनस्वभावत्वात्, नोर्ध्वम्, यतो वात्यादौ विरुद्धदिक्क्रियावायुद्वयसंयोगनिमित्तत्वेनोर्ध्वगतेः भवद्भिः व्यवस्थापितत्वात्, **न चा**त्रापि तथाविधा कल्पना ज्यायसी, अननुभवात्, अयस्कान्तो नायसो वायुद्वारेणाकर्षकः, तत्रावस्थितलघुतरतृणतूलाद्यनाकर्षणान्यथानुपपत्तेः इत्यनुमानबाधितं च । कथं च तिलकादिना परवशीभूतकान्तादीनामाकर्षणम् ?, '**तत्रापि पवनोऽस्ती**'तीचेत् महासाहसिकस्यायमुल्लापः । एवं मन्त्रजापेऽपि व्यभिचारः । अत्राक्षेपपरिहारौ **रत्नाकरावतारिकातः** प्रदर्श्येते-

**''यस्मादिदं मन्त्रजपोपसर्प्यत्प्रोद्दामरामाव्यभिचारदोषात् ।**
**उत्तालवेतालकरालकेलीकलङ्कितश्रीकमिवावभाति ॥५६॥**

**तथाहि-कनकनिकषस्निग्धां मुग्धां मुहुर्मधुरस्मिताम्, चटुलकुटिलभ्रूविभ्रान्ति कटाक्षपटुच्छटाम् ।**
**त्रिजगति गतां कश्चिन्मन्त्री समानयति क्षणात्तस्मरमणीमारान्मन्त्रान्मनोभुवि संस्मरन् ॥५७॥**

**कश्चिदत्र गदति स्म यत्पुनर्मन्त्रमन्त्रणगवी समानयेत् ।**
**युक्तमेव मदिरेक्षणादिकं तेन नाभिहितदूषणोदयः ॥५८॥**

**मन्त्रस्य साक्षाद् घटना प्रियादिना परम्परातो यदि वा निगद्यते ।**
**साक्षान्न तावद्यदयं विहायसो ध्वनिस्वरूपस्तव सम्मतो गुणः ॥५९॥**

**ततोऽस्य तेनैव समं समस्ति संसक्तिवार्त्ता न तु पक्ष्मलाक्ष्या ।**
**अथाक्षरालम्बनवेदनं स्यान्मन्त्रस्तथाप्यस्त्वियमात्मनैव ॥६०॥**

**अथापि मन्त्रस्य निवेद्यते त्वया संसक्तिरेतत्पतिदेवतात्मना ।**
**सन्तोषपोषप्रगुणा च सा प्रिया प्रियं प्रति प्रेरयति स्वयोगिनीम् ॥६१॥**

**ब्रूमहेऽत्र ननु देवतात्मना मन्त्रवर्णविसरस्य का घटा ।**
**अम्बरस्य गुण एव तत्कथं देवतात्मनि भजेत सङ्गतिम् ॥६२॥**

**आश्रयद्वारतोऽप्यस्य संसर्गो नास्ति सर्वथा ।**
**व्यापकद्रव्ययोर्यस्मात् संसर्गो नामुना मतः ॥६३॥**

**व्यापकेषु वदति व्यतिषङ्गं यस्तु तेन मनसा ध्वनिना वा ।**
**ऽतीतवस्तुविषयेण विमृश्य स्पष्ट एव विलसन् व्यभिचारः ॥६४॥''** इति ।

किञ्च, चक्षुषः प्राप्यकारित्वे शाखाचन्द्रमसोर्युगपत् ग्रहणानुपपत्तिः, युगपदुभयसंयोगाभावात् । **न च** तिर्यग्भागावस्थितयोः शाखाचन्द्रमसोर्युगपत्संयोगापत्तिरिति **वर्धमानोक्तमपि रमणीयम्,** ऊर्ध्वं प्रसृतानामेव नयनरश्मीनां तयोस्तिर्यग्भागेऽवस्थानोपपत्तेरूर्ध्वस्थितवस्तुनोपि ग्रहणप्रसङ्गात् । **न** चाग्रभागावच्छेदेन संयुक्तस्यैव चक्षुषो ग्राहकत्वम्, अत एव न नयनस्थिताञ्जनादिग्रहणप्रसङ्गोऽपीति **वाच्यम्,** तथापि तावत्पर्यन्तं प्रसृतस्यान्तरालिकवस्त्वन्तरग्रहणप्रसङ्गात्, सन्निहितं विमुच्यासन्निहित-संयोगानुपपत्तेः । **ननु** सन्निकृष्टदेशविशेषं विनैवानन्यगत्या विप्रकृष्टदेशसंयोगोपपत्तिः, वेगादि-विशेषादिति **चेत् ?, न,** अनन्यगत्या देशविशेषस्य तत्तच्चाक्षुषं प्रति हेतुत्वस्वीकारेण क्षतेरभावात्, अनन्तचक्षुःक्रियासंयोगविभागतत्कार्यकारणभावाद्यकल्पनेन लाघवाच्च । यद्वा नयनप्राप्तिनियामकं विशिष्टाभिमुख्यमेव तत्कार्यनियामकमस्तु । **एतेन-"क्रमिकोभयसंयोगवता चक्षुषा शाखा-चन्द्रमसोर्ग्रहणे कालसन्निकर्षात् यौगपद्याभिमान इति । तुल्यकालग्रहणं चासिद्धमेव तदभिमानस्य कालसन्निकर्षेणैवोपपत्तेः, अचिन्त्यो हि तैजसो लाघवातिशयेन वेगातिशयः यत्प्राचीनाचलचूडावलम्बिन्येव भगवति मयूखमालिनि भवनोदरेष्वालोक इत्यभिमानो लोकानाम्"** इति **दिनकरभटोक्तमपास्तम्,** चन्द्रज्ञानानुव्यवसायसमये शाखाज्ञानस्य नष्टत्वेन **'शाखाचन्द्रौ साक्षात्करोमि'** इत्यनुव्यवसायस्या- नुपपत्तेश्च । न च क्रमिकतदुभयजनित-संस्काराभ्यां जनितायां समूहालम्बनस्मृतावेवानुभवत्वारोपात् तथानुव्यवसाय इति वाच्यम्, तादृगारोपादिकल्पनायां महागौरवादिति । एतेन-

"**यच्च चक्षुषः प्राप्यकारित्वे शाखाचन्द्रमसोस्तुल्यकालग्रहणं न स्यादित्यापादितं तत्रेष्टापत्तिरेव। तुल्यका-लाभिमानश्चाशूत्पत्त्यैव, अचिन्त्यो हि तेजसो लाघवातिशयेन वेगातिशयो यदुदयगिरि-चूडावलम्बिन्येव भगवति सवितरि भवनोदरेष्वालोक इत्यभिमानो लोकानामिति सिद्धं मनोभिन्नेन्द्रियत्वस्वस्त्वबहिरिन्द्रियत्वेन हेतुना चक्षुषः प्राप्यकारित्वम्**" इति,

तथा-"**प्रथमतो हि चक्षुःसन्निहितं महीधरं प्राप्य प्रकाशयति पश्चाद् दूरचारिणं हरिणलक्ष्माणम् युगपत्प्रतिपत्त्यभिमानस्तु शतपत्रपत्रव्यतिभेदवदाशूत्पत्तिनिमित्तक**" इति पण्डित**वंशीधरशर्मणोक्तं** च निराकृतम् ।

यच्च-"**संसर्गिद्रव्यतया निःसरदेव नायनं तेजो बाह्यालोकेनैकाङ्गतागतं युगपदेव तावदर्थैः संसृष्टमिन्द्रियमुत्पादितवदिति भूधरशशधरयोस्तुल्यकालग्रहणमुपपद्यत**" इति केनचिदुक्तम्,

"**चक्षुर्बाह्यालोकाभ्यामारब्धेन चक्षुषा तावदर्थसंस्पृष्टेन युगपत्तावदर्थग्रहणमिति शाखाचन्द्रमसोस्तुल्यकालग्रहणमुपपद्यत एवेति**" यत् **शालिकाचार्योक्तम्,**

''**अधिष्ठानासम्बन्धार्थग्राहिण्याः प्रदीपप्रभाया इव चक्षुषोऽपि प्राप्यकारित्वसम्भवात्, पृथुतरग्रहणस्य च गोलकनिर्गतस्य महतश्चक्षुषः पृथ्वग्रत्वेन प्रदीपप्रभाया इवोपपत्तेः, स्वाधिकपरिमाणवद्द्रव्यग्राहिणा त्वगिन्द्रियेण व्यभिचारात् तादृशनियमे मानाभावाच्च**'' इति यत् **दिनकरा**भिहितं च तत्सर्वमपि प्राग् नयनस्य रश्मिवत्त्वापाकरणादपाकृतमेव । अनुपदोक्त कस्यचिन्मते **शालिकाचार्यमते** च पृष्ठस्थितस्य व्यवहितस्य चार्थस्योपलम्भप्रसङ्गोऽपि स्यात्, बाह्यालोकेन नायनतेजस एकीभावं गतत्वेन चक्षुर्बाह्यालोकाभ्यामारब्धस्य नयनस्य च पृष्ठभागे व्यवहिते चार्थे सत्त्वात्। ननु पृष्ठदेशस्थबाह्यालोकैश्चक्षुरुत्पादे मानाभाव इति **चेत्** ?, अग्रदेशस्थबाह्यालोकैरपि तदुत्पादे मानाभावः, तदनभ्युपगमेऽपि चाक्षुषोपपादनस्यानुपद-मुक्तत्वादिति **दिनकरे**णापि शालिकाचार्यं प्रत्युत्तरितम् । अनुपदं **दिनकरेण** त्वगिन्द्रियोक्तो व्यभिचारोऽपि न, स्वपरिमाणमात्रं त्वगिन्द्रियं गृह्णाति, अधिकं त्वनुमिनोतीति । इदमुपलक्षणं यत्- '**चक्षुषोऽप्राप्यकारित्वे सर्वदा घटादिविषयकचाक्षुषापत्तिः, कालभेदेन चाक्षुषनियामकस्य चक्षुःक्रियाजन्यस्य तव नियामकत्वाभावात्**' इति प्र**भाकरोक्तौ** विशेषानुपलब्धिनिमित्तकौ संशयविपर्ययावपि न स्याताम्, सामान्यवत्सन्निकृष्टानां विशेषाणामप्युपलम्भात् । अत्रा**त्रेयभाष्य**कार आह-''**यथा सामान्यस्य विशेषाणां च प्रदीपालोकेन सन्निकृष्टत्वेन दूरात्सामान्यमुपलभ्यते न विशेषा इति प्रदीपालोककारितौ संशयविपर्ययौ भवतस्तथा सामान्यस्य विशेषाणां च चक्षुषा सन्निकृष्टत्वेऽपि दूरात्सामान्यमुपलभ्यते न विशेषा इति चाक्षुषौ संशयविपर्ययौ भवतः, तत्र महाविषयत्वात्सामान्यं दूरादुपलभ्यतेऽल्पविषयत्वात्तु विशेषा न दूरादुपलभ्यन्त इति संशयविपर्ययोरुत्पत्तिरिति**'' तत् युक्तिक्षमं न, उपलम्भं प्रति महाविषयत्वस्याप्रयोजकत्वात् । **न च** दूरात्तत्स्थसामान्योपलब्धौ भूयस्त्वं निमित्तं स्यादिति **वाच्यम्,** यत उपलभ्यमानादितरे विषया लेशतोऽपि तत्सामान्यज्ञप्तौ नोपयुज्यन्ते । प्रदीपदृष्टान्तोऽपि न सम्यक्त्वमञ्चति, यत उपलम्भकारणत्वेन सन्निकर्षस्योच्यमाने प्रदीपेऽपि सामान्यवद्विशेषाणामप्युपलम्भकत्वप्रसक्तिर्दुर्निवारा स्यात् । अस्माभिस्तु प्रदीप एवोपलम्भं प्रति निमित्तमुच्यते, स च स्वयोग्यतावशेन दूरात्सामान्यमेवो-पलम्भयतीति युक्तम्, तद्वदेव यदि चक्षुषोऽपि योग्यता स्वीक्रियते तर्हि कृतं सन्निकर्षेणेति । **ननु** व्यवहिताप्रकाशकत्वेन चक्षुः योग्यमपि सन्निकर्षाभावे कथमुपलम्भयति, न ह्यप्राप्तं घटादिकं प्रदीपः प्रकटयतीति **चेत् ?, न,** व्यवहिताप्रकाशकत्वस्य निराकृतत्वात् । '**इदं रूपमिति ज्ञानं इन्द्रियसंयुक्तसमवायजन्यं बिम्बवृत्तिगुणविषयकलौकिकप्रत्यक्षत्वात् तादृशस्पर्श-प्रत्यक्षवदि**'त्यनुमानमपि रमणीयतां नाञ्चति, '**चक्षुरप्राप्यधीकृत् व्यवधिमतोऽपि प्रकाशकत्वात् यथान्तःकरणम्, व्यतिरेके पुना रसना**' इत्यनेन सत्प्रतिपक्षितत्वात् । **न चै**तदापातरमणीयमपि **वक्तुं युज्यते,** हेतोः प्राक्प्रसाधितत्वात् तवाक्षेपे युक्त्यभावात् समवायस्यान्यत्र निराकृतत्वेन

साध्याप्रसिद्धेश्च । चक्षुरप्राप्तार्थप्रकाशकात्यन्तासन्नार्थाप्रकाशकत्वात् यत्पुनः प्राप्तार्थप्रकाशकं तदत्यन्तासन्नार्थप्रकाशकमुपलब्धं यथा श्रोत्रादि, प्रत्यासन्नार्थाप्रकाशकं च चक्षुस्तस्मादप्राप्तार्थ-प्रकाशकमिति व्यतिरेकी हेतुरिति सूत्रमागमे 'रूपमस्पृष्टं गृह्णाती'ति।

यत्तु **"जं रयणिं च णं समणे भगवं महावीरे कालगए जाव सव्वदुक्खप्पहीणे तं रयणिं च णं कुंथु अणुद्धरी नाम समुप्पन्ना जा ट्ठिया अचलमाणा छउमत्थाणं निग्गंथाणं निग्गंथीणं य नो चक्खुफासं हव्वमागच्छइ, जा अट्ठिया चलमाणा छउमत्थाणं निग्गंथाणं निग्गंथीणं य चक्खुफासं हव्वमागच्छइ,"** इत्यत्र चक्षुःस्पर्शं नाम दृष्टिविषयं शीघ्रमागच्छतीत्यर्थो वाच्यः, तदुक्तमाचाराङ्गवृत्तौ-**"स्पर्शो विषयार्थः"** इति। यत्तु **जम्बूद्वीपवृत्तौ "सूरिए चक्खुफासं हव्वमागच्छइ"** इत्यत्र **"स्पर्शशब्द इन्द्रियार्थसन्निकर्षपरः, चक्षुषोऽप्राप्यकारित्वेन तदसम्भवात्"** इत्युक्तं तत्रेन्द्रियार्थयोग्यदेशावस्थितिः सन्निकर्षशब्देन ग्राह्या।

● ● ●

# શ્રી ગણધર ભાસ

## ઇંદ્રભૂતિ ભાસ

*(ઢાલ : અહો મતવાલે સાહિબા)*

પહલો ગણધર વીરનો, વર ગોબર ગામ નિવાસી રે
સુત પૃથિવી વસુભૂતિનો, નામઈં ઇંદ્રભૂતિ સુવિલાસી રે
ભવિયાં ! વંદો ભાવસ્યું. (આંકણી) ૧

જ્યેષ્ટા નક્ષત્રઈં જણ્યો, ગૃહવાસઈં વરસ પંચાસો રે;
ત્રીસ વરસ છદ્મસ્થતા, જિન બાર વરસ સુપ્રકાસો રે. ભ૦ ૨

સીસ પરિચ્છદ પાંચ સઈં, સર્વાયુ વરસ તે બાણું રે;
ગોતમ ગોત્ર તણો ધણી, એ તો સાચો હું સુરતરૂ જાણું રે. ભ૦ ૩

સુરતરૂ જાણી સેવિઓ, બીજા પરિહરિયા બાઉલિયા રે;
એ ગુરુ થિર સાયર સમો, બીજા તુચ્છ વહઈં વાહુલિયા રે. ભ૦ ૪

લબધિ અઠવીસઈં વરિઓ, જન મસ્તકે નિજ કર થાપઈં રે;
અછતું પણિ એહ આપમાં, તેહનઈં વર કેવલ આપઈં રે. ભ૦ ૫

જ્ઞાન અહંકારઈં લહિઉં, રાગઈં કરિ જગગુરુ-સેવા રે;
શોકઈં કેવલ પામિઉં, કારણ સર્વે ન કહેવા રે. ભ૦ ૬

વીરઈં શ્રુતિપદઈં બૂઝવ્યો, એ તો જીવ તણો સંદેહી રે;
શ્રી નયવિજય સુસીસનઈં, ગુરુ હોજો ધર્મસનેહી રે. ભ૦ ૭



## विभाग-३

# प्रमेयकमलमार्तण्डः

**अथो**च्यतेस्पर्शनेन्द्रियादिवच्चक्षुषोपि प्राप्यकारित्वं प्रमाणात्प्रसाध्यते । तथा हि-प्राप्तार्थप्रकाशकं चक्षुः बाह्येन्द्रियत्वात्स्पर्शनेन्द्रियादिवत् । **ननु** किमिदं बाह्येन्द्रियत्वं नाम बहिरर्थाभिमुख्यम्, बहिर्देशावस्थायित्वं वा ? **प्रथमपक्षे** मनसानेकान्तः; तस्याप्राप्यकारित्वेपि बहिरर्थग्रहणाभिमुख्येन बाह्येन्द्रियत्वसिद्धेः । **द्वितीयपक्षे** त्वसिद्धो हेतुः; रश्मिरूपस्य चक्षुषो बहिर्देशावस्थायित्वस्य भवतानभ्युपगमात् । गोलकान्तर्गततेजोद्रव्याश्रया हि रश्मयस्त्वन्मते प्रसिद्धाः । गोलकरूपस्य तु चक्षुषो बहिर्देशावस्थायिनो हेतुत्वे पक्षस्य प्रत्यक्षबाधनात्कालात्ययापदिष्टत्वम् ।

न च बाह्यविशेषणेन मनो व्यवच्छेद्यम्, न हि तत् सुखादौ संयुक्तसमवायादिसम्बन्धं व्याप्तौ च सम्बन्ध-सम्बन्धमन्तरेण ज्ञानं जनयति रूपादौ नेत्रादिवत् । **अथा**सौ सम्बन्ध एव न भवति; **तर्हि** नेत्रादीनां रूपादिभिरप्यसौ न स्यात्, तस्यापि सम्बन्धसम्बन्धत्वात् । तथा चेन्द्रियत्वाविशेषेपि मनोऽप्राप्तार्थप्रकाशकं तथा बाह्येन्द्रियत्वाविशेषेपि चक्षुः किं नेष्यते ? **अथा**त्र हेतुभावात्तन्नेष्यते; अन्यत्रापि 'इन्द्रियत्वात्' इति हेतुः केन वार्येत ? ततो मनसि तत्साधने प्रमाणबाधनमन्यत्रापि समानम् ।

चक्षुश्चात्र धर्मित्वेनोपात्तं गोलकस्वभावम्, रश्मिरूपं वा ? तत्राद्यविकल्पे प्रत्यक्षबाधा; अर्थदेशपरिहारेण शरीरप्रदेशे एवास्योपलम्भात्, अन्यथा तद्रहितत्वेन नयनपक्ष्मप्रदेशस्योपलम्भः स्यात् । **अथ** रश्मिरूपं चक्षुः; **तर्हि** धर्मिणोऽसिद्धिः । न खलु रश्मयः प्रत्यक्षतः प्रतीयन्ते, अर्थवत्तत्र तत्स्वरूपाप्रतिभासनात्, अन्यथा विप्रतिपत्त्यभावः स्यात् । न खलु नीले नीलतयानुभूयमाने कश्चिद्विप्रतिपद्यते ।

किञ्च, इन्द्रियार्थसन्निकर्षजं प्रत्यक्षं भवन्मते । **न चा**र्थदेशे विद्यमानैस्तैरपरेन्द्रियस्य सन्निकर्षोस्ति यतस्तत्र प्रत्यक्षमुत्पद्येत, अनवस्थाप्रसङ्गात् ।

**अथा**नुमानात्तेषां सिद्धिः; किमत एव, अनुमानान्तराद्वा ? प्रथमपक्षेऽन्योन्याश्रयः-अनुमानोत्थाने ह्यतस्तत्सिद्धिः, अस्याश्चानुमानोत्थानमिति । **अथा**नुमानान्तरात्तत्सिद्धिस्तदानवस्था, तत्राप्यनुमानान्तरात्तत्सिद्धिप्रसङ्गात् ।

यदि च गोलकान्तर्भूतात्तेजोद्रव्याद्बहिर्भूता रश्मयश्चक्षुःशब्दवाच्याः पदार्थप्रकाशकाः; तर्हि *गोलकस्योन्मीलनमञ्जनादिना संस्कारश्च व्यर्थः स्यात् ।* ***अथ** गोलकाद्याश्रयपिधाने तेषां विषयं प्रति* गमनासम्भवात्तदर्थं तदुन्मीलनम्, घृतादिना च पादयोः संस्कारे तत्संस्कारो भवति स्वाश्रयगोलक-संस्कारे तु नितरां स्यात् इत्यस्यापि न वैयर्थ्यम्; तदापि गोलकादिलग्नस्य कामलादेः प्रकाशकत्वं स्यात् । न खलु प्रदीपकलिकाश्रयास्तद्रश्मयस्तत्कलिकावलग्नं शलाकादिकं न प्रकाशयन्तीति युक्तम् ।

**न चा**त्र चक्षुषः सम्बन्धो नास्तीत्य**भिधातव्यम्;** यतो व्यक्तिरूपं चक्षुस्तत्रासम्बद्धम्, शक्ति-स्वभावं वा, रश्मिरूपं वा ? **प्रथमपक्षे** प्रत्यक्षविरोधः; व्यक्तिरूपचक्षुषः काचकामलादौ सम्बन्ध-प्रतीतेः । **द्वितीयपक्षेपि** तच्छक्तिरूपं चक्षुर्व्यक्तिरूपचक्षुषो भिन्नदेशम्, अभिन्नदेशं वा ? न तावद्भिन्नदेशम्; तच्छक्तिरूपताव्याघातानुषङ्गान्निराधारत्वप्रसङ्गाच्च । न ह्यन्यशक्तिरन्याधारा युक्ता । तद्देशद्वारेणैवार्थोपलब्धिप्रसङ्गश्च । ततोऽभिन्नदेशं चेत्; तत्तत्र सम्बद्धम्, असम्बद्धं वा ? सम्बद्धं चेत्; बहिरर्थवत्स्वाश्रयं तत्सम्बद्धं चाञ्जनादिकमपि प्रकाशयेत् । असम्बद्धं चेत्कथमाधेयं नाम अति-प्रसङ्गात् ?

**अथ** रश्मिरूपं चक्षुः, तस्यापि काचकामलादिना सम्बन्धोस्त्येव । न खलु स्फटिकादि-कूपिकामध्यगतप्रदीपादिरश्मयस्ततो निर्गच्छन्तस्तत्संयोगिना न सम्बद्धास्तत्प्रकाशका वा न भवन्तीति प्रतीतम् । तथा चाञ्जनादेः प्रत्यक्षत एव प्रसिद्धेः परोपदेशस्य दर्पणादेश्च तदर्थस्योपादानमनर्थकमेव स्यात् ।

किञ्च, यदि गोलकान्निःसृत्यार्थेनाभिसम्बद्ध्यार्थं ते प्रकाशयन्ति; तर्ह्यर्थं प्रतिगच्छतां तैजसानां रूपस्पर्शविशेषवतां तेषामुपलम्भः स्यात्, न चैवम्, अतो दृश्यानामनुपलम्भात्तेषामभावः । **अथा**दृश्यास्तेऽनुद्भूतरूपस्पर्शवत्त्वात्; **न;** अनुद्भूतरूपस्पर्शस्य तेजोद्रव्यस्याप्रतीतेः । जलहेम्नोर्भासुर-रूपोष्णस्पर्शयोरनुद्भूतिप्रतीतिरस्तीत्य**सम्यक्;** उभयानुद्भूतेस्तत्राप्यप्रतिपत्तेः । दृष्टानुसारेण चादृष्टार्थ-कल्पना, अन्यथातिप्रसङ्गात् । तथाहि–रात्रौ दिनकरकराः सन्तोपि नोपलभ्यन्तेऽनुद्भूतरूपस्पर्शत्वा-च्चक्षूरश्मिवत् । प्रयोगश्च मार्जारादीनां चक्षुषा रूपदर्शनं बाह्यालोकपूर्वकम् तत्त्वाद्दिवाऽस्मदादीनां तद्दर्शनवत् । **ननु** मार्जारादीनां चाक्षुषं तेजोस्ति, तत एव तत्सिद्धेः किं बाह्यालोककल्पनयेत्यन्यत्रापि समानम् । **ननु** यथा सद्दृश्यते तथा तत्कल्प्यते, दिवास्मदादीनां चाक्षुषं सौर्यं च तेजो विज्ञानकारणं दृश्यते तत्तथैव कल्प्यते, रात्रौ तु चाक्षुषमेव, अतस्तदेव तत्कारणं कल्प्यते । ननु किं मनुष्येषु नायन-रश्मीनां दर्शनमस्ति ? अथानुमेयास्ते; तर्हि रात्रौ सौर्यरश्मयोप्यनुमेयाः सन्तु । **न च** रात्रौ तत्सद्भावे नक्तञ्चराणामिव मनुष्याणामपि रूपदर्शन**प्रसङ्गः;** विचित्रशक्तित्वाद्भावानाम् । कथमन्यथोलूकादयो

दिवा न पश्यन्ति ? यथा चात्रालोकः प्रतिबन्धकः, तथान्यत्र तमः । ततो यथानुपलम्भान्न सन्ति रात्रौ भास्करकरास्तथान्यदा नायनकरा इति ।

**एतेन** 'दूरस्थितकुड्यादिप्रतिफलितानां प्रदीपरश्मीनामन्तराले सतामप्यनुपलम्भसम्भवात् तैरनुपलम्भो व्यभिचारी; **इत्यपि निरस्तम्**; आदित्यरश्मीनामपि रात्रावभावासिद्धिप्रसङ्गात् ।'

**अथोच्यते**-चक्षुः स्वरश्मिसम्बद्धार्थप्रकाशकम् तैजसत्वात्प्रदीपवत् । **ननु** किमनेन चक्षुषो रश्मयः साध्यन्ते, अन्यतः सिद्धानां तेषां ग्राह्यार्थसम्बन्धो वा ? **प्रथमपक्षे** पक्षस्य प्रत्यक्षबाधा, नरनारीनयनानां प्रभासुररश्मिरहितानां प्रत्यक्षतः प्रतीतेः । हेतोश्च कालात्ययापदिष्टत्वम् । **अथा**दृश्यत्वात्तेषां न प्रत्यक्षबाधा पक्षस्य । **नन्वेवं** पृथिव्यादेरपि तत्सत्त्वप्रसङ्गः; तथा हि-पृथिव्यादयो रश्मिवन्तः सत्त्वादिभ्यः प्रदीपवत् । यथैव हि तैजसत्वं रश्मिवत्तया व्याप्तं प्रदीपे प्रतिपन्नं तथा सत्त्वादिकमपि । **अथ** तेषां तत्साधने **प्रत्यक्षविरोधः**; सोन्यत्रापि समान इत्युक्तम् ।

**ननु** मार्जारादिचक्षुषोः प्रत्यक्षतः प्रतीयन्ते रश्मयः तत्कथं **तद्विरोधः** ? यदि नाम तत्र प्रतीयन्ते-ऽन्यत्र किमायातम् ? अन्यथा हेम्नि पीतत्वप्रतीतौ पटादौ सुवर्णत्वसिद्धिप्रसङ्गः । प्रत्यक्षबाधनमुभयत्रापि ।

किञ्च, मार्जारादिचक्षुषोर्भासुररूपदर्शनादन्यत्रापि चक्षुषि तैजसत्वप्रसाधने गवादिलोचनयोः कृष्णत्वस्य नरनारीनिरीक्षणयोर्धावल्यस्य च प्रतीतेरविशेषेण पार्थिवत्वमाप्यत्वं वा साध्यताम् । कथं च प्रभासुरप्रभारहितनयनानां तैजसत्वं सिद्धं यतः सिद्धो हेतुः ? किमत एवानुमानात्, तदन्तराद्वा ? **आद्य**विकल्पेऽन्योन्याश्रयःसिद्धे हि तेषां रश्मिवत्त्वे तैजसत्वसिद्धिः, ततश्च तत्सिद्धिरिति ।

**अथ** 'चक्षुस्तैजसं रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात् प्रदीपवत्' इत्यनुमानान्तरात्तत्सिद्धिः; **न**; अत्रापि गोलकस्य भासुररूपोष्णस्पर्शरहितस्य तैजसत्वसाधने पक्षस्य प्रत्यक्षबाधा, 'न तैजसं चक्षुः तमःप्रकाशकत्वात्, यत्पुनस्तैजसं तन्न तमःप्रकाशकं यथालोकः' इत्यनुमानबाधा च । प्रसाधयिष्यते च 'तमोवत्' इत्यत्र तमसः सत्त्वम् । प्रदीपवत्तैजसत्वे चास्यालोकापेक्षा न स्यादुष्ण-स्पर्शादितयोपलम्भश्च स्यात्, न चैवम्, तदपेक्षतया मनुष्यपारावतबलीवर्दादीनां धवललोहितकाल-रूपतयानुष्णस्पर्शस्वभावतया चास्योपलम्भात् । तन्न गोलकं चक्षुः ।

नाप्यन्यत्; तद्ग्राहकप्रमाणाभावेनाश्रयासिद्धत्वप्रसङ्गाद्धेतोः 'रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात्' इति हेतुश्च जलाञ्जनचन्द्रमाणिक्यादिभिरनैकान्तिकः । तेषामपि पक्षीकरणे पक्षस्य प्रत्यक्षबाधा, सर्वो हेतुरव्यभिचारी च स्यात् । **न च** जलाद्यन्तर्गतं तेजोद्रव्यमेव रूपप्रकाशकमित्य-**भिधातव्यम्**; सर्वत्र दृष्टहेतुवैफल्यापत्तेः । तथा च दृष्टान्तासिद्धिः, प्रदीपादावप्यन्यस्यैव तत्प्रकाश कस्य कल्पनाप्रसङ्गात् । प्रत्यक्षबाधनमुभयत्र । निराकरिष्यते च "**नार्थालोकौ कारणम्**" [परी० २।६] इत्यत्रालोकस्य रूपप्रकाशकत्वम् ।

किञ्च, रूपप्रकाशकत्वं तत्र ज्ञानजनकत्वम् । तच्च कारणविषयवादिनो घटादिरूपस्याप्यस्तीत्यनेन हेतोर्व्यभिचारः । 'करणत्वे सति' इति विशेषणेप्यालोकार्थसन्निकर्षेण चक्षूरूपयोः संयुक्तसमवायसम्बन्धेन चानेकान्तः । 'द्रव्यत्वे करणत्वे च सति तत्प्रकाशकत्वात्' इति विशेषणेपि चन्द्रादिनानेकान्तः ।

किञ्च, द्रव्यं रूपप्रकाशकं भासुररूपम्, अभासुररूपं वा ? **प्रथमपक्षे** उष्णोदकसंसृष्टमपि तत् तत्प्रकाशकं स्यात्। अनुद्भूतरूपत्वान्नेति **चेत्**, नायनरश्मीनामप्यत एव तन्माभूत् । तथा दृष्टत्वादित्यप्यनुत्तरम्; संशयात्, न हि तत्र निश्चयोस्ति ते तत्प्रकाशका न गोलकमिति । अनुद्भूतरूपस्य तेजोद्रव्यस्य दृष्टान्तेपि रूपप्रकाशकत्वाप्रतीतेः । तथाच, न चक्षू रूपप्रकाशकमनुद्भूतरूपत्वाज्जलसंयुक्तानलवत् । **द्वितीयपक्षेपि** उष्णोदकतेजोरूपं तत्प्रकाशकं स्यात् । न हि तत्तत्र नष्टम्। 'अनुद्भूतम्' इत्यभ्युपगमात् । उद्भूतं तत्तत्प्रकाशकमित्यभ्युपगमे रूपप्रकाशस्तदन्वयव्यतिरेकानुविधायी तस्यैव कार्यो न द्रव्यस्य । न खलु देवदत्तं प्रति पश्वादीनामागमनं तद्गुणान्वयव्यतिरेकानुविधायि देवदत्तस्य कार्यम् । ततो 'द्रव्यत्वे सति' इति विशेषणासिद्धिः ।

किञ्च, सम्बन्धादेरिवाऽतैजसस्यापि द्रव्यरूपकरणस्य कस्यचिद्रूपज्ञानजनकत्वं किन्न स्यात्, विपक्षव्यावृत्तेः सन्दिग्धत्वादतैजसत्वे रूपज्ञानजनकत्वस्याविरोधात् ? तदेवं तैजसत्वासिद्धेर्नातश्चक्षुषोरश्मिवत्त्वसिद्धिः ।

**अथान्यतः** सिद्धानां रश्मीनां ग्राह्यार्थसम्बन्धोनेन साध्यते; **न**; अन्यतः कुतश्चित्तेषामसिद्धेः, प्रत्यक्षादेस्तत्साधकत्वेन प्राक्प्रतिषिद्धत्वात् । तथा चेदमयुक्तम्-''**धत्तूरकपुष्पवदादौ सूक्ष्माणामप्यन्ते महत्त्वं तद्रश्मीनां महापर्वतादिप्रकाशकत्वान्यथानुपपत्तेः ।**'' इति; स्वरूपतोऽसिद्धानां तेषां महत्त्वादिधर्मस्य श्रद्धामात्रगम्यत्वात् । ततो रश्मिरूपचक्षुषोऽप्रसिद्धेर्गोलकस्य च प्राप्यकारित्वे प्रत्यक्षबाधितत्वात्कस्य प्राप्तार्थप्रकाशकत्वं साध्येत ? यदि च स्पर्शनादौ प्राप्यकारित्वोपलम्भाच्चक्षुषि तत्साध्येत; तर्हि हस्तादीनां प्राप्तानामेवान्याकर्षकत्वोपलम्भादयस्कान्तादीनां तथा लोहाकर्ष-कत्वं किन्न साध्येत ? प्रमाणबाधान्यत्रापि ।

**अथार्थेन** चक्षुषोऽसम्बन्धे कथं तत्र ज्ञानोदयः ? क एवमाह-'तत्र ज्ञानोदयः' इति ? आत्मनि ज्ञानोदयाभ्युपगमात् । **न चा**प्राप्यकारित्वे चक्षुषः सकृत्सर्वार्थप्रकाशकत्व**प्रसङ्गः**; प्रतिनियतशक्तित्वाद्भावानाम् । 'य एव यत्र योग्यः स एव तत्करोति' इत्यनन्तरमेव वक्ष्यते । कार्यकारणयोरत्यन्तभेदेऽर्थान्तरत्वाविशेषात् 'सर्वमेकस्मात्कुतो न जायेत' इति, 'रश्मयो वा लोकान्तं कुतो न गच्छन्ति' इति चोद्ये भवतोपि योग्यतैव शरणम् ।

किञ्च, चक्षूरूपं प्रकाशयति संयुक्तसमवायसम्बन्धात्, स चास्य गन्धादावपि समान इति तमपि प्रकाशयेत् । तथा चेन्द्रियान्तरवैयर्थ्यम् । योग्यताऽभावात्तदप्रकाशने सर्वत्र सैवास्तु, किमन्तर्गडुना

सम्बन्धेन ? यदि चायमेकान्तश्चक्षुषा सम्बद्धस्यैव ग्रहणमिति; कथं तर्हि स्फटिकाद्यन्तरितार्थ-ग्रहणम् ? तद्रश्मीनां तं प्रति गच्छतां स्फटिकाद्यवयविना प्रतिबन्धात्। तैस्तस्य नाशितत्वाददोषे तद्व्यवहितार्थोपलम्भसमये स्फटिकादेरुपलम्भो न स्यात् । तस्योपरि स्थितद्रव्यस्य च पातप्रसक्तिः आधारभूतस्यावयविनो नाशात् । न हि परमाणवो दृश्याः कस्यचिदाधारा वा; अवयविकल्पना-नर्थक्यप्रसङ्गात् । अवयव्यन्तरस्योत्पत्तेरदोषे तदा तद्व्यवहितार्थानुपलम्भप्रसङ्गः । न चैवम्, युगपत्तयोर्निरन्तरमुपलम्भात् । **अथा**शु व्यूहान्तरोत्पत्तेर्निरन्तरस्फटिकादिविभ्रमः, तदभावस्याप्याशु प्रवृत्तेरभावविभ्रमः किन्न स्यात् ? भावपक्षस्य बलीयस्त्वमित्युक्तम्; भावाभावयोः परस्परं स्वकार्य-करणं प्रत्यविशेषात् ।

कथं च समलजलान्तरितार्थस्योपलम्भो न स्यात् ? ये हि तद्रश्मयः कठिनमतितीक्ष्णलोहाऽभेद्यं स्फटिकादिकं भिन्दन्ति तेषां जलेऽतिद्रवस्वभावे काऽक्षमा ? **अथ** नीरेण नाशितत्वान्न ते तद्भिन्दन्ति; तर्हि स्वच्छजलव्यवस्थितस्याप्यनुपलम्भप्रसङ्गः । योग्यताङ्गीकरणे सर्वं सुस्थम् । ततः प्रोक्तदोष-परिहारमिच्छता प्रतीतिसिद्धमप्राप्यकारित्वं चक्षुषोऽभ्युपगन्तव्यम् ।

तथाहि-'चक्षुरप्राप्तार्थप्रकाशकमत्यासन्नार्थाप्रकाशकत्वात्, यत्पुनः प्राप्तार्थप्रकाशकं तदत्या-सन्नार्थप्रकाशकं दृष्टं यथा श्रोत्रादि, अत्यासन्नार्थाप्रकाशकं च चक्षुस्तस्मादप्राप्तार्थप्रकाशकम्' इति । **न चा**यमसिद्धो हेतुः; काचकामलाद्यत्यासन्नार्थाप्रकाशकत्वस्य चक्षुषि प्रागेव प्रसाधितत्वात् । **ननु** साध्याविशिष्टोयं हेतुः, 'पर्युदासप्रतिषेधे हि यदेवस्याप्राप्यकारित्वं तदेवात्यासन्नार्थाप्रकाशकत्वम्' इति । प्रसज्यप्रतिषेधस्तु जैनैर्नाभ्युपगम्यते अपसिद्धान्तप्रसङ्गात्; इत्**यप्यनुपपन्नम्;** प्रसङ्गसाधनत्वा-देतस्य, श्रोत्रादो हि प्राप्यकारित्वात्यासन्नार्थप्रकाशकत्वयोर्व्याप्यव्यापकभावसिद्धौ सत्यां परस्य व्यापकाभावेष्ट्याऽत्यासन्नार्थाप्रकाशकत्वलक्षणयाऽनिष्टस्य प्राप्तकारित्वलक्षणव्याप्याभावस्यापादान-मात्रमेवानेन विधीयते, इत्युक्तदोषाप्रसङ्गः । नाप्यनैकान्तिको विरुद्धो वा; विपक्षस्यैकदेशे तत्रैव वाऽस्याऽप्रवृत्तेः ।

**न च** स्पर्शनेन प्राप्यकारिणाप्यत्यासन्नस्याभ्यन्तरशरीरावयवस्पर्शस्याप्रकाशनाद**नेकान्तः;** अस्य तत्कारणत्वेन तदविषयत्वात् । स्वकारणव्यतिरिक्तो हि स्पर्शादिः स्पर्शनादीन्द्रियाणां विषयः, तत्रैवा-भिमुख्यसम्भवेनामीषां प्रकाशनयोग्यतोपपत्तेः । कथमन्यथैकशरीरप्रदेशान्तरगतस्पर्शनेन तत्प्रदेशान्तरगतः स्पर्शः प्रकाश्येत ? न च कामलादयोऽञ्जनादयो वा चक्षुषः कारणं येन तेषामप्यनेन न्यायेन प्रकाशनं न स्यात्, स्वसामग्रीतस्तत्सन्निधानात्प्रागेवास्योत्पन्नत्वात् । नापि कालात्य-यापदिष्टोयम्; प्रत्यक्षस्य पक्षाबाधकत्वेन प्रागेव समर्थनात्, आगमस्य च तद्बाधकस्यासम्भवात् । नापि सत्प्रतिपक्षः; विपरीतार्थोपस्थापकानुमानानां प्रागेव प्रतिध्वस्तत्वादिति । तथा, 'चक्षुर्गत्वा नाऽर्थेनाभि-सम्बद्ध्यते इन्द्रियत्वात्स्पर्शनादीन्द्रियवत्' इत्यनुमानाच्चास्याप्राप्यकारित्वसिद्धिः । अर्थस्य च तद्देशागमने प्रत्यक्षविरोध इति ।

॥ तत्त्वार्थराजवार्तिकः ॥

सर्वेन्द्रियाणामविशेषेण व्यञ्जनावग्रहप्रसङ्गे यत्रासंभवस्तदर्थं प्रतिषेधमाह-

**न चक्षुरनिन्द्रियाभ्याम् ॥१९॥**

चक्षुषा अनिन्द्रियेण च व्यञ्जनावग्रहो न भवति । कुतः ?

**व्यञ्जनावग्रहाभावः चक्षुर्मनसोरप्राप्यकारित्वात्** ।१। यतोऽप्राप्तमर्थमविदिक्कं युक्तसन्निकर्षविषयेऽवस्थितं बाह्यप्रकाशाभिव्यक्तमुपलभते चक्षुः, मनश्चाप्राप्तम्, ततो नानयोर्व्यञ्जनावग्रहोऽस्ति ।

**इच्छामात्रमिति चेत्; न; सामर्थ्यात्** ।२। **स्यादेत**त्इच्छामात्रमिदम्-'अप्राप्तार्थावग्राहि चक्षुः' इति; **तन्न**; किं कारणम् ? सामर्थ्यात् । कथं सामर्थ्यम् ? आगमतो युक्तितश्च । आगमतस्तावत्-

**"पुट्ठं सुणेदि सद्दं अपुट्ठं पुण पस्सदे रूवं ।**
**गंधं रसं च फासं बद्धं पुट्ठं विजाणादि ॥" इति ।**

युक्तितोऽपि-

अप्राप्यकारि चक्षुः स्पृष्टानवग्रहात् । यदि प्राप्यकारि स्यात्, त्वगिन्द्रियवत् स्पृष्टमञ्जनं गृह्णीयात् । न च गृह्णाति । अतो मनोवदप्राप्यकारीत्यवसेयम् ।

**अत्र केचिदाहुः** प्राप्यकारि चक्षुः आवृतानवग्रहात् त्वगिन्द्रियवदिति; **अत्रोच्यते**-काचाभ्रपटलस्फटिकावृतार्थावग्रहे सति अव्यापकत्वादसिद्धो हेतुः, वनस्पतिचैतन्ये स्वापवत् । तथा संशयहेतुः, अप्राप्यकारिण्ययस्कान्तोपले साध्यविपक्षेऽपि दर्शनादिति ।

भौतिकत्वात् प्राप्यकारि चक्षुरग्निवदिति **चेत्; न;** अयस्कान्तेनैव प्रत्युक्तत्वात् ।

बाह्येन्द्रियत्वात् प्राप्यकारि चक्षुरिति **चेत्; न;** द्रव्येन्द्रियोपकरणस्य भावेन्द्रियस्य प्राधान्यात् ।

अप्राप्यकारित्वे व्यवहितातिविप्रकृष्टग्रहणप्रसङ्ग इति **चेत्; न;** अयस्कान्तेनैव प्रत्युक्तत्वात् । अयस्कान्तोपलमप्राप्य लोहमाकर्षदपि न व्यवहितमाकर्षति नातिविप्रकृष्टमिति संशयावस्थमेतदिति ।

अप्राप्यकारित्वे संशयविपर्ययाभाव इति **चेत्; न;** प्राप्यकारित्वेऽपि तदविशेषात् ।

**कश्चिदाह**-रश्मिवच्चक्षुः, तैजसत्वात्, तस्मात्प्राप्यकारीति, अग्निवदिति; **एतच्चायुक्तम्;** अनभ्युपगमात् । न वयमभ्युपगच्छामः 'तैजसं चक्षुः' इति । तेजोलक्षणमौष्ण्यमिति कृत्वा चक्षुरिन्द्रियस्थानमुष्णं स्यात् । न च तद्देशं स्पर्शनेन्द्रियम् उष्णस्पर्शोपलम्भि दृष्टमिति । इतश्च, अतैजसं चक्षुः भासुरत्वानुपलब्धेः । अदृष्टवशादनुष्णाभासुरत्वमिति **चेत्, न;** अदृष्टस्य गुणत्वात्, अक्रियस्य

भावस्वभावनिग्रहासामर्थ्यात् । नक्तञ्चररश्मिदर्शनाद् रश्मिवच्चक्षुरिति **चेत्**; **न**; अतैजसोऽपि पुद्गल-द्रव्यस्य भासुरत्वपरिणामोपपत्तेरिति ।

किञ्च, गतिमद्वैधर्म्यात् । इह यद् गतिमद्भवति न तत् सन्निकृष्टविप्रकृष्टवर्थावभिन्नकालं प्राप्नोति, न च तथा चक्षुः । चक्षुर्हि शाखाचन्द्रमसावभिन्नकालमुपलभते, यावता कालेन शाखां प्राप्नोति तावता चन्द्रमसमिति स्पष्टं गतिमद्वैधर्म्यम्, तस्मान्न गतिमच्चक्षुरिति ।

यदि च प्राप्यकारि चक्षुः स्यात्; तमिस्रायां रात्रौ दूरेऽग्नौ प्रज्वलति तत्समीपगतद्रव्योपलम्भनं भवति कुतो नान्तरालगतद्रव्यालोचनम् ? प्रकाशाभावादिति **चेत्**; **न**; तैजसत्वादग्न्यादिवत् सहायान्तरानपेक्षत्वप्रसङ्गात् ।

किञ्च, यदि प्राप्यकारि चक्षुः स्यात् सान्तराधिकग्रहणं न प्राप्नोति । नहीन्द्रियान्तरविषये गन्धादौ सान्तरग्रहणं दृष्टं नाप्यधिकग्रहणम् । **अथ** मतंबहिरधिष्ठानाद्वृत्तिरिन्द्रियस्य अत उपपन्नं तद्विषयस्य सान्तराधिकग्रहणमिति; **तदयुक्तम्**; यस्मान्न बहिरधिष्ठानादिन्द्रियम्, तत्र चिकित्सादिदर्शनात्, अन्यथा अधिष्ठानपिधानेऽपि ग्रहणप्रसङ्गः । मनश्चाबहिर्भावात् । मनसाऽधिष्ठितं हि इन्द्रियं स्वविषये व्याप्रियते, न च मनो बहिरधिष्ठानादस्ति, तदभावादग्रहणप्रसङ्गः । अनुवृत्तौ च संभवाभावात् विप्रकीर्णं चक्षुरश्मिसमूहं कथमणुमनोऽधिष्ठास्यति ?

**॥ तत्त्वार्थसर्वार्थसिद्धिटीका ॥**

अथ सर्वेन्द्रियेषु व्यञ्जनाऽवग्रहे प्रसक्ते इन्द्रियद्वयनिषेधार्थं सूत्रमिदमुच्यते–

**न चक्षुरनिन्द्रियाभ्याम् ॥१९॥**

चक्षुश्चानिन्द्रियं च चक्षुरनिन्द्रिये, ताभ्यां चक्षुरनिन्द्रियाभ्याम् । चक्षुषानिन्द्रियेण च मनसा व्यञ्जनावग्रहो न भवति । यतः कारणादप्राप्तमर्थमविविक्तं युक्तं सन्निकर्षविषयेऽवस्थितं बाह्यप्रकाशा-भिव्यक्तं चक्षुरुपलभते । मनश्चाप्राप्तमुपलभते इति कारणात् चक्षुर्मनसोर्व्यञ्जनावग्रहो न भवति । चक्षुषोऽप्राप्यकारित्वं कथमवसीयते ? आगमाद्युक्तितश्च । कोऽसावागमः ?

**"पुट्ठं सुणोदि सद्दं अपुट्ठं पुणवि पस्सदे रूवं ।**
**गंधं रसं च फासं बद्धं पुट्ठं वियाणाहि ॥"**

कासौ युक्तिः ? चक्षुरप्राप्यकारि । कुतः ? स्पृष्टानवग्रहात् । यत् चक्षुषा स्पृष्टं तन्नाव-गृह्णातीत्यर्थः । यदि चक्षुः प्राप्यकारि स्यात् तर्हि स्पृष्टमञ्जनं त्वगिन्द्रियवत् तदवगृह्णीयात् । न चावगृह्णाति । चक्षुः स्पृष्टं वस्तु नेक्षत इत्यर्थः । ततः कारणात् मनोवत् चक्षुरप्राप्यकारीति वेदितव्यम् ।

## ॥ तत्त्वार्थ श्लोक वार्तिकः ॥

**न चक्षुरनिन्द्रियाभ्याम् ॥१९॥**

किमवग्रहेहादीनां सर्वेषां प्रतिषेधार्थमिदमाहोस्विद् व्यंजनावग्रहस्यैवेति शंकायामिदमाचष्टे:;-

**नेत्याद्याह निषेधार्थमनिष्टस्य प्रसङ्गिणः । चक्षुर्मनोनिमित्तस्य व्यंजनावग्रहस्य तत् ॥१॥**

**व्यञ्जनावग्रहो नैव चक्षुषानिन्द्रियेण च । अप्राप्यकारिणा तेन स्पष्टावग्रहहेतुना ॥२॥**

**प्राप्यकारीन्द्रियश्चार्थे प्राप्तिभेदाद्धि कुत्रचित् । तद्योग्यतां विशेषां वा स्पष्टावग्रहकारणम् ॥३॥**

**यथा नवशरावादौ द्वित्राद्यास्तोयबिन्दवः । अव्यक्तामार्द्रतां क्षिप्ताः कुर्वन्ति प्राप्यकारिणः ॥४॥**

**पौनःपुन्येन विक्षिप्ता व्यक्तां तामेव कुर्वते । तत्प्राप्तिभेदतस्तद्वदिन्द्रियाण्यप्यवग्रहम् ॥५॥**

**अप्राप्तिकारिणी चक्षुर्मनसी कुरुतः पुनः । व्यक्तामर्थपरिच्छित्तिमप्राप्तेरविशेषतः ॥६॥**

**यथायस्कान्तपाषाणः शल्याकृष्टिं स्वशक्तितः । करोत्यप्राप्तिकारीति व्यक्तिमेव शरीरतः ॥७॥**

न हि यथा स्वार्थयोः स्पृष्टिलक्षणाप्राप्तिरन्योपचयस्पृष्टितारतम्याद्भिद्यते तथा तयोः प्राप्तिर्देश-व्यवधानलक्षणापि कात्स्र्न्येनास्पृष्टेरविशेषात् तद्व्यवधायकदेशास्पदादप्राप्तिरपि भिद्यते एवेति **चेत्** किमयं पर्युदासप्रतिषेधः प्रसज्यप्रतिषेधो वा ! **प्रथमपक्षेर्थाप्रा**प्तिरन्या न वार्थः पुनरेवं "नञिव युक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः" इति वचनात् सा च नावग्रहादेः कारणमिति तद्भेदेपि कुतस्तद्भेदः । **द्वितीयपक्षे** तु प्राप्तेरभावोऽप्राप्तिः सा च न भिद्यते भावस्य स्वयं सर्वत्राभेदात् । कथमवग्रहाद्युत्पत्तौ सा कारणमिति **चेत्** तस्यां तत्प्रादुर्भावानुभवात् निमित्तमात्रत्वोपपत्तेः प्राप्तिवत् प्रधानं तु कारणं स्वावरणक्षयोपशम एवेति न किञ्चन विरुद्धमुत्पश्यामः ॥ अत्र परस्य चक्षुषि प्राप्यकारित्वसाधनमनूद्य दूषयन्नाह;-

**चक्षुः प्राप्तपरिच्छेदकारणं रूपव्यक्तितः । स्पर्शनादिवदित्येके तत्र पक्षस्य बाधनात् ॥८॥**

**बाह्यं चक्षुर्यदा तावत् कृष्णतारादि दृश्यताम् । प्राप्तं प्रत्यक्षतो बाधात् तस्यार्थाप्राप्तिवेदिनः ॥९॥**

**शक्तिरूपमदृश्यं चेदनुमानेन बाधनम् । आगमेन सुनिर्णीतासंभवद्बाधकेन च ॥१०॥**

व्यक्तिरूपस्य चक्षुषः प्राप्यकारित्वे साध्ये प्रत्यक्षेण बाध्यते पक्षोनुष्णोग्निरित्यादिवत् । प्रत्यक्षतः साध्यविपर्ययसिद्धेः शक्तिरूपस्य तस्य तथात्वसाधनेनुमानेन बाध्यते तत एव सुनिर्णीतासंभवद्-बाधकेनागमेन च । किं तदनुमानं पक्षस्य बाधकमित्याह;-

**तत्राप्राप्तिपरिच्छेदि चक्षुः स्पष्टानवग्रहात् । अन्यथा तदसंभूतेर्घ्राणादेरिव सर्वथा ॥११॥**

केवलव्यतिरेकानुमानमन्यथानुपपत्त्येकलक्षणयोगादुपपन्नं पक्षस्य बाधकमिति भावः । अत्र हेतोरसिद्धतामाशंक्य परिहरन्नाह;-

**चक्षुषा शक्तिरूपेण तारकागतमञ्जनं । न स्पृष्टमिति तद्धेतोरसिद्धत्वमिहोच्यते ॥१२॥**

**शक्तिः शक्तिमतोन्यत्र तिष्ठतार्थेन युज्यते । तत्रस्थेन तु नैवेति कोन्यो ब्रूयाज्जडात्मनः।१३।**

व्यक्तिरूपाच्चक्षुषः शक्तिमतोन्यत्र दूरादिदेशे तिष्ठतार्थेन घटादिना शक्तीन्द्रियं युज्यते न पुनर्व्यक्तिनयनस्थेनाञ्जनादिनेति कोन्यो जडात्मवादिनो ब्रूयात् । दूरादिदेशस्थेनार्थेन व्यक्तिचक्षुषः सम्बधपूर्वकं चक्षुः सम्बध्यते तद्वेदनस्यान्यथानुपपत्तेरिति **चेत्** स्यादेतदेवं यद्यसम्बधेन तत्र वेदनमुपजनयितुं नेत्रेण न शक्येत मनोवत् । न हि प्राप्तिरेव तस्य विषयज्ञानजननिमित्तमञ्जनादेः प्राप्तस्याप्रवेदनात् । योग्यतायास्तत्र भावात्तदप्रवेदनमिति **चेत्** सैवास्तु किं प्राप्तिनिर्बन्धेन । योग्यतायां हि सत्यां किञ्चिदक्षं प्राप्तमर्थं परिच्छिनत्ति किञ्चिदप्राप्तमिति यथाप्रतीतमभ्युपगन्तव्यम् । न हि प्राप्त्यभावेर्थपरिच्छेदनयोग्यताक्षस्य न सम्भवति मनोवद्विरोधाभावात् । येन प्रतीत्यतिक्रमः क्रियते ततो न स्वरूपासिद्धो हेतुः ।

पक्षाव्यापकोपि न भवतीत्याह;-

**पक्षाव्यापकता हेतोर्मनस्यप्राप्यकारिणि । विरहादिति मन्तव्यं नास्यापेक्षत्वयोग्यतः ॥१४॥**

चक्षुरेव ह्यनुपक्षीकृतं न पुनर्मनस्तस्याप्राप्यकारित्वेन प्रसिद्धत्वात् स्वयमप्रसिद्धस्य साध्यत्वेन व्यवस्थापनात् । न वेदमप्रसिद्धमित्याह;-

**मनसोप्राप्यकारित्वं नाप्रसिद्धं प्रवादिनाम् । क्वान्यथातीतदूरादिपदार्थग्रहणं ततः ॥१५॥**

न ह्यतीतादयो दूरस्थार्था मनसा प्राप्यकारिणा विषयीकर्तुं शक्या इति सर्वैः प्रवादिभिरप्राप्यकारि तदङ्गीकर्तव्यमन्यथातीतदूरादिवस्तुपरिच्छित्तेरनुपपत्तेः । ततो न पक्षाव्यापको हेतुः स्पृष्टानवग्रहादिति पक्षीकृते चक्षुषि भावात् । नाप्यनैकान्तिको विरुद्धो वा प्राप्यकारिणि विपक्षे स्पर्शनादाव-सम्भवादित्यतो हेतोर्भवत्येव साध्यसिद्धिः ॥ इतश्च भवतीत्याह;-

**काचाद्यन्तरितार्थानां ग्रहाच्चाप्राप्तकारिता । चक्षुषः प्राप्यकारित्वे मनसः स्पर्शनादिवत् ।१६।**

**ननु च** यद्यन्तरितार्थग्रहणं स्वभावकालान्तरितार्थग्रहणमिष्यते तदा न सिद्धं साधनं चक्षुषि तदभावात् । देशान्तरितार्थग्रहणं चेत्तदेव साध्यं साधनं चेत्यायातं । देशान्तरितार्थग्राहित्वमेव ह्यप्राप्यकारित्वमिति **कश्चित्, तदसत्** । चक्षुषोप्राप्तमर्थं परिच्छेत्तुं शक्तेः साध्यत्वात्तत्राप्रसिद्धत्वाद-प्राप्तकारणशक्तित्वस्याप्राप्यकारित्वस्येष्टत्वात् । साधनस्य पुनरन्तरितार्थग्रहणस्य स्वसंवेदनप्रत्यक्ष-सिद्धस्याभिधानात् ।

**ननु च** काचाद्यन्तरितार्थस्य प्राप्तस्यैव चक्षुषा परिच्छेदादसिद्धो हेतुरित्याशंकां परिहरन्नाह;-

**विभज्य स्फटिकादींश्चेत्कथञ्चिच्चक्षुरंशवः । प्राप्नुवंस्तूलराश्यादीन्नश्वरान्नेति चाद्भुतम् ।१७।**

निष्ठुरस्थिरस्वभावान् स्फटिकादीन् विभज्य नयनरश्मयः प्रकाशयन्ति न पुनर्मृदुनाशिस्वभावांस्तूलराश्यादीनिति किमत्यद्भुतमाश्रित्य हेतोरसिद्धतामुद्भावयन्तः कथं स्वस्थाः ॥

**सामर्थ्यं पारदीयस्य यथाऽयस्यानुभेदने । नालंबूभाजनोद्भेदे मनागपि समीक्ष्यते ॥१८॥**

**काचादिभेदने शक्तिस्तथा नयनरोचिषाम् । सम्भाव्या तूलराश्यादिभिदायां नेति** केचन ।१९।

तदप्रातीतिकं **सोयं काचादिरिति निश्चयात् । विनाशव्यवहारस्य तत्राभावाच्च कस्यचित्** ॥२०॥

**समानसन्निवेशस्य तस्योत्पत्तेरनाशिताम् । जनो मन्येत निर्लूनकेशादेर्वेति चेन्मतम्** ॥२१॥

**न क्वचित्प्रत्यभिज्ञानमेकत्वस्य प्रसाधकम् । सिद्ध्येदिति क्षणध्वंसि जगदापातमञ्जसा** ।२२।

**आत्माद्येकत्वसिद्धिश्चेत्प्रत्यभिज्ञानतो दृढात् । दार्ढ्यात्तत्र कुतो बाधाभावाच्चेत्प्रकृते समम् ॥ २३ ॥**

न हि स्फटिकादौ प्रत्यभिज्ञानस्यैकत्वपरामर्शिनः किञ्चिद्बाधकमस्ति पुरुषादिवत् ।

तद्भेदेनाभ्युपगमे तु बाधकमस्तीत्याह;-

**काचाद्यन्तरितानर्थान् प्रश्यतश्च निरन्तरम् । तत्र भेदस्य निष्ठानान्नाभिन्नस्य करग्रहः ॥२४॥**

सततं पश्यतो हि काचशिलादीन्नयनरश्मयो निरन्तरम् भिदन्तीति प्रतिष्ठायां कथमभिन्नस्वभावानां तथा तस्य हस्तेन ग्रहणं तच्चेदस्ति तद्भेदाभ्युपगमं बाधिष्यत इति किं नश्चिन्तया ॥

**विनाशानन्तरोत्पत्तौ पुनर्नाशे पुनर्भवेत् । कुतो निरन्तरम् तेन छादितार्थस्य दर्शनम् ॥२५॥**

**स्पर्शनेन च निर्भेदशरीरस्य महोङ्गिनाम् । सान्तरेणानुभूयन्ते तस्य स्पर्शनदर्शने ॥२६॥**

स्फटिकादेराशूत्पादविनाशाभ्यामभेदग्रहणं निरन्तरं पश्यतः सन्ततं न तद्भेदाभ्युपगमस्य बाधकमित्ययुक्तमाश्वेव स्पर्शनदर्शनयोस्तत्र प्रसङ्गात् । स्पर्शनास्पर्शनयोश्च । न च तत्र तदा कस्यचिदुपयुक्तस्यादर्शनास्पर्शनाभ्यां व्यवहितदर्शनस्पर्शने समनुभूयेते तद्विनाशस्य पूर्वोत्तरोत्पादाभ्यामाशु भाविभ्यां तिरोहितत्वान्न तत्रादर्शनमस्पर्शनं वा स्यादिति **चेत्** । नन्वेवं तदुत्पादस्य पूर्वोत्तरविनाशाभ्यामाशु भाविभ्यामेव विरोधान्नादर्शनस्पर्शने मा भूतां तदुत्पादयोः स्वमध्यगतविनाशतिरोधाने सामर्थ्यं भावस्वभावत्वेन बलीयस्त्वात् तद्विनाशयोः स्वमध्यगतोत्पादतिरोधानेऽभावस्वभावत्वेन दुर्बलत्वादिति चेन्न, भावाभावस्वभावयोः समानबलत्वात् । तयोरन्यतरबलीयस्त्वे युगपद्भावाभावात्मकवस्तुप्रतीतिविरोधात् । न हि वस्तुनो भाव एव कदाचित्प्रतीयते स्वरूपादिचतुष्टयेनेव पररूपादिचतुष्टयेनापि भावप्रतीतिशक्तेः । न चानाद्यनन्तसर्वात्मकं च वस्तु प्रतिभाति यतस्तथाभ्युपगमः श्रेयान् । नाप्यभाव एव वस्तुनोनुभूयते पररूपादिचतुष्टयेनेव स्वरूपादिचतुष्टयेनाप्यभावप्रतिपत्तिप्रसङ्गात् । न च सर्वथाप्यसत्प्रतिभाति यतस्तदभ्युपगमोपि कस्यचित्प्रतितिष्ठेत् । प्ररूपितप्रायं च भावाभावस्वभाववस्तु प्रतिभासनमिति कृतं प्रपञ्चेन । सर्वथोत्पादे विनाशे च पुनः

पुनः स्फटिकादौ दर्शनस्पर्शनयोः सान्तरयोः प्रसञ्जनस्य दुर्निवारत्वात् तदर्थोनुमीयेतेति **चेन्न**, तेषां काचादेर्न भ्रान्तत्वमर्थोपरक्तस्य विज्ञानस्यानुद्गतिर्नः (?) ॥

**प्राप्तस्यान्तरितार्थेन विभिन्नस्य परीक्षणात् । नार्थस्य दर्शनं सिद्ध्येदनुमा च तथैव वा ।२७।**

**नन्वत्यन्तपरोक्षत्वे सत्यार्थस्यानुमागतेः । विज्ञानस्योपरक्तत्वे तेन विज्ञायते कथम् ॥२८॥**

**तया शश्वददृश्येन वेधसा निर्मितं जगत् । कथं निश्चीयते कार्यविशेषाच्चेत्परैरपि ॥२९॥**

यथैवात्रास्मदादिविनिर्मितेतरच्छरीरादिविशिष्टं कार्यमुपलभ्य तस्येश्वरेणात्यन्तपरोक्षेण निर्मितत्वमनुमीयते भवता तथा परैरपि विज्ञानं नीलाद्यर्थाकारविशिष्टं कार्यमभिसंवेद्य नीलाद्यर्थोनुमीयत इति समं पश्यामः । यथा च काचाद्यन्तरितार्थे प्रत्यक्षता व्यवहारो विभ्रमवशादेवं बहिरर्थेपीति कुतो मतान्तरं निराक्रियते ॥

**प्रत्यक्षेणाप्रबाधेन बहिरर्थस्य दर्शनम् । ज्ञानस्यान्तः प्रसिद्धं चेन्नान्यथा परिकल्प्यते ॥३०॥**

**काचाद्यन्तरितार्थेपि समानमिदमुत्तरं । काचादेर्भिन्नदेशस्य तस्याबाधं विनिश्चयात् ॥३१॥**

**यथा मुखं निरीक्षन्ते दर्पणे प्रतिबिम्बितम् । स्वदेहे संस्पृशन्तीति बाधा सिद्धात्र धीमताम् ॥३२ ॥**

**तथा न स्फटिकाम्भोनुपटलावृत्तवस्तुनि । स्वदेशादितया तस्य तदा पश्चाच्च दर्शनात् ।३३।**

न च नयनरश्मयः प्रसिद्धाः प्रमाणसामर्थ्यादिः स्फटिकादीन् विभज्य घटादीन् प्रकाशयन्तीत्याह;-

**न चेक्षन्तेस्मदादीनां स्फुरन्तश्चक्षुरंशवः । सान्धकारनिशीथिन्यामन्यान्वभिभवादपि ॥३४॥**

**यद्यनुद्भूतरूपास्ते शक्यन्ते नेक्षितुं जनैः । तदा प्रमान्तरं वाच्यं तत्सद्भावावबोधकम् ।३५।**

**रश्मिवल्लोचनं सर्वं तैजसत्वात् प्रदीपवत् । इति सिद्धं न नेत्रस्य ज्योतिष्कत्वं प्रसाधयेत् ।३६।**

**तैजसं नयनं सत्सु सन्निकृष्टरसादिषु । रूपस्य व्यञ्जकत्वाच्चेत्प्रदीपादिवदीर्यते ॥३७॥**

**हेतोर्दिननिशानाथमयूखैर्व्यभिचारिता । तैजसं निहिते चन्द्रकान्तरं तत्क्षितौ भवाः ॥३८॥**

**तेजोनुसूत्रिता ज्ञेया गा मूलोष्णवती प्रभा । नान्या मकरतादीनां पार्थिवत्वप्रसिद्धितः।३९।**

चक्षुषस्तैजसत्वे साध्ये रूपस्यैव व्यञ्जकत्वादित्यस्य हेतोश्चन्द्राद्युद्योतेन मूलोष्णत्वरहितेन पार्थिवत्वेन व्यभिचारादगमकत्वात्ततैजसत्वस्यासिद्धेर्न ततो रश्मिवच्चक्षुषः सिद्ध्येत् ॥

**रूपाभिव्यञ्जने चाक्ष्णां नाशे क्वापेक्षणं भवेत् । तैजसत्वात्प्रदीपादेरिव सर्वस्य देहिनः ।४०।**

**यथैकस्य प्रदीपस्य सुस्पष्टार्थप्रकाशने । मन्दत्वादसमर्थस्य द्वितीयादेरपेक्षणम् ॥४१॥**

**तथाक्ष्णोर्न विरुद्ध्येत सूर्यालोकाद्यपेक्षणं । स्वकार्यो हि स्वजातीयं सहकारि प्रतीक्ष्यते ॥४२॥**

*तदसञ्चेतनस्यार्थप्रकाशित्वाविनिश्चयात्* । कथञ्चिदपि दीपादिनिरपेक्षस्य प्रदीपवत् ॥४३॥

**अन्धकारावभासोस्ति विनालोकेन चेन्न वै । प्रसिद्धस्तेन्धकारोस्ति ज्ञानाभावात्परोर्थकृत् ॥४४॥**

**परेष्ट्यास्तीति चेत्तस्याः सिद्धं चक्षुरतैजसं । प्रमाणत्वेन्यथा नान्धकारः सिद्ध्येत्ततस्तव ४५**

**अतैजसाञ्जनापेक्षि चक्षू रूपं व्यनक्ति यं । नातः समानजातीयसहकारि नियम्यते ॥४६॥**

तैजसमेवाञ्जनादि रूपप्रकाशने नेत्रस्य सहकारि न पुनः पार्थिवमेव तत्रानुद्भूतस्य तेजोद्रव्यभावादित्य**युक्तं** प्रमाणाभावात् । तैजसमञ्जनादि रूपावभासने नयनसहकारित्वाद्दीपादिवत्यप्य**सम्यक्**, चन्द्रोद्योतादिनानैकान्तात् । तस्यापि पक्षीकरणान्न व्यभिचार इति **चेन्न**, हेतोः कालात्ययापदिष्टत्वप्रसङ्गात् । पक्षस्य प्रत्यक्षानुमानागमबाधितत्वात् तस्य प्रत्यक्षेणातैजसत्वेनानुभवात् । न तैजसश्चन्द्रोद्योतो नयनानन्दहेतुत्वात्सलिलादिवदित्यनुमानात् । **मूलोष्णवती प्रभा तेज** इत्या**गमा**च्चाब्धिजलकल्लोलैश्चन्द्रकान्तप्रतिहताः सूर्यांशवः प्रद्योतन्ते शिशिराश्च भवन्ति । तत एव नयनानन्दहेतव इत्या**गमस्तु न प्रमाण**, युक्त्याननुगृहीतत्वात् तथाविधागमान्तरवत् । तदननुगृहीतस्यापि प्रमाणत्वेऽतिप्रसङ्गात् । पुरुषाद्वैतप्रतिपादकागमस्य प्रमाणत्वप्रसङ्गात् सकलयौगमतविरोधात् । किञ्च–

**किमुष्णस्पर्शविज्ञानं तैजसेऽक्ष्णि न जायते । तस्यानुद्भूततायां तु रूपानुद्भूतता कुतः ॥४७॥**

**तेजोद्रव्यं ह्यनुद्भूतस्पर्शमुद्भूतरूपभृत् । दृष्टं यथा प्रदीपस्य प्रभाभारः समन्ततः ॥४८॥**

**तथानुद्भूतरूपं तदुद्भूतस्पर्शमीक्षितम् । यथोष्णोदकसंयुक्तं परमुद्भूततद्द्वयम् ॥४९॥**

**नानुभूतद्वयं तेजो दृष्टं चक्षुर्यतस्तथा । अदृष्टवशतस्तच्चेत्सर्वमक्षं तथा न किम् ॥५०॥**

**सुवर्णघटवत्तत्स्यादित्यसिद्धं निदर्शनं । प्रमाणबलतस्तस्य तैजसत्वाप्रसिद्धितः ॥५१॥**

**नोष्णवीर्यत्वतस्तस्य तैजसत्वं प्रसिद्ध्यति । व्यभिचारान्मरीचादिद्रव्येण तैजसेन वः ॥५२॥**

**ततो नासिद्धता हेतोः सिद्धसाध्यस्य बुध्यते । चक्षुषत्वादितोध्वानेनित्यत्वस्य यथैव हि ॥५३।**

तदेवं तैजसत्वादित्यस्य हेतोरसिद्धत्वान्न चक्षुषि रश्मिवत्त्वसिद्धिनिबन्धनत्वं यतस्तस्य रश्मयोर्थप्रकाशनशक्तयः स्युः सतामपि तेषां बृहत्तरगिरिपरिच्छेदनमयुक्तं मनसोधिष्ठाने सर्वथेत्याह;–

**सन्तोपि रश्मयो नेत्रे मनसाधिष्ठिता यदि । विज्ञानहेतवोऽर्थेषु प्राप्तेष्वेवेति मन्यते ॥५४॥**

**मनसोऽणुत्वतश्चक्षुर्मयूखेष्वनधिष्ठितेः । भिन्नदेशेषु भूयस्त्वपरमाणुवदेकशः ॥५५॥**

**महीयसो महीध्रस्य परिच्छित्तिर्न युज्यते । क्रमेणाधिष्ठितौ तस्य तदंशेष्वेव संविदः ॥५६॥**

**निरंशोऽवयवी शैलो महीयानपि रोचिषा । नयनेन परिच्छेद्यो मनसाधिष्ठितेन चेत् ॥५७॥**

**न स्यान्मेचकविज्ञानं नानावयवगोचरम् । तद्देशिविषयं चास्य मनोहीनैर्दृगंशुभिः ॥५८॥**

**शैलचन्द्रमसोश्चापि प्रत्यासन्नदविष्ठयोः । सह ज्ञानेन युज्येत प्रसिद्धमपि सद्धियाम् ॥५९॥**

**कालेन यावता शैलं प्रयान्ति नयनांशवः । केचिच्चन्द्रमसं चान्ये तावतैवेति युज्यते ॥६०॥**

**तयोश्च क्रमतो ज्ञानं यदि स्यात्ते मनोद्वयं । नान्यथैकस्य मनसस्तदधिष्ठित्यसम्भवात् ॥६१॥**

**विकीर्णानेकनेत्रांशुराशेरप्राप्यकारिणः । मनसोधिष्ठितौ कायस्यैकदेशेपि तिष्ठतः ॥६२॥**

**सहाक्षपञ्चकस्यैतत्किं नाधिष्ठायकं मतं । यतो न क्रमतोभीष्टं रूपादिज्ञानपञ्चकम् ॥६३॥**

**तथा च युगपज्ज्ञानानुत्पत्तेरप्रसिद्धितः । साध्ये मनसि लिङ्गत्वं न स्यादिति मनः कुतः ॥६४॥**

**मनोनधिष्ठिताश्चक्षूरश्मयो यदि कुर्वते । स्वार्थज्ञानं तदप्येतद्दूषणं दुरतिक्रमम् ॥६५॥**

**ततोक्षिरश्मयो भित्त्वा काचादीनर्थभासिनः । तेषामभावतो भावेप्युक्तदोषानुषङ्गतः ॥६६॥**

**काचाद्यन्तरितार्थानां ग्रहणं चक्षुषः स्थितम् । अप्राप्यकारितालिङ्गं परपक्षस्य बाधकम् ॥६७॥**

एवं पक्षस्याध्यक्षबाधामनुमानबाधां च प्ररूप्यागमबाधां च दर्शयन्नाह;-

**स्पृष्टं शब्दं शृणोत्यक्षमस्पृष्टं रूपमीक्ष्यते । स्पृष्टं बद्धं च जानाति स्पर्शं गंधं रसं तथा ॥६८॥**

**इत्यागमश्च तस्यास्ति बाधको बाधवर्जितः । चक्षुषोप्राप्यकारित्वसाधनः शुद्धधीमतः ॥६९॥**

ननु नयनाप्राप्यकारित्वसाधनस्यागमस्य बाधारहितत्वमसिद्धमिति पराकूतमुपदर्श्य दूषयन्नाह;-

**मनोबुद्धिप्रकृष्टार्थग्राहकत्वानुषञ्जनं । नेत्रस्याप्राप्यकारित्वे बाधकं येन गीयते ॥७०॥**

**तस्य प्राप्तानुगन्धादिग्रहणस्य प्रसञ्जनम् । घ्राणादेः प्राप्यकारित्वे बाधकं केन बाध्यते ॥७१॥**

**सूक्ष्मे महति च प्राप्तेरविशेषेपि योग्यता । गृहीतुं चेन्महद्द्रव्यं दृश्यं तस्य न चापरम् ॥७२॥**

**तर्ह्यप्राप्तेरभेदेपि चक्षुषः शक्तिरीदृशी । यथा किञ्चिद्धि दूरार्थमविदिक्कं प्रपश्यति ॥७३॥**

ननु च घ्राणादींद्रियं प्राप्यकारि प्राप्तमपि तत्राणुगन्धादियोगिनः परिच्छिनत्ति नास्मदादेस्तादृशादृष्टविशेषस्याभावात् महत्त्वाद्युपेतद्रव्यं गन्धादि तु परिच्छिनत्ति तादृगदृष्टविशेषस्य सद्भावादित्यदृष्टवैचित्र्यात्तद्विज्ञानभावाभाववैचित्र्यं मन्यमानान् प्रत्याह;-

***समं चादृष्टवैचित्र्यं ज्ञानवैचित्र्यकारणं । स्याद्वादिनां परेषां चेत्यलं वादेन तत्र नः ॥७४॥***

स्याद्वादिनामपि हि चक्षुरप्राप्यकारि केषाञ्चिदतिशयज्ञानभृतामृद्धिमतामस्मदाद्यगोचरं विप्रकृष्टस्वविषयपरिच्छेदकं तादृशं तदावरणक्षयोपशमविशेषसद्भावात् । अस्मदादीनां तु यथाप्रतीति स्वार्थप्रकाशकं स्वानुरूपतदावरणक्षयोपशमादिति सममदृष्टवैचित्र्यं ज्ञानवैचित्र्यनिबन्धनमुभयेषां ।

ततो न नयनाप्राप्यकारित्वं बाध्यते केनचित् घ्राणादिप्राप्यकारित्ववदिति न तदागमस्य बाधोस्ति येन बांधको न स्यात् पक्षस्य । तदेवं–

**प्रत्यक्षेणानुमानेन स्वागमेन च बाधितः । पक्षः प्राप्तिपरिच्छेदकारि चक्षुरिति स्थितः ॥७५॥**

**कालात्ययापदिष्टश्च हेतुर्बाह्येन्द्रियत्वतः । इत्यप्राप्तार्थकारित्वे घ्राणादेरिव वाञ्छिते ॥७६॥**

न हि पक्षस्यैवं प्रमाणबाधायां हेतुः प्रवर्तमानः साध्यसाधनायालमतीतकालत्वादन्यथातिप्रसङ्गात् ॥

**एतेन भौतिकत्वादि साधनं तत्र वारितं । प्रत्येतव्यं प्रमाणेन पक्षबाधस्य निर्णयात् ॥७७॥**

प्राप्यकारि चक्षुर्भौतिकत्वात्करणत्वात् घ्राणादिवदित्यत्र न केवलं पक्षः प्रत्यक्षादिबाधितः । कालात्ययापदिष्टश्चेद्धेतुः पूर्ववदुक्तः । किं तर्ह्यनैकान्तिकश्चेति कथयन्नाह;–

**अयस्कान्तादिना लोहमप्राप्याकर्षता स्वयं । अनैकान्तिकता हेतोर्भौतिकार्थस्य बाध्यते ॥७८॥**

**कायान्तर्गतलोहस्य बहिर्देशस्य वक्ष्यते । नायस्कान्तादिना प्राप्तिस्तत्कैर्वोक्तकर्मणि ॥७९॥**

**यथा कस्तूरिकाद्रव्ये वियुक्तेपि पटादितः । तत्र सौगन्ध्यतः प्राप्तिस्तद्गन्धाणुभिरिष्यते ॥८०॥**

**अयस्कान्ताणुभिः कैश्चित्तथा लोहेपि सेष्यतां । विभक्तेपि ततस्तत्राकृष्ट्यादेर्दृष्टितस्तदा ॥८१॥**

**इत्ययुक्तमयस्कान्तमप्राप्तं प्रति दर्शनात् । लोहाकृष्टेः परिप्राप्तास्तदंशास्तु न जातुचित् ॥८२॥**

**यथा कस्तूरिकाद्यर्थं गन्धादिपरमाणवः । स्वाधिष्ठानाभिमुख्येन ता नयन्ति पटादिगाः ॥८३॥**

**तथायस्कान्तपाषाणं सूक्ष्मभागाश्च लोहगाः । इत्यायातमितोप्राप्तायस्कान्तो लोहकर्मकृत् ॥८४॥**

ननु यथा हरीतकी प्राप्य मलमङ्गाद्विरेचयति तथायस्कान्तपरमाणवः शरीरान्तर्गतं शल्यं प्राप्याकर्षन्ति शरीरादिति मन्यमानं प्रत्याह;–

**प्राप्ता हरीतकी शक्ता कर्तुं मलविरेचनं । मलं न पुनरानेतुं हरीतक्यन्तरं प्रति ॥८५॥**

तर्हि यथाननान्निर्गतो वायुः पद्मनीलादिगः प्राप्य पानीयमाननं प्रत्याकर्षति तथायस्कान्तान्तरगाः परमाणवो बहिरवस्थितायस्कान्तावयविनो निर्गताः प्राप्य लोहं तं प्रत्येवाकर्षन्तीति शङ्कमानं प्रत्याह;–

**आकर्षणप्रयत्नेन विनाननकृतानिलः । पद्मनालादिगोम्भांसि नाकर्षति मुखं प्रति ॥८६॥**

तर्हि पुरुषप्रयत्ननिरपेक्षा यथादित्यरश्मयः प्राप्य भूगतं तोयं तमेव प्रति नयन्ति तथायस्कान्तपरमाणवोपीत्यभिमन्यमानं प्रत्याह;–

**सूर्यांशवो नयन्त्यम्भः प्राप्य तत्सूर्यमण्डलं । चित्रभानुत्विषो नास्तमिति स्वेच्छोपकल्पितम् ॥८७॥**

निःप्रमाणकमुदाहरणमाश्रित्यायस्कान्तस्य प्राप्यकारित्वं व्यवस्थापयत्कथं न स्वेच्छाकारि ! तदागमात्सिद्धमिति **चेन्न,** तस्य प्रत्यागमे सर्वत्र दृष्टेष्टाविरुद्धेन प्रमाणतामात्मसात्कुर्वता प्रतिहतत्वात् स्वयं युक्ताननुगृहीतस्य प्रमाणत्वानभ्युपगमाच्च न ततस्तत्सिद्धिः यतोऽयस्कान्तस्य प्राप्यकारित्वसिद्धौ तेनानैकान्तिकत्वं भौतिकत्वस्य न स्यात् ॥

**तथैव कारणत्वस्य मनसा व्यभिचारिता । मन्त्रेण च भुजङ्गाद्युच्चाटकादिकरेण वा ॥८८॥**

**शब्दात्मनो हि मन्त्रस्य प्राप्तिर्न भुजगादिना । मनागावर्तमानस्य दूरस्थेन प्रतीयते ॥८९॥**

प्राप्यकारि चक्षुः करणत्वाद्दात्रादिवदित्यत्राप्यंशतः सर्वान् प्रत्यु**द्योतकरे**णोक्तो हेतुरनैकान्तिको मनसा मन्त्रेण च सर्वाद्याकृष्टिकारिणा प्रत्येयः पक्षश्च प्रमाणाबाधितः पूर्ववत् ॥

**तदेवं चक्षुषः प्राप्यकारित्वे नास्ति साधनं । मनसश्च ततस्ताभ्यां व्यञ्जनावग्रहः कुतः ॥९०॥**

यत्र करणत्वमपि चक्षुषि प्राप्यकारित्वसाधनाय नालं च तत्रान्यत्साधनं दूरोत्सारितमेवेति मनोवदप्राप्यकारि चक्षुः सिद्धम् । ततश्च न चक्षुर्मनोभ्यां व्यञ्जनस्यावग्रहः इति व्यवतिष्ठते ॥

**॥ न्यायकुमुदचन्द्रः ॥**

नहि चक्षूरूपयोः सन्निकर्षोऽस्ति अप्राप्यकारित्वाच्चक्षुषः ।

**ननु चास्या**ऽप्राप्यकारित्वप्रतिज्ञा प्रमाणविरुद्धाः; तथाहि-प्राप्यकारि चक्षुः बाह्येन्द्रियत्वात्, यद् बाह्येन्द्रियं तत्प्राप्यकारि प्रतिपन्नम् यथा त्वगादि, बाह्येन्द्रियञ्च चक्षुः, तस्मात् प्राप्यकारि । नचायमसिद्धो हेतुः; पक्षे प्रवर्तमानत्वात् । नापि विरुद्धः; सपक्षे सत्त्वात् । नाप्यनैकान्तिकः; सपक्षवद् विपक्षेऽप्यप्रवृत्तेः । नच मनसा व्यभिचारः; बाह्यविशेषणात् । 'इन्द्रियत्वात्' इत्युच्यमाने हि मनसा व्यभिचारः स्यात्, तत्परिहारार्थं बाह्यविशेषणम् । नापि कालात्ययापदिष्टः; प्रत्यक्षागमाभ्याम-बाधितविषयत्वात् । नापि प्रकरणसमः; प्रकरणचिन्ताप्रवर्तकस्य हेत्वन्तरस्यासम्भवात् ।

**अथ** मतम् अधिष्ठानदेश एव चक्षुः नान्यत्र, अधिष्ठानपिधाने विषयाग्राहकत्वात्; यद् यद् अधिष्ठानपिधाने विषयाग्राहकं तत्तत् अधिष्ठानदेश एव यथा घ्राणादि, अधिष्ठानपिधाने विषयाग्राहकञ्च चक्षुः, तस्मात् तद्देश एव, अतः कथमस्य प्राप्यकारित्वं स्यादिति ? **तदपि न सङ्गतम्;** यतः 'अधिष्ठानदेश एव' इति कोऽर्थः ? किम् अधिष्ठानदेशे सत्, उत अधिष्ठानादव्यतिरिक्तम्, ततोऽन्यत्र असदिति वा ? तत्रा**द्यपक्षो**ऽयुक्तः; अधिष्ठानदेशे सत्त्वस्य प्राप्यकारित्वाविरोधात्, नह्यधिष्ठानदेशे सतः स्पर्शनादेः प्राप्यकारित्वविरोधो दृष्टः । **द्वितीयविकल्पो**ऽप्यनुपपन्नः; अधिष्ठानादव्यतिरिक्तत्वस्य क्वचिदपि इन्द्रियेऽप्रसिद्धेः, न खलु स्पर्शनादेरपि अधिष्ठानादव्यतिरिक्तत्वम् उभयोः प्रसिद्धम् । **तृतीयपक्षोप्य**-सङ्गतः; अधिष्ठानादन्यत्रापि तत्सत्त्वसम्भवात् । अधिष्ठानं हि गोलकरूपम्,

तस्मान्निसृताः रश्मयोऽर्थदेशं यावत् प्रसृताः सन्ति प्रदीपान्निसृतरश्मिवत् । अधिष्ठानपिधाने विषयाग्राहकत्वञ्च न प्राप्यकारित्वं विहन्ति घ्राणादेस्तत्सद्भावेऽपि प्राप्यकारित्वाऽविरोधात् ।

**न च** रश्मिवत्त्वं चक्षुषोऽसिद्धम्; तत्साधकप्रमाणसद्भावात् । तथाहि–रश्मिवच्चक्षुः तैजसत्वात् प्रदीपवत् । **नचेदमप्यसिद्धं** तत एव, तथाहि–तैजसं चक्षुः, रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात् तद्वदेव, अतो रश्मिवत्त्वस्यात्र प्रसिद्धेः ।

'प्राप्यकारित्वे चक्षुषो महतः पर्वतादेरप्रकाशप्रसङ्गः' इत्येतत्प्रत्याख्यातम्; धत्तूरकपुष्पवद् आदौ सूक्ष्माणामप्यन्ते महत्त्वोपपत्तेस्तद्रश्मीनाम् । ते हि आलोकमिलिता यावदर्थं वर्द्धन्ते, महतः पर्वतादेः प्रकाशकत्वान्यथानुपपत्तेः ।

**ननु** चक्षुषः प्राप्यकारित्वे कथं शाखाचन्द्रमसोर्युगपद्ग्रहणम् ? इत्यपि **वार्तम्;** युगपद् ग्रहणस्यासिद्धत्वात्; प्रथमतो हि चक्षुः सन्निकृष्टां शाखां प्राप्य प्रकाशयति, पश्चाद्विप्रकृष्टं चन्द्रमसम्, युगपत्प्रतिपत्त्यभिमानस्तु उत्पलपत्रशतव्यतिभेदवद् भ्रान्तिनिबन्धनः ।

दूरनिकटादिव्यवहारोऽपि चक्षुषः प्राप्यकारित्वे न दुर्घटः; शरीरापेक्षया चक्षुर्विषयस्य सन्निकृष्ट-विप्रकृष्टतोपपत्तितस्तस्य सुघटत्वात् । यदि चाप्राप्यकारि चक्षुः स्यात्तर्हि कुड्याद्यव्यवहितवत् तद्व्यवहितस्यापि घटादेर्मेर्वादिश्चानेकयोजनशतव्यवहितस्यापि तत् प्रकाशकं स्यात् क्वचित्प्रत्यासत्ति-विप्रकर्षाऽभावात्, न चैवम्, अतः प्राप्यकारि तत् प्रतिपत्तव्यम् ।

कारकत्वाच्च; यत् कारकं तत् प्राप्यकारि यथा वास्यादि, कारकञ्च चक्षुरिति । यच्चास्याप्राप्यकारित्वे साधनमभिधीयते–'अत्यासन्नार्थाऽप्रकाशकत्वात्' इति; तत् साध्याऽविशिष्टत्वात् असाधनमेव । पर्युदासप्रतिषेधे हि यदेवास्याऽप्राप्यकारित्वं तदेव अत्यासन्नार्थाऽप्रकाशकत्वम् । प्रसज्यप्रतिषेधस्तु जैनैर्नाभ्युपगम्यते, अपसिद्धान्तप्रसङ्गादिति ।

**अत्र प्रतिविधीयते** । यत्तावदुक्तम्–'बाह्येन्द्रियत्वात्' इति; तत्र किमिदं बाह्येन्द्रियत्वं नाम ? बहिरर्थग्रहणाभिमुख्यम्, बहिर्देशावस्थायित्वम्, बहिःकारणप्रभवत्वम्, इन्द्रियस्वरूपातीतत्वम्, मनोऽन्यत्वं वा स्यात् ? तत्र**ाद्यविकल्पे** मनसाऽनेकान्तः; तस्याप्राप्यकारित्वेऽपि बहिरर्थग्रहणाभिमुख्यतो बाह्येन्द्रियत्वसद्भावात् । **द्वितीयविकल्पे**ऽपि रश्मिरूपस्य, गोलकस्वभावस्य वा चक्षुषो बहिर्देशेऽवस्थायित्वं स्यात् ? **प्रथमपक्षे** किमिदं तत्र तस्यावस्थायित्वम्आश्रितत्वम्, प्रकाशकत्वेन प्रवृत्तिर्वा ? तत्र**ाद्यविकल्पे** अपसिद्धान्तः; रश्मिरूपस्य चक्षुषो भवता बहिर्देशाश्रितत्वस्यानाभ्युपगमात्, गोलकान्तर्गततेजोद्रव्याश्रया हि रश्मयो भवद्भिः प्रतिज्ञाताः । **द्वितीयविकल्पे** त्वसिद्धो हेतुः; रश्मिरूपस्य चक्षुषो ग्राहकप्रमाणाऽभावतः प्रकाशकत्वेन बहिर्देशे तत्प्रवृत्तेरसिद्धेः । तद्ग्राहकप्रमाणाभावश्च अत्रैव प्रतिपादयिष्यते । दृष्टान्तश्च साधनविकलः; तथाविधबाह्येन्द्रियत्वस्य त्वगादाव-

सम्भवात् । गोलकस्वभावस्य तु चक्षुषो बहिर्देशावस्थायित्वे प्रत्यक्षबाधा; अर्थदेशासम्बद्धस्यास्य शरीरप्रदेश एव प्रत्यक्षतः प्रतीतेः । बहिःकारणप्रभवत्वमपि मनसैवाऽनैकान्तिकम्; आत्मापेक्षया हि बहिःकारणं पुद्गलतत्त्वम् तत्प्रभवत्वञ्च चक्षुरादीन्द्रियवत् मनसोऽस्त्येव, अस्यापि पौद्गलिकत्वेन षट्पदार्थपरीक्षायां प्रसाधयिष्यमाणत्वात् । इन्द्रियस्वरूपातीतत्वञ्च अपसिद्धान्तप्रसङ्गादनुपपन्नम् । मनोऽन्यत्वमपि मनसः सिद्धौ सिद्ध्येत, न च तत्सिद्धं भवत्परिकल्पितस्य मनसः षट्पदार्थपरीक्षायां निराकरिष्यमाणत्वात् । सिद्ध्यतु वा; तथापि बाह्येन्द्रियत्वं मनोऽन्यत्वे सतीन्द्रियत्वम् उच्यते, तत्र च मनोव्यवच्छेदार्थं बाह्यविशेषणमयुक्तम्; तस्यापि सर्वत्र प्राप्यकारित्वात्, सुखादौ हि संयुक्तसमवाया-दिसम्बन्धात्, व्याप्तौ तु सम्बन्धसम्बन्धात् तज् ज्ञानमुत्पादयति रूपादौ नेत्रादिवत्, न खलु रूपादौ नेत्रादेरपि सम्बन्धसम्बन्धादन्यः सम्बन्धोऽस्ति ।

धर्मित्वेन चात्रोपात्तं चक्षुः गोलकस्वभावम्, रश्मिरूपं वा ? **प्रथमपक्षे** प्रत्यक्षविरोधः; अर्थेना-सम्बद्धस्य अर्थदेशपरिहारेण शरीरप्रदेश एव गोलकस्वभावस्य चक्षुषः प्रत्यक्षतः प्रतीतेः, अन्यथा तद्रहितत्वेन नयनपक्ष्मप्रदेशस्योपलम्भः स्यात् । **द्वितीयपक्षे** तु धर्मिणोऽसिद्धिः; रश्मिरूपस्य चक्षुषः कुतश्चित्प्रमाणादप्रसिद्धेः । तत्साधकं हि प्रमाणं प्रत्यक्षम्, अनुमानं वा स्यात् ? न तावत्प्रत्यक्षम्; अर्थवत्तत्र तत्स्वरूपाऽप्रतीतेः न खलु रश्मयः प्रत्यक्षतः प्रतीयन्ते विप्रतिपत्त्यभावप्रसङ्गात्, नहि नीले नीलतया प्रतीयमाने कश्चिद् विप्रतिपद्यते । किञ्च, इन्द्रियार्थसन्निकर्षजं प्रत्यक्षं भवन्मते, न चार्थदेशे विद्यमानैस्तैः अपरेन्द्रियस्य सन्निकर्षोऽस्ति यतस्तत्र प्रत्यक्षमुत्पद्येत अनवस्थाप्रसङ्गात् । अनुमानतो-ऽपि अतएव, अन्यतो वा तत्सिद्धिः स्यात् ? यदि अतएव; अन्योन्याश्रयःप्रसिद्धे हि अनुमानोत्थाने-ऽतस्तत्सिद्धिः, अस्याश्चानुमानोत्थानमिति । अनुमानान्तरात् तत्सिद्धावनवस्था; धर्मिणस्तत्राप्य-नुमानान्तरात् सिद्धिप्रसङ्गात् ।

**एतेन** यदुक्तं रश्मिप्रसाधकमनुमानम्-'रश्मिवच्चक्षुः तैजसत्वात्' इति; तत्**प्रत्याख्यातम्;** उक्त-पक्षदोषाणामत्राप्यविशेषात् । किञ्च, रश्मिवत्ता गोलकरूपस्य चक्षुषः प्रसाध्यते, तद्व्यतिरिक्तस्य वा ? न तावत्तद्व्यतिरिक्तस्य; तस्यासिद्धस्वरूपत्वात्, अपसिद्धान्तप्रसङ्गाच्च । गोलकरूपस्य तु तत्साधने पक्षस्य प्रत्यक्षबाधा; प्रभासुरप्रभारहितस्य गोलकस्य प्रत्यक्षतः प्रतीतेः । अथ अदृश्यास्त-द्रश्मयः अनुद्भूतरूपस्पर्शवत्त्वात्, अतो नास्य प्रत्यक्षबाधा; कथमेवं रूपप्रकाशकत्वं तस्य स्यात् ? तथाहि-चक्षु रूपप्रकाशकं न भवति, अनुद्भूतरूपत्वात्, जलसंयुक्तानलवत् । न चानुद्भूतरूपस्पर्शं तेजोद्रव्यं क्वचित् प्रतीयते । जलहेम्नोर्भासुररूपोष्णस्पर्शयोरनुद्भूतिप्रतितिरस्ति; इत्यप्य**सम्यक्;** उभयानुद्भूतेस्तत्राप्यप्रतिपत्तेः । दृष्टानुसारेण चादृष्टार्थकल्पना, अन्यथा पृथिव्यादेरपि तद्वत्ताप्रसङ्गः; तथाहि-रश्मिवन्तः पृथिव्यादयः द्रव्यत्वात् प्रदीपवत् । यथैव हि तैजसत्वं रश्मिवत्तया व्याप्तं प्रदीपे प्रतिपन्नं तथा द्रव्यत्वमपि । अथ ततस्तेषां तत्साधाने प्रत्यक्षविरोधः, सोऽन्यत्रापि समानः । **अथ**

मार्जारादिचक्षुषोः प्रत्यक्षतः प्रतीयन्ते रश्मयः, तत्कथं तद्विरोधः ? यदि नाम तत्र ते प्रतीयन्ते अन्यत्र किमायातम् ? अन्यथा हेम्नि पीतत्वस्य सुवर्णत्वेन व्याप्तिप्रतिपत्तेः पटादौ पीतत्वोपलम्भात् सुवर्णत्वसिद्धिः स्यात्। प्रत्यक्षबाधनम् अन्यत्रापि। रश्मिवत्त्वे चास्य अर्थप्रकाशने आलोकापेक्षा न स्यात्; तथाहि-यद् रश्मिवत् तदर्थप्रकाशने नालोकापेक्षं यथा प्रदीपः, रश्मिवच्च भवद्भिरभिप्रेतं चक्षुरिति। तथा तद्वत्त्वे स्वसम्बद्धस्याञ्जनादेः प्रकाशकत्वप्रसङ्गः, न खलु प्रदीपस्तद्वान् स्वसम्बद्धं शलाकादिकं न प्रकाशयति इति प्रातीतिकम्।

प्रयोगः-यद् रश्मिवत् तत्स्वसम्बद्धमर्थं प्रकाशयत्येव यथा प्रदीपः, रश्मिवच्च चक्षुः, तस्मात्स्वसम्बद्धं कामलादिकं प्रकाशयेदेव। **न चात्र** चक्षुषः सम्बन्धोऽपि नास्ति इत्य**भिधातव्यम्;** यतो गोलकस्वरूपं चक्षुस्तत्रासम्बद्धम्, रश्मिरूपम्, शक्तिस्वभावं वा ? तत्रा**द्यपक्षे** प्रत्यक्षविरोधः; गोलकस्वरूपस्य चक्षुषः काचादौ सम्बन्धप्रतीतेः। **द्वितीयपक्षे**ऽपि तत्रास्य सम्बन्धोऽस्त्येव, नहि स्फटिकादिकूपिकामध्यगतप्रदीपादिरश्मयः ततो निर्गच्छन्तः तत्संयोगिना न सम्बद्धाः तत्प्रकाशका वा न भवन्तीति प्रतीतम्। शक्तिरूपमपि चक्षुः व्यक्तिरूपचक्षुषो भिन्नदेशम्, अभिन्नदेशं वा स्यात् ? न तावद्भिन्नदेशम्; तच्छक्तित्वव्याघातानुषङ्गात्, निराश्रयत्वप्रसङ्गाच्च। न हि अन्यशक्तिरन्याश्रयायुक्ता, तद्देशद्वारेणैवार्थोपलब्धिप्रसङ्गश्च। अथ ततोऽभिन्नदेशम्; तत्तत्र सम्बद्धम्, असम्बद्धं वा ? यदि सम्बद्धम्; बहिरर्थवत् स्वाश्रयं तत्सम्बद्धञ्चाञ्जनादिकं प्रकाशयेत्। अथासम्बद्धम्; कथामाधेयं नाम अतिप्रसङ्गात् ?

यदपि-'तैजसत्वात्' इति साधनमुक्तम्; तदप्ययुक्तम्; असिद्धत्वात्। तदसिद्धत्वञ्च कुतश्चित्प्रमाणात्तत्र तस्याऽप्रतीतेः। तद्धि गोलकस्वरूपस्य चक्षुषोऽभ्युपगम्येत, रश्मिरूपस्य वा ? यदि गोलकस्वरूपस्य; तदाऽध्यक्षबाधा, भासुररूपोष्णस्पर्शरहितस्यास्य अध्यक्षतः प्रतीतेः। अनुमानबाधश्च; तथाहि-चक्षुस्तैजसं न भवति, भासुररूपोष्णस्पर्शरहितत्वात्, यद् यत्तथाविधं तत् (तत्तत्) तैजसं न भवति यथा मृत्पिण्डादिः, भासुररूपोष्णस्पर्शरहितञ्च चक्षुः, तस्मात्तैजसं न भवतीति। तथा, न तैजसं चक्षुः, तमःप्रकाशकत्वात्, यत्पुनस्तैजसं तन्न तमःप्रकाशकं यथा आलोकः, तमःप्रकाशकञ्च चक्षुः, तस्मान्न तैजसमिति। रश्मिरूपस्य तु चक्षुषोऽसिद्धस्वरूपत्वान्न तैजसत्वमुपपद्यते, न खलु रश्मयः प्रत्यक्षादितः प्रसिद्ध्यन्तीत्युक्तम्। ननु मार्जारादिनेत्रे नेत्रत्वं रश्मिवत्तया व्याप्तं प्रतिपन्नम्, अतोऽन्यत्रापि मनुष्यादिनेत्रे नेत्रत्वाद्रश्मिवत्त्वं ततस्तैजसत्वञ्च प्रसाध्यते, तर्हि गवादिनेत्रे नेत्रत्वं कृष्णत्वेन नरनारिनेत्रे च धावल्येन व्याप्तं प्रतिपन्नम्, अतोऽविशेषेण कार्ष्ण्यं धावल्यं वा पार्थिवत्वम् आप्यत्वं वा प्रसाध्यताम् अविशेषात्।

यदपि-'रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात्' इति तत्तैजसत्वे साधनमभिहितम्, तदपि जलाऽञ्जन-चन्द्र-माणिक्यादिभिरनैकान्तिकम्। **न चैतद्वक्तव्यम्**जलादीन् प्रति गत्वा व्यावृत्तानां

चक्षूरश्मीनामेव तत्प्रकाशकत्वम्, न जलादीनाम् **इति;** सर्वत्र दृष्टहेतुवैफल्यापत्तेः । तथा च दृष्टान्ताऽसिद्धिः; प्रदीपादावपि अन्यस्यैव तत्प्रकाशकत्वप्रसङ्गात्, प्रत्यक्षबाधनम् उभयत्र । रूपप्रकाशकत्वञ्च रूपस्यानुभवः, तत्र ज्ञानजनकत्वं वा ? **प्रथमविकल्पे** रूपज्ञानेनानेकान्तः; तस्यातैजसत्वेऽपि रूपानुभवसम्भवात् । **द्वितीयविकल्पे** तु घटादिरूपेणानेकान्तः, तस्याऽतैजसस्यापि रूपज्ञानजनकत्वाभ्युपगमात् । 'करणत्वे सति' इति विशेषणेऽपि आलोकार्थसन्निकर्षेण चक्षूरूपयोः संयुक्तसमवायेन चानेकान्तः, 'द्रव्यत्वे सति' इति विशेषणेऽपि चन्द्रादिनाऽनेकान्तः । अतश्चक्षुषः कुतश्चित्तैजसत्वाऽसिद्धेः कथं रश्मिवत्त्वं सिद्ध्येत् यतः प्राप्यकारित्वं स्यात् ?

*किञ्च, अस्य प्राप्यकारित्वे* विषयश्चक्षुर्देशमागच्छेत्, चक्षुर्वा विषयदेशम् ? तत्र**आद्यविकल्पे** प्रत्यक्षबाधा; चक्षुःप्रदेशे विषयस्य गमनाऽप्रतीतेः, न हि चक्षुःप्रदेशे पर्वतादेर्विषयस्यागमनं केनचिद् दृष्टमिष्टं वाऽनुपहतचेतसा । **द्वितीयविकल्पे**ऽपि अध्यक्षविरोधः; विषयं प्रति चक्षुषो गमनाऽप्रतीतेः, 'चक्षुर्गत्वा नार्थेनाभिसम्बद्ध्यते, इन्द्रियत्वात्, त्वगादिवत्' इत्यनुमानविरोधश्च । तदविशेषेऽपि दृष्टातिक्रमेण कस्यचित् तत्र गत्वा सम्बन्धाभ्युपगमे यथाप्रतीति असम्बन्ध एव किन्नाभ्युपगम्यते अलं प्रतीत्यपलापेन ?

किञ्च, चक्षुर्गत्वा संयुज्य अर्थं चेद् द्योतयति, तर्हि यथा विप्रकृष्टस्याऽऽदित्यादेः संयुक्तसमवायाद् रूपं द्योतयति, एवं कर्माऽपि द्योतयेत् संयुक्तसमवायाऽविशेषात् । कथञ्चैवंवादिनः काचाऽभ्रपटलस्वच्छोदकस्फटिकाद्यन्तरितार्थानामुपलम्भः स्यात् चक्षुषस्तत्र गच्छतः काचाद्यवयविना प्रतिबन्धात् ? अथ काचादिकं भित्त्वा चक्षूरश्मयोऽर्थदेशं गच्छन्ति; तर्हि तद्व्यवहितार्थोपलम्भसमये काचादेरनुपलम्भः, तदाधेयद्रव्यस्य पातश्च स्यात् तदाधारस्यावयविनो नाशात्, न चैवम्, युगपत्तयोर्निरन्तरमुपलम्भात् । पूर्वपूर्वव्यूहनिवृत्तौ उत्तरोत्तरतद्रूपव्यूहान्तरस्याशूत्पत्तेः प्रदीपाग्निज्वालावत् निरन्तरताभ्रमे सौगतमतसिद्धिः; सर्वार्थानां प्रतिक्षणं क्षणिकत्वेऽपि इत्थं निरन्तरताभ्रमप्रसङ्गात् । एतेन 'शाखाचन्द्रमसोः क्रमेणानुभवेऽपि आशुवृत्त्योत्पलपत्रशतव्यतिभेदवद् युगपत्प्रतिपत्त्यभिमानो भ्रान्तिनिबन्धनः' इति प्रत्याख्यातम् ।

यच्चान्यदुक्तम्-'शरीरापेक्षया चक्षुर्विषयस्य सन्निकृष्टविप्रकृष्टतोपपत्तेर्दूरनिकटादिव्यवहारः सुघटः' इति; तदपि श्रद्धामात्रम्; इन्द्रियसन्निकर्षेणास्य प्रतिपत्तौ तथा तद्व्यवहारानुपपत्तेः । तथाहि- *यद् इन्द्रियसन्निकर्षेण प्रतीयते न तत्र दूरनिकटादिव्यवहारः यथा रसादौ, इन्द्रियसन्निकर्षेण प्रतीयते च* चक्षुर्विषय इति ।

प्राप्यकारित्वे च चक्षुषः संशयविपर्ययानुपपत्तिः; सामान्यवद् विशेषाणामपि सन्निकृष्टानामुपलम्भसम्भवात् । विशेषानुपलब्धिनिमित्तो हि संशयो विपर्ययश्च । न च चक्षुषा सन्निकृष्टत्वा-

ऽविशेषेऽपि सामान्यमेवोपलभ्यते न विशेषः इत्यभिधातव्यम्; विशेषाभावात् । तन्न प्राप्यकारित्वं चक्षुषो घटते । **न चा**प्राप्यकारित्वे सकलार्थप्रकाशकत्वप्रसङ्गः; योग्यदेशापेक्षणाद् अयस्कान्तवत्, नहि अयस्कान्तोऽयसोऽप्राप्तस्याकर्षणे प्रवर्तमानः सर्वस्यायसः तथाविधस्याकर्षणे समर्थः, अपि तु योग्यदेशस्थस्यैव । अञ्जन-तिलक-मन्त्रादिर्वा अप्राप्तस्यापि स्त्र्यादेराकर्षकः सन् न सर्वस्याकर्षको दृष्टः नियतस्यैव स्त्र्यादेः तेनाकर्षणोपलम्भात् । भवतोऽपि च 'चक्षूरश्मयो लोकान्तं गत्वा किमिति रूपं न प्रकाशयन्ति, चक्षुर्वा संयुक्तसमवायाद् यथा रूपं प्रकाशयति तथा गन्धादिकमपि किमिति न प्रकाशयेत् तत्रापि तस्याविशेषाद् ?' इति चोद्ये योग्यतैव शरणम् ।

यदपि 'कारकत्वात्' इत्युक्तम्; तदपि मनसा अयस्कान्ताऽञ्जनतिलकमन्त्रादिना चानैकान्तिकम्, तस्य कारकत्वेऽपि अप्राप्यकारित्वात् । यदपि 'अत्यासन्नार्थाऽप्रकाशकत्वात्' इत्यस्य साध्याविशिष्टत्वमुक्तम्; तदप्ययुक्तम्; प्रसङ्गसाधनत्वादेतस्य, श्रोत्रादौ हि प्राप्यकारित्वाऽत्यासन्नार्थप्रकाशकत्वयोः व्याप्यव्यापकभावसिद्धौ सत्यां परस्य व्यापकाभावेष्टया अत्यासन्नार्थाऽप्रकाशकत्वलक्षणया अनिष्टस्य प्राप्यकारित्वलक्षणव्याप्याभावस्य आपादनमात्रमेवानेन विधीयते इति ।

**॥ धवला ॥**

सव्वेसु इंदिएसु अपत्तत्थग्गहणसत्तिसंभावादो

होदु णाम अपत्तत्थगहणं चक्खिदियणोइंदियाणं, ण सेसिंदियाणं; तहोवलंभाभावादो त्ति । ण, एइंदिएसु फासिंदियस्स अपत्तणिहिग्गहणुवलंभादो । तदुवलंभो च तत्थ पारोहमोच्छणादुव लब्भदे । सेसिंदियाणपत्तत्थगहणं कुदोवगम्मदे । जुत्तीदो । तं जहा घाणिंदिय-जिब्भिंदिय-फासिंदियाण-मुक्कस्सविसओ णवजोयणाणि । जदि एदेसिमिंदिया मुक्कस्सखओवसमगदजीवो णवसु जोयणेसु ट्ठिददव्वेहिंतो विप्पडिय आगदपोग्गलाणं जिब्भा-घाण-फासिंदिएसु लग्गाणं रस-गंध फासे जाणदि तो समंतदो णवजोयणब्भंतरट्ठिदगूहभक्खणं तग्गंधजणिदअसादं च तस्स पसज्जेज्ज । ण च एवं, तिव्विंदियक्खओवसमगचक्कट्ठीणं पि असायसायरं तोपवेसप्पसंगादो । किं च-तिव्वखओवसमगद-जीवाणं मरणं पि होज्ज, णवजोयणब्भंतरट्ठियविसेण जिब्भाए संबंधेण घादियाणं णवजोयणब्भंत-रट्ठिदअग्गिणा दज्झमाणाणं च जीवणाणुववत्तीदो । किं च-ण तेसिं महुरभोयणं वि संभवदि, सग-क्खेत्तंतोट्ठियतियदुअपिचुमंदकडुइरसेणमिलिददुद्ध महुरत्ताभावादो । तम्हा सेसिंदियाणं पि अपत्तग्गहणमत्थि त्तिइच्छिदवं ।

न कार्त्स्न्येनाप्राप्तमर्थस्यानिःसृतत्वमुक्तत्वं वा ब्रूमहे यतस्तदवग्रहादिनिदानमिन्द्रियाणाम-प्राप्यकारित्वमिति । किं तर्हि । कथं चक्षुरनिन्द्रियाभ्यामनिःसृतानुक्तावग्रहादि तयोरपि प्राप्यकारित्व-प्रसंगादिति**चेन्न** योग्यदेशावस्थितेरेव प्राप्तेरभिधानात् । तथा च रसगंधस्पर्शानां स्वग्राहिभिरिन्द्रियैः

स्पष्टं स्वयोग्यदेशावस्थितिः शब्दस्य च । रूपस्य चक्षुषाभिमुखतया, न तत्परिच्छेदिना चक्षुषा प्राप्यकारित्वमनिःसृतानुक्तावग्रहादिसिद्धेः ।

॥ न्यायदीपिका ॥

**नन्व**तज्जन्यस्यान्यस्य कथं तत्प्रकाशकत्वमिति **चेत्**, घटाद्यजन्यस्यापि प्रदीपस्य तत्प्रकाशकत्वं दृष्ट्वा सन्तोष्टव्यमायुष्मता । **अथ** कथमयं विषयं प्रति नियमः ? यदुक्तं घटज्ञानस्य घट एव विषयो, न पर इति । अर्थजत्वं हि विषयं प्रति नियमकारणं, तज्जन्यत्वात् । तद्विषयमेव चैतदिति । तत्तु भवता नाभ्युपगम्यते । इति **चेत्**, योग्यतैव विषयं प्रति नियमकारणमिति ब्रूमः ।

का नाम योग्यतेति, **उच्यते**स्वावरणक्षयोपशमः । तदुक्तं "**स्वावरणक्षयोपशमलक्षणयोग्यतया हि प्रतिनियतमर्थं व्यवस्थापयति**" इति । **एतेन** तदाकारत्वात्तत्प्रकाशकत्वमित्यपि **प्रत्युक्तम्**, अतदाकारस्यापि प्रदीपादेस्तत्प्रकाशकत्वदर्शनात् । ततस्तदाकारवत्तज्जन्यत्वमप्रयोजकं प्रामाण्ये । सविकल्पकविषयभूतस्य सामान्यस्य परमार्थत्वमेवाबाधितत्वात् । प्रत्युत सौगताभिमत एव स्वलक्षणे विवादः । तस्मान्न निर्विकल्पकरूपत्वं प्रत्यक्षस्य सन्निकर्षस्य च यौगाभ्युपगतस्याचेतनत्वात्कुतः प्रमितिकरणत्वं कुतस्तरां प्रमाणत्वं कुतस्तमां प्रत्यक्षत्वम् ?

किञ्च रूपप्रमितेरसन्निकृष्टमेव चक्षुर्जनकम् । अप्राप्यकारित्वात्तस्य । ततः सन्निकर्षाभावेपि साक्षात्कारिप्रमोत्पत्तेर्न सन्निकर्षरूपतैव प्रत्यक्षस्य । **न चाप्राप्यकारित्वं चक्षुषोऽप्रसिद्धं**, प्रत्यक्षस्तथैव प्रतीतेः । **ननु** प्रत्यक्षागम्यामपि चक्षुषो विषयप्राप्तिमनुमानेन साधयिष्यामः परमाणुवत् । यथा प्रत्यक्षासिद्धोपि परमाणुः कार्यान्यथानुपपत्त्यानुमानेन साध्यते, तथा चक्षुः प्राप्तार्थप्रकाशकं बहिरिन्द्रियत्वात्त्वगिन्द्रियनुमानात्प्राप्तिसिद्धिः । प्राप्तिरेव हि सन्निकर्षः । ततो न सन्निकर्षस्याव्याप्तिरिति **चेन्न**, अस्यानुमानाभासत्वात् ।

तद्यथा चक्षुरित्यत्र कः पक्षोऽभिप्रेतः किं लौकिकं चक्षुरुतालौकिकम् ? **आद्ये** हेतोः कालात्ययापदिष्टत्वं गोलकाक्षस्य चक्षुषो विषयप्राप्तेः प्रत्यक्षबाधितत्वात् । **द्वितीये** त्वाश्रयासिद्धः, अलौकिकस्य चक्षुषोऽद्याप्यसिद्धेः । शाखासुधादीधितिसमानकालग्रहणाद्यन्यथानुपपत्तेः चक्षुरप्राप्यकारीति निश्चीयते । तदेवं सन्निकर्षाभावेपि चक्षुषा रूपप्रतीतिर्जायते इति सन्निकर्षोऽव्यापकत्वात् प्रत्यक्षस्य स्वरूपं न भवतीति स्थितम् ।

• • •



## विभाग-४

# ॥ पञ्जिकासमेतः तत्त्वसंग्रहः ॥

'येषां त्वप्राप्तजातोऽयं शब्दः श्रोत्रेण गृह्यत' इत्यादावाह-**अप्राप्तिमात्रसाम्येऽ**पीत्यादि ।

**अप्राप्तिमात्रसाम्येऽपि न सर्वस्य ग्रहो यथा ।**

**अयस्कान्तेन लोहस्य सामर्थ्यनियमस्थितेः ॥२५१९॥**

यद्यपि सर्वोऽप्राप्तस्तथाऽपि पदार्थानां शक्तिप्रतिनियमान्न पूर्वस्य विषयस्य ग्रहः-ग्रहणं प्राप्नोति। यथा-अयस्कान्तो नामोपलोऽप्राप्तमयः कर्षन्नपि न सर्वमप्राप्तं कर्षति ॥२५१९॥

अयस्कान्तप्रभेत्यादिना**शङ्करस्वामि**मतेन दृष्टान्तासिद्धिमाशङ्कते ।

**अयस्कान्तप्रभाप्राप्त्या तत्राप्याकर्षणं यदि ।**

**ननु प्रभा न दृश्येयं कथमस्तीति गम्यते ॥२५२०॥**

स हि प्राह । तत्राप्ययस्कान्तमणिप्रभावेधवशादेवाकर्षणमयसोऽन्यथा सर्वदेशावस्थितानामयसामाकर्षणं स्यात् । यद्यपि तस्य प्रभा प्रदीपप्रभावन्नोपलभ्यते, तथाऽप्यनुमेया, ध्ववधारे (व्यवधाने ?) दूरे चाकर्षण(णा?)दर्शनादिति । **नन्वि**त्यादिना प्रतिविधत्ते । न दृश्येयमित्यनुपलम्भेन सद्व्यवहारनिषेधं करोति ॥२५२०॥

यदपि प्रसङ्गसाधनमुक्तं सर्वदेशावस्थितानामयसामाकर्षणप्रसङ्गादिति, तत्परिहरन्नाह-**कस्मादाप्तमित्यादि** ।

**कस्मादाप्तं न काष्ठादि सा समाकर्षति प्रभा ।**

**तच्छक्तिनियतत्वाच्चेदप्राप्तावपि तत्समम् ॥२५२१॥**

प्राप्तिपक्षेऽपि तुल्यः प्रसङ्गः, कस्मात्साऽयस्कान्तप्रभा सर्वं प्राप्तं काष्ठादिकं नाकर्षतीति । पदार्थस्वभावप्रतिनियमान्नातिप्रसङ्ग इति चेदप्राप्तिपक्षेऽपि पदार्थस्वभावस्य नियामकत्वं केनापहृतम्, येन तत्र नेष्यते, तस्माददृष्टप्रभाकल्पनं व्यर्थमेव ॥२५२१॥

यदुक्तम्-'तत्र दूरसमीपस्थग्रहणाग्रहणे समे । स्यातां न च क्रम' इति तत्राह-दूरेत्यादि ।

**दूरमध्यसमीपस्थैरक्रमेणैव गम्यते ।**
**प्रयोगानन्तरं तत्र सर्वेषां ज्ञानजातितः ॥२५२२॥**

क्रमग्रहणमसिद्धं शब्दप्रयोगानन्तरं युगपद्विज्ञानोत्पत्तेः ॥२५२२॥

यच्चोक्तम्–नापि तीव्रमन्दादिसम्भव इति, तत्राह–**दूरासन्नादी**त्यादि ।

**दूरासन्नादिभेदेन स्पष्टास्पष्टं यथेक्ष्यते ।**
**रूपं तथैव शब्देऽपि तीव्रमन्दादिविद्भवेत् ॥२५२३॥**

यथा रूपमप्राप्य गृह्यमाणमध्या(व्यां?)पि च स्पष्टमीक्ष्यते तथा शब्देऽप्यध्या(व्या?)पिन्यप्राप्य गृह्यमाणे च तीव्रमन्दादिवेदना भविष्यति । **ननु च** परस्य रूपस्याप्यप्राप्य ग्रहणमसिद्धं तत्कथं दृष्टान्तत्वेनोच्यत इति । **नैष दोषः**। यद्यपि परस्य वचनमात्रान्न सिद्धम्, तथापि यत्प्रमाणसिद्धं तदुभयोरपि सिद्धम् । किं पुनरत्र प्रमाणम्, सन्निकृष्टविप्रकृष्टयोस्तुल्यकालग्रहणम् । यो हि गतिमान्स सन्निकृष्टमाशु प्राप्नोति, विप्रकृष्टं चिरेण, यथा देवदत्तो ग्रामाद्ग्रामान्तरं गच्छन्, शाखाचन्द्रमसोस्तु तुल्यकालमुन्मेषसमनन्तरमेव ग्रहणं दृष्टं, तस्मादप्राप्यकारि चक्षुरिति गम्यते । **अत्रोद्योतकरः** प्राह–ज्ञानानामाशूत्पत्तेः कालभेदस्याग्रहणान्मिथ्याप्रत्यय एष उत्पलपत्रशतवेधवदिति । तदेतदसम्यक्, एवं हि सरो रस इत्यादावपि क्रमव्यवसायो न स्यादाशूत्पत्तेस्तुल्यत्वात्, ततश्च प्रतीतिभेदो न स्यात्, सर्वासां च बुद्धीनामाशूत्पत्तिरस्तीति न कदाचित्क्रमग्रहणं स्यादिति प्राग् निर्लोडितमेतद्विस्तरेण । पुनः स एवाह–यद्यप्राप्यकारि चक्षुर्भवेत्तदा न कुट्यादेरावरणस्य सामर्थ्यमस्तीत्यावरणानुपपत्तिः । यच्च दूरीभूतस्याग्रहणं अन्तिके च ग्रहणं तत्र (त्र ?) स्यादविशेषात् । **स्यादेतत्** य एव हि चक्षुषो विषयीभवत्यर्थः स उपलभ्यते यश्च न भवति नासावुपलभ्यत इति । तच्च नैवम् । सम्बन्धव्यतिरेकेण विषयीभावानुपपत्तेः कोऽयं सम्बन्धव्यतिरेकेण विषयीभावो नाम । केवलं मयोच्यते सम्बन्ध इति भवताऽभिधीयते विषयीभाव इति न कश्चिद्विशेष इति । **तदेतदसम्यक्** । कारणीभावो हि विषयीभाव उच्यतेऽस्माभिर्न सम्बन्धः । तथाहि–रूपादिर्विषयश्चक्षुषो विज्ञानोत्पत्तौ सहकारितां प्रतिपद्यमानो विषयीभवतीत्युच्यते, नतु तेन सहाश्लिष्यन् । द्विविधश्च सहकारार्थः । परस्प(म्प?)रोपकारो वा, यथा–प्रभावश्च(प्रस?)रादपवरकप्रतिष्ठस्य, एकार्थक्रिया वा, यथा–प्रभावश्च(प्रस?)रादपवरकप्रतिष्ठस्य, एकार्थक्रिया वा, यथोन्मिषतमात्रेण रूपं गृह्णतः । उभयथापि विज्ञानस्य कारणविशेष एव विषय उच्यते, नतु सम्बन्धी ॥ स एव कारणविशेषप्रतिनियमोऽसति सम्बन्धे न स्यादिति **चेत् । न** । स्वकारणशक्तितः प्रतिनियमसिद्धे–स्तथाभूत एवासौ स्वकारणादुत्पद्यमान उत्प(पप ?)द्यते, येन कश्चिदेव ज्ञानजनको भवति नान्यः, कारणभेदेन भिन्नस्वभावत्वात्सर्वभावानाम् । यथा च भवतस्तुल्येऽपि सम्बन्धे किमिति चक्षू रूपमेवोपलभते न रसम् । तेनासम्बन्धान्नोपलभत इति **चेत्,** स एव हि सम्बन्धः किमिति न स्यात्, देशस्याभिन्नत्वात् । न ह्यत्र नियामकं किञ्चिदस्ति कारणम्,

येनाभिन्नदेशत्वेऽपि रूपमेवानुसरति चक्षुर्न रसं तद्देशवर्त्तिनमपि, नाप्यतिदूरदेशवर्त्ति रूपमिति । स्वहेतुर्नियामक इति चेत् । तदेतदप्राप्तिपक्षेऽपि समानमित्यलं विस्तरेण ॥२५२३॥

भिन्नाभानामित्यादिना परस्य चोद्यमाशङ्कते ।

**भिन्नाभानां मतीनां चेदेकालम्बनता कथम् ।**
**तुल्यं रूपधियामेतच्चोद्यं बाह्यार्थवादिनाम् ॥२५२४॥**

कथं भिन्नाभानां मतीनामेको विषयो भवेत्, एवं हि रसरूपादिबुद्धीनामेकालम्बनता स्यादिति परस्याभिप्रायः । परिहारमाहतुल्यमित्यादि । रूपधियां रूपविषयाणामपि बुद्धीनाम्, एतच्चोद्यं समानंकथमेकविषयता भवेद्दूरासन्नादिभेदेन स्पष्टादिप्रतिभासानामिति । एतच्च बाह्यार्थवादिनां चोद्यम् । ये विषयगतमेवाकारं वर्णयन्ति न विज्ञानगतम् ते पुनर्विज्ञानवादिनस्तेषां सर्वमेव विज्ञानं निर्विषयमात्मसंवेदनं स्पष्टाद्याकारभेदवद्भिन्नमेवोपजायत इति न तेषां चोद्यम् । येषामपि बाह्यार्थ-वादिनां साकारं ज्ञानमिति पक्षस्तेषां सर्वात्मना विषयसारूप्यानभ्युपगमात्केनचिदंशेन सारूप्याद्भिन्ना-भानामपि मतीनामेकविषयत्वमविरुद्धमेवेति न चोद्यम् ॥२५२४॥

शब्दस्य तर्हि प्राप्तिग्रहणे किं बाधकं प्रमाणं अप्राप्तिग्रहणे च किं साधकमिति प्रश्ने सत्याह-**प्राप्तीत्यादि** ।

**प्राप्तिग्रहणपक्षे तु कर्णाभ्यन्तरपक्षवत् ।**
**न विच्छिन्न इति ज्ञानं मेघशब्दादिके भवेत् ॥२५२५॥**

कर्णाभ्यन्तरपक्षवदिति वैधर्म्यदृष्टान्तः । षष्ठ्यन्ताद्वतिः । यथा कर्णकण्डूविनोदनकारिणः पतत्रिपक्षस्याविच्छिन्नं शब्द उपलभ्यते, तथा मेघादिशब्दस्यापि कदम्बगोलकन्यायेन प्रविसर्पतः कर्णदेशमागतस्यैव ग्रहणात्तुल्यं ग्रहणं प्राप्नोति । **न च** स्वकारणसंयोगसमवायिदेशवशादयं विच्छेद-विभ्रम **इति शक्यं वक्तुम्** । तेषां श्रोत्रेणाग्रहणात् । न ह्यविषयीभूतपदार्थाकारमारोपयदुत्पद्यते क्वचिद्विज्ञानम् । नहि चक्षुर्विज्ञानं रससारूप्यं समारोपयतीति ॥२५२५॥

तदेवं प्राप्तिग्रहणे बाधकं प्रमाणमभिधायाप्राप्तिग्रहणे साधकमाह**तद्विच्छिन्न** इत्यादि ।

**तद्विच्छिन्न इति ज्ञानजनकत्वाद्यथा मनः ।**
**श्रोत्रमप्राप्यकारि स्यान्नान्यथैव त्वगादिवत् ॥२५२६॥**

तदिति । तस्मात् । नान्यथैवं त्वगादिवदिति वैधर्म्यदृष्टान्तः । यथा त्वगादेरिन्द्रियस्य विच्छेदेन ग्रहणं न भवति तथाऽत्रापि स्यादिति यावत् ॥२५२६॥

**मनोपी**त्यादिना दृष्टान्तस्य साध्यविकलतामाशङ्क्य परिहरति ।

**मनोऽपि प्राप्यकारीति ये प्राहुः क्षणमात्रतः ।**
**विदूरतरदेशस्थं चेतस्तेषां न युज्यते ॥२५२७॥**

अत्रोद्योतकरकुमारिलादयः प्रमाणयन्तिप्राप्यकारिणी चक्षुःश्रोत्रे बाह्येन्द्रियत्वात् घ्राणादिवत् । बाह्यग्रहणमन्तःकरणेन मनसा व्यभिचारपरिहारार्थम् । तथा करणत्वे सति व्यवहितार्थानुपलम्भकत्वात् घ्राणादिवत् । विषयनिवृत्त्यर्थं करणत्वे सतीति विशेषणम् । तथा रूपशब्दौ प्राप्यकारिबाह्येन्द्रियग्राह्यौ बाह्येन्द्रियार्थत्वात्, गन्धरसवत् । तथा रूपशब्दविज्ञाने प्राप्यकारिबाह्येन्द्रियग्राह्यविषयालम्बने बाह्येन्द्रियार्थालम्बनत्वात्, गन्धरसज्ञानवदिति । अत्र दूषणमाह-**यत्त्वि**त्यादि ।

**यत्तु बाह्येन्द्रियत्वादि प्राप्यकारित्वसाधनम् ।**
**अन्यधर्मविजातीयाद्विरोधाद्व्यभिचारि तत् ॥२५२८॥**

सुबोधम् ॥२५२८॥

**॥ प्रमाणसमुच्चयम् ॥**

**सान्तरग्रहणं न स्यात् प्राप्तौ ज्ञानाधिकस्य च ।**
**अधिष्ठानाद्बहिर्नाक्षं न शक्तिर्विषये क्षणे ॥२०॥**

यथोक्तं दिङ्नागेन, बहिर्वर्तित्वादिन्द्रियस्योपपन्ने सान्तरग्रहणमितिचेदत उक्तं 'अधिष्ठानाद्बहिर्नाक्ष' मिति । किंत्वधिष्ठानदेश एवेन्द्रियम् । कुतः तच्चिकित्सादियोगतः ।

**सत्यपि च बहिर्भावे न शक्तिर्विषयेक्षणे ।**
**यदि च स्यात् तदा पेश्यदप्युन्मील्य निमीलनात् ॥**

यदि च स्यादुन्मील्यनिमीलितनयनोऽपि रूपं पश्येदुन्मीलनादस्ति बहिरिन्द्रियमिति ।

**ततश्चाप्राप्यकारित्वात् यद्बौद्धैः श्रोत्रचक्षुषोः ।**
**लक्षणव्याप्तिसिद्ध्यर्थं संयोगो नेति कीर्त्यते ॥**

किंच यदि प्राप्यकारि चक्षुः स्यात्सान्तराधिकग्रहणं न प्राप्नोति । नहीन्द्रियाणां निरन्तरे विषये गन्धादौ सान्तरग्रहणं, दृष्टं, नाप्यधिकग्रहणं । अथ मतं बहिरधिष्ठानाद्वृत्तिरिन्द्रियस्य अतः उपपन्नं तद्विषयस्य सान्तराधिकग्रहणमिति तदयुक्तम् ॥

ननु ते चक्षुःश्रोत्रे आश्रयाद्बहिर्भवतः । अतश्च सान्तराधिकयोर्ग्रहणमुपपद्यते चेत् । तदपि न युज्यते । कुतः अधिष्ठानादित्यादि ।

चक्षुःश्रोत्रविज्ञानयोरपि यस्मात् प्रत्यक्षत्वमिष्यते तयोश्च सन्निकर्षजत्वं न संभवति । तदसंभवदर्शनार्थमाह सान्तरग्रहणमिति । सान्तरग्रहणं विच्छिन्नग्रहणं अधिकग्रहणं इन्द्रियासम्बद्धग्रहणमिति ॥

॥ अभिधर्मकोष: स्वोपज्ञ टीकासमेत: ॥

तद्यदि चक्षु: पश्यति, किमेकेन चक्षुषा रूपाणि पश्यति ? आहोस्विद् उभाभ्याम् ? नात्र नियम: ।

**उभाभ्यामपि चक्षुर्भ्यां पश्यति व्यक्तदर्शनात् ।**

**उभाभ्यामपि चक्षुर्भ्यां पश्यतीत्याभिधार्मिका:** । तथा हि-द्वयोर्विवृतयो: परिशुद्धतरं दर्शनं भवति। एकस्मिंश्चोन्मीलिते चक्षुषि द्वितीये चार्धनिमिलिते द्विचन्द्रादिग्रहणं भवति; नैकतरान्यथी-भावात् ।

न चाश्रयविच्छेदाद् विच्छेदप्रसङ्ग:; विज्ञानस्य देशाप्रतिष्ठितत्वाद् रूपवदिति ॥

यदि चक्षु: पश्यति शृणोति यावन्मनो विजानाति, किमेषां प्राप्तो विषय: ? आहोस्विदप्राप्त: ?

***चक्षु:श्रोत्रमनोऽप्राप्तविषयम्,***

तथा हि-दूराद् रूपं पश्यति, अक्षिस्थमञ्जनं न पश्यति । दूराच्छब्दं शृणोति, सति च प्राप्तविषयत्वे दिव्यं चक्षु:श्रोत्रमिह मनुष्येषु ध्यायिनां नोपजायेत, घ्राणादिवत् ।

**यद्यप्राप्तविषयं चक्षु:**, कस्मान्न सर्वमप्राप्तं पश्यति दूरं तिरस्कृतं च ! कथं तावदयस्कान्तो न सर्वमप्राप्तमय: कर्षति ! प्राप्तविषयत्वेऽपि चैतत् समानम् । कस्मान्न सर्वं प्राप्तं पश्यत्यञ्जनं शलाकां वा । यथा च घ्राणादीनां हि प्राप्तो विषयो न तु सर्व:, सहभूगन्धाद्यग्रहणात्; एवं चक्षुषोऽप्यप्राप्त: स्यात्, न तु सर्व: । मनस्त्वरूपित्वात् प्राप्तुमेवाशक्तम् ।

केचित् पुन: श्रोत्रं प्राप्ताप्राप्तविषयं मन्यन्ते; कर्णाभ्यन्तरेऽपि शब्दश्रवणात् । शेषं तु घ्राण-जिह्वाकायाख्यम् । XXX..........................................XXX

किं पुनरेभिश्चक्षुरादिभिरात्मपरिमाणतुल्यस्यार्थस्य ग्रहणं भवति, आशुवृत्त्या च पर्वतादीना-मलातचक्रादिवद् ? आहोस्वित् तुल्यातुल्यस्य ? यानि तावदेतानि प्राप्तविषयाण्युक्तानि, एभि:

यावन्तो हीन्द्रियपरमाणवस्तावन्तो हि विषयपरमाणव: समेत्य विज्ञानं जनयन्ति । चक्षु:-श्रोत्राभ्यां त्वनियम: । कदाचिदल्पीयांसो यदा वालाग्रं पश्यति, कदाचित् समा यदा द्राक्षाफलं पश्यति, कदाचित् भूयांसो यदा महान्तं पर्वतं पश्यत्युन्मिषितमात्रेण । एवं श्रोत्रेण मशकमेघादिशब्दश्रवणे घोषम् ।

मनस्त्वमूर्त्तिवदेवेति परिमाणपरिच्छेद: सम्प्रधार्यते ॥

कथं पुनरेषां चक्षुरादीन्द्रियपरमाणूनां सन्निवेश: ?

चक्षुरिन्द्रियपरमाणवस्तावदक्षितारकायामजाजीपुष्पवदवस्थिता: । अच्छचर्मावच्छदितास्तु न विकीर्यन्ते । अधरौत्तर्येण पिण्डवदवस्थिता इत्यपरे । न चान्योऽन्यमावृण्वन्ति; स्फटिकवदच्छत्वात् ।

## ॥ अभिधर्मकोषः स्फुटार्थ टीका ॥

**उभाभ्यामपि** इति। अभिशब्दादेकेनापि नात्र नियमः। द्वयोर्विवृतयोः परिशुद्धतरं दर्शन मित्युक्तं भवति। **नैकतरान्यथीभावादिति।** उन्मीलितार्धनिमीलितयोरक्ष्णोरेकतरस्यान्यथीभावात्। द्वयोरेकतरद् यद्यन्यथीभवति। यदि यदुन्मीलितं तदर्धनिमीलितं क्रियते, सर्वनिमीलितं वा; यच्चार्ध-निमीलितं यदि तत् सर्वनिमीलितं क्रियेत सर्वोन्मीलितं वा, तदा द्विचन्द्रदर्शनं न भवति। अतोऽव-गम्यतेद्वयोरपि चक्षुषोरत्र विज्ञानोत्पत्तौ व्यापारोऽस्तीति। देशाप्रतिष्ठितत्वाद् रूपवदिति। विपरीत-दृष्टान्तः। यथा रूपस्य देशप्रतिष्ठितत्वादाश्रयविच्छेदाद् विच्छेदो भवति, नैवं विज्ञानस्य। न हि विज्ञानं देशप्रतिष्ठितम्, किं तर्हि? देशाप्रतिष्ठितम्; अमूर्तत्वात्। देशाप्रतिष्ठितत्वाच्च नाश्रयविच्छेदादिच्छेदो भवति।

**तथाहि दूराद्रूपं पश्यतीति।** यत्र रूपं दृश्यते, न तत्र तद्ग्राहकं चक्षुरिन्द्रियमस्ति, तत्र प्रमाणा-नुपलभ्यमानत्वात्, तत्राविद्यमानदेवदत्तादिवत्। यथा चक्षुः, एवं श्रोत्रमपि वक्तव्यम्। इतर आह- '**स्वविषयदेशप्रापि चक्षुःश्रोत्रम्; इन्द्रियत्वात्, घ्राणेन्द्रियादिवत्।**' अनेनानुमानेन तत्र प्रमाणा-नुपलभ्यमानत्वं हेतुमसिद्धं दर्शयति। आचार्य आह-**सति च प्राप्तविषयत्व** इति। विस्तरः-यदि प्राप्तविषयं चक्षुःश्रोत्रं कल्प्येत, दिव्यं चक्षुःश्रोत्रमिह मनुष्येषु ध्यायिनां नोपजायेत। यदि हि चक्षुः-श्रोत्रमतिविप्रकृष्टदेशस्थं व्यवहितं च कुड्यादिभिर्यथायोगं रूपं शब्दं गृह्णीयाद्, एवमस्य दिव्यत्वं सम्भवेत्, तच्च प्राप्तविषयत्वे न स्यात्। घ्राणादिवत्। यथा घ्राणजिह्वाकायाः प्राप्तविषयत्वाद् दिव्या ध्यायिनां नोपजायेरन्, तद्वत्। अनेन स्वविषयदेशप्रापित्वपक्षस्य धर्मिविशेषविपर्ययापक्षालत्वं दर्शयति। सम्भवद्दिव्यत्वे हि चक्षुःश्रोत्रे धर्मी। असम्भवद्दिव्यत्वभावो विशेषविपर्ययः। स प्राप्नोतीति दोषः। अनेन दोषेणाननुमानत्वात् तत्प्रमाणानुपलभ्यमानत्वं सिद्धं व्यवस्थापयति। तस्मादप्राप्तविषयं चक्षुःश्रोत्रम्।

यद्यप्राप्तविषयं चक्षुरिति विस्तरः। आसन्नेनातिदूरस्थेन तिरस्कृतेन वा तुल्या तदप्राप्तिरिति तत्र दर्शनं प्रसञ्जयति। किमिदं परस्य साधनम्, उत दूषणमिति? यदि तावदेवं साधनम्-'**अतिदूरं तिरस्कृतं चक्षुःश्रोत्रेण गृह्यते, अप्राप्तत्वात्, आसन्नविषयवत्**' इति, तदसाधनम्; हेतोः स्वयम-निश्चितत्वात्, पूर्वाभ्युपगमविरोधाद्वा। अथ दूषणम्-'**सर्वाप्राप्तग्राहकत्वं चक्षुःश्रोत्रलक्षणस्य धर्मिणः प्रसज्यते**', तददूषणम्; अनुमानबाधनात्। कथम्? इत्याह-कथं तावदयस्कान्तो न सर्वमप्राप्तमयः कर्षतीति। प्रश्नमुखेनायस्कान्तनिदर्शनमुपन्यस्य सर्वाप्राप्तग्राहकत्वं चक्षुःश्रोत्रस्य साधयति-न सर्वाप्राप्तग्राहकं चक्षुःश्रोत्रम्; सर्वाप्राप्तग्रहणशक्तिहीनत्वात्, अयस्कान्तवत्। अयस्कान्तो ह्यप्राप्तमयो गृह्णाति, कर्षतीत्यर्थः, न च सर्वमप्राप्तं गृह्णाति; तद्वच्चक्षुःश्रोत्रम्। प्राप्तविषयत्वेऽपि चैतत् समानमिति। नातिदूरतिरस्कृतो विषयश्चक्षुःश्रोत्रेण गृह्यते; ग्रहणायोग्यत्वात्, सम्प्राप्ताञ्जनशलाकावत्। अथ वा-न सर्वस्वग्राह्यग्राहि चक्षुःश्रोत्रम्; इन्द्रियस्वाभाव्यात्, घ्राणेन्द्रियादिवत्। घ्राणादीनां हि प्राप्तो

विषयो न तु सर्वः, सहभूगन्धाद्यग्रहणात् । घ्राणादिसहभूनि हि गन्धरसस्प्रष्टव्यानि घ्राणादिभिर्न गृह्यन्ते, शक्तिर्हीन्द्रियाणामीदृशीति । मनस्त्वरूपित्वादिति । प्राप्तत्वं मूर्तानामेव व्यवस्थाप्येत, नामूर्तानामिति । मनोऽप्राप्तविषयमिति न विचारः क्रियते । XXX......................XXX

**आशुवृत्त्या च पर्वतादीनामलातचक्रादिवदिति** । आत्मपरिमाणतुल्यस्यैवार्थस्य ग्रहण इष्यमाणे कथं पर्वतादीनां महतां सकृदिव ग्रहणं लक्ष्यते, न क्रमेण ? इत्याशङ्क्य युक्तिं तथा ग्रहणे कथयति-**आशुवृत्त्या चे**त्यादि । यथालातचक्रादिग्रहणं क्रमेण वर्तमानं सकृदिव लक्ष्यते, तथा पर्वतनदीशब्दादिग्रहणमाशुवृत्त्या भवतीति । **आहोस्वित्तुल्यातुल्यस्येति** । द्राक्षाफलादिदर्शने तुल्यस्य, वालाग्रपर्वतादिदर्शनेऽतुल्यस्येत्यभिप्रायः । **उन्मिषितमात्रेणेति** । न क्रमदर्शनन्यायेन । **एवं श्रोत्रे**णेति विस्तरः । कदाचिदल्पीयांसः, यदा मशकशब्दं श्रृणोति । कदाचित् समाः, यदा श्रोत्रपरमाणुसमप्रमाणं कस्यचिच्छब्दं शृणोति । कदाचिद् भूयांसः, यदा मेघशब्दं शृणोतीति ।

अजाजीपुष्पवदवस्थिताः कालजीरकपुष्पवदवस्थिताः । एकतलावस्थिता इत्यर्थः ।

**॥ चंद्रकीर्त्ति वृत्तिसहित चतुःशतकम् ॥**

रूपं पश्येद्देशं गत्वा वा पश्येदगत्वा वा पश्येदुभयथा च दोष इति प्रतिपादयन्नाह-

**पश्येच्चक्षुश्चिराद्दूरे गतिमद्यदि तद्भवेत् ।**
**अत्यभ्यासे च दूरे च रूपं व्यक्तं न तच्च किम् ॥१३॥**

यदि चक्षुः प्राप्तकारित्वाद्विषयदेशं गच्छेत्तदोन्मिषितमात्रेण न चन्द्रतारकादीनर्थान् गृह्णीयात् । (गतिमतोऽर्थदेशोपग्रहणं) तुल्यकालं विप्रकृष्टविषयग्रहणं (च) अयुक्तं गतिकालस्य भिन्नत्वात् । पश्यति च चक्षुरुन्मिषितमात्रेण समीपस्थवद्विदूरदेशस्थमपीत्ययुक्तमेतत् यदि (च) प्राप्तकारिचक्षुः स्यात्तदात्यभ्यासेऽपि पश्येदक्षिस्थामञ्जनशलाकां दूरे च व्यक्तदर्शनं स्यात् । न चैतत्सम्भवतीत्ययुक्तमेतत् ॥१३॥

अपि च । यदि चक्षुर्गत्वा रूपं पश्यति तत्किं दृष्ट्वा तद्देशं गच्छत्युतादृष्ट्वा । उभयथापि दोष इति प्रतिपादयन्नाह ।

**गतेन न गुणः कश्चिद्रूपं दृष्टाक्षि याति चेत् ।**
**द्रष्टव्यं नियमेनेष्टमिति वा जायते वृथा ॥१४॥**

यदि रूपं दृष्ट्वा रूपदेशं चक्षुर्यातीति कल्प्यते गतेन तेन गमनेन चक्षुषो न किञ्चित्प्रयोजनम् । विषयदर्शनार्थं चक्षुषो गमनम् । स च विषयः पूर्वमेवेहस्थेन दृष्ट इति न किञ्चिद्गमनस्य प्रयोजनम् । अथादृष्ट्वा गच्छति । तदा दिदृक्षित विषयदर्शनं नियमेन न प्राप्नोति । अद्रष्टाह्यन्धस्येवान-भिलक्षित-देशगमनादृष्टव्यस्य नियमेन दर्शनं न प्राप्नोति ॥१४॥

अथैतद्दोषपरिजिहीर्षया यदि ।

**गृह्णीयादगतं चक्षुः पश्येत्सर्वमिदं जगत् ।**
**यस्य नास्ति गतिस्तस्य नास्तिदूरं न चावृतम् ॥१५॥**

यो हि मन्यते चक्षुः श्रोतं मनोऽप्राप्तविषयमित्यागमादप्राप्तविषयमेव चक्षुरिति तं प्रत्युच्यते। प्राप्तकारितामात्रप्रतिषेधपरत्वादागमस्य तावदविरोधः । क्वचिद्विधेः प्राधान्यं यत्र तस्याविरोधः । क्वचित्प्रतिषेधस्य प्राधान्यं यत्र तदविरोधः । तदत्र विधेरसम्भवात्प्राप्तकारिताप्रतिषेधमात्रेणाप्राप्त-विषयत्वं व्यवस्थाप्यते। विधिमुखेन त्वप्राप्तविषयत्वे कल्प्यमान इहस्थमेव चक्षुः सर्व जगत्पश्येत्। यस्य हि गतिर्नास्ति तस्य कुतो दूरम् । समीपस्थोऽपि ह्यनेनार्थोऽगत्वा द्रष्टव्यो विदूरस्थोऽपीति दूरकृतोऽपि विशेषो न् स्यात् । यदा चागत्वा पश्यति तदेहस्थमिव विदूरस्थमपि पश्येत् । गतौ हि सत्याभावावृते गतिविघाताद्यवृतं नेक्षत इति युक्तम् । यदा त्वगत्वाद्रष्टव्यं तदावृते गतिप्रतिबन्धा-भावादनावृत इव दर्शनं स्यात् ॥१५॥

यदि च दर्शनस्वभावं चक्षुः स्यात्तदा स्वभावस्य सर्वत्रैवाव्याघातात् स्वरूपमपि पश्येत् । तथा हि लोके-

**स्वभावः सर्वभावानां पूर्वमात्मनि दृश्यते ।**
**ग्रहणं चक्षुषः केन चक्षुषैव न जायते ॥१६॥**

यथा चम्पकमल्लिकादिषु सौगन्ध्यं पूर्व स्वाश्रय एवोपलभ्यते पश्चात्तत्सम्पर्कस्तैलादिस्वपि । यथा चाग्नेरौष्णयं स्वतोऽवस्थितं तद्योगात् परतोऽप्युपलभ्यते । एवं यदि चक्षुदर्शनस्वभावं स्यात्तदा स्वात्मन्येव तावद्दर्शनं स्यात् । कस्मात्पुनश्चक्षुषो ग्रहणं चक्षुषैव न भवति । भावानां स्वभावस्य च स्वात्मन्येव प्रथमतरं विद्यमानत्वाच्चक्षुषैव चक्षुषो ग्रहणं न्याय्यम् । न चक्षुः स्वात्मानं पश्यतीति लोष्ठादिवत् परदर्शनमप्यस्य न सम्भाव्यते ॥१६॥

● ● ●

## અગ્નિભૂતિ ભાસ

(ઢાલ : લાછલદે માત મલ્હાર)

ગોબર ગામ સમૃદ્ધ, અગનિભૂતિ સુપ્રસિદ્ધ;
આજ હો બીજો રે, ગણધર વર-મહિમા-મંદિરૂજી. ૧

પૃથિવી તેહની માત, શ્રી વસુભૂતિ તે જાત;
આજ હો સોહઈ રે, મન મોહઈ જનમિઓ કૃત્તિકાજી. ૨

ગૃહિપણઈ વરસ છયાલ, બાર છઉમત્થનો કાલ;
આજ હો સોલઈ રે, રંગ રોલઈ જિન પદ ભોગવ્યુંજી. ૩

આયુ ચિહોત્તરી વર્ષ પણસય સીસ સહર્ષ;
આજ હો જેહનું રે, અતિ ઉત્તમ ગૌતમ ગોત્ર છઈજી. ૪

ભાજ્યો કર્મસંદેહ, વીરસ્યું નેહ અછેહ;
આજ હો તેહનઈ રે, મુખ દીઠઈ નીઠઈ દુખ સવેજી. ૫

ગગનઈ ઊગઈ ચંદ, કરઈ ચકોર આનંદ;
આજ હો દૂરઈ પણિ સુખ પૂરઈ, સુનજરિ તિમ ફલઈજી. ૬

દેખી ભગતિ પડૂર, રહો મુઝ ચિત્ત હજુર;
આજ હો રાગઈ રે અથાગઈ વાચક જશ કહઈજી. ૭



विभाग-५

# प्राप्यकारीतावादी-दर्शनो

## ॥ व्योमवती ॥

**नन्वा**हङ्कारिकत्वादिन्द्रियाणामयुक्तमेतत् । तथा च प्रकाशकत्वं सत्त्वधर्म इति सात्त्विकादहङ्कारादिन्द्रियाणामुदयः । किमत्र प्रमाणमिति **चेद**प्राप्यकारित्वम् । तच्च शाखाचन्द्रमसोर्युगपद् ग्रहणाद् विज्ञातम् । अन्यथा हि शाखासम्बन्धोत्तरकालं चिरेण चन्द्रमसा च सम्बन्धाद् युगपद् ग्रहणं न स्यात्, अस्ति च, अतोऽप्राप्यकारित्वम् । तच्च भौतिकेषु न सम्भवति प्रदीपादिष्वदर्शनादित्यभौतिकत्वमन्येषामपि प्रतिपत्तव्यं चक्षुर्दृष्टान्तबलादेव ।

तथा महदणुप्रकाशकत्वाच्च । यद्धि यावत्परिमाणं तावदेव क्रियां कुर्वद् दृष्टमिति । तथा ह्यल्पपरिमाणं वास्यादि महान्तं वटवृक्षं व्याप्यच्छिदां न करोतीति दृष्टम् । किं तर्हि ? स्वव्याप्तप्रदेश एवेति । चक्षुरपि अल्पपरिमाणत्वान्न पर्वतादिपरिच्छेदकं स्यात्, तत्तु दृष्टमतो न भौतिकमिति ।

यत्तावदप्राप्यकारित्वादिति साधनं तदसिद्धम् । व्यवहितार्थानुपलब्ध्या प्राप्तेरुपलम्भात् । अन्यथा हि व्यवहितस्याग्रहणमन्तिके च ग्रहणं न स्याद् अप्राप्तेरुभयत्राविशेषात् । आवरणानुपपत्तिश्च प्राप्तिप्रतिषेधकत्वात्, तथा च प्राप्तिप्रतिषेधं कुर्वदावरणमग्रहणाय कल्प्यते । दृष्टश्चावरणसामर्थ्यम्, दूरे वा प्रकाशकत्वमतः प्रदीपस्येव प्राप्तार्थपरिच्छेदकत्वम् । तथा च चक्षुः प्राप्तार्थपरिच्छेदकं व्यवहिताप्रकाशकत्वात्, यद् यद् व्यवहिताप्रकाशकं तत्तत् प्राप्तावर्थपरिच्छेदकं यथा प्रदीपः, तथा व्यवहिताप्रकाशकं चक्षुः, तस्मात् प्राप्तार्थपरिच्छेदकमिति ॥

प्राप्तिसद्भावे प्रमाणोपपत्तेः, शाखाचन्द्रमसोः कालभेदेन ग्रहणसद्भावेऽप्याशुभावादुत्पलपत्रशतव्यतिभेदाभिमानवद् युगपद् ग्रहणाभिमानः ।

यच्च महदणुप्रकाशकत्वं तदप्यन्यथासिद्धत्वादसाधनम् । तथाहि, चक्षुर्बहिर्गतं बाह्यलोकसम्बन्धाद् विषयपरिमाणमुत्पद्यत इति महदाद्यर्थप्रकाशकं नाभौतिकत्वादिति ।

## ॥ न्यायलीलावती ॥

तथापि विशिष्टादृष्टोपगृहीतं गोलकमेवास्तु इन्द्रियं कर्णशष्कुलीवत् । **न च** व्यवहितोपलम्भा**पत्तिः** । योग्यदेशस्थस्यैव ग्राह्यत्वात् । अन्यथा महानिले ऋजुवस्त्वग्रहणप्रसङ्गः । पवनेन

तेजसां दूरमपनयनात् तेजोभेदे नैवमिति **चेन्न**, कराभ्यामप्यनावरणापत्तेः । शाखाचन्द्रमसोः समसमयवेदनाच्च । **न च** तद् भ्रान्तं, यौगपद्यमात्रप्रतिक्षेपापत्तेः । तत्र बाधकाभावादिति **चेन्न**, तुल्यत्वात् । **एतेन** रसनादिकमप्य**पास्तम्** ।

त्वगपि देहव्यापी उद्भूतस्पर्शः पवन एवास्तामिति नातीन्द्रियतासिद्धिरिति **चेन्न**, का देशस्य योग्यता, रूपभेदो वा इन्द्रियप्राप्तिर्वा । **नाद्यः** । दिगन्तरस्थेन सत्यावरणे तदनुपलब्धेः । **पुरुषान्तरं** प्रति तदावृतमिति **चेन्न**, एकस्यावृतानावृतत्वविरोधात् । ज्ञातृभेदेनैकस्यैव ज्ञातृपुरोवर्तिकुड्यादिपरापरदेशसंयोगित्वं तत्त्वमविरुद्धमिति **चेन्न**, आवृताप्रकाशकत्वेन दीपवत्प्राप्यकारित्वसिद्धिः । **नेतरः** । तत एवाधिष्ठानबहिर्भूतेन्द्रियसिद्धेः । ऋजुवस्तुग्रहोऽपि तस्यातिशयितवेगवत्त्वेनाप्रतिबन्धात् । तस्य च फलोन्नेयत्वात् अचिरदीधितिसंयोगवत् । अत एव यौगपद्यस्य भ्रान्तत्वं ।

## ॥ न्यायलीलावती कण्ठाभरणम् ॥

बौद्धः शङ्कते**तथापीति** । **कर्णशष्कुलीवदिति** प्रसाध्याङ्गकम् । विशिष्टादृष्टोपगृहीतत्वमात्रे वा कर्णशष्कुली दृष्टान्तः । बहिर्वृत्त्यभावमात्रे वा प्रसन्नान्धव्यावृत्तये विशिष्टादृष्टोपगृहीतत्वं विशेषणम् । **ननु** प्राप्तिश्चेन्न तन्त्रं तदा व्यवहितमपि गृह्णीयादित्यत आह–**न चेति** । विषययोग्यताया एव प्रयोजकत्वं न तु प्राप्तेरित्यर्थः । **अन्यथेति** । यदि प्राप्य गृह्णीयादित्यर्थः । **तेजोभेद इति** । शीघ्रगमनशील इत्यर्थः । एतादृशस्यानपनेयत्वे करेणापि चक्षुरपनयो न स्यादित्याह **कराभ्यामिति** । सन्निकृष्टविप्रकृष्टयोरतुल्यकालग्रहणं न स्यादित्याह–**शाखेति** । **तदिति** । वेदनयोः समकालीनत्ववेदनमित्यर्थः । **तत्रेति** । यौगपद्यमात्र इत्यर्थः । रसनादिकमिति । अधिष्ठानातिरिक्तमित्यर्थः ।

**पवन एवेति** । बाह्य एवेत्यर्थः । **नेन्दियसिद्धि**रिति । अतीन्द्रियसिद्धिरित्यर्थः । यद्वा सिद्धान्त्यमतेन्द्रियसिद्धिरित्यर्थः । **रूपभेद** इति । स्वरूपभेद इत्यर्थः । **दिगन्तरस्थेनेति** । व्यवहितघटनिकटस्थेनेत्यर्थः । **पुरुषान्तरमिति** । व्यवहितमित्यर्थः । **ज्ञातृभेदेनेति** । ज्ञात्रोश्चैत्रमैत्रयोः पुरोवर्त्ति यत् कुड्यं यत्परावरदेशसंयोगित्वमावृतानावृतत्वमविरुद्धमेवेत्यर्थः । चक्षुः प्राप्यकारि प्रकाशकत्वे सति आवृताप्रकाशकत्वात् प्रदीपवदित्यनुमानात् प्राप्यकारित्वसिद्धिरित्याह **आवृतेति** । इन्द्रियप्राप्तियोग्यताभ्युपगमेनैव दूषयति–**नेतर इति** । **तत एवेति** । गोलकस्य दूरस्थेनप्राप्तेरित्यर्थः । महानिलप्रेर्यत्वं यदुक्तं तत्राह–**ऋज्विति** । तर्हि करप्रेर्य्यत्वमपि न स्यादिति यदुक्तं तत्राह–**तस्येति** । निविडावयवद्रव्यापनेयत्वेऽपि महानिलानपनेयत्वं फलबलोन्नेयमित्यर्थः । **अत एवेति** । प्राप्यकारित्वादेवेत्यर्थः । सन्निकृष्टविप्रकृष्टयोर्युगपत् प्राप्तिरपि पृथक्तया उपपद्यत इति भावः । **इन्द्रियत्वेनेति** । शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानजनकमनःसंयोगाश्रयत्वमिन्द्रियत्वमितिव्यवस्थापनादिति भावः ।

## ॥ न्यायलीलावती प्रकाश ॥

यद्यपि चक्षुस्तैजसत्वं प्रागेव साधितं तथापि गोलकसम्बद्धमेव तेजश्चक्षुरस्तु नाश्रयबहिर्वर्त्तीति शङ्कामाह-**तथापीति** । विशिष्टादृष्टोपगृहीतमिति । प्रसन्नान्धव्यावृत्तये अधिष्ठानादन्यदेशगामित्वाभावसाम्येनाह-**कर्णशष्कुलीवदिति** । यथा कर्णशष्कुलीबहिर्वृत्त्याकाशं न श्रोत्रमित्यर्थः । ननु चाप्राप्तत्वाविशेषात्कुड्यव्यवहितमपि चक्षुर्गृह्णीयादित्यत आह-**न चेति** । गोलकाद् बहिर्निर्गच्छच्चक्षुः कियद्दूरमेव गच्छति नातिदूरम्, स्फटिकादिना न प्रतिबध्यते किन्तु कुड्यादिनेति त्वदुपगमवन्मयापि देशस्वभावविशेषस्य योग्यतानियामकत्वोपगमादित्यर्थः । ननु विषयसम्बद्धस्वभावत्वाच्चक्षुषो न पवनेन दूरापनय इत्याह-**तेजोभेद इति** । कराभ्यामिति । यद्यपि करादिवारणीयमपि काण्डादि वायुना न प्रतिबध्यत इत्यनैकान्तिकं तथापि वेगमान्द्यस्यावश्यकतया यावद्दूरं निर्वाते याति काण्डादि न तावद्दूरं वायावित्यस्ति । चक्षुस्तु वातनिर्वातयोरुभयत्र तुल्यगाम्येव । तथा च करप्रतिबद्धगतिकं वाते मन्दं गच्छतीति नियम इति भावः । **रसनादिकमिति** । अधिष्ठानसम्बद्धजलादिभिन्नमिति शेषः । पवन एव प्रत्यक्षस्पर्शाश्रय इति शेषः । **दिगन्तरस्थेनेति** । सन्निधानवद् व्यवधानेऽपि पर्वतवत्केशस्यापि ग्रहापत्तेर्दूरसाक्षात्कारे महत्त्वविशेषः कारणमिति भावः । ननु यत्र क्वचित् कुड्यादिसत्त्वं न प्रतिबन्धकमपि तु ग्राह्यग्राहकमध्यवर्त्ति । **न चैवं** कुड्यादौ मध्यवर्त्तिनि पर्वताद्य-ग्रह**प्रसङ्गः**, ग्राह्याधिकपरिमाणवन्मध्यवर्त्तिनः कुड्यादेः प्रतिबन्धकत्वादित्यभिप्रेत्याह**ज्ञातृभेदे( ने!)** ति । **आवृतेति** । चक्षुः प्राप्यकारि प्रकाशकत्वे सत्यावृताप्रकाशकत्वात् प्रदीपवत् । न च गोलकपक्षीकरणे बाधः, अतिरिक्तपक्षत्वे चाश्रयासिद्धिः, रसाद्यव्यञ्जकरूपसाक्षात्कारकारणत्वेनोभयसिद्धेन पक्षत्वात् । **नन्वावृतत्वं** यदीन्द्रियगतिप्रतिबन्धकमध्यस्थितद्रव्यकत्वं तर्ह्यसिद्धम् । अथाधिष्ठानासम्बन्धार्थग्राहकत्वं तदा शरीरेणानैकान्तिकं शरीरस्य हि स्वावयवोऽधिष्ठानमेव । **मैवम्**। पूर्वमेव चक्षुस्तैजसत्वसिद्धौ बहिर्वृत्तितार्थमेव विवादात् तैजसत्वेन हेतुविशेषणान्नानैकान्तिकम् । **न च** तैजसशरीरेणानैकान्तः अन्त्यावयविभिन्नतैजसत्वस्य विवक्षितत्वात् । अत्र यत्र काले चन्द्रसंयुक्तं चक्षुस्तत्काले शाखयापीति तुल्यकालग्रहणोपपत्तिः । **न** चाग्रावच्छेदेनैष चक्षुःसंयोगो ग्राहकः, अन्यथा मूलावच्छेदेन गोलकस्य नित्यसम्बन्धात्तद्ग्रहापत्तेरिति **वाच्यम्**, तिर्यग्भागेन शाखाचन्द्रमसोरग्रावच्छेदेन चक्षुःसंयोगाविरोधादिति समाधाने सत्येव यत्र न तथात्वं तत्राह-**अत एवेति** । अतिशयितवेगवत्त्वादेवेत्यर्थः । **ननु** कर्मणां कथमेकत्र चिरत्वमन्यत्र क्षिप्रत्वं पूर्वदेशविभागोत्तरदेशसंयोगयोः कर्मणा जनयितव्ययोरविशेषात् । **अत्राहुः** । यत्र(तु)भूयोऽवच्छेदेनोत्तरदेशसंयोगस्तत्र क्षिप्रता, यत्र स्वल्पावच्छेदेन स, तत्र चिरत्वम् । न चैवमुन्मील्य निमीलितनयनस्यापि साक्षात्कारापत्तिः, गोलकसन्निकृष्टेन्द्रियस्य विषयसंयोगे सति तज्ज्ञानजनकत्वोपगमात् ।

## ॥ न्यायलीलावतीप्रकाशविवृत्तिः ॥

**प्रसन्नान्धो**ऽभग्नगोलकोऽन्ध इत्यर्थः श्रोत्रतदधिष्ठानरभेदा(दा?)ह-**अधिष्ठानादिति । विषयसम्बद्धेति ।** अन्याप्रतिरुद्धस्यभावत्वादित्यर्थः । **वेगेति ।** अन्यथा वातनिर्वातयोः काण्डस्य तुल्यतापत्तेरिति भावः । **सन्निधानवदिति ।** देशस्वरूपभेदात्मकयोग्यताया नियामकत्वे आवृतस्यापि ग्रहणापत्तिरिति मूलोक्तमुपलक्षणम् । दूरस्थकेशस्यापि ग्रहणापत्तिः पर्वतसाक्षात्कारानुरोधेन तद्देशस्य योग्यत्वा-दित्यर्थः । अत्रेष्टापत्तिमाशङ्क्याह-**दूरेति ।** स चात्र नास्त्येवेति नेष्टापत्तिरिति भावः । इति पूर्वोत्तरफक्किकयोर्व्याख्यानमयुक्तं देशस्य योग्यत्वेऽपि महत्त्वविशेषरूपसहकारिविरहादेव दूरस्थ केशानुपलम्भोपपत्तेस्तस्य देशयोग्यतायामबाधकत्वात् । तस्मादेवं व्याख्या । **ननु** यथेन्द्रियसन्निकर्षनियामकत्वपक्षे तवेन्द्रियसम्बद्धस्यापि व्यवहितकेशस्याग्रहस्तथा देशस्वभावस्यापि नियामकत्वे मम कुतश्चिन्निमित्तादावृताग्रहः स्यादित्याशङ्कायामाह-**सन्निधानवदिति ।** तथा च महत्त्वविशेषकारणाभावाद्दूरे केशाग्रहं उपपद्यते न त्वावृताग्रहः, इन्द्रियसन्निकर्षस्यानियामकत्वे ग्रहकारणवैकल्याभावादिति । **ग्राह्याधिकेति । अन्यूनेत्यर्थः ।** समानपरिमाणस्यापि प्रतिबन्धकत्वात् । यद्यप्युपरिस्थेन न्यूनपरिमाणेनापि पर्वतादिग्रहप्रतिबन्धादधिकपरिमाणेनापि किञ्चिद्दूरस्थवस्तूपलम्भाप्रतिबन्धाच्चेदमयुक्तं तथापि प्राप्यकारितापक्षेऽपि किञ्चित् क्वचिन्नयनगतिप्रतिबन्धकमुपेयम् । तथा च यादृशमेव नयनप्रतिबन्धकं तादृशमेवोपलम्भप्रतिबन्धकमिति भावः । **न च गोलकेति ।** यद्यप्यतिरिक्ततेजसः प्रागेव साधनाद्विकल्पोऽयमसङ्गतः, तथापि गोलकमात्रावच्छिन्नं तेजः पक्षो घटादिसम्बद्धं वेति विकल्पार्थो बोध्यः । **नन्वा**वृतत्वमित्यत्रावृताप्रकाशकत्वमित्यर्थस्तेनाधिष्ठानासम्बद्धार्थग्राहकत्वमित्यनेन सामानाधिकरण्यं घटते। '**असिद्धि**'रन्यतरासिद्धिः । प्रकृते तेजोगतेरन्यतरासिद्धत्वात् । तैजसत्वविशेषणासिद्धिपरिहारायाह-**पूर्वमिति ।** तथा चाधिष्ठानासम्बद्धार्थग्राहकत्वमेव तदितिभावः । शरीरे च न व्यभिचार इत्याह-**तैजसत्वेनेति ।** तथा च प्रकाशकपदं तैजसपरमिति अधिष्ठानासम्बद्धार्थग्राहकतेजस्त्वादिति हेतुरिति भावः । **अन्त्यावयवीति ।** शरीरतदवयवभिन्नेत्यर्थः । अन्यथा तद्गोलके व्यभिचारतादवस्थ्यात् । एवं च सति घ्राणे व्यभिचारवारणाय तैजसपदमिति भावः । **न चैव**मधिष्ठानासम्बद्धेति व्यर्थं स्वप्रकाशके शरीरतदवयवभिन्ने सुवर्णादौ स्वसंयुक्तार्थग्राहकत्वलक्षणप्राप्यकारित्वसाध्याभावेन व्यभिचारात् । **केचित्तू**क्तानुमानस्य चक्षुः कर्मसंयुक्तं सत् ज्ञानकारणं साक्षात्कारसाधारणकारणतेजस्त्वादालोक-वदिति तात्पर्यम् । तेजःपदं च श्रोत्रे व्यभिचारवारणायेति **वदन्ति । समाधान** इति । इदं चोद्भूतानुद्भूतरूपाभ्यामारम्भपक्षेऽन्यथा सार्वकालिकयौगपद्यप्रत्ययानुपपत्तेः । वस्तुतस्तयोर्गुणविरोधे-नारम्भकत्वमेव न भवतीति यथाकरमेव ग्राह्यमिति मिश्राः । **यत्र तु भूय इति ।** इदमपि कर्मवैजात्यादन्यथा कारणैकजात्ये कार्यवैलक्षण्यानुपपत्तेरिति भावः । **चक्षुरादीनामिति ।** चक्षुरादेरणुत्वे स्थौल्याग्रहप्रसङ्गः, तदवच्छेदेन सन्नि(क?)र्षा(भावादिति?) भावः ।

## ॥ किरणावली ॥

**इह केचिदाहुः** । अप्राप्यकारि चक्षुरधिष्ठानासम्बद्धार्थग्राहित्वात् । यत् पुनः प्राप्यकारि न तदधिष्ठानासम्बद्धार्थग्राहि । यथा रसनादि । पृथुतरग्रहणाच्च । यदि प्राप्यकारि चक्षुः स्यात् स्वतोऽधिकपरिमाणं न गृह्णीयात् । न खलु नखरञ्जनिका परशुच्छेद्यं छिनत्ति । शाखाचन्द्रमसोस्तुल्यकालग्रहणाच्च । यदि हि गत्वा गृह्णीयात् निकटस्थमाशु गृह्णीयात् । दवीयस्तु चिरेणेति न तुल्यकालमुपलम्भयेत् । अनुभवति तून्मीलयन्नेव नयने शाखां शीतमयूखञ्चेति । काचाभ्रदलस्फटिकाद्यन्तरितोपलब्धेश्च । यदि हि प्राप्तं गृह्णीयात् प्रतिघातिनां स्फटिकादिद्रव्येण विष्टम्भादप्राप्तं प्रसर्पत् तृणादिकं नाददीत । तस्मादप्राप्यकारि । ततो न तैजसमिति । **तदसत्** । अधिष्ठानसम्बद्धार्थग्राहित्वस्य प्रदीपेनानैकान्तिकत्वात् । पृथुतरग्रहणस्यापि पृथ्वग्रतया तद्वदेवोपपत्तेः । तुल्यकालग्रहणन्त्वसिद्धमेव। तदभिमानस्य कालसन्निकर्षेणोपपत्तेः । अचिन्त्योहि तेजसो लाघवातिशयेन वेगातिशयो यत्प्राचीनाचलचूडावलम्बिन्येव मयूखमालिनि भवनोदरेष्वालोक इत्यभिमानो लौकिकानाम् ।

**केचित्तु** संसर्गिद्रव्यतया निःसरदेव नायनं तेजो बाह्यालोकेनैकतां गतं युगपदेव तावदर्थेन संसृष्टमिन्द्रियमुत्पादितवदिति शाखाचन्द्रमसोस्तुल्यकालग्रहणमुपपद्यत इति समाधान**माहुः** । तदसत् । पृष्ठभागव्यवहितार्थोपलम्भप्रसङ्गात् । इन्द्रियप्राप्तये ह्यार्जवावस्थानमप्युपयुज्यत इति स्फटिकाद्यन्तरितोपलब्धिरपि प्रसादस्वभावतया स्फटिकादीनां तेजस्ततेरप्रतिबन्धकत्वात् । प्रदीपप्रभावदेवोपपत्तेरिति । येषान्त्वप्राप्यकारि चक्षुः तेषामप्राप्तत्वाविशेषादव्यवहितमिव कुड्यादिव्यवहितमपि किं न गृह्णाति । नहि व्यवधायकं प्राप्तिविघातादन्यत्र सत्तयैव कार्यविरोधि, तथात्वे तस्मिन् सति न क्वचित् कार्यं भवेत् । योग्यं योग्येन गृह्यते, तत्त्वयोग्यत्वान्न गृह्यते, न तु व्यवहितत्वादित्यपि वार्त्तं, स्थैर्य्यं स्वरूपयोग्यतायास्तदानीमप्यपरावृत्तेः । क्षणिकत्वेऽपि प्रत्यासीदतां सहकारिणामतिशयजनकत्वात् । न ह्यप्रत्यासीदन्तः सहकारिप्रत्ययाः समासहस्रेणापि भावानतिशाययन्ति । प्रत्यासत्तिश्च बौद्धनये निरन्तरोत्पादः । अस्माकं च द्रव्ययोः संयोग एव स्यात् । न च कृष्णसारस्यार्थेन निरन्तरोत्पादः । नापि संयोगः । ततस्तदाश्रयस्यातीन्द्रियस्य गतिक्रमेण निरन्तरोत्पादेन वा संयोगेन वेत्यवशिष्यते । तदेतदग्रे निरूपयिष्यत इति एषा दिक् ।

## ॥ किरणावली प्रकाशः ॥

**अप्राप्यकारीति । ननु** गोलकस्य पक्षत्वेऽपि सिद्धसाधनं तदन्यस्य पक्षत्वे चाश्रयासिद्धिः । सिद्धौ वा धर्म्मिग्राहकमानबाधः । **अत्राहुः** । तदन्यस्यैव पक्षत्वे न बाधः । धर्म्मिग्राहकमानस्य प्राप्यकारित्वानुपजीवकत्वात् । तस्य व्यवहितानुपलब्धिगम्यत्वात् । यद्वा गोलकमेव पक्षः स्वासम्बन्धविषयग्राहकत्वञ्च साध्यम् । **न च** सिद्धसाधनम् । घटसाक्षात्कारकारणतेजःसंयोग-

समानाधिकरणघटसाक्षात्कारणतेजःसंयोगवत्त्वस्य निषेध्यत्वात् । अनैकान्तिकत्वाद्विरुद्धत्वादित्यर्थः । पृथुतरग्रहणस्य साधिकपरिमाणद्रव्यग्राहिणात्वगिन्द्रियेणानैकान्तिकत्वं सत्येव समाधानान्तरमाह । **पृथुतरेति ।** यत्काले चन्द्रमसा संयुक्तं चक्षुस्तत्काले शाखयापीति तुल्यकालग्रहोपपत्तिः । न चाग्रावच्छेदेनैव चक्षुःसंयोगो ग्राहकोऽन्यथा मूलावच्छेदेन गोलकस्य नित्यसम्बन्धात् तद्ग्रहापत्तिरिति वाच्यम् । तिर्य्यग्भावेन शाखाचन्द्रमसोरग्रावच्छेदेन चक्षुःसंयोगाविरोधादिति समाधाने सत्येवाह । **तुल्यकालेति** । शाखाग्रहणानन्तरमेव चन्द्रग्रहणम् । तयोस्तुल्यकालत्वधीर्भ्रम इत्यर्थः ।

**लाघवातिशयेनेति** । सजातीयसम्बलनमेवातिशयः । गुरुत्वाभावात्मके लाघवे जात्यात्मकप्रकर्षाभावात् । एतदेव दृष्टान्तेन द्रढयति । **यत्प्राचीनेति ।**

**शालीकमतं** दूषयितुमुपन्यस्यति । **केचित्त्विति । पृष्ठभागेति ।** वस्तुतोऽनुद्भूतरूपेण चक्षुषा उद्भूतरूपेणालोकेन सहारम्भे विरोधः । आरम्भेऽपि वावयवस्येन्द्रियत्वं स्यात् । न चावयविनः कार्य्यैकोन्नेयत्वात् तस्य । **एतेने**तस्ततः स्थितैः प्रेक्षकाणां परस्परनयनैर्नारम्भविरोधः । तेषामनुद्भूतरूपत्वादित्य**पास्तम्** ।

**नन्विन्द्रियमेव** पृष्ठदेशे व्यवहितेन कुतो न सम्बध्यते इत्यत आह । **इन्द्रियप्राप्तय** इति । **तस्मिन् सतीति । ननु** यत्र क्वचित् कुड्यादि न प्रतिबन्धकं किन्तु ग्राह्यग्राहकमध्यवर्त्ति । **न चा**ल्पपरिमाणेन तादृशेन महापरिमाणद्रव्याग्रहा**पत्तिः** । ग्राह्याधिकपरिमाणस्य तन्मध्यवर्त्तिनः कुड्यादेः प्रतिबन्धक-त्वात् । **न चैवं** गोलकस्यैव रूपग्राहकत्वे प्रसन्नान्धस्यापि रूपग्रहण**प्रसङ्गः**, श्रोत्रवददृष्ट-विशेषोपग्रहेणैव गोलकस्य ग्राहकत्वात् । **मैवम्** । पूर्वोक्ततैजसानुमानेनैव चक्षुषः प्राप्यकारित्वसिद्धेः । **न चै**वमुन्मील्य निमीलितनयनस्यापि साक्षात्कार**पत्तिः** गोलकसन्निकृष्टेन्द्रियस्य विषयसंयोगे सति ज्ञानजनकत्वोपगमात् । क्षणभङ्गपक्षे तथोत्पादमभ्युपेत्याह**योग्यमिति** । कुर्वद्रूपविशिष्ट-क्षणोत्पादो'**ऽतिशयः**', '**सहकारिप्रत्ययाः**' सहकारिकारणानि । **निरन्तरोत्पादेने**त्यत्र भावानति-शाययन्ति इत्यनुषज्यते । क्वचिन्निरन्तरोत्पादः । '**संयोगे वेती**'ति पाठः सुगम एव । **तदेतदिति** । क्षणभङ्गनिराकरणेन कथमेतदिति तेजस्त्वाविशेषे चक्षुरेव रूपव्यञ्जकं न 'तूष्मादी'ति कुतो नियम इत्यर्थः ।

## वर्धमानेन्दुः ( किरणावलीप्रकाश टीका )

**अनुपजीवकत्वात्** = प्राप्यकारित्वासाधनत्वात् । **तस्य** = प्राप्यकारित्वस्य । **सिद्धसाधनमिति,** गोलकघटाद्योः साक्षात्सम्बन्धाभावादित्यर्थः । **घटेति** घटसाक्षात्कार कारणं तेजःसंयोगश्च चक्षुर्घटसंयोगःतेन समानाधिकरणो यः संयोगः चक्षुर्गोलकसंयोगः तद्वत्वस्य निषेध्यत्वादित्यर्थः । **विरूद्धत्वादिति, ननु** अधिष्ठानासम्बद्धरूपादिग्राहित्वस्य रूपाद्यप्राप्यकारित्वस्य च मनसि विद्यमानत्वात् कथं विरूद्धत्वं ? साध्यासहचरितहेतोरेव विरूद्धत्वादिति **चेत्**, न,

व्यभिचारिव्यतिरेकिणएव विरूद्धपदेन ग्रहणात्, भवति चायं व्यतिरेकीयत्रयत्र प्राप्यकारित्वं तत्रतत्राधिष्ठानसम्बद्धार्थ, ग्राहित्वं, यथा घ्राणेन्द्रिय इति, व्यतिरेकव्याप्तिसम्भवात्, व्यभिचारस्यमूल एवोक्तत्वादिति भावः । **सजातीयेति,** यद्यपि अभावे जातिर्नास्ति, तथापि धर्मोऽस्त्येवेति भावः । **तथोत्पादः** = कार्यंप्रति कुर्वद्रूपत्वेनोत्पादः । **निरन्तरोत्पादेनेति,** कर्तृत्वस्यक्रियापेक्षायामाह **अनुषज्य**ते इति ।

## ॥ द्रव्यकिरणावली टीका ॥

"अप्राप्यकारिचक्षुरधिष्ठानासंबन्धार्थग्राहित्वादि"त्यत्र मनसः सपक्षस्य सत्त्वात् कथं व्यतिरेकितेति **चेत्, न** । संस्कारलक्षणप्रत्यासत्तिसापेक्षतया मनसोऽपि प्राप्यकारित्वात् । तदाह- **कुसुमाञ्जलौ** "संस्कारस्तु प्रत्यासत्तिमात्रेणोपयुज्यत" इति । प्राप्तिनिरपेक्षसाक्षात्कारसाधनत्वं वा अप्राप्यकारित्वं, न चैतन्मनसः संभवति, स्मृतेरसाक्षात्कारित्वात् सुखादिसाक्षात्कारे तु मनसः प्राप्तिसापेक्षत्वात् । बाह्यार्थसाक्षात्कारे च मनसोऽसाधनत्वादिति । अस्यामेव प्रतिज्ञायां स्वतोऽधिकपरिमाणाग्राहकत्वात्, सन्निहितदूरस्थितयोस्तुल्यकालमुपलम्भकत्वात् स्फटिकादिव्यवहितोपलम्भकत्वादिति[३] व्यतिरेकित्रयं क्रमेण आह-**पृथुतरेत्यादिना** । यद् वा, चक्षुर्न प्रा(प्य ?)बोधकं तद्विरहेऽपि तद्बोधकत्वादिति एव मुख्यो हेतुः । तत्साधकाः पुनः प्रकृतहेतव इति । **न च** स्वतोऽधिकपरिमाणग्राहकत्वं पर्व्वतादिग्राहिणि त्वगिन्द्रिये प्राप्यकारिणे अस्तीति विरुद्धमिति **वाच्यं,** त्वगिन्द्रियस्य यावत्सन्निकृष्टपर्वतभागमात्रग्राहित्वेन पूर्व्वपक्षिणोऽभिप्रेतत्वात् । पृथुतरग्राहित्वस्य अनुकूल-(तर्क ?)माह-**यदि चेति** । समग्रो हि पर्व्वतादिरुपलभ्यते, न चाल्पपरिमाणस्य चक्षुषः समग्रपर्व्वतसंयोगः संभवी, न हि नखरञ्जिका परशुरिव शाखाव्यापिनं संयोगमनुभवति समस्तशाखाच्छेदप्रसङ्गात् । **अधिष्ठानासंबद्धार्थेति** । गोलक इव चक्षुषस्तैलपात्रं प्रदीपस्याधिष्ठानं तेनासंबद्धं घटादि प्रदीपो गृह्णाति प्राप्यकारी चेति व्यभिचारः । **न च** व्यतिरेकिणि विरोध एवोद्भाव्यो न व्यभिचार इति **वाच्यम्,** अधिष्ठानासंबद्धार्थग्राहित्वस्य प्राप्यकारित्वेऽपि बाधाभावे नाप्राप्यकारित्वनियमानिश्चयात् । तेन प्राप्यकारिणि विपक्षे सद्भावमात्रेण अनैकान्तिकत्वमुक्तमिति । **ननु** यदि गत्वा चक्षुश्चन्द्रमसं गृह्णीयात् तर्हि मासादिव्यवधानेन परिच्छिन्द्यात्, अनेकलक्षयोजनान्तरितत्वादिति कथं कालसन्निकर्षेणापि शाखाचन्द्रोपलम्भयौगपद्याभिमान इति अत आह-**अचिन्त्यो हीति** । **'लाघवं'** गुरुत्वाभावः, **'तस्यातिशयः'** उपष्टम्भकादिगतगुरुत्वाभावः **'संसर्गि( द्रव्य ? )तये'**त्यन्योन्यमिश्रीभावयोग्यद्रव्यतयेत्यर्थः । **ननु** नायनरश्मेरपीन्द्रियत्वे गत्वा पृष्ठदेशव्यवस्थितार्थोपलम्भप्रसङ्गस्तुल्य इत्यत **आहेन्द्रियप्राप्तयेत्विति** । नायनं तेजः पुरतः स्थितेन संबद्ध्यते, न पृष्ठस्थितेन, शरीरेण प्रतिबन्धादिति भावः । **"येषां त्वि"**त्यादिना अप्राप्यकारित्वे व्यवहितप्रकाशकत्वप्रसङ्ग इति वदता व्यवहिताप्रकाशकत्वात् प्रसङ्गविपर्य्ययात् प्राप्यकारित्वं चक्षुषोऽनुमेयमिति दर्शितम् । **ननु**

अप्राप्यकारित्वेऽपि विरोधिनः कुड्यादेः सत्त्वान्न व्यवहितोपलम्भ इत्यत आह-**न हि व्यवधायकमिति**। न हि कुड्यां स्वरूपेण ज्ञानपरिपन्थि, अव्यवहितेऽपि ज्ञानानुदयप्रसङ्गात्। नापि ज्ञानजनकचक्षुःसंयोगविरोधितया प्राप्यकारितापत्तेरिति भावः। यो हि इन्द्रियविषययोः स्वरूपयोग्यतैवो पलब्धिप्रयोजिका तद्विरहादेव व्यवहितानुपलम्भो, न तु प्राप्तिविरहादित्याह, स किं कुड्यादिव्यवधानकालीनयोर्विषयेन्द्रिययोर्यावदव्यवधानं स्थिर्ति मनुते, किं वा योग्ययोरन्ययोरेवा-व्यवधानदशायामुत्पत्तिम्? **प्रथमे** दोषमाह **स्थैर्य** इति। **तदानीमपीति**। **व्यवधानेऽपीत्यर्थः**। "**अपरावृत्तेरि**"त्य"त्रोपलम्भापत्तिरि"ति शेषः। **द्वितीयं** दूषयति-**क्षणिकत्व इति**। बौद्धमते हि अयोग्यावेवेन्द्रियविषयौ योग्ययोरेवेन्द्रियविषययोरन्योन्यसहितौ जनकौ, तद् यदि प्राप्तिनिरपेक्षयोर-योग्येन्द्रियविषययोर्योग्येन्द्रियविषयजनकत्वं, तदा कुड्यव्यवधानेऽपि योग्येन्द्रियविषययोरुदयाद् व्यवहितोपलम्भापत्तिः, प्राप्तिसापेक्षयोरयोग्ययोर्योग्यजनकत्वेऽयोग्यजनकत्वे वापि उपलम्भोपयोगिनी प्राप्तिरिति सिद्धमिति भावः। **ननु** प्राप्तिः साध्यमाना गोलकस्य साध्यते, तद्व्यतिरिक्तस्य वा? **आद्ये**, बाधः; **द्वितीये** तु आश्रयासिद्धिरत आह-**न च कृष्णेति**। रूपोपलब्धिकरणे प्राप्यकारित्वं साध्यते, तच्च सिद्ध्यमानमन्तर्भावितगोलकातिरेकमेव सिद्ध्यति, गोलके बाधात्। ननु निरन्तरोत्पादादेव प्राप्तिव्यवहारे घटमाने संयोगलक्षणप्राप्तिर्दुर्लभेति अत आह-**तदेतदिति**।

**॥ द्रव्यकिरणावली दिवाकर विरचिता टीका ॥**

**अप्राप्यकारीति**विषयाप्राप्तमेव तद्ग्राहकमित्यर्थ। **ननु** गोलकस्य पक्षत्वे सिद्धसाधनं तदतिरिक्तस्याश्रयासिद्धिः। सिद्धौ वा तद्ग्राहकमानबाध इति **चेत्**। न गोलकं पक्षीकृत्य स्वासम्बन्धविषयग्राहीत्वस्य साध्यत्वात्। **न च** सिद्धसाधनं गोलकेन समं चक्षुस्तेजोघटितसंयुक्त संयोगस्य घटादिग्राहकत्वेन त्वयाङ्गीकारात् घटसाक्षात्कार कारणतेजःसंयोगसमानाधिकरणघट साक्षात्कारकारणतेजःसंयोगवत्त्वं वा तस्य निषेध्यं।

यद्वा शरिरासंयुक्तघटसाक्षात्कारः (पक्ष) घटसंयुक्तेन्द्रियाजन्यः (साध्य) शरीरासंयुक्तघट-ज्ञानत्वात् तदनुमितिवदिति।

**अनेकान्तिकत्वादिति** विरुद्धत्वात् इत्यर्थः

यद्यपि स्वाधिकपरिमाणघटादिग्राहकत्वं त्वगेन्द्रियेण प्राप्यकारिण्यपि विद्यते तथापि गत्यन्तरमाह **पृथुतरेति**।

यद्यपि शाखाचन्द्रमसंयोगसमानकालीनेन्द्रियसंयोगवत्वेन तुल्यकालमुपलम्भ सम्भवत्येव तथापीन्द्रियस्य प्राप्यकारित्वेन शाखां गृहित्वा पश्चाच्चन्द्रमसंयोगसमानकालीनेन्द्रिये गृह्णातीत्यत आह **तुल्यकालेति**। शाखाग्रहणपुरःसरमेवतद्ग्रहणं तुल्यकालत्वेन आरोपस्तु तयोरित्यर्थः।

**पृष्ठभागेति**-तस्मादनुद्भूतरूपचक्षुषोद्भुतरूपालोकेन सह विरुद्धरुयोत्पादविरोधादारम्भ एव नास्ति आरम्भेऽपि वा अवयवस्येवेन्द्रियत्वं न च तदवयविनः ।

अतएव यत्रेतत्स्थितः (? इतस्ततः स्थित) प्रेक्षकाणां परस्पर नयनैर्नारम्भ विरोधः । तत्रापि पृष्ठदेश व्यवहितार्थोपलम्भापत्त्या आरम्भ एव नास्ति अवयवस्येवेन्द्रियत्वमित्येव वाच्यमितिभावः ।

**तस्मिन् सति इतिः**-**ननु** यत्र क्वचित् कुड्यादिसत्त्वं न प्रतिबन्धकं किन्तु ग्राह्यग्राहक मध्यवर्त्ति तथा । **नचै**वमपि कुड्यादौ मध्यवर्तिनी पर्वतादि ग्रहणं न स्यादिति**वाच्यं** । ग्राह्याधिक परिमाणस्य तन्मध्यवर्तिनः कुड्यादेः । प्रतिबन्धकत्वात् । अथवा त्वन्मते यादृशेन्द्रियसंबन्ध-विच्छेदकत्वं तादृशस्य स्वरूप एवाभावः कारणमित्यभ्युपगमात् **न चैवं** गोलकस्येवरूपग्राहकत्वे प्रसन्नान्धस्यापि रूपग्रह**प्रसङ्ग** श्रोत्रवददृष्टविशेषोपग्रहेणैव गोलकस्य ग्राहकत्वात् । यदाहुः —

**विशिष्टादृष्ट वैचित्र्यात् कृष्णसारं विलोचनं ।**
**व्यवधानाद्यभावश्च स्वस्मेणैव युज्यते ॥ इति ।**

**मैवं** पूर्वोक्त तेजसत्वानुमानेनैव चक्षुषः प्राप्यकारित्वसिद्धेः । तथोत्पादादाह **योग्यत्वमिति**-

**अतिशयेति**-कुर्वदरुपं उतक्षणोत्पादोतिशयः

**सहाकारिप्रत्यया** इति-सहारिकारणमित्यर्थः

**निरन्तरोत्पादेनेति**-भावानतिशाययन्तीत्यनेनान्वयः क्वचिद् प्रथमा एव पाठः सतु स्पष्टमेव।

**॥ पदार्थदीपिका ॥**

**ननु** चक्षुषो गोलकविशेषरूपस्य घटादिसंयोगः प्रत्यक्षबाधितः कथमासत्तिरिति **चेन्न** । तत्तद् गोलकाधिष्ठितानामिन्द्रियाणामतीन्द्रियाणामप्युपगमात् गोलकादिरूपवत्त्वे चाऽसम्बद्धग्राहकत्वम-भ्युपेयम् । तथा च पृष्ठभागीयाः पुरोवर्त्तिनो भित्यादिव्यवहिताश्च पदार्था गृह्येरन् । व्यवधानं प्रतिबन्धकमिति **चेन्न** । भित्यादिपरभागस्थितानां परावृत्य दर्शने पृष्ठदेशे स्वस्य च प्रत्यक्षं न स्यात् । तत्पुरुषीयतत्कालीनप्रत्यक्षं प्रत्येव तत्कालप्रतिबन्धकत्वकल्पने चातिगौरवात् । तस्मादावश्यक-मतीन्द्रियमिन्द्रियम् । **नन्वे**वं शाखाचन्द्रमसोस्तुल्यकालग्रहणं न स्यात् । किं च नेत्रोन्मीलने प्रहराद्य-वधिसूर्यचन्द्रग्रहणार्थे विलम्बापत्तिः । चक्षुषस्तावत् दूरगमनकल्पनात् इति **चेन्न** । अतिलाघवादति-शीघ्रं तावत् दूरगमनाद्विशेषाऽग्रहणस्याशु तदुत्पादकप्रतीतेश्चोपपत्तेः । तदुक्तम् ।

**अचिन्त्यो हि तेजसो लाघवातिशयेन वेगातिशयो यत्प्राचीनाचलचूडावलम्बिन्येव भगवति मयूखमालिनि भुवनोदरेष्वालोक इत्यभिमानो लौकिकानामिति दिक् । ( किरणावली )**

## ॥ न्यायकन्दली ॥

इन्द्रियप्रकृतित्वमिन्द्रियस्वभावत्वं न भूतस्वभावानीन्द्रियाणि अप्राप्यकारित्वात् प्राप्यकारित्वं हि भौतिको धर्मो यथा प्रदीपस्येति **केचित् । तदयुक्तम्** । व्यवहितानुपलब्धेः यदीन्द्रियमप्राप्यकारि कुड्यादिव्यवहितमप्यर्थं गृह्णीयादप्राप्तेरविशेषात् । योग्यताभावाद्व्यवहितार्थाग्रहणमिति **चेत्** इन्द्रियस्य तावद्योग्यता विषयग्रहणसामर्थ्यमस्त्येव तदानीमव्यवहितार्थग्रहणात् विषयस्यापि योग्यता महत्त्वानेकद्रव्यवत्त्वरूपविशेषाद्यात्मिका व्यवधानेपि न निवृत्तैव आर्जवावस्थानमपि तदवस्थमेव । **अथ** मतं आवरणाभावोऽप्यर्थप्रतीतिकारणं संयोगाभाव इव पतनकर्मणि आवरणे सत्यावरणाभावो निवृत्त इति प्रतीतेरनुत्पत्तिः कारणाभावादिति । **नैतत्सारम्** । आवरणस्य स्पर्शवद्द्रव्यप्राप्तिप्रतिषेधभावोपलब्धेः छत्रादिकं हि पततो जलस्य सावित्रस्य च तेजसः प्रतिषेधति न तु स्वस्याभावमात्रं निवर्तयति तथा सति सुलभमेतदनुमानं प्राप्तप्रकाशकं चक्षुर्व्यवहितार्थाप्रकाशकत्वात् प्रदीपवत् बाह्येन्द्रियत्वात् त्वगिन्द्रियवत् । नन्वेवं तर्हि विप्रकृष्टार्थग्रहणं कुतः रश्म्यर्थसन्निकर्षात् अनुद्भूतरूपस्पर्शा नायना रश्मयो दूरे गत्वा सन्तमर्थं गृह्णन्ति । अत एव महदणुप्रकाशकत्वात् किमिन्द्रियस्य भौतिकत्वं न सिद्ध्यति प्रदीपस्येव रश्मिद्वारेण तदुपपत्तेः यत्र च रश्मयो भूयोभिः स्वावयवैः सहार्थावयविना तदवयवैश्च सह सम्बद्ध्यन्ते । तत्राशेषविशेषास्कन्दितस्यार्थस्य ग्रहणात् स्पष्टं ग्रहणं यत्र त्ववयवमात्रेण सम्बन्धस्तत्र सामान्यमात्रविशिष्टस्य धर्मिणो ग्रहणादस्पष्टं ग्रहणम् । यद् गच्छति तत्सन्निहितव्यवहितार्थौ क्रमेण प्राप्नोति तत्कथं शाखाचन्द्रमसोस्तुल्यकालोपलब्धिरिति **चेत्** इन्द्रियवृत्तेराशुसञ्चारित्वात् पलाशशतव्यतिभेदवत् क्रमाग्रहणनिमित्तोयं भ्रमो न तु वास्तवं यौगपद्यम् । **ननु** प्राप्तिपक्षे सान्तरालोयमिति ग्रहणं न स्यात् नान्यथा तदुपपत्तेः इन्द्रियसम्बन्धस्यातीन्द्रियत्वान्न तद्भावाभावकृतौ सान्तरनिरन्तरप्रत्ययौ किं तु शरीरसम्बन्धभावाभावकृतौ यत्र शरीरसम्बद्धस्यार्थस्य ग्रहणं तत्र निरन्तरोयमितिप्रत्ययः यत्र तु तदसम्बद्धस्य ग्रहणं तत्र सान्तर इति ।

## ॥ न्यायकन्दलीटीप्पणम् ॥

**अभूतस्वभावानि** इति-अन्वये मनोवत् । **विषयस्यापि योग्यता इति नन्वा**काशे महत्त्वमस्ति परं रूपविशेषो नास्ति, द्व्यणुके तु रूपविशेष उद्भूतं रूपमस्ति परं महत्त्वं नास्तीत्यचाक्षुषत्वे द्वयोरप्युद्भूतरूपमहत्त्वयोर्दर्शनं प्रति कारणत्ववचनं युक्तम्, महत्त्वाद्यनेकद्रव्यत्वयोरप्युपादानमनर्थकम्, उद्भूतरूपस्य महतोऽनेकद्रव्यत्वाव्यभिचारेण व्यवच्छेद्याभावात् । **सत्यम्,** द्वयोरपि दर्शनं प्रति कारणत्वख्यापनार्थमथवा द्वयोरपि तुल्यव्याप्यव्यापकताप्रदर्शनार्थं द्वयोरुपादानम् । **ननु** द्वयोस्तुल्यव्यापकत्वमसिद्धमिति उद्भूत रूपस्यानेकद्रव्यवतो द्व्यणुकस्य महत्त्वरहितत्त्वात् ? **नैवम्,** न विद्यते एकं द्रव्यमाश्रयतया यस्य (तदनेकम्, अनेकं द्रव्यमाश्रयतया) विद्यते यस्य तदनेकद्रव्यवत्,

सावयवद्रव्यारब्धम् इति व्युत्पत्त्या द्व्यणुकस्यानेकद्रव्यवत्त्वाभावात् । स्थैर्यपक्षाभिप्रायेण घटस्य तत्स्वरूपत्वाद् योग्यताया अनिवृत्तिः । क्षणिकत्वे कुड्याद्यन्तरितस्यापि पुरुषान्तरेणोपलम्भादस्ति तस्मिन्नेव क्षणे योग्यतेति । **संयोगाभावः फलादेवृन्तादिनेति । प्रतीतेः** इति-कुड्यादिव्यवहित-स्यार्थस्येति शेषः । **नैतत्सारम्** इति-यद्यप्यन्वय व्यतिरेकाभ्यां कुड्यादिसंसर्गप्रागभावस्य कारणत्वा-वगमात् कुड्याद्यन्तरितत्वे कारणाभावः; तथाप्यावारकं द्रव्यं किमप्यावृण्वत् कार्यं प्रतिषेधयति । **नैवमेवेति** भूयोभूयस्तथादर्शनादिति ।

**तथा च सति** इति-**ननु** व्यवहितार्थप्रकाशकत्वमित्येवं रूपं शिलादावप्यस्ति न तु प्राप्तप्र-काशकत्वमित्यनैकान्तिकत्वम्, **नैवम्;** प्रकाशकत्वे सति व्यवहितार्थाप्रकाशनस्य चिन्तनात् । **बाह्येन्द्रियेति** बाह्याग्रहणं मनोव्यवच्छेदार्थम् । **अत एव** इति । स्वपरिमाणापेक्षया महदल्पं च प्रकाशयतीति तर्कः । अथवा विवादाध्यासितमिन्द्रियम् अभौतिकम्, स्वपरिमाणाधिकपरिमाण-प्रकाशकत्वात्, मनोवत् इति परानुमानम् । अत्र अणुग्रहणं दृष्टान्तार्थम्, यथा चक्षुरणुप्रकाशकं तथा महत्प्रकाशकमिति प्रदीपरश्मिभिरनैकान्तिकमित्यर्थः । **क्रमाग्रहणनिमित्तोऽयम्** इति-अत्र कर्मोत्पादकक्षणसंस्कारोत्पादकक्षणकर्मनाशक्षणकर्मान्तरोत्पादक्षणादिक्षणगणनायामितरवेगवत् साधारणे तेजसोऽपि वेगे शाखाचन्द्रमसोस्तुल्यकालोपलब्ध्यनुपपत्तावितरवेगविलक्षणवेगाभ्युपगम एवोत्तरम् । **ननु प्राप्ति** इति-यदि चक्षुरिन्द्रियं प्राप्यमर्थं गृह्णाति तर्हि यथा स्पर्शनेन प्राप्ते **निरन्तरः** सम्बद्धोऽयमर्थो मया (गृहीत इति प्रत्ययो भवति तथा चक्षुरिन्द्रियप्राप्तेऽपि स्यात्, न तु **सान्तरो-**ऽसम्बद्धो मया गृहीत इति) सान्तरप्रत्ययस्याप्राप्तिनिबन्धनत्वात् । अस्ति चैवं प्रत्ययः ततोऽप्राप्तस्यैव ग्रहणं मन्तव्यमिति । समाधत्ते **नान्यथा** इति । स्पर्शनगृहीतेऽप्यर्थे संयोगस्य द्विष्ठत्वात् त्वगिन्द्रियस्य चातीन्द्रियत्वात् न तत्रापीन्द्रियसंयोगजनितो निरन्तर प्रत्ययः, किन्तु देहसम्बन्धजनित इति तस्यैव तत्र कारणत्वम्, देहसंयोगाभावस्य तु सान्तरप्रत्यये कारणत्वमिति ।

**॥ न्यायकन्दली पञ्जिका ॥**

**न भूतस्वभावानीन्द्रियाणीत्यादिना** । **केचिदिति**-बौद्धजैन**सांख्याः** । **योग्यताभावादिति**-योग्यतायाः अभावादित्यर्थः । नन्वभावः कथं कारणं भवतीत्याह-**संयोगाभाव इव पतनकर्म-णीति** सत्यपि हि गुरुत्वे पतनहेतौ यावत्संयोगस्तावत्पतनं न भवति । यथा वृन्तसंयोगे बीजपूरस्य, संयोगाभावे पतनम् । **इतीति** अस्माद्धेतोः । **प्रतीतेरिति**-अर्थज्ञानस्य । **कारणाभावादिति**-आवरणाभावस्य कारणस्याभावात् । **आवरणस्य स्पर्शवद्द्रव्यप्राप्तिप्रतिषेधार्थत्वेनोपलब्धेरिति** प्राप्तिशब्देन संयोगः । इदमत्रावेदितं भवति-न च स्पर्शवन्तीन्द्रियाणि भवन्मतेऽभौतिकत्वात् । तत आवरणेन तेषामप्रतिघाताद् व्यवहितार्थोपलब्धिः स्यात् । परवाक्यं **नन्वेवं तर्हीत्यादि । श्रीधरः** प्राह **रश्म्यर्थसन्निकर्षादिति** रश्मीनां नयनानामर्थेन विषयेण सह नैकट्यात् । दूरे गत्वा सन्तमर्थं

**गृह्णन्तीति** योगः । **ननु** भौतिकं यावत्परिमाणं तावत्येवार्थक्रियां..दृष्टम्, यथा कुठारादिकं वटवृक्षादौ । इन्द्रियं तु स्वपरिमाणाधिकमपि वस्तु प्रकाशयति तथा स्वपरिमाणादण्वपि प्रकाशयति तत्कथं तस्य भौक्तिकत्वं युक्तम्, अभौतिकत्वमेव हि प्राप्तमित्याशंक्याह-**अत एव महदणुप्रकाशकत्वा-दिन्द्रियस्याभौतिकत्त्वं न सिद्ध्यतीति** । परवाक्यं **यद्गच्छतीत्यादि । प्राप्तिपक्षे इति**-नायन रश्मीनां पदार्थसन्निकर्षे कक्षीयक्रियमाणे इत्यर्थः । **सान्तरालयोऽयमिति ग्रहणं न स्यादिति**-विप्रकृष्टोऽयमिति ग्रहणं न स्यात् । नायनरश्मयो हि यदि तत्र गत्वाऽर्थं गृह्णन्ति तदा किं दूरं किं वा आसन्नमिति भावः । **श्रीधरः** प्राह **नान्यथा तदुपपत्तेरित्यादि । न तद्भावाभावकृतौ सान्तर-निरन्तरप्रत्ययाविति**नेन्द्रियसम्बन्धभावाभावकृतौ सान्तरनिरन्तरप्रत्ययौ इत्यर्थः । अत्र चेन्द्रिय-सम्बन्धभावकृतो निरन्तरप्रत्ययः । इन्द्रियसम्बन्धाभावकृतस्तु सान्तरप्रत्यय इति द्रष्टव्यम् । ननु यथा-संख्यमनुसार्यं शास्त्रशैल्या यथासंख्यमर्यादाया इह निर्वाहात् ।

## ॥ न्यायकन्दली कुसुमोदगमोदयव्याख्या ॥

**न भूतेति** । **तदयुक्तमिति** तदप्राप्यकारित्वं प्रमाणबाधितमित्यर्थः । शङ्कते-**योग्यते**ति । अयमभिसन्धिःयोग्यता हि तादृशइन्द्रियक्षणपरिणाम (:) अर्थक्षणश्च, तयोरप्राप्तयोरेव ग्रहण-ग्राह्यभावः । व्यवहितविप्रकृष्टश्च न तादृशा इति तत्किमप्रतीयमानप्राप्तिकल्पनयेति । तत्र प्रतिक्षण-परिणामस्याग्रे निराकरिष्यमाणत्वात् तदतिरिक्तयोग्यता स्वरूपलक्षणा सहकारिलक्षणा वा स्यात् । तदुभयं व्यवहितविप्रकृष्टयोरप्यविशिष्टं प्राप्तिरूपसहकारिवैकल्यमेव केवलमवशिष्यते इत्याह **इन्द्रियस्येति** । अयं प्रयोगः चक्षुरावरणं प्राप्तिप्रतिबन्धकतया आव्रियमाणकार्यं विरुणद्धि आवरणत्वादश्रुवत् । **तथा च** सतीति व्यवहितयोरिन्द्रियार्थयोः प्राप्तिव्यतिरिक्तयोग्यत्ये कार्याभावे च सति अनुमानं सुलभमन्यथासिद्धिस्वरूपासिद्धिशङ्काया अनवकाशत्वादित्यर्थः । व्यवहिताप्रकाशत्वा-दित्यत्र सर्वथाऽप्रकाशकैर्व्यभिचा-रपरिहाराय प्रकाशकत्वे सतीति विशेषणीयो हेतुः ।

## प्रकाशोपेतपदार्थमाला

**[अत्र] केचित्**-चक्षुः न प्राप्यकारि, अधिष्ठानासम्बद्धार्थग्राहकत्वात् । यत् प्राप्यकारि तत् नाधिष्ठानासम्बद्धार्थग्राहम् । यथा रसनादिः । प्राप्यकारित्वे पृथुतरग्रहणानुपपत्तेश्च । न हि स्वल्पस्य चक्षुषः पृथुतरप्राप्तिसंभव; किं च शाखाचन्द्रमसोर्युगपत् ग्रहणं न स्यात् । **न च** वेगातिशयात् **समाधि** परापरमाण्ववयवान्तं गतिमन्तरेणावयविनो गमनाभावात् । तेषां च भूयोऽवच्छेदेन संयोगाभावात्; अत्यतिशयवेगवतोऽपि सन्निकृष्टदेशसंयोगादिकं विना विप्रकृष्टदेशगमनासम्भवाच्च । अपि चैवं काचस्फटिकाद्यन्तरितोपलब्धिः न स्यात् । तथात्वे भित्त्याद्यन्तरितोपलब्ध्यापत्तेः । तस्मादप्राप्यकारि चक्षुः, ततो न तैजसम् । किं तु गोलकमेव विशिष्टादृष्टोगृहीतं, तेन प्रसन्ना-न्धव्यावृत्तिरित्याहुः ।

**तन्न**— दीपप्रभायमनैकान्तात् चक्षुषो गोलकमिव प्रभाया अपि दीपोऽधिष्ठानं तदसम्बद्धार्थ-ग्राहकत्वं प्रभायाम् । न च तत्राप्राप्यकारित्वमस्ति ।

शाखाचन्द्रमसोर्युगपद्ग्रहणे यौगपद्यभिमानस्तु कालसन्निकर्षात् शतपत्रसूचिवेधवत् अचिन्त्यो हि तेजसो वेगातिशयः ।

केचित्तु-निस्सरन् नायनं तेजो बाह्यालोकसहकारेण युगपदेव तावदवच्छेदेन संसृष्ट-चक्षुरुत्पादयतीति शाखाचन्द्रमसोर्युगपद्ग्रहणम् । **न चैवं** पृष्ठभागस्थितानामुपलम्भापत्तिः; आभिमुख्यं त्विन्द्रियव्याप्तावेवोपयुज्यत इति **वाच्यम्** । पृष्ठदेशस्थबाह्यालोकैः चक्षुरुत्पादे मानाभावात् चक्षुषो मूलावच्छन्निवत् पृष्ठावच्छिन्नस्य संयोगस्याग्राहकत्वसम्भवाच्चेत्याहुः ।

अनन्यगत्या वेगादिविशेषवशात् विनैव सन्निकृष्टदेशविशेषसंयोगं विप्रकृष्टदेशे संयोगान्तराव-स्थितघनद्रव्यविशेषाणामेव तत्प्रतिबन्धकत्वादत्यन्ये । काचान्तरोपलब्धिस्तु काचादेरतिस्वच्छतया प्रभावन् नयनगतिविरोधित्वाभावात् ।

किं च चक्षुषोऽप्राप्यकारित्वे भित्त्यादिव्यवहितस्यापि ग्रहः स्यात् । भित्त्यादिकं हि प्राप्ति-विघातकतयैव विरोधि, न तु स्वरुपसत्तया, तथात्वे तस्मिन् सति क्वचिदपि कार्यं न स्यात् । न च तत्तद्भित्तेः स्वस्वप्राच्यादिस्थपुरुषसाक्षात्कारे स्वस्वप्रतीच्यादिवर्तित्वसंबन्धेन प्रतिबन्धकत्वं, गौरवात् ।

यत्तु - व्यवहितमयोग्यत्वादेन न गृह्यते; न तु व्यवहितत्वादिति - तन्न - अयोग्यत्वं हि न स्वरूपायोग्यत्वम्; स्थैर्यपक्षे तस्यैव कालान्तरे ग्रहात् । क्षणिकत्वपक्षे प्रत्यासन्नानां सहकारिणामेव तत्रातिशयजनकत्वं नाप्रत्यासन्नानाम् । प्रत्यासत्तिश्च बौद्धानां निरन्तरोत्पादः । अस्माकं तु द्रव्ययोस्संयोगः तदुभयमपि कृष्णसारस्यार्थेन न सम्भवति; किं तु तदाश्रितस्यातीन्द्रियेन्द्रियस्य गतिक्रमेणेति ।

**परे तु** - अनन्तचक्षुः क्रियासंयोगविभागतत्कार्यकारणभावादिकल्पनमपेक्ष्य तत्तद्गोलकादि-क्रियादेः तत्तच्चाक्षुषहेतुत्वमेवोचितमिति किमतिरिक्तचक्षुषे**त्याहुः** ।

**तच्चिन्त्यम्** - चक्षुस्संयोगत्वादिना हेतुत्वस्य लाघवात्सिद्धौ फलमुखस्य गौरवस्यादोषत्वात् ।

**यत्तु** - भित्त्यादेः चक्षुस्संयोगप्रतिबन्धकत्वं त्वयापि वाच्यमिति चाक्षुषप्रतिबन्धकत्वमेव युक्तमिति - तन्न - तत्तत्क्रिया तत्तदुत्तरदेशानां तत्तदुत्तरसंयोगहेतुत्वेनानतिप्रसङ्गे भित्त्यादेः संयोगप्रतिबन्धकत्वाभावात् ।

स्यादेतत् - घ्राणादिकं पृथिव्यादिभ्यो भिद्यत इन्द्रियत्वात्, मनोवत्, मनसोऽपि भिद्यते महत्वात् घटवत् । युक्तं चैतत् । महतः पृथिव्यादेः रूपरसगन्धस्पर्शेष्वन्यतमोद्भवनियमात् तादृशप्रत्यक्ष-बाधादिति **चेत्** - न । घ्राणं पृथिवी, परकीयरूपाव्यञ्जकत्वे सति गन्धव्यञ्जकत्वात्, कुङ्कुमगन्ध-

व्यञ्जकघृतवत् । दृष्टान्तासिद्धिवारणाय परकीयेति; वायुपनीतसुरभिभागादेर्दृष्टान्तत्व-सम्भवात् नोपादेयमेव वा तत् । एवं रसादिमात्रव्यञ्जकत्वेन रसादौ जलत्वाद्यनुमेयमिति **सिद्धान्तिनः** ।

**एकदेशिनस्तु** - अनुमानमिदमप्रयोजकं, घ्राणाद्योरेकजात्या व्यञ्जकत्वं न युक्तिसहम्ः एकतरसत्त्वे फलापतेः । इत्थं चैकेनन्द्रियत्वेन जात्या षोढा सन्निकर्षोन्यतमप्रत्यासत्या लौकिकप्रत्यक्षत्वावच्छिन्नहेतुत्वं निराबाधम् । न च जन्यपृथिवीत्वावच्छिन्न पृथिवीत्वादिना हेतुत्वस्य क्लृप्तत्वात् घ्राणादेः पृथिवी-त्वादिकमेव युक्तम्ः पृथिवीत्वं जलत्वादिकं वेत्यत्र विनिगमकाभावादित्याहुः ।

उक्तनुमानमेव विनिगमकं "**अणुरपी**" ति न्यायात् युक्त्यनुग्रहोऽप्यत्रैवेति तु युक्तम् ।

## प्रकाशटीका

चक्षषस्तैजसत्वे पूर्वपक्षमाह - **अत्र केचिदिति** । **न प्राप्यकारि** - न सम्बद्धार्थग्राहकम् ।

**ननु चक्षुषः सम्बद्धार्थग्राहकत्वे शाखाचन्द्रमसो; ग्रहणयौगपद्यभिमानः कालसन्नि-कर्षादपि न संभवति, तयोरतिव्यवहितत्वेन तस्याप्यसम्भवादित्यत आह**-अचिन्त्यो हीति ।

**वेगातिशये आचार्योक्तमुदाहरणं यथा- "यत्प्राचीनाचलचूडावलम्बिन्येन मयूख-मालिनि भुवनोदरेषु चालोक" ( कि. पृ. ७४ ) इति ।**

**चक्षुषः प्राप्यकारित्वं तत्तद्दूषणनिरासेन साधयित्वाऽप्राप्यकारित्वे बाधकमप्याह**- किं च चक्षुष इति । प्राप्तिविघातकतयैव- **सम्बन्धविघातकतयैव** ।

बौद्धमतं खण्डयितुमाह-**यत्त्विति** । तत्र-**भित्त्यादिव्यवहितस्थले** । अतिशयेति । **प्रत्यक्ष-जननयोग्यत्वात्मकातिशयजनकत्वं तादृशातिशयविशिष्टद्रव्यजनकत्वमिति यावदित्यर्थः** ।

तच्चिन्त्यमिति । **चिन्ताबीजं स्वयमेव स्फुटयति - चक्षुस्संयोगत्वादिनेति । चक्षुष्ट्वादे-र्जातित्वेन तदवच्छिन्न - चक्षुस्संयोगत्वादिना चाक्षुषादिहेतुत्वे लाघवम्**; गोलकत्वस्य पार्थिवाप्यादिगोलकसाधारण्यस्य जलत्वादिना सङ्करेण जातित्वाभावात् तदवच्छिन्नसंयोगत्वादिना हेतुत्वे गौरवमित्यर्थः । फलमुखेति । फलं तादृशकार्यकारण भावग्रहो मुखमुपस्थितिबीजं यस्य तादृशगौरवस्यानन्तचक्षुरादिकल्पनागौरवस्येत्यर्थः ।

घ्राणादिपञ्चकं द्रव्यान्तरमेव, न तु पृथिव्याद्यारब्धिमित्याक्षिपति-स्यादेतदिति ।

एकदेशिमतं दूषयति- उक्तानुमानमेवेति । घ्राणादेः पृथिवीत्वादिसाधकानुमानमेवेत्यर्थः । ननूक्तानुमानस्याप्रयोजकत्वात् कथं विनिगमकचमत आह-अणु इति । "अणुरपि विशेषोऽध्यवसायकर" इति न्यायादित्यर्थः । अत्र- घ्राणादेः पृथिवीत्वादौ ।

## किरणावली द्रव्य भास्कर

**आप्राप्यकारीति ।** विषया सम्बद्धमेव ग्राहकं । यदि प्राप्यकारि स्यात् तदा रसनादिवदधिष्ठान सम्बद्धं गृह्णीयात् । नचैवं गोलकासम्बद्धस्य गृह्णणीदित्यर्थः । **पृथ्विति** । यदि प्राप्य गृह्णीयात्तदा स्वल्पस्याधिकदेशावच्छेदेन प्राप्त्यभावादधिकदेशावच्छिन्नं न गृह्णीयात् नचाधिष्ठानासम्बद्धं स्व सम्बन्धे स्वाधिष्ठानसम्बन्धस्यापि प्रसङ्गादित्यर्थ । **न खल्विति** । यावदूरं सम्बन्धस्तावदेववछिन्नति। नत्वधिकं तथा प्रकृतेऽपि स्वल्पतागस्यैव ग्रहणं स्यादित्यर्थः । **शाखेति** । गतिक्रमेण प्राप्य ग्रहणे क्रमिकं ग्रहणं स्यात् तथाचानुभवविरोध इत्यर्थः । **काचेति** । गत्वा प्राप्य ग्रहणे व्यवधाने ग्रहणं न स्यात् व्यवधायकेन प्रतिबद्धे गमनासंभवादित्यर्थः । **न तैजसमिति** । प्राप्यकारित्वानुरोधेन हि गोलकातिरिक्तं चक्षुरङ्गीक्रियते गोलकस्य चन्द्रादिप्राप्त्यसंभवात् अप्राप्यकारित्वेतु गोलकमेव चक्षुर्नच प्रसन्नान्धानुपपत्तिः अदृष्टविशेष सहितस्य तस्य तत्वादित्यर्थ । **अधिष्ठनेति** आधेय सम्बद्धस्याधार सम्बन्धानियमेन यथा शरावासम्बद्धग्रहेऽपि प्रदीपः प्राप्यकारी तथा चक्षुरपीत्यर्थः । **पृथतरेति** । एवं च यावति दूरे सम्बन्ध्यते तावदेव गृह्णातीत्यर्थः । यद्यप्यनिर्गतं गोलकपरिसमाप्तमेव चक्षुस्तथापि निर्गतं महद्भवतीतिभावः । तद्वत् प्रदीपवत् । तेजसः प्राप्तौ क्रमाज्ञानं दृष्टान्तेनाह **यदिति** यदेव चूडावलम्बनं तदेवालोक इति यथाभ्रम स्तथैव प्रकृतेपीत्यर्थः । चक्षु र्बाह्यालोकाभ्यामारब्धेन चक्षुषा तावदर्थ संसृष्टेन युगपत्तावदर्थ ग्रहणमिति क्रेषाचिन्मतमाह- **केचित्त्विति** पृष्ठेति एवं हि तस्य चक्षुषः पृष्ट भागेऽपिसत्वात् तत्रस्थमपि गृह्येतेत्यर्थः । ननु चक्षुदेशस्थमेव गृह्यते इति न तदुपलम्भ इत्यतः आह इन्द्रियेति । न ह्यार्जव स्थानं स्वत उपयुज्यते किन्तु प्राप्तिद्वारा सा चेत् पृष्टदेश स्थेनाप्यस्ति तदार्जवं विनापि गृह्येतेत्यर्थः । **स्फटिकादीति** तथा सच्छिद्रता तेषां यथा नातिप्रतिबन्ध इत्यर्थः । **प्रसाद स्वभवतया** सच्छिद्रताविशेष शालितयेत्यर्थः । **येषामिति** कुड्यार्त्ति गृहणीयादित्यपि योज्यं ननु प्रतिबन्धकस्य भित्त्यादेः सत्वात् न व्यवहिता व्यवहितमित्युपलक्षणादि ग्रहणमित्यत आह **नहीति** । भित्यादि हि प्राप्ति विघात द्वारा प्रतिबध्नाति न च प्राप्तेरकारणत्वे तदुपपद्यते । नच स्वत एव प्रतिबन्धकत्वं भित्त्यादेरन्तरालेऽपि भित्त्यादि सत्वे कार्याभाव प्रसङ्गात् । नचान्तरालवर्त्तिनः प्रतिबन्धकत्वं स्वल्प परिमाणस्य कुड्यादेरन्तराले सत्वे महापरिमाणस्य गजादेरग्रहण प्रसङ्ग इति भावः ।

## तर्कभाषा

नन्विन्द्रियाणि सम्बद्धार्थग्राहकाणि । **तथा हि** - इन्द्रियाणि वस्तुप्राप्यप्रकाशकारीणि । ज्ञानकरणत्वात् आलोकवत् । यद्वा चक्षुःश्रोत्रे वस्तुप्राप्यप्रकाशकारीणी बहिरिन्द्रियत्वात् । **त्वगादिवत्** । त्वगादीनां तु प्राप्यकारित्वमुभयवादिसम्मतमेव ।

## गोवर्धनी टीका

ननूक्तमिन्द्रियेषु सम्बन्धान्तरकल्पना स्यादित्याह । **नन्विति** । ननु शरीरे व्यभिचार इत्यत आह । यद्वेति । अत्र हेतौ बहिःपदं सम्पातायातं मनस्यपि साध्यसत्वात् । दृष्टान्तासिद्धिमपाकरोति । त्वगादीनामिति ।

## तर्कतरङ्गिणी

अत्र पूर्वपक्षयति - **नन्विति** तथा चाभावग्रहे इन्द्रियस्य प्रमाणत्वे सन्निकर्षकल्पनमेव गौरवमित्यर्थः। शरीरे इति विज्ञानकारणत्वं वर्तते शरीरे, तत्र वस्तुप्राप्यप्रकाशकत्वं नास्ति । यदा घटादिविषयकं ज्ञानमुत्पद्यते तदा शरीरस्य कारणत्वमन्वयव्यतिरेकाभ्यामस्ति । शरीरव्यतिरेकेणज्ञानानुत्पत्तेरिति । परं वस्तुप्राप्यकाशकत्वं नास्ति । घटादीनां समं शरीरेण सम्बन्धाभावाद् व्यभिचार । हेत्वर्थः यद्वेति चक्षु : श्रोत्रे इत्यनुमाने इन्द्रियत्वादयं हेतुः । चक्षु : श्रोत्रे इति पक्षः । वस्तु प्राप्यप्रकाशकत्वं साध्यम्। तथा च यत्र यत्रेन्द्रियत्वं तत्र वस्तुप्राप्यकाशकत्वम् । अत्र मनसि व्यभिचारवारणार्थमिन्द्रियत्वे हेतो : बहिर्पदं विशेषणं देयम् । तथा च बहिरिन्द्रियत्वादिति हेतुः । तेन मनसि हेतुरपि नास्तीति भावः । **सम्पातयातमिति** अर्थादायातमित्यर्थः ।

●●●

## વાયુભૂતિ ભાસ

*(નીંદલડી હો વઈરણ હુઈ રહી - એ દેશી)*

ત્રીજો ગણધર મુઝ મનિ વસ્યો,
વાયુભૂતિ હો ગુણગણ અભિરામ કે;
સુત પૃથિવી વસુભૂતિનો,
જાયો સ્વાતિ હો ગોબર વર ગ્રામ કે. ત્રીજો૦ ૧

વરસ બઈંતાલીસ ગૃહીપણઈં,
છઉમત્થો હો દસ વરસ પ્રમાણ કે;
વરસ અઢાર તે કેવલી,
સર્વાયુ હો સત્તરિ પરિણામ કે. ત્રીજો૦ ૨

ગોતમ ગોત્ર સુહામણો,
જેહના સોહે હો પણસય વર સીસ કે;
જસ સંશય તે મજ્જીવનો,
તે ટાલે હો યુગતેં જગદીશ કે. ત્રીજો૦ ૩

એહવા ગુરુની ગોઠડી,
થોડિ પણિ હો સવિ જનમનો સાર કે;
થોડું પણ ચંદન ભલું,
સ્યૂં કીજઈં હો બીજા કાઠનો ભાર કે ? ત્રીજો૦ ૪

હેજ હઈઆનું ઉલ્લસે,
જો બાઝઈં હો ગુણવંતસ્યું ગોઠિ કે;
નહીં તો મન માંહિ રહિં નવી,
આવે હો મત વાત તે હોઠિ કે. ત્રીજો૦ ૫

ચતુર શિરોમણિ સુંદરૂ,
મુઝ મિલિઓ હો ગુરુ શિવતરૂકંદ કે;
મનહ મનોરથ સવિ ફલ્યા,
વલિ ટલિઆ હો દુ:ખદોહગ-દંદ કે. ત્રીજો૦ ૬

દૂર રહ્યા પણિ જાણીઈં,
ગુણવંતા હો નિજ ચિત્ત હજૂર કે;
શ્રી નયવિજય વિબુધ તણો,
ઈમ સેવક હો લહે સુખ-પડૂર કે. ત્રીજો૦ ૭



## विभाग-६

# ॥ न्यायवार्त्तिकः ॥

**'इन्द्रियार्थसन्निकर्षोत्पन्नम्'** इत्ययुक्तम् इन्द्रियस्याप्राप्यकारित्वात् । अप्राप्यकारिणीः चक्षुःश्रोत्रे इति एके । तत्र च न्यायं ब्रुवते, अप्राप्यकारि चक्षुः **सान्तरग्रहणात् पृथुतरग्रहणाच्चेति**-सान्तरस्यार्थस्य विप्रकृष्टदेशावस्थितस्य ग्रहणं दृष्टम्, न तु चक्षुषस्तेन अर्थेन प्राप्तिरस्ति, भूतविशेषस्येन्द्रियभावात् य एवायं कृष्णसारलक्षणो भूतविशेषः स बाह्यभूतविशेषप्रसादानुगृहीतस्त-तृष्णापूर्वककर्मापेक्षः चक्षुरित्युच्यते । तथा चोक्तम्; **रूपोपलब्धिसंवर्तकेन कर्मणा तत्तृष्णापूर्वकेण चक्षुरभिनिर्वृत्तमतो रूपोपलब्धेः कारणं भवतीति** । एवं शेषेषु । न च भूतविशेषानुगृहीतस्य गोलकस्य प्राप्तिर्विषयेणास्ति । तस्मात् सान्तरग्रहणादप्राप्यकारीति । अपरे तु सान्तर इति ग्रहणं हेतुं वर्णयन्ति। न हि प्राप्यकारिषु घ्राणादिषु सान्तर इति ग्रहणं दृष्टम्, दृष्टं तु चक्षुषि ।

पृथुतरग्रहणाच्चराष्ट्रवनादिरूपं च महदुपलभ्यते, न चाक्ष्णोस्तथा पृथ्ववभास इति ।

**दिग्देशव्यपदेशाच्च**-यदि प्राप्यकारि चक्षुर्भवेत्, दिग्देशव्यपदेशो न स्यात् । नहि प्राप्यकारिषु घ्राणादिषु एतदस्तीति ।

**सन्निकृष्टविप्रकृष्टयोस्तुल्यकालग्रहणाच्च**यत् खलु गतिमद्भवति तत् तां गतिमभिन्दत् सन्निकृष्टमाशु प्राप्नोति, विप्रकृष्टं चिरेण । शाखाचन्द्रमसोः तुल्यकालग्रहणं दृष्टम् तस्मादप्राप्यकारीति ।

यत् तावत् सान्तरग्रहणादिति, तदयुक्तम् विकल्पानुपपत्तेः । सान्तरग्रहणमिति कोऽर्थः ? किं तावत् सान्तरस्य ग्रहणमप्राप्तस्य ग्रहणमित्ययमर्थः, आहोस्वित् सहान्तरेण ग्रहणं सान्तरग्रहणमिति । अस्तु तावत् **पूर्वः पक्षः**, अप्राप्तस्य ग्रहणं सान्तरग्रहणमिति । **नन्वयं** प्रतिज्ञार्थ एव ततश्च हेत्वभावः । किं कारणम् ? हेत्वर्थस्य प्रतिज्ञार्थेन आक्षिप्तत्वात्-एतदुक्तं भवति, अप्राप्यकारि चक्षुः, अप्राप्य-ग्रहणादिति न प्रतिज्ञार्थाद् भिद्यते । **अथ** ब्रूषे सहान्तरेण ग्रहणमिति, किं तदन्तरं नाम, यच्चक्षुषा विषयेण सहोपलभ्यते इति ? किमाकाशमभावो द्रव्यान्तरं वा ? यद्याकाशम्, तत्र चक्षुषो विषयः-न ह्याकाशं चक्षुर्ग्राह्यम्, अरूपत्वादिति । अथ रूपवद्द्रव्यान्तरमन्तरशब्दवाच्यम्, तस्य व्यवधाय-

कत्वात् तेन सह ग्रहणं न युक्तम् । अथाभावोऽन्तरशब्दवाच्यः ? स स्वतन्त्रश्चक्षुर्विषयो न भवतीति तेन सहोपलब्धावनैकान्तिकम् । न चान्या गतिरस्ति । तस्मात् शून्यमभिधानं सान्तरग्रहणादिति । यैरपि विद्वत्समानैः सान्तरग्रहणादित्यस्य सान्तर इति ग्रहणमित्येतद् व्याख्यानं क्रियते, तदप्ययुक्तम् सान्तर इति ग्रहणस्यान्यनिमित्तत्वात्-अन्यथैव सान्तर इति ग्रहणं भवति, शरीरावधिनिमित्तत्वात्;-शरीरमवधिं कृत्वा सान्तरनिरन्तरे भवतः, न पुनरिन्द्रियप्राप्त्यप्राप्त्यपेक्षे । यत्र शरीरमिन्द्रियं चोभयमर्थेन संबध्यते तत्र निरन्तरमिति ग्रहणं भवति । यत्र पुनः इन्द्रियमात्रे सम्बन्धः तत्र सान्तर इति । तस्मात् सान्तर इति ग्रहणस्यान्यनिमित्तत्वात्, न सान्तरग्रहणादप्राप्यकारित्वं सिध्यतीति ।

यदपि पृथुतरग्रहणादिति तदप्ययुक्तम्, सम्बन्धमात्रेण महदण्वोर्ग्रहणात् । सम्बन्धमात्रैणैव महति वाणौ वा विषयभेदानुविधायी प्रत्यय उपजायते । तस्मादचोद्यमेतदपीति ।

यत् पुनरेतदुक्तं दिग्देशव्यपदेशादिति, तदपि शरीरावधिनिमित्तत्वेन प्रत्युक्तम् । यत्रेन्द्रियं शरीरं चार्थेन संबध्यते तत्र दिग्देशव्यदेशो न भवति, दूरान्तिकानुविधानं वा । यत्र पुनरिन्द्रियमेव केवलं संबध्यते तत्र शरीरमवधिं कृत्वा संयुक्तसंयोगाल्पीयस्त्वं तद्भूयस्त्वं वापेक्षमाणस्य दिग्देशप्रत्ययाः सन्निकृष्टविप्रकृष्टप्रत्ययाश्च भवन्तीति ।

यत्पुनरेतत् शाखाचन्द्रमसोस्तुल्यकालग्रहणादिति, तदपि न, अनभ्युपगमात्, को हि स्वस्थात्मा शाखाचन्द्रमसोस्तुल्यकालग्रहणं प्रतिपद्यते ? कालभेदस्याग्रहणान्मिथ्याप्रत्यय एष उत्पलदलशत-व्यतिभेदवदिति ।

कथं पुनरवगम्यते कालभेदाग्रहणनिमित्त एष युगपत्प्रत्ययो न पुनरेककालग्रहणनिमित्त एवेति ? इदमनुमानम् आवरणानुपपत्तेरिति यद्यप्राप्यकारि चक्षुर्भवति, न कुड्यकटादेरावरणस्य सामर्थ्यमस्ती-त्यावरणानुपपत्तिः स्यात् । न च व्यवहितार्थोपलब्धिरस्ति । तस्मात् नाप्राप्यकारि । दूरान्तिकानुविधानं चानुपलब्ध्युपलब्ध्योर्न स्यात्-अप्राप्य चक्षुरर्थं गृह्णातीति यदिदमर्थस्य दूरेऽग्रहणम्, अन्तिके च ग्रहणमुभयमेतत् न स्यात् । दृष्टं तु, तस्मात् नाप्राप्यकारि । विषयीभावादिति चेत्, न, सम्बन्ध-व्यतिरेकेण तु विषयीभावानभ्युपगमात्-अथापीदं स्यात्, यः चक्षुषोर्विषयीभवत्यर्थः स उपलभ्यते । यस्तु न भवति नासावुपलभ्यते इति । न च व्यवहितानां दूरावस्थितानां वार्थानां चक्षुषो विषयीभावो-ऽस्ति, तस्मात् न ते गृह्यन्ते इति । तच्च नैवम्, सम्बन्धव्यतिरेकेण विषयीभावानभ्युपगमात्-कः पुनः सम्बन्धव्यतिरेकेण विषयीभावः ? केवलं भवतां संज्ञामात्रं भिद्यते नार्थ इति । मयोच्यते सम्बन्ध इति, भवताभिधीयते विषयीभाव इति । न कश्चिद् विशेष इति ।

**अथ** प्राप्यकारित्वे चक्षुषः किं प्रमाणम् ? इन्द्रियत्वमेवप्राप्यकारि चक्षुः, इन्द्रियत्वात्, घ्राणादिवत् । घ्राणादीन्द्रियं प्राप्यकारि दृष्टं तथा च चक्षुः, तस्मात् प्राप्यकारीति । अथ पुनर्न किञ्चिद-

पीन्द्रियं प्राप्यकारि प्रतिपद्यते, तदा सर्वाणि पक्षीकृत्यकरणत्वादिति वाच्यम् । करणं वास्यादि प्राप्यकारि दृष्टं तथा चेन्द्रियाणि, तस्मात् प्राप्यकारीणीति ।

अथ पुनर्वैयात्यात् सर्वनिवार्थानप्राप्यकारिणः प्रतिपद्यते, तदा कथम् ? सोऽपि दृष्टसामर्थ्यानां कारणानां सर्वत्र कार्यानुपपत्त्या प्रत्यवस्थेयःयदि खल्वेतानि कारणानि परस्परप्राप्त्यनपेक्षाणि स्वयमनुपजातशक्तिकानि कार्यान्तरमारभन्ते इति कस्मात् कार्यं सर्वत्र न भवतीति वक्तव्यम् । अतो न कारणमप्राप्यकार्यस्तीति । अनेकदण्डचक्राद्युदाहरणं लोके इति । तस्माद् व्यवस्थितमिन्द्रियार्थसन्निकर्षोत्पन्नमिति ।

॥ **न्यायवार्तिकतात्पर्यटीका** ॥

आक्षिपति । **इन्द्रियार्थसन्निकर्षोत्पन्नमित्ययुक्तमिति** सान्तरग्रहणादिति हेतुं विभजते । **विप्रकृष्टेति । ननु** नार्थो विप्रकृष्टश्चक्षुषस्तत्र प्राप्तेरित्यत आह । **न च चक्षुष इति** । कस्मादित्यत आह **भूतविशेषस्ये**ति । बाह्यो भूतविशेष आलोकस्तस्य प्रसाद इन्द्रियाव्यवधायकत्वं कुड्यादिभ्यो विशेषः यः खलु काचाभ्रपटलादिषु स्वच्छेषु समस्ति । स्यादेतत् अस्ति कृष्णसारलक्षणो भूतविशेषः प्रसन्नान्धस्यापि अतस्तस्यापि रूपोपलब्धिः स्यादित्यत आह । **तत्तृष्णापूर्वकेति** । रूपोपभोगतृष्णा हि तत्साधनं कृष्णसारमपि विषयीकरोति । एतदुक्तं भवति । भूतविशेषः, कर्म्मापेक्षो रूपं च चक्षाणश्चक्षुरित्युच्यते । कर्म्मक्षयात् तु प्रसन्नान्धस्य न रूपं चष्ट इति न चक्षुः । अस्तु गोलकमेव चक्षुः किमेतावतापीत्यत आह **न चेति** । विच्छिन्नं गोलकमर्थादनुभूयत इत्यर्थः । तदेवं वस्तुनः सान्तरस्य ग्रहणमप्राप्यकारित्वे हेतुरुक्तम् ।

**केचित्** तु सान्तरम् इति ग्रहणविशेषणं हेतुं कुर्व्वन्ति तन्मतमुपन्यस्यति । **अपरे त्विति** । साध्यविपर्ययादस्य व्यतिरेकं दर्शयति । **न हि प्राप्यकारिष्विति** पक्षधर्म्मतामाह दृष्टं **त्विति** । यच्चोक्तमप्राप्यकारित्वे साधनं पृथुतरग्रहणादिति तद्विभजते । **पृथुतरेति** । द्व्याश्रयो हि संयोगो ऽल्पमेव संयोगिनमनुरुध्यते न महान्तम् । न जातु रथादिसंयोगा नभो व्यश्नुवते मा भूत्सर्वत्र रथादीनां तत्संयोगादीनां चोपलब्धिः तेन यावन्मात्रं राष्ट्रवनादेर्गोलकेन व्याप्तं तावन्मात्रस्य ग्रहणप्रसङ्गः । हेत्वन्तरं चाह **दिगिति** । अस्यापि व्यतिरेकमुखेन गमकत्वं दर्शयति । **यदि प्राप्यकारीति** । अपरमपि हेतुमाह **सन्निकृष्टेति** । यद्यपि गतिक्षणानां प्रत्येकं स्वाश्रयस्य देशान्तरविभागसंयोगोपजननं प्रति चिरक्षिप्रतायामविशेषः स्वाश्रयप्रत्यासत्तौ चाऽविशेषस्तथाऽप्या चापादानविभागाद् आ च प्रापणीयदेशप्राप्तेरन्तरालवर्त्ती यावान् गतिक्षणप्रचयः पूर्व्वापरीभूतो गतिरिह विवक्षितस्तस्य सान्तरत्वं मन्दत्वं विलम्बः । नैरन्तर्य्यं पाटवं क्षिप्रता । तामिमां गतिमभिन्दद् नैरन्तर्य्येण कुर्वदपि सन्निकृष्टमाशु प्राप्नोति न विप्रकृष्टेन तुल्यकालं किन्तु विप्रकृष्टं चिरेणेति । यथोक्तं **दिग्नागेन**-

**"सान्तरग्रहणं न स्यात् प्राप्तौ ज्ञानेऽधिकस्य च ।"**

बहिर्वर्तित्वादिन्द्रियस्योपपन्नं सान्तरग्रहणमिति चेद् अत उक्तम्। "**अधिष्ठानाद्बहिर्नाक्षं**" किं त्वधिष्ठानदेश एवेन्द्रियम्। कुतः "**तच्चिकित्सादियोगतः**"।

"**सत्यपि चाक्ष बहिर्भावे न शक्तिर्विषयेक्षणे।**
**यदि च स्यात्तदा पश्येदप्युन्मील्य निमीलनाद्॥**"

यदि च स्यादुन्मील्य निमीलितनयनो ऽपि रूपं पश्येत् उन्मीलनादस्ति बहिरिन्द्रियमिति।

**तद्वार्तिककारः** सान्तरग्रहणादिति हेतुं विकल्प्य दूषयति **यत्तावदिति** सान्तरता खल्वप्राप्ति-साहचर्य्यादप्राप्तिं लक्षयति। हेत्वर्थस्य प्रतिज्ञार्थेनाक्षिप्तत्वादभेदेन। तदुक्तं **प्रतिज्ञार्थान्न भिद्यत** इति। हेतुप्रतिज्ञापदवाच्यत्वेन भेदमुपचर्य्याक्षेप्याक्षेपकभावो द्रष्टव्यः। **तस्य व्यवधायकत्वादिति**। रूपवतो ऽप्रसादस्वभावस्य कुड्यादेरित्यर्थः। यत्तु प्रसादस्वभावं तेजः, तन्न गृह्यते किं तु तस्य रूपमात्रं विस्फारिताक्षेण दृश्यते। तदाश्रयं च द्रव्यं साधयिष्यते। न च तद् गुणो द्रव्यस्यान्तरम्। मा भूद् गन्धादिभिरन्तरं च द्रव्यस्य मा च भूतां निरन्तरे द्रव्ये स्वगुणाभ्यामन्तरितत्वात्। न चापातजन्मा-लोचनं वा विकल्पो वा द्रव्यानुमानं प्रतीक्षते येन रूपज्ञानानुमितं द्रव्यमिन्द्रियार्थयोर्द्रव्ययोरन्तरं स्यात्। अपि च रूपमात्रमगृह्यमाणे द्रव्ये स्वतन्त्रं गन्धादिवद्-गृह्यमाणं कथमन्तरा स्वाश्रयमनुमापयेत्। आकाशादीनामाश्रयाणामग्रहणात्। तस्माद्विविक्तावयव-तेजोऽवयविद्रव्याप्रत्यक्षत्वसमारोपमात्रेण दूषणं, वक्ष्यमाणं त्वन्यथासिद्धत्वदूषणं परमार्थिकं द्रष्टव्यम्। अथाभावो ऽन्तरशब्दवाच्य इति नास्माकं मूर्तद्रव्याभावादन्यदाकाशमस्तीति भावः। दूषयति। स स्वतन्त्रश्चक्षुर्विषयो न भवति। इन्द्रियं चार्थं चान्तराऽभावो ग्राह्यस्तेन सहार्थस्य ग्रहणं सान्तरग्रहणं न चेन्द्रियार्थयोर्मध्ये कस्य चित्संयुक्तस्य वा समवेतस्य वा ग्रहणमस्ति यत्तन्त्रो ऽयमभावो गृह्यते इति भावः। स्यादेतन्मा भूदान्तरालिकं संयुक्तं समवेतं वा विशेष्यं गृह्यमाणमेव तु रूपादि विशेष्यमिति तत्तन्त्रो ऽयमभावस्त-द्विशेषणत्वेन निरूपयिष्यते ततश्च सान्तरग्रहणमुपपत्स्यत इत्यत आह **तेन सहोपलब्धाविति** प्रतीयते हि त्वगादिभिरपीन्द्रियैः प्राप्यकारिभिरौष्ण्याभावविशेषणं शिशिरतरं पाथो न चेन्द्रियाणामत्रा-प्राप्यकारिता। तस्मादनैकान्तिकम्। अन्वयाभ्युपगमेनैतदुक्तम्। अन्वयाभावे तु विरुद्धमिति भावः। न च तैजसं रूपमन्तरं येन सान्तरग्रहणं स्यादित्याह **न चान्या गतिरिति**। यथा चैतत्तथोप-पादितमधस्तात्।

ये तु सान्तर इति ग्रहणमिति हेतुमाहुस्तान्प्रति दूषणमाह **यैरपीति**। अन्यथासिद्धत्वे हेतुमाह **शरीरेति**। शरीरावच्छिन्नाः खल्वात्मानः शरीरमेवात्मानमभिमन्यमाना अर्थाननुभवन्ति। तत्र य एव शरीरासम्बद्ध इत्यनुभूयते तमेव सान्तर इति मन्यते। इन्द्रिसम्बन्धो भवतु मा वा भूच् शरीरसम्बन्धेन तस्य स्पर्शादौ न सान्तरत्वाभिमान इत्यर्थः। हेत्वन्तरं दूषयति **यदपीति। सम्बन्धमात्रेणेति।**

मात्रग्रहणं सम्बन्धचतुष्टयव्याप्त्यर्थं तद्यथेन्द्रियेणार्थस्य सम्बन्ध इन्द्रियावयवैरर्थस्यार्थावयवैरिन्द्रियस्येन्द्रियावयवैरर्थावयवानां, न चैतन्निर्य्यतो विना पृथ्वग्रतां भवतीति पृथ्वग्रता सूचिता। यथा वर्त्तिदेशे पिण्डितमपि तेजः प्रसर्प्पत्प्रासादोदरं व्याप्नोति। तत्कस्य हेतोः। पृथ्वग्रत्वादिति। स्वभावतः प्रसरदपि न स्वपरिमाणानुविधायिनं प्रत्ययमाधत्ते किं तु विषयभेदानुविधायिनम्। विषयनिरूपणाधीननिरूपणा हि प्रत्यया नेन्द्रियनिरूपणाधीननिरूपणाः। तदिदमुक्तं **विषयभेदानुविधायी प्रत्यय** इति।

अपरमपि हेतुं दूषयति। **यत्पुनरिति**। देहमर्थं चान्तरावस्थितस्य पृथिव्यादेः संयुक्तसंयोगाल्पीयस्त्वं भूयस्त्वं चापक्षमाणस्येति। खगानां चोपर्युपरि संचरतां दूरान्तिकभावो बहुलतमालोकावयवभागानां संयुक्तसंयोगाल्पत्वभूयस्त्वाभ्यामवगन्तव्यः। स च तादृगालोकावयवी प्रत्यक्षोऽन्यथा न रूपमात्रेण तदनुमानं शक्यमित्युक्तम्। न च खगानामुपर्युपरि संचरतां दूरान्तिकप्रत्ययः स्यान्न च पतति पतत्रिणीह प्राप्तो नेहेति भवेत्तस्मादन्यथासिद्धिरेव सहान्तरेण ग्रहणादितिवदत्रापि दूषणमिति द्रष्टव्यम्।

अपरमपि हेतुं दूषयति। **यत्पुनरिति**। युगपद्ग्रहणमसिद्धं तदभिमानस्त्वन्यथासिद्धः अचिन्त्यो हि तेजसो लाघवातिशयेन वेगातिशयो यदुदयगिरिशिखरमारोहत्येव मार्तण्डमण्डले भवनोदरेष्वालोक इत्यभिमानो लौकिकानाम्। तादृशं चाक्षुषमपि तेज इति क्रमेणापि गच्छद् युगपत्तत्र तत्र प्राप्तमिति लक्ष्यते। न चैकस्मादेव कर्म्मणो युगपद्दूरान्तिकसंयोगा भवन्तीति युक्तम्। तद्धि स्वकार्य्यं जनयितव्ये स्वाश्रयप्रत्यासत्तिमपक्षते। अन्यथा मथुरास्थस्य देवदत्तस्य कर्म्म पाटलिपुत्रेण देवदत्तं योजयेत्। वेगाख्यं संस्कारजमपि कर्म्म न सहसा शरमन्तरालदेशेन च लक्ष्येण च योजयति। तस्मा-न्मिथ्यैव यौगपद्याभिमान इति। चोदयति **कथं पुनरिति**। अस्ति हि शाखाचन्द्रमसोर्ग्रहणे यौगपद्याभिमानः न चायमसति बाधके मिथ्येति वक्तुं शक्यः सोऽयमबाधितो बोधयत्यप्राप्यकारितां चक्षुष इत्यर्थः। परिहरति। **इदमिति**। इन्द्रियं यद्यगत्वाऽनागतमर्थं गृह्णीयात् किमस्य कुड्य-कटाद्यावरणमपकुर्य्यात्। येन तदावृतं न गृह्णीयात्। गतौ तु स्पर्शवता प्रसादरहितेन सैवास्य प्रतिबद्धेति न प्राप्नोति विषयमप्राप्तं च न गृह्णातीति। प्रयोगस्तु चक्षुःश्रोत्रे प्राप्य स्वविज्ञेयं कार्य्यं कुरुतः जनकत्त्वे सति तदप्राप्तावजनकत्वात्। यज्जनकं सद् यदप्राप्तौ यन्न जनयति तत् तत्प्राप्तावेव तज्जनयति यथा कुम्भजनको मृदामप्राप्तावकुर्वन् कुम्भं तत्प्राप्तावेव करोति तथा चैतत्तस्मात्तथेति। युक्त्यन्तरमाह। **दूरान्तिकानुविधानमिति**। दूरे नोपलभ्यते अन्तिके चोपलभ्यते अप्राप्तेरविशेषेण दूरेऽप्युपलम्भः स्यादनुपलम्भे वा अन्तिकेऽपि न स्यात्। प्राप्तौ तु दूरं गच्छत् प्रक्षीणं सत् प्राप्तमर्थं न गृह्णाति अतैजसं तैजसमप्यभिभूतं न गृह्णाति यथोल्काप्रकाशं मध्यन्दिने, अनभिभूतं तु मार्डण्डमण्डलं गृह्णात्येवेति। चोदयति। **विषयीभावा**दिति। योग्यो हि तादृश इन्द्रियक्षणः

स्वकारणादुपजातः परिणतो वाऽर्थक्षणश्च ययोरप्राप्तयोरेव ग्रहणग्राह्यभावः, व्यवहितविप्रकृष्टौ च न तौ तादृशौ तत्किमप्रतीयमानप्राप्तिकल्पनयेत्यर्थः । परिहरति । **तच्च नैवमि**ति । निषेत्स्यतेति हि क्षणभङ्ग-परिणामौ भावानां, तेन स्थेमभाजां भावानां स्वरूपयोग्यता वा महत्वादिर्विषयीभावः सहकारिसाकल्यं वा ज्ञानोपजननं प्रति परिशिष्यते । तत्र स्वरूपयोग्यतामात्रं चेदास्थीयते तदा यदेवा-व्यवहितं सन्निहितं सदजनयद्विज्ञानं विप्रकृष्टमपि व्यवहितमपि तदेवेति तथैव तेन ज्ञानं जनयितव्यम् । अस्ति हि तस्य तदाऽपि स्वरूपयोग्यतेति, सहकारिसाकल्यं तु प्राप्तिरेव, तस्मान्न संबन्धमन्तरेण विषयीभाव इति सूक्तम् ।

सन्दिग्धः पृच्छति । **अथ प्राप्यकारित्व** इति । अयमभिसंधिः । कुलालादौ प्राप्यकारिणि दृष्टं यथा विप्रकृष्टो व्यवहितश्च न करोतीति, अप्राप्यकारिणि चायस्कान्तादौ दृष्टं यथा विप्रकृष्टो व्यवहितश्च लौहं मणिमाकर्षति, तस्मात्तत्र प्रमाणं वक्तव्यमिति । उत्तरम् । इन्द्रियत्वमेव प्रमाणम् । तदेव पञ्चावयवोपपन्नमाह । **प्राप्यकारीति** । यदि तु कश्चित् दृष्टान्तस्य साध्यविकलत्वमुद्भावयेत्त्व-गादीनामप्राप्यकारित्वादिति, तं प्रत्याह । **अथ न किंचिदिति** । पृच्छति । **अथेति** । योग्यतयैव हि कारणानि स्वकार्यं कुर्वन्ति, प्राप्तिस्तु स्वरूपयोग्यताप्रयुक्तां व्याप्तिमुपजीवति न त्वस्याः स्वाभाविकं व्यापकत्वमिति भावः । उत्तरं **सोऽपीति** । सहकारिसाकल्यं तावन्न प्राप्तेरतिरिच्यत इत्युक्तम् । केवलं स्वरूपयोग्यता वक्तव्या । सा च व्यस्तानामप्यस्तीति यत्र तत्र व्यवस्थितेभ्योऽपि कार्योत्पादप्रसङ्गः । अयस्कान्तमणेरपि चक्षुष इव वृत्तिभेद एषितव्यः । अन्यथा व्यवधानविप्रकर्षयोरपि लोहाकर्षण-प्रसङ्गात् । **न च** व्यवधानविप्रकर्षाभावसहितो लोहमाकर्षति व्यवधानविप्रकर्षयोस्तु तदभावाभावेन न भवतीति **सांप्रतम्** । प्राप्तेरेव तत्र तत्र कार्य्योत्पादं प्रति उपयोगस्यावेदितत्वात् । योग्यतामात्रस्य चोपाधेरपाकृतत्वात् । यथा च द्रव्यातिरिक्तस्तद्धर्म्मः प्राप्तिस्तथा निवेदयिष्यते । तस्मात्सर्वमवदातम् । उपसंहरति । **तस्मादिति** । यदपि कृष्णसारानुग्रहोपघाताभ्यां दर्शनादर्शनादिति, तत्रोच्यते । तदधिष्ठाना-नुग्रहोपघाताभ्यां तस्यानुग्रहोपघातौ । यथा कूष्माण्डलतासेचनच्छेदनाभ्यां तत्फलस्यानुग्रहोपघातावत एव हि निर्गताऽप्यच्छिन्नमूला चक्षुःसंततिः कार्याय समर्था न च्छिन्नमूलेति सिद्धम् ।

### ॥ वात्स्यायनभाष्यसमेत न्यायसूत्रम् ॥

**अथे**दानीमिन्द्रियाणि प्रमेयक्रमेण विचार्यन्ते किमाव्यक्तिकान्याहोस्विद्भौतिकानीति । कुतः संशयः-

**कृष्णसारे सत्युपलम्भाद्व्यतिरिच्य चोपलम्भात्संशयः ॥३३॥**

कृष्णसारं भौतिकं तस्मिन्ननुपहते रूपोपलब्धिः । उपहते चानुपलब्धिरिति । व्यतिरिच्य कृष्णसारमवस्थितस्य विषयस्योपलम्भो न कृष्णसारप्राप्तस्य । न चाप्राप्यकारित्वमिन्द्रियाणाम् । तदिदमभौतिकत्वे विभुत्वात्संभवति । एवमुभयधर्मोपलब्धेः संशयः ॥३३॥

अभौतिकानीत्याह कस्मात्-

**महदणुग्रहणात्** ॥३४॥

महदिति महत्तरं महत्तमं चोपलभ्यते। यथा न्यग्रोधपर्वतादि। अण्वित्यणुतरमणुतमं च गृह्यते। न्यग्रोधधानादि। तदुभयमुपलभ्यमानं चक्षुषो भौतिकत्वं बाधते। भौतिकं हि यावत्तावदेव व्याप्नोति। अभौतिकं तु विभुत्वात्सर्वव्यापकमिति ॥३४॥

न महदणुग्रहणमात्रादभौतिकत्वं विभुत्वं चेन्द्रियाणां शक्यं प्रतिपत्तुम्। इदं खलु-

**रश्म्यर्थसंनिकर्षविशेषाद्ग्रहणम्** ॥३५॥

तयोर्महदण्वोर्ग्रहणं चक्षूरश्मेरर्थस्य च संनिकर्षविशेषाद्भवति। यथा प्रदीपरश्मेरर्थस्य चेति। रश्म्यर्थसंनिकर्षश्चाऽऽवरणलिङ्गः। चाक्षुषो हि रश्मिः कुड्यादिभिरावृतमर्थं न प्रकाशयति यथा प्रदीपरश्मिरिति ॥३५॥

आवरणानुमेयत्वे सतीदमाह-

**तदनुपलब्धेरहेतुः** ॥३६॥

रूपस्पर्शवद्धि तेजो महत्त्वादनेकद्रव्यवत्त्वाच्चोपलब्धिरिति प्रदीपवत्प्रत्यक्षत उपलभ्येत चक्षुषो रश्मिर्यदि स्यादिति ॥३६॥

**नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः** ॥३७॥

संनिकर्षप्रतिषेधार्थेनाऽऽवरणेन लिङ्गेनानुमीयमानस्य रश्मेर्या प्रत्यक्षतोऽनुपलब्धिर्नासावभावं प्रतिपादयति। यथा चन्द्रमसः परभागस्य पृथिव्याश्चाधोभागस्य ॥३७॥

**द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः** ॥३८॥

भिन्नः खल्वयं द्रव्यधर्मो गुणधर्मश्च महदनेकद्रव्यवच्च विष(भ)क्तावयवमाप्यं द्रव्यं प्रत्यक्षतो नोपलभ्यते स्पर्शस्तु शीतो गृह्यते तस्य द्रव्यस्यानुबन्धाद्धेमन्तशिशिरौ कल्प्येते। तथाविधमेव च तैजसं द्रव्यमनुद्भूतरूपं सह रूपेण नोपलभ्यते स्पर्शस्त्वस्योष्ण उपलभ्यते। तस्य द्रव्यस्यानुबन्धाद् ग्रीष्मवसन्तौ कल्प्येते यत्रत्वेषा भवति।

**अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिः**। तत्र रूपं च द्रव्यं च तदाश्रयः प्रत्यक्षत उपलभ्यते। रूपविशेषस्तु यद्भावात्क्वचिद्रूपोपलब्धिः, यदभावाच्च द्रव्यस्य क्वचिदनुपलब्धिः स रूपधर्मोऽयमुद्भवसमाख्यात इति। अनुद्भूतरूपश्चायं नायनो रश्मिः। तस्मात्प्रत्यक्षतो नोपलभ्यत इति। दृष्टश्च तेजसो धर्मभेदः-उद्भूतरूपस्पर्शं प्रत्यक्षं तेजो यथाऽऽदित्यरश्मयः। उद्भूतरूप-

मनुद्भूतस्पर्शं च प्रत्यक्षं यथा प्रदीपरश्मयः। उद्भूतस्पर्शमनुद्भूतरूपमप्रत्यक्षं यथाऽबादिसंयुक्तं तेजः। अनुद्भूतरूपस्पर्शोऽप्रत्यक्षश्चाक्षुषो रश्मिरिति।

**कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः**। यथा चेतनस्यार्थो विषयोपलब्धिभूतः सुख-दुःखोपलब्धिभूतश्च कल्प्यते तथेन्द्रियाणि व्यूढानि। विषयप्राप्त्यर्थश्च रश्मेश्चाक्षुषस्य व्यूहः। रूपस्पर्शानभिव्यक्तिश्च व्यवहारप्रक्लृप्त्यर्था। द्रव्यविशेषे च प्रतीघातादावरणोपपत्तिर्व्यवहारार्था। सर्वद्रव्याणां विश्वरूपो व्यूह इन्द्रियवत्कर्मकारितः पुरुषार्थतन्त्रः। कर्म तु धर्माधर्मभूतं चेतनस्योपभोगार्थमिति।

**अव्यभिचाराच्च प्रतीघातो भौतिकधर्मः**। यश्चाऽऽवरणोपलम्भादिन्द्रियस्य द्रव्यविशेषे प्रतीघातः स भौतिकधर्मो न भूतानि व्यभिचरति। नाभौतिकं प्रतीघातधर्मकं दृष्टमिति। अप्रतिघातस्तु व्यभिचारी भौतिकाभौतिकयोः समानत्वादिति ॥३८॥

**यदपि मन्यते** प्रतिघाताद्भौतिकानीन्द्रियाणि, अप्रतिघातादभौतिकानीति प्राप्तम्। दृष्टश्चाप्रतीघातः काचाभ्रपटलस्फटिकान्तरितोपलब्धेः। **तन्न युक्तम्**। यस्माद्भौतिकमपि न प्रतिहन्यते काचाभ्रपटल-स्फटिकान्तरितप्रकाशात्प्रदीपरश्मीनाम्। स्थाल्यादिषु पाचकस्य तेजसोऽप्रतिघातः। उपपद्यते चानुपलब्धिः कारणभेदात्-

**मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ॥३९॥**

यथाऽनेकद्रव्येण समवायाद्रूपविशेषाच्चोपलब्धिरिति सत्युपलब्धिकारणे मध्यन्दिनोल्काप्रकाशो नोपलभ्यत आदित्यप्रकाशेनाभिभूतः, एवं महदनेकद्रव्यवत्त्वाद्रूपविशेषाच्चोपलब्धिरिति सत्युपलब्धि-कारणे चाक्षुषो रश्मिर्नोपलभ्यते निमित्तान्तरतः। तच्च व्याख्यातमनुद्भूतरूपस्पर्शस्य द्रव्यस्य प्रत्यक्षतोऽनुपलब्धिरिति ॥३९॥

अत्यन्तानुपलब्धिश्चाभावकारणं यो हि ब्रवीति लोष्टप्रकाशो मध्यन्दिन आदित्यप्रकाशा-भिभवान्नोपलभ्यत इति तस्यैतत्स्यात्-

**न रात्रावप्यनुपलब्धेः ॥४०॥**

अप्यनुमानतोऽनुपलब्धेरिति। एवमत्यन्तानुपलब्धेर्लोष्टप्रकाशो नास्ति, न त्वेवं चक्षुषो रश्मिरिति ॥४०॥

उपपन्नरूपा चेयम्-

**बाह्यप्रकाशानुग्रहाद्विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥४१॥**

बाह्येन प्रकाशेनानुगृहीतं चक्षुर्विषयग्राहकं तदभावेऽनुपलब्धिः। सति च प्रकाशानुग्रहे शीत-स्पर्शोपलब्धौ च सत्यां तदाश्रयस्य द्रव्यस्य चक्षुषाऽग्रहणं रूपस्यानुद्भूतत्वात्। सेयं रूपानभिव्यक्तितो रूपाश्रयस्य द्रव्यस्यानुपलब्धिर्दृष्टा ॥४१॥

तत्र यदुक्तम्-'तदनुपलब्धेरहेतुः' (३।१।३६) इत्येतदयुक्तम् । कस्मात्पुनरभिभवोऽनुपलब्धिकारणं चाक्षुषस्य रश्मेर्नोच्यत इति-

**अभिव्यक्तौ चाभिभवात् ॥४२॥**

बाह्यप्रकाशानुग्रहनिरपेक्षतायां चेति चार्थः । यद्रूपमभिव्यक्तमुद्भूतं बाह्यप्रकाशानुग्रहं च नापेक्षते तद्विषयोऽभिभवो विपर्ययेऽभिभवाभावात् । अनुद्भूतरूपत्वाच्चानुपलभ्यमानं बाह्यप्रकाशानुग्रहाच्चोपलभ्यमानं नाभिभूयत इति । एवमुपपन्नमस्ति चाक्षुषो रश्मिरिति ॥४२॥

**नक्तञ्चरनयनरश्मिदर्शनाच्च ॥४३॥**

दृश्यन्ते हि नक्तं नयनरश्मयो नक्तञ्चराणां वृषदंशप्रभृतीनां तेन शेषस्यानुमानमिति । जातिभेदवदिन्द्रियभेद इति चेद्धर्मभेदमात्रं चानुपपन्नमावरणस्य प्राप्तिप्रतिषेधार्थस्य दर्शनादिति ॥४३॥

इन्द्रियार्थसंनिकर्षस्य ज्ञानकारणत्वानुपपत्तिः । कस्मात्-

**अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ॥४४॥**

तृणादिसर्पद्द्रव्यं काचेऽभ्रपटले वा प्रतिहतं दृष्टमव्यवहितेन सन्निकृष्यते, व्याहन्यते वै प्राप्तिर्व्यवधानेनेति । यदि च रश्म्यर्थसन्निकर्षो ग्रहणहेतुः स्यान्न व्यवहितस्य सन्निकर्ष इत्यग्रहणं स्यात् । अस्ति चेयं काचाभ्रपटलस्फटिकान्तरितोपलब्धिः । सा ज्ञापयत्यप्राप्यकारीणीन्द्रियाणि । अत एवाभौतिकानि । प्राप्यकारित्वं हि भौतिकधर्म इति ॥४४॥

न-

**कुड्यान्तरितानुपलब्धेरप्रतिषेधः ॥४५॥**

अप्राप्यकारित्वे सतीन्द्रियाणां कुड्यान्तरितस्यानुपलब्धिर्न स्यात् । प्राप्यकारित्वेऽपि तु काचाभ्रपटलस्फटिकान्तरितोपलब्धिर्न स्यात् ॥४५॥

**अप्रतीघातात्संनिकर्षोपपत्तिः ॥४६॥**

न च काचोऽभ्रपटलं वा नयनरश्मिं विष्टभ्नाति । सोऽप्रतिहन्यमानः सन्निकृष्यत इति ॥४६॥

यश्च मन्यते न भौतिकस्याप्रतीघात इति तत्र-

**आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽविघातात् ॥४७॥**

आदित्यरश्मेरविघातात्स्फटिकान्तरितेऽप्यविघाताद्दाह्येऽविघातात् । अविघातादिति च पदाभिसम्बधभेदाद्वाक्यभेद इति । यथावाक्यं चार्थभेद इति । आदित्यरश्मिः कुम्भादिषु न प्रतिहन्यतेऽविघातात् । कुम्भस्थमुदकं तपति प्राप्तौ हि द्रव्यान्तरगुणस्योष्णस्पर्शस्य ग्रहणं तेन च शीतस्पर्शा-

भिभव इति । स्फटिकान्तरितेऽपि प्रकाशनीये प्रदीपरश्मीनामप्रतीघातः अप्रतीघातात्प्राप्तस्य ग्रहणमिति। भर्जनकपालादिस्थं च द्रव्यमाग्नेयेन तेजसा दह्यते, तत्राविघातात्प्राप्तिः, प्राप्तौ तु दाहो नाप्राप्यकारि तेज इति अविघातादिति च केवलं पदमुपादीयते । कोऽयमविघातो नाम । अव्यूह्य-मानावयवेन व्यवधायकेन द्रव्येण सर्वतो द्रव्यस्याविष्टम्भः क्रियाहेतोरप्रतिबन्धः प्राप्तेरप्रतिषेध इति । दृष्टं हि कलशनिषक्तानामपां बहिः शीतस्पर्शग्रहणम् । न चेन्द्रियेणासंनिकृष्टस्य द्रव्यस्य स्पर्शो-पलब्धिः । दृष्टौ च प्रस्यन्दपरिस्रवौ । तत्र काचाभ्रपटलादिभिर्नायनरश्मेरप्रतिघाताद्भिभिद्यार्थेन सह सन्निकर्षादुपपन्नं ग्रहणमिति ॥४७॥

**नेतरेतरधर्मप्रसङ्गात् ॥४८॥**

काचाभ्रपटलादिवद्वा कुड्यादिभिरप्रतीघातः । कुड्यादिवद्वा काचाभ्रपटलादिभिः प्रतीघात इति प्रसज्यते । नियमे कारणं वाच्यमिति ॥४८॥

**आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत्तदुपलब्धिः ॥४९॥**

आदर्शोदकयोः प्रसादो रूपविशेषः स्वोधर्मो नियमदर्शनात् । प्रसादस्य वा स्वो धर्मो रूपोपलम्भनम् । यथाऽऽदर्शप्रतिहतस्य परावृत्तस्य नयनरश्मेः स्वेन मुखेन संनिकर्षे सति स्वमुखोपलम्भनं प्रतिबिम्बग्रहणाख्यमादर्शरूपानुग्रहात्तन्निमित्तं भवति । आदर्शरूपोपघाते तदभावा-त्कुड्यादिषु च प्रतिबिम्बग्रहणं न भवति । एवं काचाभ्रपटलादिभिरविघातश्चक्षूरश्मेः कुड्यादिभिश्च प्रतिघातो द्रव्यस्वभावनियमादिति ॥४९॥

**दृष्टानुमितानां नियोगप्रतिषेधानुपपत्तिः ॥५०॥**

प्रमाणस्य तत्त्वविषयत्वात् । न खलु भोः परीक्ष्यमाणेन दृष्टानुमिता अर्थाः शक्या नियोक्तुमेवं भवतेति। नापि प्रतिषेद्धमेवं न भवतेति। नहीदमुपपद्यतेरूपवद्गन्धोऽपि चाक्षुषो भवत्विति, गन्धवद्वा रूपं चाक्षुषं मा भूदिति, अग्निप्रतिपत्तिवद्धूमेनोदकप्रतिपत्तिरपि भवत्विति, उदकाप्रतिपत्तिवद्वा धूमेनाग्निप्रतिपत्तिरपि मा भूदिति। किं कारणम्। यथा खल्वर्था भवन्ति य एषां स्वो भावः स्वो धर्म इति तथाभूताः प्रमाणेन प्रतिपद्यन्त इति । यथाभूतविषयकं हि प्रमाणमिति। इमौ खलु नियोगप्रतिषेधौ भवता देशितौ काचाभ्रपटलादिवद्वा कुड्यादिभिरप्रतिघातो भवतु कुड्यादिवद्वा काचाभ्रपटलादिभिरप्रतिघातो मा भूदिति । न दृष्टानुमिताः खल्विमे द्रव्यधर्माः । प्रतिघाताप्रतिघात-योर्ह्युपलब्ध्यनुपलब्धी व्यवस्थापिके । व्यवहितानुपलब्ध्याऽनुमीयते कुड्यादिभिः प्रतिघातो व्यवहितोपलब्ध्याऽनुमीयते काचाभ्रपटलादिभिरप्रतिघात इति ॥५०॥

इतीन्द्रियपरीक्षाप्रकरणम् ॥७॥

## न्यायसूत्रन्याय वार्तिकः

**सूत्र :- कृष्णसारे सत्युपलम्भाद् व्यतिरिच्य चोपलम्भात् संशयः ॥३०॥**

कृष्णसारे सत्युपलम्भाव्यतिरिच्य चोपलम्भात् संशयः । कृष्णसारं भौतिकं तस्मिन्ननुपहते विषयोपलब्धिः, कृष्णसारव्यतिरेकेण विप्रकृष्टदेशावस्थितस्य विषयस्योपलब्धिः, सेयं व्यतिरेकोपलब्धिरभौतिकधर्मः, तदेवमुभयधर्मोपलब्धेः संशय इति । कृष्णसारमेव चक्षुः तस्मिन् सति भावाद्रूपग्रहणस्य यस्मादिदं रूपग्रहणं सति कृष्णसारे भवति असति न भवति । यच्च यस्मिन् सति भवत्यसति न भवति तस्य तदिति । यथा कार्यद्रव्यस्य रूपादय इति । न प्रदीपादिभिरनेकान्तात् प्रदीपे सति रूपोपलब्धिर्भवति न च प्रदीपस्य रूपोपलब्धिरित्यनेकान्तः । यस्य कृष्णसारं चक्षुः तस्य सन्निकृष्टविप्रकृष्टयोस्तुल्योपलब्धिप्रसङ्गः । कृष्णसारं न विषयं प्राप्नोति अप्राप्यविशेषात् सन्निकृष्टविप्रकृष्टयोस्तुल्योपलब्धिः प्राप्नोति । विषयीभावादिति **चेत्** ?-**अथ** मन्यसे सन्निकृष्टेऽस्य विषयो भवति विप्रकृष्टो न विषयः एवं च न तुल्योपलब्धिरिति ? **नोक्तोत्तरत्वात् प्रत्यक्षसूत्र** इति ।

अभौतिकानीत्यपरे-

**सूत्र :- महदणुग्रहणात् ॥३१॥**

महदणुग्रहणात् । **महदिति** महत्तरं महत्तममुच्यते **अण्विति** अणुतरमणुतममिति तदिदमुभयं चक्षुष्युपलभ्यमानं भौतिकत्वं चक्षुषो बाधते भौतिकं हि यावद्भवति तावदेव व्याप्नोति अभौतिकं तु व्यापकत्वात् सर्वसम्बद्धम् ।

न भौतिकेषु प्रदीपादिषु दृष्टत्वात्भौतिकाः प्रदीपादयो महदण्वोः प्रकाशका भवन्तीत्यनेकान्तः प्रदीपाद्यनभ्युपगमे वा महदणुप्रकाशकत्वं चक्षुष एवेत्यसाधारणत्वादहेतुः भौतिकाभौतिकयोर्निवृत्तेः । **ननु** चाभौतिके ज्ञाने महदणुप्रकाशकत्वं दृष्टं ? न दृष्टं-न हि बुद्ध्या महदणुनी प्रकाश्येते, अपि तु प्रकाशो बुद्धिर्न प्रकाशनमिति, अवधारितस्यार्थस्य हानोपादानोपेक्षाबुद्धीनां साधनं बुद्धिरिति नाभौतिकं महदणुप्रकाशकमस्ति । **ननु** मनो विद्यते ? सत्यं न पुनस्तद्भौतिकं नाप्यभौतिकमिति । एतेनात्मा व्याख्यातः-न भौतिको नाभौतिक इति । यदि मनो नाभौतिकं यदुक्तं भौतिकानीन्द्रियाणि अभौतिकं मन इति तद्व्याहतं ? नाभौतिकार्थस्याभूतात्मकपर्यायत्वात् अभौतिकं मन इति अभूतात्मकं मन इति यावदुक्तं भवति । मुख्यतस्तु मनो न भौतिकं नाभौतिकमिति । नेन्द्रियेऽपि समानत्वात् इन्द्रियमभौतिकमिति यावदुक्तं भवति अभूतात्मकमिति ? । अभूतात्मकं व्यापकं चेन्द्रियं प्रतिपद्यमान इदं पर्यनुयोज्यः व्यवहितार्थग्रहणं कस्मान्न भवति ? किं कारणम्-व्यापकत्वादिन्द्रियस्य न कुड्यादेरावरणसामर्थ्यमस्तीति ? वृत्तिः प्रतिषिध्यत इति **चेत्** ?-**अथ** मन्यसे सत्यं व्यापकमिन्द्रियं तस्य तु पुरुषार्थहेतुना क्षोभ्यमाणस्य महदाद् बुद्बुदा इव निःसरन्त्यस्ताः

कुड्यादिभिः प्रतिषिध्यन्त इति ? **न** वृत्तिव्यतिरेकेणेन्द्रियसत्त्वे प्रमाणाभावात् येयं विषयग्रहणात्मिका वृत्तिः तां त्यक्त्वा तद्व्यतिरिक्तमिन्द्रियमिति किं प्रमाणम् ? न चाप्रामाणिकोऽर्थः शक्यः प्रतिपत्तुम्, न च प्रतिषिध्यमानाप्रतिषिध्यमानयोरेकत्वम्, एकत्वे वाऽऽनर्थक्यं वृत्तिः प्रतिषिध्यते निश्चरतीति च ।

अव्यतिरेकाच्च तदुत्पत्तिविनाशधर्मकम्-यदि वृत्त्यव्यतिरेकीन्द्रियं यथा वृत्तेरुत्पादविनाशावेवमिन्द्रियस्यापि प्राप्नुतः । वृत्तेर्व्यक्तिर्नोत्पत्तिरिति **चेत्** ?-**अथ** मन्यसे न मया वृत्तेरुत्पत्तिरभ्युपगम्यतेऽपि तु व्यक्तिः न निरोधो विनाशोऽपि तु तिरोभाव इति ? **नोत्पत्तिविशेषत्वात्**-व्यक्तिरुत्पत्तेर्विशेषः । कथमिति ? नानुपजातविशेषस्य व्यक्तिरिति । **अथानुपजातविशेषं** व्यज्यत इति **मन्यसे** ? नित्यं व्यक्तिः स्यात् । **एतेन** विनाशो **व्याख्यातः** । तिरोभाव इति विद्यमानं **न** किञ्चिन्निरुद्धं न ह्यनिवृत्तविशेषस्याग्रहणं भवति । न च सर्वनित्यवादिना ग्रहणाग्रहणे युक्तेविशेषस्यानुपजननान्न ग्रहणं विशेषस्यानुपचयान्नाग्रहणमिति । नित्यं व्यापकञ्चेन्द्रियमभ्युपगच्छतः कारणार्थो हीयते कारणं नाम यस्यानन्तरं यद्भवति कारणञ्च नित्यं कार्यञ्च नित्यमिति किं कस्यानन्तरं कार्यकारणभावश्च कथं तयोर्नित्यत्वात् ।

कारकशब्दार्थश्च वाच्यः । **ननु** करोतीति कारकम् ? **सत्यं** करोतीति कारकम् न पुनर्नित्यवादिनः किञ्चित्कर्तव्यमस्ति न चासति कर्तव्ये कारकार्थं पश्यामः । व्यक्तौ कारकार्थ इति **चेत्** ? व्यक्तौ च तुल्यं व्यक्तिरपि व्यङ्यवन्नित्येति व्यक्तावपि न कारकार्थोऽस्ति युगपदनेकविज्ञानप्रसङ्गाच्च यदि च वृत्तिर्वृत्तिमतो नान्या भवति वृत्तिमतोऽवस्थानाद् वृत्तीनामवस्थानमिति युगपदनेकविज्ञानप्रसङ्गः वृत्त्यनेकत्वे चैकमिन्द्रियमनेकं प्राप्नोति वृत्तिभ्योऽनन्यत्वात् । अथ माभूदिन्द्रियभेद इति ? वृत्तीनां तर्ह्येकत्वं प्राप्नोति वृत्तिवृत्तिमतोरनन्यत्वात् । **अथ** माभूदयं दोष इत्युभयं नेष्यते ? भेदस्तर्हि वृत्तिवृत्तिमतोरिति न चान्या गतिरस्ति तस्मादयुक्तम् व्यापकमिन्द्रियं नित्यं चेति ॥

महदणुग्रहणस्य चान्यथासिद्धेरहेतुः-योऽयं हेतुर्महदणुग्रहणादभौतिकानीन्द्रियाणीत्ययमन्यथासिद्धः न महदणुग्रहणमात्रादभौतिकत्वं व्यापकत्वमिन्द्रियाणां शक्यं प्रतिपत्तुं, कस्मात् इदं ? यस्माद्रश्म्यर्थसन्निकर्षविशेषान्महदण्वोर्ग्रहणम् ॥

**सूत्रः- रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणम् ॥ ३२॥**

चक्षूरश्मेरर्थस्य च सन्निकर्षविशेषान्महदण्वोर्ग्रहणं भवति । तत्र सन्निकर्षमात्रात् सामान्यग्रहणं सन्निकर्षविशेषाद्विशेषग्रहणम् । कः पुनः सन्निकर्षस्य विशेषः ? भूयोऽवयवसन्निकर्षानुग्रहः यस्मादयं सन्निकर्षो विशेषप्रतिपत्तिहेतुर्भूयोऽवयवसंयोगैरनुगृह्यते सोऽयमवयवान्तरसंयोगापेक्षोऽवयवीन्द्रियसन्निकर्षः सन्निकर्षविशेष इत्युच्यते स च रश्म्यर्थसन्निकर्षविशेषोऽणुमहतोस्तुल्यो

भवतीत्यन्यथा महदण्वोर्ग्रहणं सिद्ध्यति । रश्म्यर्थसन्निकर्षश्चावरणलिङ्गः कुड्यादिव्यवहितानामप्रकाशरूपत्वात् अप्राप्यकारित्वे तु न कुड्यादेरावरणसामर्थ्यमस्तीत्यस्ति चाक्षुषो रश्मिः यथा प्रदीपरश्मिरिति ॥

आवरणानुमेयत्वे सतीदमाह-

**सूत्रः- तदनुपलब्धेरहेतुः ॥ ३३॥**

तदनुपलब्धेरहेतुः । न चाक्षुषो रश्मिर्विद्यत इति सूत्रार्थः । कथमिति ? । उपलब्धिलक्षणप्राप्तत्वादनुमानानुपपत्तिः यत् खलूपब्धिलक्षणप्राप्तं नोपलभ्यते तन्नास्ति यथा घटादि घटादेर्महदनेकद्रव्यवत्त्वरूपवत्त्वानि सन्तीत्युपलभ्यन्ते घटादयः तथा महदनेकद्रव्यवत्त्वरूपवांश्चाक्षुषो रश्मिः कस्मात् प्रत्यक्षतो नोपलभ्यत इति-महत्त्वं तावत् कारणमहत्त्व-बहुत्वप्रचयेभ्यः अनेकद्रव्यवत्त्वमपि कारणबहुत्वादेव रूपस्पर्शवद्धि तेज इति नारूपं तत् एवमशेषोपलब्धिकारणसन्निधाने सति यन्नोपलभ्यते तेन गम्यते नास्तीति ॥

**सूत्रः- नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः ॥ ३४॥**

नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः । यत् प्रत्यक्षतो नोपलभ्यते तदनुमानेनोपलभ्यमानं नास्तीत्ययुक्तम् यथा चन्द्रमसः परभागः पृथिव्याश्चाधोभागः प्रत्यक्षलक्षणप्राप्तावपि न प्रत्यक्षत उपलभ्यते अनुमानेन चोपलब्धेर्न तौ न स्तः । किं पुनरनुमानम् ? अर्वाग्भागवदुभयप्रतिपत्तिः तथा चाक्षुष रश्मेः कुड्याद्यावरणमनुमानं सम्भवतीति ।

**अपरे** तु महदनेकद्रव्यवत्त्वाद्रूपवत्त्वाच्चोपलब्धिरित्युपलब्धौ नियमं **वर्णयन्ति** । नोपलभ्यमान इति किमुक्तं भवति न युक्तो यत्र यत्र महदनेकद्रव्यवत्त्वरूपाणि सन्ति तत्तदुपलभ्यत इति, अपि तु यद्यदुपलभ्यते तत्र तत्र महदनेकद्रव्यवत्त्वरूपाणि सन्तीति ? । एवं तर्हि इदं सूत्रं नोपलब्धेः कारणप्रतिपादकम् सत्स्वभावादितिसत्सु महदनेकद्रव्यरूपेषु उपलब्धिर्न भवतीति नैतान्युपलब्धिकारणमिति ॥

**सूत्रः- द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः ॥३५॥**

द्रव्यगुणधर्मभेदाच्चोपलब्धिनियम इति । शेषं **भाष्ये** । कस्मात् तर्हि चाक्षुषो रश्मिर्नोपलभ्यते इति ? उपलब्धिकारणाभावादिति । नैतावदेवोपलब्धिकारणं यन्महदनेकद्रव्यरूपाणि, अपि तु रूपग्रहणाद्रूपविशेषोऽभिधीयते न रूपमात्रम् ।

एवं च सूत्रम् ॥

**सूत्रः- अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिः ॥३६॥**

अनेकद्रव्येण समवायाद्रूपविशेषाच्च रूपोपलब्धिरिति । अत्र रूपविशेषग्रहणेन रूपधर्म उद्भवसमाख्योऽभिधीयते न रूपत्वं रूपान्तराद्रूपं विशिनष्टि अपि तूद्भवो विशेषकत्वाद्विशेष इत्युच्यते यथा ब्राह्मणविशेष इति न ब्राह्मणत्वं ब्राह्मणविशेषः एवं समानजातीयविशेषकत्वं यत् तद्विशेष इत्युच्यते, उद्भवश्च कार्यगम्यः यस्याभावाद्विषक्तावयवमाप्यं द्रव्यं हेमन्ते न गृह्यते तैजसञ्च ग्रीष्मे यस्य भावात् प्रदीपरश्मिरुपलभ्यते आदित्यरश्मिश्च, स उद्भवो नाम विशेषः स तस्मिन्नायने रश्मौ रूपविशेषो नास्तीत्यतश्चाक्षुषो रश्मिर्नोपलभ्यते दृष्टश्च तेजसो धर्मभेदः । चतुर्विधञ्च तेजो भवति उद्भूतरूपस्पर्शं यथाऽऽदित्यरश्मिः । उद्भूतरूपमनुद्भूतस्पर्शं यथा प्रदीपरश्मिः । उभयं च प्रत्यक्षम् रूपस्योद्भूतत्वात् । उद्भूतस्पर्शमनुद्भूतरूपं यथा वारिस्थितं तेजः । अनुद्भूतरूपस्पर्शं यथा नायनं तेजः । उभयं चाप्रत्यक्षम् रूपस्यानुद्भूतेः ॥

**सूत्रः- कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ॥३७॥**

कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः । शेषं भाष्ये । रूपस्पर्शानभिव्यक्तिश्च व्यवहार-प्रक्लृप्तार्था-यदि नायनो रश्मिरुद्भूतस्पर्शो भवेत् तेन दृश्यविशेषेवेऽनेकरश्मिसन्निधाने सति द्रव्यं दह्येत अनेकरश्मिसन्निपाते च सति व्यवहितत्वाद् द्रव्यस्यानुपलब्ध्या भवितव्यम् । अथ मन्यसे यथादित्य-रश्मिसम्बद्धेर्थे नायनो रश्मिर्न व्यवधीयते एवं रश्म्यन्तरसन्निपातेऽपीति ? । तत्र व्यतिभिद्यार्थ-ग्राहकत्वात् व्यतिभिद्यादित्यरश्मि तत्सम्बद्धेन द्रव्येण सम्बद्ध्यते उद्भूतरूपस्पर्शवत्त्वे च चक्षुषो यस्य पूर्वं सन्निपतितं चक्षुस्तदितरेण व्यवहितमपि नार्थं गृह्णीयात् । अथानेकरश्मिसन्निपाते सति समान-जातीयद्रव्येभ्यो द्रव्यान्तरं रश्मिरुत्पद्यत इति । एवं सति समग्रासमग्रचक्षुषोस्तुल्योपलम्भः प्राप्नोति । न चैतदिष्टमनुपलब्धेरिति व्यवहारक्लृप्त्यर्थं च नायनस्य रश्मेरनुद्भूतरूपस्पर्शवत्त्वमिति । सर्वद्रव्याणां विश्वरूपो व्यूहः पुरुषार्थकारित इति । कर्म च धर्माधर्मरूपं चेतनस्योपभोगार्थमिति ॥

**सूत्रः- अव्यभिचाराच्च प्रतीघातो भौतिकधर्मः ॥३८॥**

अव्यभिचारी तु प्रतीघातो भौतिकधर्मः । भौतिकं चक्षुः कुड्यादिभिः प्रतीघातदर्शनात् घटादिवदिति । अप्रतीघातादभौतिकमिति **चेत्** ?-**अथ** मन्यसे यदि प्रतीघाताद्भौतिकमप्रतीघातादभौतिकम् दृष्टश्चाप्रतीघातः काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ? **नाने**कान्तात्प्रदीपरश्मिवत् भौतिकस्याप्रतीघातः यथा- प्रदीपरश्मेरिति । स्थाल्यादिषु च पाचकस्य तेजसोऽप्रतीघातादिति ।

उपपद्यते चानुपलब्धिः कारणभेदात्-

**सूत्रः- मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ॥३९॥**

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः । यथोपलब्धिलक्षणप्राप्तस्य मध्यन्दिनोल्का-प्रकाशस्य निमित्तादग्रहणमभिभवात् तथोपलब्धिलक्षणप्राप्तस्य चाक्षुषस्य रश्मेरग्रहणं निमित्ताद्रूप-स्यानुद्भूतेरिति। मध्यन्दिनोल्काप्रकाशो नोपलभ्यते इति आदित्यप्रकाशात्-आदित्यप्रकाशाभि-भवादियं युक्तम् सर्वरश्मिवत्त्वप्रसङ्गात् -एवं सति सर्वं लोष्टादि रश्मिमत् प्राप्नोति । अथ लोष्टादिरश्मयः कस्मान्नोपलभ्यन्ते इत्यनुक्तो ब्रूयादादित्यरश्म्यभिभवादित्ययुक्तं तदेतदुत्तरद्धारकं सूत्रम्-

**सूत्रः- न रात्रावप्यनुपलब्धेः ॥४०॥**

न रात्रावप्यनुपलब्धेः । यदि लोष्टादिरश्मयः स्युर्दिवादित्यप्रकाशाभिभवाच्च नोपलभ्यन्ते इति रात्रौ तर्ह्युपलभ्येरन् रात्रावपि नोपलभ्यन्ते । व्यञ्जकाभावादिति **चेत्** ? न हि यद्यस्याभिभावकं तत् तस्याभिव्यञ्जकमिति । कथं न प्राप्नोति लोष्टादिरश्मीनामुपलम्भः अनुमानतश्च नोपलभ्यते लोष्टरश्मिरित्यपिशब्दात् गम्यते । तदेवं सर्वप्रमाणनिवृत्तेर्न विद्यते लोष्टरश्मिः न पुनरेवं चाक्षुषो रश्मिर्निरनुमानः कुड्यादेरावरणस्य सामर्थ्यादिति तस्य विद्यमानस्य बाह्यप्रकाशानुग्रहाद्विषयो-पलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥

**सूत्रः- बाह्यप्रकाशानुग्रहाद् विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥४१॥**

दृष्टान्तस्थान एवैतत् सूत्रम् । किमुक्तं भवति ? यत् खलु बाह्यप्रकाशमपेक्षते तस्यानु-पलब्धीरूपानभिव्यक्तित इत्यनुद्भूतेर्यथा विषक्तावयवस्याऽऽप्यद्रव्यस्य रूपानुद्भूतेरग्रहणम् तथा चाक्षुषो रश्मिर्बाह्यप्रकाशानुग्रहमपेक्षते तस्मादस्यापि रूपस्यानुद्भूतेरग्रहणमिति । कस्मात् पुनर्नायनस्य रश्मेरनुपलब्धेरभिभवो न कारणमुच्यते इति ? मोच्यते-

**अभिव्यक्तौ साभिभवात् ॥४२॥**

अभिव्यक्तौ चाभिभवात् यदुद्भूतरूपं बाह्यप्रकाशानुग्रहणं च नापेक्षते तदभिभूयते यथा मध्यन्दि-नोल्काप्रकाशः, अनुद्भूतरूपस्य नायनो रश्मिर्बाह्यप्रकाशानुग्रहणं चापेक्षते यदनुद्भूतरूपं तन्नाभिभूयते यथा तदेव विषक्तावयवमाप्यं द्रव्यम् । यच्च बाह्यप्रकाशानुग्रहापेक्षं उद्भूतरूपमपि तन्नाभिभूयते यथा घटादिद्रव्यमिति, सोऽयमुभयविषयोऽभिभवो नायनरश्मावनुपपन्न इति विप्रतिपत्तिविषयः । कृष्णसारं रश्मिमत् द्रव्यत्वे सति रूपोपलब्धौ नियतस्य साधनाङ्गस्य निमित्तत्वात् प्रदीपवदिति । अथवा रश्मिमच्चक्षुः द्रव्यत्वे सति नियतत्वे च सति स्फटिकादिव्यवहितार्थप्रकाशकत्वात् प्रदीपवत् ॥

**सूत्रः- नक्तञ्चरनयनरश्मिदर्शनाच्च ॥४३॥**

नक्तञ्चनयनरश्मिदर्शनाच्चेति दृष्टान्तसूत्रम् । मानुषं चक्षू रश्मिमत् अप्राप्तिस्वभावत्वे सति रूपाद्युपलब्धिनिमित्तत्वात् नक्तञ्चरचक्षुर्वदिति । जातिभेदादिन्द्रियप्रभेद इति **चेत्** ?-**अथ** मन्यसे यथा

विडालत्वं जातिर्वृषदंशे वर्त्तते न मनुष्ये एवं रश्मिमद्विडालस्यैव चक्षुर्भविष्यति न मानुषस्येति ? नावरणसामर्थ्यात् सत्येतस्मिन् जातिभेदे यथावृषदंशप्रभृतीनां कुड्यादिभी रश्मय आव्रियन्ते तथा मनुष्याणामपीति समानमेवेति । इतश्च भौतिकानीन्द्रियाणि प्रतिघातित्वात् घटवदितिवत् भूतं श्रोत्रं द्रव्यत्वे सति बाह्यप्राप्तार्थप्रकाशकत्वात् घ्राणादिवदिति ॥

रश्म्यर्थसन्निकर्षग्रहणात्तद्ग्रहणमयुक्तमन्यथापि ग्रहणात्–

**सूत्रः– अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ॥४४॥**

अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः । तृणादिसर्पद्द्रव्यं काचेऽभ्रपटले वा प्रतिहन्यते । यदि चाक्षुषो रश्मिः प्राप्तार्थप्रकाशकः स्यात् काचाभ्रपटलैस्फटिकान्तरिते प्रकाशको न स्यात् । अस्ति तु । तस्मान्न प्राप्यकारि चक्षुरिति । अत एवाभौतिकं प्राप्यकारित्वं भौतिकधर्म इति ।

**सूत्रः– कुड्यान्तरितानुपलब्धेरप्रतिषेधः ॥४५॥**

न कुड्यान्तरितानुपलब्धेरप्रतिषेध इति ।

अप्राप्यकारित्वे इन्द्रियस्य न कुड्याद्यावरणसामर्थ्यमस्तीत्युक्तम् । शेषं भाष्ये ॥

**सूत्रः– अप्रतिघातात् सन्निकर्षोपपत्तिः ॥४६॥**

अप्रतिघातात् सन्निकर्षोपपत्तिः । न काचोऽभ्रपटलं वा रश्मिं प्रतिबध्नाति सोऽप्रतिहन्यमानो व्यतिभिद्यार्थेन सम्बध्यते ।

यश्च मन्येत न भौतिकस्यास्त्यप्रतीघात इति सर्वं हि भौतिकं प्रतीघातधर्मकमिति ? तन्न–

**सूत्रः– आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽविघातात् ॥४७॥**

आदित्यरश्मेः स्फाटेकान्तरितेऽपि दाह्येऽविघातात् । न आदित्यरश्मेरविघातात् स्फटिकान्तरितेऽप्यविघाताद्दाह्येऽप्यविघातात् । अविघातादिति पदाभिसम्बन्धाद्वाक्यभेदः । नैकं वाक्यमनेकार्थं प्रतिवाक्यं चार्थभेद इति । शेषं **भाष्ये** ॥

कोऽयमविघातः ? अव्यूह्यमानावयवद्रव्यानुप्रवेशःयस्य द्रव्यस्यावयवा न व्यूह्यन्ते तस्यान्तरावयवैरव्यूह्यमानस्य योऽभिसम्बन्धः सोऽविघात इति । अन्तर्व्यवस्थितस्य वा द्रव्यस्य वाऽव्युह्यमानावयवद्रव्यस्य बहिरवस्थितद्रव्यप्राप्तिः । दृष्टं कलशे निषक्तानामेषां बहिःशीतस्पर्शग्रहणम् न हि गुणस्यास्वतन्त्रस्य गुणिनमन्तरेण बहिर्निर्गमनं युक्तमिति । तत्र परिस्पन्दः तिर्यग्गमनं परिस्रवः पात इति ॥

**सूत्रः- नेतरेतरधर्मप्रसङ्गात् ॥४८॥**

नेतरेतरधर्मप्रसङ्गात् । इतरधर्म इतरत्र प्रसज्यते इतरधर्मश्चेतरत्र यद्यविघातः चक्षूरश्मेः स्फटिकादिभिः कुड्यादिभिरपि प्राप्नोति कुड्यादिभिर्वा प्रतीघातः स्फटिकादिभिरपि प्राप्नोति ? नैष दोषः-

**सूत्रः- आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत् तदुपलब्धिः ॥ ४९॥**

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत्तदुपलब्धिः । आदर्शोदकयोः प्रसादो रूपविशेषः स च स्वो भवति नियमात् । कः पुनरयं रूपविशेषः द्रव्यान्तरासंयुक्तद्रव्यसमवायः तस्य वा रूपोपलम्भनसामर्थ्यं स्वो धर्मः स च स्वभावतः तस्य या विद्यमानता उदकादिषु तत्स्वाभाव्यं प्रसादस्वभावत्वाद् आदर्शोदकादिषु नयनरश्मिः प्रतिहन्यते स च प्रतिहतः प्रतिनिवृत्तौ स्वमुखादिना सम्बध्यते तस्य चाग्रसम्बन्धाद्यदभिमुखमग्रं तदभिमुखं मुखादि पश्यतीति यथाग्रतोऽवस्थितस्य पुरुषस्येति आदर्शमुखग्रहणमनुक्रमेण तदप्याशुभावान्न विभाव्यते आदर्शरूपानुग्रहणात् तदनुरञ्जितः प्रत्ययः । शेषं भाष्ये ॥

**सूत्रः- दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः ॥ ५०॥**

दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः । प्रमाणस्य तत्त्वविषयत्वाद्-दृष्टानुमिताः खल्विमे द्रव्यधर्मा यथाभूता भवन्ति तथाभूता एव प्रमाणेन प्रतिपाद्यन्ते इमौ च भवता नियोगप्रतिषेधौ देशितौ क्व विषये स्याताम्, न चैतद्युक्तम् न हि यथा धूमेनाग्निप्रतिपत्तिस्तथोदकप्रतिपत्तिरपि भवत्विति । न चोदकप्रतिपत्तिर्धूमेन भवतीत्यग्निप्रतिपत्तिरपि न युक्ता, अर्थान्नियुञ्जानो भवानुपेक्षणीयः प्रतिघाता-प्रतिघातयोः खलूपलब्ध्यनुपलब्धी व्यवस्थापिके व्यवहितोपलब्ध्यानुमीयते स्फटिकादिभिरप्रतीघातः व्यवहितानुपलब्ध्या च कुड्यादिभिः प्रतीघात इति । यदि प्राप्यकारिं चक्षुर्भवति अथ कस्मादञ्ज-नशलाकादि नोपलभ्यते ? **नेन्द्रियेणासम्बन्धात्** इन्द्रियेण सम्बद्धा अर्था उपलभ्यन्ते न चाञ्जन-शलाकादीन्द्रियेण सम्बद्धम् अधिष्ठानस्यनिन्द्रियत्वात् रश्मिरिन्द्रियं नाधिष्ठानं न रश्मिनाऽञ्जनशलाका सम्बद्धेति ॥ (इति इन्द्रियभौतिकत्वपरीक्षाप्रकरणम् ।)

## न्यायसूत्र दीपा टीका

अथेन्द्रियाणि गोलकातिरिक्तत्वेन भौतिकत्वेन च परीक्षणीयानि । तत्र संशयमाह ।

**कृष्णसारे सत्युपलम्भाद्व्यतिरिच्य चोपलम्भात् संशयः ॥ ३३ ॥**

कृष्णसारे चक्षुर्गोलके सति विषयोपलम्भात् । असति च तस्मिन्ननुपलम्भादिति पूरणीयम् । चकारेण वा व्यतिरेकदर्शनम् । गोलकमेवेन्द्रियमिति बौद्धाः । **व्यतिरिच्य** = गोलकान्निर्गत्य विषयं

प्राप्येन्द्रियेणोपलम्भाद् = विषयोपलम्भादन्यथा नेति गोलकातिरिक्तमिन्द्रियमिति विशेषदर्शिन इति तटस्थानां संशयो गोलकमिन्द्रियं न वेति इन्द्रियं गोलकातिरिक्तं न वेति । अत्र व्यतिरिच्य चेत्यादिविशेषविवेचने बौद्धमतनिरासान्न संशय इति सूत्रतात्पर्यम् । तथाहि गोलकं न विषयग्राहकं तदसम्बन्धात् तदसम्बद्धेन तद्ग्रहणेऽतिप्रसङ्गात् । तथा च विषयसाक्षात्कारकरणस्यैवेन्द्रियत्वाद् गोलकस्य चातत्त्वेन नेन्द्रियत्वमिति सिद्धमिन्द्रियं गोलकातिरिक्तम् ॥ ३३ ॥

तत्रातिरिक्तत्वेऽपि न भौतिकत्वं किं त्वाहङ्कारिकत्वमितिसांख्यमतमाह ।

**महदनुग्रहणात्** ॥ ३४ ॥

महतो वस्तुनोऽनुग्रहणात् = चक्षुषा साक्षात्कारजननाच्चक्षुर्न भौतिकम् । भौतिकत्वे हि न्यूनपरिमाणेन चक्षुषा महतो व्यापनासम्भवेन तत्साक्षात्कारानुपपत्तिरिति । अथवा **महदणुग्रहणादिति** पाठः । अणोर्न्यूनपरिमाणस्य यथा चक्षुषा ग्रहणं तथाधिकपरिमाणस्यापि ग्रहणादित्यर्थः । तत्र महतो ग्रहणं चक्षुषो भूतत्वे न सम्भवतीत्युक्तम् । **केचित्तु** पूर्वसूत्रं संशयप्रदर्शनपरम् । तत्र बौद्धनिरासेन संशयनीरासकमिदं सूत्रम् । तथा च कदाचिन्महतः कदाचिदणोश्च ग्रहणाद् विषयेन्द्रियसम्बन्ध एव नियामकोवाच्य इति गोलकस्य तद्बाधात् तदतिरिक्तमिन्द्रियं स्वीकार्यं यत्सम्बन्धासम्बन्धाभ्यां विषयग्रहणाग्रहणनियम इति । नन्वतिरिक्तत्वेऽपि कथं तत्सम्बन्धोऽतिरिक्तमपि किं क्लृप्तान्तर्गतभुत नेत्यत आह । रश्म्यर्थेतीति **प्राहुः** । अभौतिकानोन्द्रियाणीत्यवतारभाष्यं सूत्रादौ केचिल्लिखन्ति ॥ ३४ ॥

सिद्धान्तयति ।

रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणाम् ॥ ३५ ॥

रश्मि = चक्षुर्गोलकावच्छिन्नं तेजः, तेनार्थस्य = घटादे रुपादेश्च, सन्निकर्षविशेषः = संयोगसंयुक्तसमवायादिरुपस्तस्मात् । तद्ग्रहणं = महदादिवस्तुग्रहणम् । दीपान्महदणुप्रकाशवद् भौतिकत्वेऽपि सर्वव्यापकत्वमङ्गीकार्यमन्यथा तद्दोषतादवस्थ्यम् । तथा च पुरःपश्चाद्वर्तिनां सर्वेषामेव वस्तूनां ग्रहणप्रसङ्ग इति भावः ॥ ३५ ॥

गोलकातिरीक्तेन्द्रियस्य बाधमाशङ्कते बौद्धः ।

**तदनुपलब्धेरहेतुः** ॥ ३६ ॥

तद् = गोलकातिरिक्तमिन्द्रियम् । न हेतुः = न साक्षात्कारकारणम् । अनुपलब्धेः = अनुपलब्धिबाधितत्वात् । परेषामसतोऽपि भानान्नाश्रयासिद्धिः । अथवा गोलकातिरिक्तं न साक्षात्कारकारणमिन्द्रियं तत्त्वेनाप्रतीयमानत्वादिति ॥ ३६ ॥

समाधत्ते ।

**नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः** ॥ ३७ ॥

अनुमीयमानस्य = 'रूपादिसाक्षात्कारः सकरणको बुद्धित्वादि'त्याद्यनुमानगम्यस्यायोग्यस्य वस्तुनः। प्रत्यक्षतोऽनुपलब्धिः साक्षात्काराभावः। नाभावहेतुः = न सर्वकालवृत्त्यभावग्राहक इत्यर्थः। तथा च योग्यानुपलब्धिरेवाभावग्राहिका न त्वनुपलब्धिमात्रम्। योग्यता च महत्त्वे सत्युद्भूतरुपवत्त्वं निरुक्तरश्मेश्चोद्भूतरुपविरहान्न योग्यत्वमिति तदनुपलब्धिर्न तदभावसाधिकेति भावः॥ ३७ ॥

**ननु** महतो द्रव्यस्य चक्षुषः कुतो नोपलम्भ इत्यत आह।

**द्रव्यगुणाधर्मभेदाच्चोपलब्ध्यनियमः** ॥ ३८ ॥

द्रव्यमात्रस्योपलब्धिनियमो न द्रव्यगुणधर्मभेदात् द्रव्यगुणधर्मविशेषाणां प्रत्यक्षनियामकत्वात्। तत्र द्रव्यधर्मो महत्त्वरूपादिकं गुणधर्म उद्भूतत्वादिः तथा चोद्भूतरुपवत्त्वविरहादेव न चक्षुषः प्रत्यक्षं तादृशरुपविरहश्च प्रत्यक्षाभावादनुमेयः। यद्वा द्रव्यधर्मो महत्त्वोद्भूतरुपादिर्गुणधर्मोऽदृष्टभिन्नत्वादिः। उपलब्ध्यनियमो द्रव्यमात्रस्य गुणमात्रस्य च न प्रत्यक्षनियमः। चकारात् क्रियादीनामप्येवमनियमः॥ ३९ ॥

ननु चक्षुरादावुद्भूतरुपमेव कुतो न स्वीक्रियत इत्यत आह।

**कर्मकारितश्चेन्द्रयाणां व्युहः पुरुषार्थतन्त्रः** ॥ ३९ ॥

कर्मणे कार्याय प्रत्यक्षात्मककार्याय कारितः स्वीकृत इन्द्रियाणां व्यूहो रचनाविशेषः समूह इति वा। पुरुषार्थसाधक इत्यर्थः। तथा च प्रयोजनविरहेणोद्भूतरूपं न स्वीक्रियत इति भावः। केचित्तु कर्मकारितोऽदृष्टविशेषाधीन इत्यर्थः। तथा चादृष्टविशेष एवोद्भूतरूपविरहे प्रयोजकं इत्याहुः। सूत्रमिदं भाष्यकारस्येति केचित्॥ ३९ ॥

ननु महत्त्वे सति रुपवत्त्वमेव प्रत्यक्षप्रयोजकमस्तु किमर्थमुद्भूतत्वं रूपविशेषणमित्यत आह।

**मध्यन्दिनोल्काप्रकाशानुपलब्धिवत् तदनुपलब्धिः** ॥ ४० ॥

महतो रुपवतश्चोल्काप्रकाशस्य मध्याह्नसम्बन्धिनः सौरालोकेनाभिभवादनुपलब्धिवत् तस्य चक्षुषोऽनुपलब्धिरित्यर्थः। तथा च रूपमात्रस्य व्यभिचारेण न प्रत्यक्षहेतुता। व्यभिचारवारणाय यद्यनभिभूतत्वं रूपविशेषणमुच्यते तदा प्रत्यक्षकरणतया सिद्धस्य चक्षुरादेर्व्यभिचारवारणायानुद्भूतत्वमपि रुपविशेषणं देयमिति भावः॥ ४० ॥

**ननु** चक्षुषो रुपे सौरालोकाभिभवादेव न प्रत्यक्षमित्येव किं नोच्यत इत्यत आह।

**न रात्रावप्यनुपलब्धेः** ॥ ४१ ॥

न चक्षुरूपं सौरालोकेनाभिभूतत्वेनाप्रत्यक्षं रात्रावप्यनुपलब्धेः । तथा च चक्षुषो रात्रावनुपलब्धि-सम्पादनाय तद्रूपस्यानुद्भूतत्वमेव स्वीकार्यमिति भावः ॥ ४१ ॥

दिवसेऽपि चक्षुषो रूपस्य सौरालोकाभिभवो न भवतीत्याह ।

**बाह्यप्रकाशानुग्रहाद् विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥ ४२ ॥**

न अभिव्यक्तिर्यत इतिव्युत्पत्त्या कार्याभावप्रयोजकतया कारणाभावस्य क्लृप्तत्वादनभिव्यक्ति-पदेन उद्भूतरुपविरहो बोध्यते । तेन चक्षुषोऽनुपलब्धिर्न त्वभिभवात् । अभिभवे बाधकमाह। बाह्यप्रकाशानुग्रहात् । सौरालोकादिसहकृताच्चक्षुष इति शेषः । विषयोपलब्धेरित्यर्थः । सौरालोकाभिभूतत्वे तत्सहकारेण प्रत्यक्षजननं न स्यादभिभूतस्य कार्याक्षमत्वात् । उद्भूतरूपवत्त्वे चक्षुरालोकाद्विषयप्रकाशसम्भवेनेतरालोकापेक्षा न स्यादिति भावः ॥ ४२ ॥

नन्वभिभूतस्यापि भर्जनकपालस्थवह्नेर्दाहजनकत्वं दृष्टं तथाभिभूतस्य चक्षुषो विषयग्राहकत्वं कल्प्यम् । एवमनभिभूतालोकसंयोगस्यैव विषयप्रकाशकत्वं वाच्यं नातो वह्निप्रकाशानपेक्षा तथाभि-भवश्च दिवसे सौरालोकेनेव रात्रावपि केनचिद्वस्तुनाकल्पनीय इत्यत आह ।

**अभिव्यक्तेऽभिभवात्** ॥ ४३ ॥

अभिव्यक्तिमात्रे भवन्मतेऽभिभवकल्पनात् । अभिव्यक्तिश्च स्वस्येव परस्यापि न सम्भवति तत्प्रयोजकस्यानभिभूतत्वाभावात् । स्वाभिव्यक्तौ तस्य प्रयोजकत्वकल्पने गौरवदन्यथा भर्जनक-पालस्थवह्निना परप्रकाशो भवेत् । एवं रात्रावभिभावकवस्त्वन्तरकल्पने गौरवम् । एवमुष्मादेर-प्रत्यक्षाय प्रत्यक्षप्रयोजकमुद्भूतत्वं क्लृप्तं तद्विरहादेव चक्षुषोऽनुपलब्धिः । ननु चक्षुषस्तैजसत्वे किं मानमिति चेत् चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरुपव्यञ्जकत्वात् प्रदीपवदित्य-नुमानेनैव तत्सिद्धेः । तत्र मनआदौ व्यभिचारवारणाय सत्यन्तम् । घटादौ व्यभिचारवारणाय विशेष्यदलम् । पटादौ स्वीयरुपव्यञ्जकत्वाद् द्वितीयं परकीयेति । दृष्टान्ते प्रदीपादावसिद्धिवारणाय प्रथमं परकीयेति । प्रभाया दृष्टान्ततासम्भवात् तदपि वा नोपादेयम् । चक्षुःसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं विशेषणं देयम् । एतदनुमानं च रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणमितिप्रागुक्तसूत्रादवसेयम् । अग्रे च स्पष्टं वक्ष्यति ॥ ४३ ॥

क्वचित् प्रत्यक्षमपि प्रमाणयति ।

**नक्तञ्चरनयनरश्मिदर्शनाच्च** ॥ ४४ ॥

नक्तञ्चराणां बिडालादीनां गोलकरश्मिदर्शनादन्यथा तमसि तस्य प्रत्यक्षं न स्यात् । तथा च तद्दृष्टान्तेन मानुषादीनां गोलकरश्म्यनुमानमिति भावः ॥ ४४ ॥

सन्निकर्षो न हेतुरित्याशङ्कते ।

**अप्राप्य ग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः** ॥ ४५ ॥

सिद्धन्तयति ।

**कुडयान्तरितानुपलब्धेरप्रतिषेधः** ॥ ४६ ॥

**अप्रतिषेधः सन्निकर्षहेतुताऽप्रतिषेधः** ॥ ४६ ॥

ननु सन्निकर्षहेतुता काचाद्यन्तरितविषयकप्रत्यक्षे व्यभिचारान्न सम्भवतीत्युक्तं तत् कथमप्रतिषेध इति व्यभिचारमुद्धरति ।

**अप्रतिघातात् सन्निकर्षोपपत्तिः** ॥ ४७ ॥

काचादिस्वच्छद्रव्येणाप्रतिघातादप्रतिबन्धात् सन्निकर्ष उपपद्यत इत्यर्थः । एतेन चक्षुषि तेजस्त्वमपि साधितं तेजस एव स्वच्छद्रव्येणाप्रतिघातात् प्रदीपादौ तथादर्शनात् ॥ ४७ ॥

अत एव तेज एव दृष्टान्तमाह ।

**आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽभिघातात्** ॥ ४८ ॥

अभिघातात् संयोगात् ॥ ४८ ॥

शङ्कते ।

**नेतरेतरधर्मप्रसङ्गात्** ॥ ४९ ॥

अप्रतिघातो न युक्त इतरस्य कुड्यादेः स्फटिकादेर्वाइतरस्य स्फटिकादेः कुड्यादेर्वा यो धर्मो-ऽप्रतिघातः प्रतिघातो वा तत्प्रसङ्गात् । तथा च कुड्यादेः स्फटिकादिधर्मप्रसङ्गेन तदन्तरितस्य प्रत्यक्षं स्फटिकादेः कुड्यादिधर्मप्रसङ्गेन स्फटिकान्तरितस्याप्रत्यक्षं वा स्यादिति भावः ॥ ४९ ॥

समाधत्ते ।

**आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत् तदुपलब्धिः** ॥ ५० ॥

आदर्शो उदके च प्रसादस्वाभाव्यात् स्वच्छस्वभावत्वात् तत्संयुक्तनयनरश्मीनामुच्छलितानां मुखादौ संयोगात् मुखादिरुपोपलब्धिर्न तु भित्त्यादौ तथा भवति तथा स्फटिकादेः स्वाभाव्यात् नयनरश्म्यप्रतिघातात् तदन्तरितस्य तथात्वं न कुड्यादेस्तथास्वभावाकल्पनात् । न च वह्न्यादेर्घटादिनाऽप्रतिघातवच्चक्षुषोऽपि तेनाप्रतिघातः स्यादिति वाच्यम् । वहन्यादेरतिवेगवत्तया-ऽप्रतिघातः स्याच्चक्षुषस्तु दीपालोकादेरिव प्रतिघात एवेति ॥ ५० ॥

चक्षुषः केनचित् प्रतिघातः केनचिन्नेति नियमः कथमित्यत आह ।

**दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः** ॥ ५१ ॥

दृष्टानामिवानुमितानामपि पदार्थानां नियोगप्रतिषेधानुपपत्तिः स्वभावप्रतिषेधो नेत्यर्थः फलानु-रोधित्वात् कल्पनाया इति भावः । यद्वा नियोग इतरधर्मकल्पनं प्रतिषेधः स्वधर्मनिषेधः तयोरनुपपत्तिः । न ह्यप्रामाणिकं कल्पयितुं शक्यते प्रामाणिकं निषेद्धुं वेति भावः । एवं घ्राणादिकमपि नासारन्ध्राद्यतिरिक्तमनीन्द्रियं प्राप्य कारित्वादिति बोध्यम् । तेषां पार्थिवत्वादिकमग्रे व्यक्तिभविष्यतीति ॥ ५१ ॥

## न्याय रहस्य

तृतीयाध्याय प्रथमाह्निक

**अथेन्द्रियपरीक्षा । तत्रसूत्रं, कृष्णसारे** .......... ॥ ३३ ॥

**सति** = सत्येव । **व्यतिरिच्य** = अप्राप्य कृष्णसारेणेति शेषः । तथाच ग्राहकत्वादप्राप्य ग्राहकत्वाच्च साधारणधर्मात् गोलके इन्द्रियत्वसंशयः, तत्र लाघवाद् गोलकमेवेन्द्रियमिति बोद्धाः, अतिरिक्तेन्द्रियस्य प्रमाणसिद्धत्वात् लाघवमप्रयोजकमित्यन्ये । व्यतिरिच्च गोलकतो विभज्य,विषयम् प्राप्येतियावत् ·तथाच प्राप्यग्राहित्वसाधारणधर्म्मात् इन्द्रियाणि भौतिकानि नवा इति संशयः । अभूतानीति सांङ्ख्याः भूतानीति परे ।

तत्र नैयायिकमतनिरासाय बोद्धानां साङ्ख्यानां चाभिधानं ।

**महदणुग्रहणात्** ॥ ३४ ॥

अणुनामिव महतां = पर्वतादीनामपि ग्रहणात्, **नच** नैयायिकसिद्धचक्षुचा तेषां प्राप्तिरस्ति न्यूनपरिमाणेनाधिकपरिमाणाव्यापनात् महतैवाधिकपरिमाणेनैवाणूनां = न्यूनपरिमाणानां ग्रहणात् व्यापनादिति वार्थः । तथाच सम्बन्धग्रहे अतिप्रसङ्गस्य तत्रापि समानत्वात् किमतिरिक्तेनेन्द्रियेणेति बोद्धाः । अतएवेन्द्रियाणां विभुत्वस्वीकर इति ना सम्बन्धग्रह इत्यभौतिकानीन्द्रियाणि महदर्थ-ग्राहकत्वात् इति सांङ्ख्याः ।

**सिद्धान्तसूत्रं रश्म्यर्थ** ........... ॥ ३५ ॥

रश्मिना = गोलकस्थेन तादृशगन्धयापि सन्निकर्षात् तयोर्महदर्थोर्ग्रहणं नानुपपन्नमित्यर्थः । महदग्राहकत्वं च प्रदीपादौ व्यभिचरीति हृदयम् ।

द्रव्यत्वेनोभय सिद्ध भिन्नं न द्रव्यं तत्वेनानुपलभ्यमानत्वादित्यभिप्रेत्य बोद्ध आक्षिपति–

**तदनुपलब्धेरहेतुः** ॥ ३६ ॥

तेषामिन्द्रियाणानुपलम्भो न ज्ञानं स्वरुपासिद्धेः किन्तु प्रत्यक्षम् नच तद्भावव्याप्तिरस्ति अतीन्द्रिय द्रव्येव्यभिचारादप्रयोजकत्वाच्चेत्यभिप्रेत्य सिद्धान्त माह–

**नानुमीयमानस्य** ............ ॥ ३७ ॥

प्रत्यक्षतोऽनुपर्लब्धिरनुमीयमानस्य नाभावसाधिकेत्यर्थः

ननु महत्वाविशेषे सूर्यालोकवत् कथं नेन्द्रियण्युपलभ्यन्ते इत्यत आह–

**द्रव्यगुण** ............. ॥ ३८ ॥

द्रव्यगुणरुपधर्म्मस्य = रुपादे र्भेदाद् = वैलक्षण्याद् अनुद्भुतत्वाश्रियमतेऽनुपर्लब्धिरित्यर्थः अनुदभूतरुपवत्वान्नेन्द्रिय प्रत्यक्षतेति भावः

पृथिवीत्वतेजस्त्व द्यविशेषादुदभूतरुपा एव कथं न घ्राणादिरश्मय इत्यत आह–

**कर्मकारित** ............. ॥ ३९ ॥

व्यूहोऽनुद्भुतरुपादिवदवयवपृथिवीकत्वं, कर्मविशेषेणकारितः पुरुषार्थ = भोगमूले प्रत्यक्षे प्रयोजक अन्यथा उद्भूतस्पर्शेन चक्षुषा सन्निकर्षमात्रेण ग्राह्यदाह किं गृह्यतेति प्रत्यक्षाभावोवा = पुरुषार्थः

नन्वेवं व्यभिचारान्महत्वं न प्रत्यक्षकारणं स्यादित्यत आह–

**मध्यन्दिन** .......... ॥ ४० ॥

मध्यन्दिने उल्काप्रकाशस्य सौरकिरणाभिभवादनुपलब्धिवत् तस्य चक्षुषोप्यनुपलब्धि र्महत्वकारणत्वाविघटिकेत्यर्थः । सामग्र्या एव व्यभिचारोदूषणं न कारणस्येति भावः

**नन्वेवं** लोष्टेपि रश्मिः स्यात् सौरतेजोभिभवान्नोपर्लभ्यत इतिचेत्

न रात्रावप्यनुपलब्धेः ॥ ४२ ॥

अन्यथा सौरतेजो ऽभिव्यभाव्यस्य तस्य लोष्टसत्वे वारप्युपर्लम्भः स्यात्, तदा अनुपलब्धेश्च तन्नास्तीति भावः । अभिभवादेव चक्षुषोऽनुपलब्धिर्नत्वनुद्भूतरुपादिति तटस्थाशङ्कां निरस्यति

**बाह्यप्रकाश** ........... ॥ ४१ ॥

अनभिव्यक्तितः = अनुद्भूतरुपतत एव चसुषोऽनुपलब्धिर्नत्वाभिभवात् बाह्यप्रकाश साहित्याद् विषयोपर्लब्धेः चक्षुषाजननात् नहि अभिभूतं कार्य्यक्षममितिभावः ॥

अथ चक्षुर्ग्रह एवाभिभावाविरोधी न तत् कार्य इत्यत आह–

**अभिव्यक्तौ** ........... ॥ ४३ ॥

अभिव्यक्तौ = तत्रोद्भूतरुपे प्रमाणसिद्धे एवाभिभवादग्रहः, नच चक्षुषि तत् प्रमाणसिद्धं प्रतिहतंचभिभवे कारणांतरकल्पना गौरवेणेतिभावः ।

**नव्यास्तु** सूर्यतेजोऽभिभवादेव चक्षुषोऽनुपलब्धि र्नत्वनुद्भूत रुपादित्यशङ्कते

**मध्यंदिनेति** ............. ॥ ४० ॥

समाधिमाह–

नरात्रविति ॥ ४१ ॥ तदापि चंन्द्रादिकिरणैरभिभव इत्यत आह

बाह्येति ॥ ४२ ॥

प्राचीन नयोक्ता स्वरसादाह

अभिव्यक्तावितीति ॥ ४३ ॥ **प्राहुः**

क्वचिन्नपनतेजसिप्रत्यक्षमपिमानमित्याह

**नक्तञ्चर** ........... ॥ ४४ ॥

नक्तञ्चराणां = वृषदन्शाहीनां नयनरश्मीतिवत् सहकारादन्धकारेऽपि तेषां दर्शनमितिभावः । व्यभिचारात् सन्निकर्षो न हेतु रित्याशङ्कते ।

**आप्राप्यग्रहणं** ............ ॥ ४५ ॥

त्वयापि वाच्यं तथाच किमतिरिक्तेन्द्रिय स्वीकारणेति बौद्धाशयः ।

सिद्धन्त सूत्रम्

**कुड्याद्यंतरिता** ........... ॥ ४६ ॥

सन्निकर्षहेतुत्वे तदन्तरितमप्युपलभ्येत अतएव इन्द्रियसिद्धिः साङ्ख्यमत निरासश्चेति भावः । उक्तं व्यभिचारमुद्धरति ।

**अप्रतिघातात्** ........... ॥ ४७ ॥

काचादिनाऽप्रतिबन्धात् नवैतददृष्टचरमित्याह–

**आदित्य** ............ ॥ ४८ ॥

आदित्यादीत्यर्थः । स्फटिकेति स्फटिकादीत्यर्थः । आदित्यरश्मेः कुम्भादिना अप्रतिघातात् कुम्भाद्यन्तर्गत जलादवौष्ण्योपलब्धेः स्फटिकाद्यन्तरिते प्रकाश्ये प्रदीपादिरश्मेरिव प्रतिघातात् भर्ज्जनादिकपालेन ततस्थे दाह्येवह्नेरप्रतिघातात् शङ्कते ।

**नेतरेतर** ............. ॥ ४९ ॥

अप्रतिघातो न, अन्यथा इतरस्यकुड्यादेः इतरस्य स्फटिकादेर्यो धर्मो प्रतिघातकत्वं तत् प्रसज्यते सिद्धन्तमाह–

**आदर्शोदकयोः** ॥ ५० ॥

आदर्शादाविव प्रसादो रुपविशेषः स्वच्छतयामुखादिस्वरुपोपलब्धिवत् तेषां स्फटिकाद्यन्तरितानां चक्षुरादिभिः प्राप्तिः कश्चिद् प्रतिबधन्धकं **किचिच्च नतथे** (अपूर्णादर्शः)

**॥ न्यायसूत्रे विश्वनाथवृत्तिः ॥**

अथेन्द्रियं परीक्षणीयम् । तत्र लक्षणसूत्रोक्तभौतिकत्वमिन्द्रियाणां परीक्षितुं संशयमाह **कृष्णसारे** चक्षुर्गोलके सति घटाद्युपलम्भाद्गोलकस्येन्द्रियत्वमिति **बौद्धाः** । **व्यतिरिच्य** विषयं प्राप्योपलम्भादुपलम्भजननाद्गोलकातिरिक्तानीत्य**परे** । तथेन्द्रियाणि गोलकातिरिक्तानि न वेति संशयः । गोलकातिरिक्तानीति **नैयायिकादयः** । तत्राप्यभौतिकान्याहङ्कारिकाणीति **साङ्ख्याः** । भौतिकानीत्य**परे** ॥३३॥

तत्र **साङ्ख्यमतेन बौद्धमत**मुदस्यन्नाहगोलकं नेन्द्रियम्, अप्राप्यकारित्वेऽतिप्रसङ्गात् । इत्थं च गोलकातिरिक्तं भौतिकमिति वाच्यम् । तदप्यसंगतम् । चक्षुषा हि न्यूनपरिमाणं महत्परिमाणं च गृह्यते। न च न्यूनेन महतो व्यापनं संभवति । न वाऽव्याप्यग्रहणमतोऽभौतिकानीन्द्रियाण्याहङ्कारिकाणीति ॥३४॥

**साङ्ख्यं** निरस्यतिरश्मिर्गोलकावच्छिन्नं तेजः । तेनार्थस्य घटादेर्यः सन्निकर्षविशेषः संयोगविशेषस्तस्मान्महदण्वोर्ग्रहणमुपपद्यते । भौतिकेऽपि प्रदीपादौ महदणुप्रकाशकत्वं दृष्टम् । अभौतिकत्वे तु पुरः पश्चाद्वर्तिनां सर्वेषामेव ग्रहः स्यात् ॥३५॥

तैजसे चक्षुष्यनुपलब्धिबाधं **बौद्धः शङ्कते** रश्म्यर्थसंनिकर्षो न हेतुर्गोलकातिरिक्तस्य रश्मेरनुपलब्धेः ॥३६॥

**समाधत्ते** रूपोपलब्धेः सकरणत्वादिनाऽनुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिर्नाभावनिर्णायिकेत्यर्थः ॥३७॥

कथं तर्हि नोपलम्भ इत्यत आह-द्रव्यस्य धर्मभेदो महत्त्वादिः । गुणस्य धर्मभेद उद्भूतत्वम् । तदधीनत्वात्प्रत्यक्षस्य । द्रव्यमात्र उपलब्धेर्न नियमः । यत्रोद्भूतरूपमहत्त्वादिकं तस्य प्रत्यक्षं तदभावाच्चक्षुरादेरप्रत्यक्षम् । चक्षुरादावुद्भूतरूपमेव न कुत इत्याशङ्कायां भाष्यम्-अदृष्टविशेषाधीन इन्द्रियाणां व्यूहो रचनाविशेष उपभोगसाधनमिति सूत्रमेवेदमिति केचित् ॥३८॥

महतो रूपवतोऽनुपलब्धौ दृष्टान्तमाहमहतो रूपवतश्चोल्काप्रकाशस्य सौरालोकेनाभिभवान्मध्यन्दिनेऽनुपलब्धिवदनुद्भूतरूपवत्त्वाच्चक्षुषोऽप्यनुपलम्भः संभवतीति भावः ॥३९॥

**नन्वेवं** घटादेरपि रश्मिः स्यात्सौरालोकेनाभिभवात्पुनरग्रह इत्यत्राऽऽह **नेत्य**स्य घटादौ रश्मिरिति शेषः ॥४०॥

**नन्व**नुद्भूतरूपत्वाच्चक्षुषोऽनुपलब्धिर्न त्वभिभवादित्यत्र किं विनिगमकमिति तटस्था-शङ्कायामाह-अनभिव्यक्तितोऽनुद्भूतरूपत्वाच्चक्षुषोऽनुपलब्धिः । कुतः । बाह्यप्रकाशानुग्रहात्सौरा-लोकादिसाहित्याद्विषयोपलब्धेः । तस्योद्भूतरूपत्वे बाह्यप्रकाशापेक्षा न स्यात् । अभिभूतत्वे च तत्साहित्येनापि प्रत्यक्षजननं न स्यात् । अभिभूतस्य कार्याक्षमत्वादिति भावः ॥४१॥

**ननु** चक्षुषो नाभिभवः किंतु तद्रूपस्य । तस्य च प्रत्यक्षजनकत्वे मानाभावः । किं चाभि-भवात्तस्य न प्रत्यक्षम् । इतरप्रत्यक्षजनने च विरोधाभाव इत्याशङ्कायामाह रूपस्याभिव्यक्तौ प्रत्यक्ष उद्भूतत्व इति यावत् । उद्भूतरूपस्य प्रत्यक्षाभावे ह्यभिभवकल्पना । न त्वेवं प्रकृते । सुवर्णा-दिवत्सर्वदाऽभिभावकद्रव्यान्तरकल्पने च गौरवमिति भावः ॥४२॥

चक्षुषि प्रमाणान्तरमाहनक्तञ्चराणां वृषदंशादीनां गोलके रश्मिदर्शनात्तद्दृष्टान्तेन परेषामपि रश्म्यनुमानमिति भावः । अन्यथा तमसि तस्य प्रत्यक्षं न स्यादिति हृदयम् ॥४३॥

अप्राप्यकारित्वं चक्षुषः स्यादित्याशङ्कते ॥४४॥

समाधत्ते । **परे** तु-उक्तसूत्रस्य पूर्वपक्षपरत्वं मन्यमानस्य भाष्यकारस्यावतारणिका-अप्राप्य-ग्रहणमिति । वस्तुतः सिद्धान्तसूत्रमेव । तत्प्रदीपदृष्टान्तेन काचाद्यन्तरितप्रकाशकत्वेन तैजसत्वं सिध्यतीति । नन्वप्राप्यकारित्वं किं न स्यादत्राऽऽहकुड्येति । उक्तस्य तेजसत्वस्य प्रतिषेधो गोलकात्मकत्वं न संभवति । कुड्यान्तरितस्यानुपलब्धेरित्या**हुः** ॥४५॥

**ननु** कुड्यान्तरित इव काचान्तरितेऽपि संनिकर्षो न संभवतीति कथं प्राप्यकारित्वमित्या-शङ्कायामाह काचादिना स्वच्छद्रव्येणाप्रतिघातादप्रतिबन्धात्संनिकर्ष उपपद्यत इति भावः ॥४६॥

तत्र दृष्टान्तमाह दाह्य इति । वस्तुमात्रोपलक्षणम् । परे तु दाह्ये कपालादौ वह्न्यादेरविघातपरं तदित्याहुः ॥४७॥

आक्षिपति अप्रतिघातो न युक्तः । इतरस्य स्फटिकादेः । इतरस्य कुड्यादेर्यो धर्मः प्रतिघातकत्वं तत्प्रसङ्गात्स्फटिकादिकमपि कुड्यादिवत्प्रतिबन्धकं भवेदित्यर्थः ॥४८॥

समाधत्ते आदर्श उदके च प्रसादस्वाभाव्यात्स्वच्छस्वभावत्वान्मुखादिरूपोपलब्धिर्न तु भित्त्यादौ । एवं स्फटिकान्तरितस्योपलब्धिर्न तु कुड्यान्तरितस्येति स्वाभाव्यान्न दोषः । **एतेन** वह्न्यादेर्घटादिनाऽप्रतिघातवच्चक्षुषोऽपि प्रतिघातो न स्यादिति **प्रत्युक्तम्,** वह्न्याद्यप्रतिबन्धेऽपि दीपालोकादेः प्रतिबन्धवत्संभवादिति भावः ॥४९॥

चक्षुषस्तादृशत्वकल्पने किं मानमित्यत्राऽऽह-हि यस्मात्तादृशानामनुमितानां वा पदार्थानां दृष्टेनानुमितानामिति वाऽर्थः । तेषामेवं भवितेति नियोग एवं मा भवितेति प्रतिषेधो वा नोपपद्यते युक्त्यनुसारिणी हि कल्पनेति भावः ॥५०॥

इतीन्द्रियपरीक्षाप्रकरणम् ॥

**॥ न्यायसिद्धान्तमुक्तावली प्रभाटीका ॥**

**अन्येतु** चक्षुर्विषयासंबद्धमेव ग्राह्यं यदि प्राप्यकारि स्यात् तदा रसनादिवदधिष्ठानसंबन्धं गृह्णीयात् नचैवं गोलकासंबन्धग्रहणात् । **न च** घटादीनां गोलकासंबद्धत्वेपि चक्षुरेव गोलकान्निर्गत्य घटादिना संबध्यत इति **वाच्यम्,** चक्षुषः प्राप्यग्राहकत्वे स्वतोऽधिकपरिमाणग्राहकत्वानुपपत्तेः यावदवयवावच्छेदेन विषयसंयोगाभावात् **नच** सर्वावयवावच्छेदेन विषयसंयोगाभावेऽपि चक्षुस्संयोगमात्रेण घटादिग्राहकत्वमात्रवत् तत्समवेताधिकपरिमाणग्राहकत्वे बाधकाभावः सामग्र्यास्तुल्यत्वादिति **वाच्यम्** । तथा सति शाखाचन्द्रमसोस्तुल्यकालग्रहणानापत्तेः चक्षुषः शाखाप्राप्त्युत्तरकालमेव चन्द्रप्राप्तिसंभवेन शाखाप्रत्यक्षोत्तरमेव चन्द्रप्रत्यक्षसंभवात् । **न चेष्टापत्तिः अनुभवति तून्मीलयन्नेव नयने शाखां शीतमयूखं चेति** इति लोकप्रवादविरोधापत्तेः तस्माच्चक्षुषः प्राप्यकारित्वानुरोधेन गोलकातिरिक्तं चक्षुः परैरङ्गीक्रियते गोलकस्य चन्द्रादिप्राप्त्यसंभवात्। अप्राप्यकारित्वसिद्धौ गोलकमेव चक्षुः तत्तु पार्थिवं न तैजसमित्याहुः। तदसत्। अधिष्ठानासंबन्धार्थग्राहिण्याः प्रदीपप्रभाया इव चक्षुषोऽपि प्राप्यकारित्वसंभवात् स्वाधिकपरिमाणद्रव्यग्रहणात् त्वगिन्द्रिये व्यभिचारेण तादृश-नियमे मानाभावात्। तुल्यकालग्रहणं चासिद्धमेव तदभिमानस्य कालसन्निकर्षेणैवोपपत्तेः । अचिन्त्यो हि तेजसां लाघवातिशयेन वेगातिशयः यत् प्राचीनाचलचूडावलम्बिन्येव भगवति मयूखमालिनि भवनोदरेष्वालोक इत्यभिमानो लोकानाम् । इदमुपलक्षणं चक्षुषः अप्राप्यकारित्वे सर्वदा घटादिविषयकचाक्षुषापत्तिः कालभेदेन चाक्षुषनियामकस्य चक्षुःक्रियाजन्यस्य तव नियामकत्वाभावादित्यपि बोध्यम् । यदाहुः **शालिकाचार्याः** चक्षुर्बाह्यालोकाभ्यामारब्धेन चक्षुषा तावदर्थसंस्पृष्टेन युगपत् तावदर्थग्रहणमिति । **तन्न यौक्तिकं,** चक्षुर्बाह्यालोकाभ्यामारब्धस्य चक्षुषः पृष्ठभागेऽपि सत्त्वात्, पृष्ठभागस्थितपदार्थग्रहणापत्तेः । पृष्ठदेशस्थबाह्यालोकैश्चक्षुरुत्पादे मानाभाव इति **चेत्** । अग्रदेशस्थबाह्यालोकैरपि तदुत्पादे मानाभावः, तदनभ्युपगमेऽपि चाक्षुषोपपादनस्यानुपदमुक्त-त्वादिति ।

**॥ न्यायसिद्धान्तमुक्तावली दिनकरीयः ॥**

**अत्र केचिदाहुः** चक्षुर्विषयासम्बद्धमेव ग्राहकम् । यदि प्राप्यप्रकाशकारि स्यात् तदा रसनादिवदधिष्ठानसम्बद्धं गृह्णीयात् नचैवं गोलकासम्बद्धग्रहणात् । किं च यदि चक्षुः प्राप्य गृह्णीयात्तर्हि स्वतोऽधिकपरिमाणवन्न गृह्णीयात् न खलु नखरञ्जनिका परशुच्छेद्यं छिनत्तीति शाखाचन्द्रमसोस्तुल्य-

कालग्रहणानापत्तिश्च गतिक्रमेण प्राप्य ग्रहणे हि सन्निहितक्रमेण ग्रहणं स्यात् न तु तुल्यकालमुपलम्भः अनुभवति तून्मीलयन्नेव नयने शाखां शीतमयूखं च। एवं च प्राप्यकारित्वानुरोधेन गोलकातिरिक्तं चक्षुः परैरङ्गीक्रियते गोलकस्य चन्द्रादिप्राप्त्यसम्भवात्। अप्राप्यकारित्वे च गोलकमेव चक्षुस्तच्च न तैजसमिति। **तदसत्,** अधिष्ठानसम्बद्धार्थग्राहिण्याः प्रदीपप्रभाया इव चक्षुषोऽपि प्राप्यकारित्व-सम्भवात् पृथुतरग्रहणस्य च गोलकनिर्गतस्य महतश्च चक्षुषः पृथ्वग्रत्वेन प्रदीपप्रभाया इवोपपत्तेः, स्वाधिकपरिमाणवद्द्रव्यग्राहिणा त्वगिन्द्रियेण व्यभिचारात्, तादृशनियमे मानाभावाच्च। तुल्यकालग्रहणं चासिद्धमेव, तदभिमानस्य कालसन्निकर्षेणैवोपपत्तेः। अचिन्त्यो हि तेजसो लाघवातिशयेन वेगातिशयः यत्प्राचीनाचलचूडावलम्बिन्येव भगवति मयूखमालिनि भवनोदरेष्वालोक इत्यभिमानो लोकानाम्। यत्त्वाहुः **शालिकाचार्याः** चक्षुर्बाह्यालोकाभ्यामारब्धेन चक्षुषा तावदर्थसंस्पृष्टेन युगपत्तावदर्थग्रहणमिति शाखाचन्द्रमसोस्तुल्यकालग्रहणमुपपद्यत एवेति। **तन्न**। चक्षुर्बाह्या-लोकाभ्यामारब्धस्य चक्षुषः पृष्ठभागेऽपि सत्त्वात्पृष्ठभागस्थितपदार्थग्रहणापत्तेः। पृष्ठदेशस्थबाह्या-लोकैश्चक्षुरुत्पादे मानाभाव इति **चेद**ग्रदेशस्थबाह्यालोकैरपि तदुत्पादे मानाभावः तदनभ्युपगमेऽपि चाक्षुषोपपादनस्यानुपदमुक्तत्वादिति।

## ॥ रामरुद्रीयः ॥

गोलकमेव चक्षुर्न तैजसमित्यु**च्छृङ्खलमतं** दर्शयति ॥ **अत्र केचिदित्यादिना** ॥ **विषयासम्बद्धं** विषयसन्निकर्षरहितम्। एवकारेण सन्निकृष्टग्राहकत्वं व्यवच्छिद्यते गोलकसंयुक्तस्य चक्षुषाऽग्रहणात् अत्र चक्षुःपदं चक्षुरिन्द्रियत्वेनाभिमतपरं न तेजोरूपचक्षुषः स्वमतेऽसत्त्वेऽपि न पक्षाप्रसिद्धिः। नवा पार्थिवगोलकस्य च सन्निकृष्टग्राहकतायाःतेनाप्यनङ्गीकारेण यदीत्याद्युत्तरग्रन्थानुत्थितिरिति ध्येयम्। अत्र चोत्तरग्रन्थानुसारादधिष्ठानासम्बद्धग्राहकत्वादिति हेतुरूहनीयः परं त्वाभिमुख्यमव्यवधानं च ग्रहणे प्रयोजकमित्येतन्मतेऽवश्यमङ्गीकरणीयमन्यथा पृष्ठदेशस्थितानां व्यवहितानां च चाक्षुषापत्ति-वारणासम्भवात् सिद्धान्तिभिस्तु चक्षुस्संयोगाभावेनैव तद्वारणसम्भवान्न तेषामेतत्कल्पनीयं दूरस्थत्वस्य प्रतिबन्धकताकल्पनं तूभयमतेऽपि समानमिति बोध्यम्। ननूक्तहेतुरप्रयोजक इत्याशङ्कानिरासाय साध्याभावे हेतुरेव न स्यादिति हेतूच्छित्त्यापत्तिरूपमनुकूलतर्कं प्रदर्शयति ॥ **यदीत्यादिना** ॥ **प्राप्यकारि** सन्निकृष्टग्राहि। न चैवमिति छेदः। गोलकसम्बद्धमात्रग्राहकं नचेति तदर्थः **ग्रहणा-दित्यन्तस्य चक्षुष** इत्यादिः। अत्र प्रदीपप्रभायां वक्ष्यमाणव्यभिचाररूपारुचिं परिचिन्त्य स्वाधिक-परिमाणवद्द्रव्यग्राहकत्वेनापि चक्षुष्युक्तसाध्यसिद्धिः सम्भवतीत्याह ॥ **किं चेति** ॥ यद्यत्संयुक्तमेव यत्सम्बन्धिफलजनकं तत्तदपेक्षया नात्यन्तन्यूनपरिमाणवदिति सामान्यमुखव्याप्त्यभिप्रायेण दृष्टान्तमाह ॥ **न खल्विति** ॥ **नखरञ्जनिका** नखकृन्तनी। तथा चैतद्व्याप्त्यनङ्गीकारे नखरञ्जनिकापि परशुभेद्यं महादार्वपि छिन्द्यात्। अत्र च स्वाधिकपरिमाणदारोरपि परशुभेद्यत्वदर्शनादात्यन्तिक-

न्यूनताया निर्वक्तुमशक्यत्वाच्चेत्यस्वरसाद्धेत्वन्तरमाह ॥ **शाखेति** ॥ तथा च शाखाचन्द्रमसोरेककालीनचाक्षुषजनकत्वेनापि चक्षुषि असन्निकृष्टग्राहकत्वमापादयितुं शक्यमिति भावः । उपसंहरति ॥ **एवं चेति** ॥ चक्षुषः असन्निकृष्टग्राहकत्वे चेत्यर्थः । नन्विष्टापत्तिरित्याशङ्कायामाह ॥ **तच्चेति** ॥ तथा चेन्द्रियं नयनमिति कारिकाविरोधापत्तेर्नेष्टापत्तेस्सम्भव इति भावः ॥ **अधिष्ठानासम्बद्धेति** ॥ तथाचोक्तनियमो दीपरूपाधिष्ठानासम्बद्धघटादिग्राहिण्यां दीपप्रभायां व्यभिचरित इति भावः ॥ **तदभिमानस्य** एककालीनत्वभ्रमस्य ॥ **कालसन्निकर्षेण** अतिसन्निहितकालवृत्तित्वेन । ननु शाखातः चन्द्रमसोऽतिदूरत्वेन झटिति चन्द्रचक्षुः-संयोगासम्भवात् शाखाचन्द्रमसोश्चाक्षुष-योरत्यन्तसान्निध्यमेव न सम्भवति येन तुल्यकालताभ्रान्तिः स्यादित्यत आह ॥ **अचिन्त्यो हीति** ॥ निर्वक्तुमशक्य इत्यर्थः । **लाघवातिशयेन** वेगजनकक्रियातिशयेनेत्यर्थः । गुरुत्वाभावरूपलाघवस्य वाय्वाद्यपेक्षयाऽतिशयासम्भवादिति मन्तव्यम् ॥ **यत्** यस्मात् ॥ **प्राचीनाचलः** उदयगिरिः ॥ **चूडा** अग्रं शिखरमिति यावत् । **मयूखमालिनि** सूर्ये ॥ **अभिमानो** भ्रमः । उदयाचलारोहणग्रहणं किरणप्रसारयोर्वस्तुगत्यैककालीनत्वाभावादिति भावः । वस्तुतस्तु चक्षुरिन्द्रियस्य तैजसत्वसाधकानुमानस्य पूर्वमुक्ततया तत एव गोलकस्य चक्षुरिन्द्रियत्वं न शङ्कास्पदमपि । न हि सिद्धान्तिभिः प्राप्यकारित्वानुरोधेन चक्षुषस्तथात्वमङ्गीक्रियतेऽन्यथा रसनेन्द्रियादीनामधिष्ठानातिरिक्तत्वं कथं सिध्येत् । यद्यपि घ्राणेन्द्रियस्य पार्थिवत्वादधिष्ठानातिरिक्तत्वे न किञ्चिदपि मानं तथापि नासिकासत्त्वेऽपि केषाञ्चिद् गन्धानुपलब्धिदर्शनात् घ्राणादीन्द्रियमतीन्द्रियमिन्द्रियत्वान्मनोवदित्यनुमानाच्च तत्सिद्धिरिति ध्येयम् । बाह्यालोकोऽत्र न सौरालोकादिपरमाण्वादिस्तदारब्धस्य प्रत्यक्षत्वापातात् किन्त्वनुद्भूतरूपवत्तेज एवेति मन्तव्यम् ।

## ॥ न्यायसार सभूषणम् ॥

न प्राप्यकारिणी चक्षुःश्रोत्रे सान्तरग्रहणात् प्राप्यकारित्वे हि चक्षुरर्थयोः श्रोत्रशब्दयोश्चान्तराल-ग्रहणं न स्यात् परशुवृक्षवत् । प्राप्तिश्च कथम् ? किं चक्षुर्देशमागत्य सम्बध्यतेऽर्थः ? उतार्थदेशं गत्वा चक्षुः सम्बध्यते इति ? **प्रथमे पक्षे** प्रतीतिविरोधः, अग्निदर्शने चक्षुरादिदाहप्रसंगश्च । **द्वितीये**ऽपि पक्षे प्रतीतिविरोधः-न हि शरवदर्थसंगतं चक्षुः केनचिदुपलभ्यते । सूक्ष्मत्वादनुपलब्धिरिति **चेत्,** नैतदस्ति; गोलकमेव हि चक्षुरिति सर्वलोकप्रतीतं, तदुपघातेऽर्थदर्शनाभावाच्च । सूक्ष्मत्वाभ्युपगमेऽपि किं तदाकाशवदमूर्तत्वेन सूक्ष्मम् ? उताल्पप्रमाणत्वेनेति ? प्रथमे पक्षे सर्वार्थसम्बद्धत्वाद्युपग्राहकत्वं स्यात्, अमूर्तद्रव्यस्य व्यापकत्वाभ्युपगमात् । **अथाल्पपरिमाणत्वेन सूक्ष्मं, तदयुक्तम्;** पृथुतरग्रहणात् यावतैव प्रदेशेन सम्बन्धं दृष्टं नखनिकृन्तनादि, तावत्येव प्रदेशे क्रियां कुर्वदुपलब्धं ततश्चाल्पपरिमाणस्य चक्षुषः पर्वतादिग्राहकत्वं नोपपद्यते इति । इतश्च न प्राप्यकारि चक्षुः, शाखाचन्द्रमसोस्तुल्यकालग्रहणात्, गच्छतो हि चक्षुषः क्रमसम्बन्धार्हस्य क्रमेणैव ग्राहकत्वं युक्तं, न चैतदस्ति ।

नाप्याशुभावाद् युगपदभिमानः, चन्द्रमसोऽतिविप्रकर्षादवश्यं चिरकालव्यवधानेन सम्बन्ध इति । शब्दस्य तर्हि सन्तानेनागतस्य श्रोत्रसम्बन्धादुपलब्धिरस्तु, न; दिग्देशव्यपदेशात् । न हि कर्णदेशे शब्दोपलब्धौ पूर्वापरादिदिग्व्यपदेशो ग्रामारण्यादिग्देशव्यपदेशो वा युज्यत इति । तत्सिद्धं श्रोत्रस्याप्राप्यकारित्वं, तस्मादनेन दृष्टान्तेन सर्वेन्द्रियाणां प्राप्यकारित्वं निषेद्धव्यमिति ।

**अत्रोच्यते**यत्तावत्सान्तरग्रहणादिति, तदसिद्धत्वादसाधनं, चक्षुरादेरतीन्द्रियत्वात् । कथं ततोऽर्थस्य विश्लेषः प्रत्यक्षग्राह्यः स्यात् ? अनुमानेन त्वर्थसंश्लिष्टस्यैव चक्षुरादेः प्रदीपादिदृष्टान्तादर्थप्रकाशकत्वं गम्यते । यच्चोक्तं प्राप्तिः कथमित्यादि, तत्रोच्यतेचक्षुरेव रश्मिद्वारेणार्थदेशं गत्वा प्रदीपवत्सम्बध्यते, तद्रश्मयश्चानुद्भूतरूपत्वात् न दृश्यन्ते । अनुद्भूतरूपाणामर्थप्रकाशकत्वमयुक्तमिति **चेत्**, न; प्रदीपादिप्रकाशसहितानां तदुपपत्तेः । अत एव येषामदृष्टसामर्थ्यादुद्भूतरूपा नायनरश्मय उत्पन्नास्तेषां बाह्यप्रकाशनिरपेक्षया एवार्थं प्रकाशयन्ति यथा नक्तंचराणाम्, तथा च केषाञ्चिन्नक्तंचराणां नायनरश्मयः प्रत्यक्षेणैव दृश्यन्त इति ।

अथवाऽलोकावयवसहितेभ्यः तदवयवेभ्य उद्भूतरूपा एव नायनरश्मय उत्पद्यन्ते । दृष्टौ हि तेजसामाशुतरविनाशोत्पादौरूपस्पर्शौ चोद्भूतत्वानुद्भूतत्वधर्मविकल्पोपेताविति । उद्भूतरूपत्वेनोत्पन्नानामपि रश्मीनामन्यस्मिन्समावेशाद्विवेकेनाग्रहणं, यथानेकप्रदीपरश्मीनामेकार्थसम्बद्धानामिति ।

पृथुतरग्रहणादित्येतदनैकान्तिकं, न हि यावत्परिमाणः प्रदीपस्तावत्परिमाणमेवार्थं प्रकाशयति रश्मिद्वारेण पृथुतरस्यापि व्यापकत्वादिति ।

यत्पुनः शाखाचन्द्रमसोस्तुल्यकालग्रहणादिति, तदप्यसिद्धत्वादसाधनम्, आशुभावित्वेन युगपदभिमानात् । चन्द्रमसोऽतिविप्रकृष्टत्वादिति **चेत्, न;** लाघवातिशयेन रश्मीनामतिशीघ्रगतित्वादर्करश्मिवत्–न हि भानुरश्मयोऽर्थैः सह सम्बध्यमानाः क्रमेणोपलभ्यन्त इति ।

यच्चोक्तं दिग्देशव्यपदेशादिति, तन्न; तस्यान्यथापि सम्भवात् । तथा हि–यदा पूर्वदिग्विशिष्टकर्णशष्कुल्यवयवावच्छिन्ने नभोदेशे शब्दमुपलभते तदा पूर्वस्यां दिशि शब्द उत्पन्न इति प्रतिपद्यते । एवं दक्षिणादिदिग्विशेषेष्वपि द्रष्टव्यम् । कर्णशष्कुल्यवयवैरवच्छिन्नो हि नभोदेशः श्रोत्रम् । ते चावयवाः सर्वदिक्षु विद्यन्त इति युक्ता दिग्विशेषावच्छेदेन शब्दोपलब्धिरिति । इयति दूरे शब्द उत्पन्न इति प्रतिपत्तिश्चानुमानिकी । कथम् ? यावतो दूरात् प्रत्यक्षागमोपलब्धकारणव्यापारभाविनः शब्दस्य सन्तानेनागतस्य यान् विशेषानुपलब्धवांस्तावद् दृष्टकारणकस्यापि शब्दस्य विशेषानुपलभमानस्तावति दूरे शब्दोत्पादं प्रतिपद्यते । यथा कैश्चिदेव विशेषैः शङ्खादिकं वक्तृविशेषं च प्रतिपद्यते इति । यस्तु तथाभूतान् विशेषान्न लक्षयति तस्य संशय इति दृश्यते कस्य कुतो वायं शब्द इति ? तस्मिंश्च दिग्देशविशेषेऽनुमिते ग्रामादिकं सम्भाव्य तत्र शब्दोत्पादं व्यपदिशति, न तु देशादीनां श्रोत्रग्राह्यत्वमिति । तस्माद् बाह्येन्द्रियत्वाद्रसनादिवच्चक्षुःश्रोत्रयोरपि प्राप्यकारित्वं सिद्धम् ।

प्राप्त्यभावे हि सर्वार्थोपलम्भः स्यात्, न हि प्राप्त्यभावेऽन्या काचिद्योग्यतास्ति, येनोच्यते योग्यदेशावस्थितस्यैव ग्रहणमिति ।

अयस्कान्तादिवदिति **चेत्, न**; दृष्टान्तमात्रेण सन्देहानिवृत्तेः । किमयस्कान्तादिवदप्राप्यकारित्वमिन्द्रियाणाम् ? उत प्राप्यकारित्वं वाश्यादिवदिति ? नात्र विशेष हेतुरुच्यते । अपि चायस्कान्तसंश्लिष्टं वायुद्रव्यं विशिष्टमुत्पन्नं शरीरे प्राणवत्, तच्चायः प्राप्येवाकर्षति प्राण इव तोयतूलादिकं, तत्स्पर्शानुपलम्भेऽपि तत्कार्येणैव तथाभूतस्य तस्योत्पन्नस्य सद्भावोऽवगम्यते इति । मन्त्रोऽपि सम्बद्धमेव देवतात्मानमाराधयति । स च देवताविशेषः प्राप्यैव जपितुरभिप्रेतमर्थं करोतीति न कस्यचिदप्राप्यकारित्वम् ।

शब्दान्तःकरणादेरतीताद्यर्थेनाप्राप्तस्यापि तज्ज्ञानजनकत्वात्कथं प्राप्यकारित्वमिति **चेत्, न**; अपरिज्ञानात् । सहकारिणं प्राप्य कारणस्य कार्यजनकत्वं प्राप्यकारित्वमुच्यते । तच्च शब्दान्तःकरणादेरप्यस्ति । अतीताद्यर्थस्य तु कारणत्वमेव नास्तीत्युक्तं, तेन तदप्रापकत्वेऽपि नाप्राप्यकारित्वम् । न चैवं चाक्षुषाद्यर्थस्याप्यजनकत्वं, तस्यालोकादिवदन्वयव्यतिरेकाभ्यां कारणत्वसिद्धेः । प्राप्तस्याप्यञ्जनादेरनुपलब्धिरित्येतदपि न युक्तम्, न हि यदिन्द्रियेण प्राप्तं तदुपलभ्यत एवेति नियम्यते, किं तर्हि ? यद् बाह्येन्द्रियेणोपलभ्यते तत्प्राप्तमेवेति नियमः । किं कारणं ? बाह्येन्द्रियाणां भौतिकत्वेन प्रदीपवत्प्राप्तार्थप्रकाशकत्वात् । इन्द्रियत्वान्मनसोऽपि प्रसंग इति **चेत्**, क्वचित्तथाभावात् । सिद्धसाधनं, नियमपक्षे त्वतीताद्यर्थैरुक्तो विरोधः । किं चान्वयव्यतिरेकाभ्यां बाह्येन्द्रियेण विद्यमानं जनकमेवोपलभ्यते जनकानां च घटादिहेतूनामिव परस्परसम्बद्धानामेवैककार्यहेतुत्वमिति सिद्धः सन्निकर्षः, तज्जनितत्वं ज्ञानस्येति ।

**॥ न्यायसिद्धान्तमञ्जरीटीका तर्कप्रकाशः ॥**

**अत्र केचित्** चक्षुषःप्राप्यकारित्वे चन्द्रमसोग्रहणानुपपत्तेः । शाखाचन्द्रमसोस्तुल्यकालं ग्रहणानुपपत्तेश्च अप्राप्यकार्य्येव तद्वाच्यम् एवं चाप्राप्यकारित्वाविशेषात् गोलकमेव तदिति पार्थिवत्वमेव तस्ये त्याहुः । तदसत् । चक्षुषोऽप्राप्यकारित्वे निमीलितनयनस्यापि चाक्षुषापत्तेः प्राप्यकार्येव तद्वाच्यम् । चक्षुषस्तैजसत्वेनातिशीघ्रगामितया चन्द्रमसा संयोग उपपद्यते । शाखाचन्द्रमसोस्तुल्यकालग्रहणं त्वसिद्धं यथा मया युगपच्छतं शतपत्राणि च्छिन्नानीतिवत् । तथाच गोलकस्य च घटादौ संयोगाभावेनातिरिक्तं तैजसं चक्षुः स्वीकार्यमिति ।

**॥ न्यायालङ्कारः ॥ ( न्यायवार्तिक तात्पर्य परिशुद्धि विषमपद व्याख्या )**

**( उने ) तृष्णातत्कर्मसंभव** इति । तृष्णा च तत्कर्म च कृष्णसारनिर्वर्तकमदृष्टं च तयोः संभवः ।

**अस्येति** । कृष्णसारस्य ।

**अतः कार्येऽपीति** । न केवलं कृष्णसारोत्पत्तौ कार्यस्योपलम्भत्वक्षणे ।

**तत्कार्यस्येति** । संयोगकार्यस्य तदभावादिति प्रादेशिकासमवायिकारणाभावात् ।

**तद्द्वारेणोपलभ्यमाना** इति । शब्देनानुमीयमाना इत्यर्थः ।

**( टीयाम् ) बहिर्वर्तित्वादित्यादि** । यदि कृष्णसारमात्रमिन्द्रियमिष्यते, तेन चार्थस्य प्राप्तौ ग्रहणं तदा सान्तरग्रहणं न स्यात् । यदा तु बहिर्वर्त्यपि इन्द्रियमिष्यते तदा कृष्णसारापेक्षया सान्तरग्रहणमुपपन्नमेवेत्यर्थः ।

**न चापातजन्मेत्यादि** । कुड्यादिविषयं निर्विकल्पकं सविकल्पकं वा द्रव्यानुमानात् प्रागेव स्यादित्यर्थः ।

**आश्रयाणामिति** । शब्दाद्याश्रयाणाम् ।

**विषक्तेति** । विशकलिता ।

**समारोपमात्रेणेति** । समाश्रयणमात्रेण ।

**( उने ) ननु मा भूत् सहान्तरेण ग्रहणमित्यादि** । अप्राप्यकारि चक्षुः सान्तरग्रहणादित्यस्य हेतोः सहान्तरेण ग्रहणं सान्तर इति वा ग्रहणमर्थो मा भूत्, उभयस्यापि शरीरासंबद्धग्रहनिमित्तत्वादिति परं शरीरेन्द्रियाधिष्ठानासंबद्धस्य ग्रहणमेव हेतोरर्थो भविष्यति ।

कुत इत्याह-**न ह्ययमन्यथासिद्ध** इति । यथा हि सान्तरेण ग्रहणं सान्तरमिति वा ग्रहणमन्यथा अप्राप्तिमन्तरेणापि शरीरेन्द्रियाधिष्ठानासम्बद्धग्रहणेन सिध्यति, न तथायं शरीरेन्द्रियाधिष्ठानसंबद्धग्रहोऽन्यथा अप्राप्तिमन्तरेण सिद्धो निष्पन्नः, किं त्वप्राप्तिनिमित्तक एवायमित्यर्थः ।

**नन्वयमप्यन्यनिमित्तो** भविष्यति तत्कथमप्राप्तो हेत्वर्थ इत्याह-**एतस्यैवेत्यादि** । एतस्यैव शरीरसंबद्धग्रहणस्यैव इतरोपाधित्वेन इतरस्य सान्तरग्रहणस्योपाधित्वेन कारणत्वेन सान्तरग्रहणं प्रति प्रयोजकत्वात् । एतत्प्रति तु अप्राप्तिमन्तरेण नान्यत्किञ्चित् प्रयोजकमित्यर्थः ॥

**टीयाम् ॥ इन्द्रियसंबन्धो भवत्वित्यादि** । शरीरसंबन्धाविनाभूतौ नैरन्तर्याभिमानिनः शरीरासम्बन्धाविनाभूतश्च सान्तरत्वाभिमान इति नियम इन्द्रियसम्बन्धविनाभूतः शरीरसम्बन्धः, इन्द्रियासम्बन्धाविनाभूतश्च शरीरसम्बन्ध इति तु नियमो नास्तीत्यैदम्पर्यम् ॥

**उने** ॥ यच्छरीरसम्बद्धं तदवश्यमिन्द्रियसम्बद्धमित्यनुषङ्गादुक्तम् । उपयुक्तं त्वत्र यदिन्द्रियसम्बद्धं तदवश्यं शरीरसम्बद्धमिति ।

**तत्रेति** । इन्द्रियासम्बद्धत्वे ॥

**टीयाम्** ॥ **विषयरूपाधीननिरूपणा** इति । विषयरूपाधीनं निरूपणं ग्रहणं येषां ते तथा। एतेन प्रत्ययानां विषया अन्तरङ्गा इत्युक्तम् ॥

**उने** ॥ **असिद्धिव्यवच्छेदार्थमिति** । अथ रूपवद्द्रव्यान्तरमन्तरशब्दवाच्यम्, तस्य व्यवधायकत्वात् तेन सह ग्रहणं न युक्तमिति **वार्त्तिके** सहान्तरेण ग्रहणादित्यस्यासिद्धिरुक्ता । सा च परमार्थतो नास्ति, अन्तरेण बहलतमालोकेन सह ग्रहणस्य सम्भवात् । तस्मात् सहान्तरेण ग्रहणस्यापि शरीरसम्बद्धग्रहनिमित्तकत्वादन्यथासिद्धत्वमेव परमार्थत इत्यसिद्धिव्यवच्छेदाय ॥

**टीयाम्** ॥ तस्मादन्यथासिद्धिरेवेत्यत्रैवकार इत्यर्थः ।

**एतावन्मात्रे त्विति** । अप्राप्तावजनकत्वादित्यैतावत्येव ।

**विपर्ययेण प्रयोगो द्रष्टव्य** इति । प्राप्यकारि चक्षुरनुविहितदूरान्तिकभावत्वात् वास्यादिवदित्ययम् ।

**गृह्यन्त इत्यर्थ** इति । न हीत्यनेन योगः ।

**सहकारिप्रत्यया** इति । कारणानि ।

**भावानिति** । बीजादीन् ।

**सैवेति** । प्रत्यासत्तिः ।

**विप्रतिपद्येतेति** । विप्रतिपत्तुमर्हति ।

**न तु निरन्तरोत्पादेऽपीति** । एतेन **बौद्धा**दिना अकामेनापि इन्द्रियार्थयोः प्राप्तिरङ्गीकर्तव्येत्युक्तम् ।

**टीयाम्** । **निषेत्स्येते हीत्यादि** । यदि हि क्षणभङ्गपरिणामौ निषिद्धौ नाभविष्यताम्; तदा इन्द्रियक्षणोऽर्थक्षणश्च निरन्तरावुत्पन्नौ परिणतौ चेति तयोरतिरिक्तप्राप्तिरहितयोरेव ग्रहणग्राह्यभावोऽप्य-(घ)टिष्यत । यदा तु तौ निषेत्स्येते तदा स्थेमवतां भावानां स्वरूपयोग्यता चेत्यादिभणितनीत्या भिन्ना प्राप्तिः सिध्यतीति भावः ।

**योग्यतयैव हि** इत्यादि । करणानां वास्यादीनां स्वकार्यं कुर्वतां योग्यतैव कारणम्, न तु प्राप्तिरित्यर्थः । **ननु** कारणानि प्राप्तिपूर्वकाण्येव सन्ति स्वकार्यं कुर्वाणानि दृश्यन्ते । तत् कथं प्राप्तिकारणमित्याह-**प्राप्तिस्त्वित्यादि** । कारणानां स्वकार्यकरणं योग्यतयैव कारणेन व्याप्तम् । प्राप्तेस्तु सहचारितामात्रमित्यर्थः ॥

**उने ॥ नन्वयस्कान्तस्येत्यादि ।** अयस्कान्तश्चेदप्राप्यकारी तदा कारणत्वादिति हेत्वन्तरमपि प्राप्यकारित्वसाधनायोपन्यस्तमनैकान्तिकमित्यर्थः ॥

**न च कृष्णसारस्येत्यादि ।** यदि हि कृष्णसारमण्योर्वृत्तयोऽङ्गीक्रियन्ते, तदा तासामर्थेन लोहेन च निरन्तरोत्पादः स्यात् ।

**आचरतीति ।** कुर्वाणे ।

**स्थिरनये** इति । **ए**तेनास्थिरमते तावत् कार्यं जनयन्ति, कारणानि परस्परप्राप्तिं न व्यभिचरन्तीति व्यवस्थापितमिति **ज्ञापितम्** ।

**॥ न्यायमञ्जरी ॥**

**ननु** सन्निकर्षावगमे किं प्रमाणम् ? व्यवहितानुपलब्धिरिति ब्रूमः । यदि ह्यसन्निकृष्टमपि चक्षुरादीन्द्रियमर्थं गृह्णीयाद् व्यवहितोऽपि ततोऽर्थ उपलभ्येत, न चोपलभ्यते, तस्मादस्ति सन्निकर्षः ।

**नन्वव्यवधानमेवास्तु** किं सन्निकर्षेण ? मैवम् । इन्द्रियाणां कारकत्वेन प्राप्यकारित्वात् संसृष्टञ्च कारकं फलाय कल्पत इति कल्पनीयः संसर्गः । एतच्चेन्द्रियपरिक्षाप्रसङ्गे निपुणं निर्णेष्यत इति नेह विविच्यते । रसनस्पर्शनयोश्च स्पष्टं प्राप्यकारित्वमुपलभ्यत इति तत्सामान्याविन्द्रियान्तरेष्वपि कल्पनीयमिति ।

एवं हि साङ्ख्याः सम्प्रवदन्ते आहङ्कारिणीन्द्रियाण्यर्थं साधयितुमर्हन्ति, नान्यथा । तथा हि कारकं कारकत्वादेव प्राप्यकारी भवति, भौतिकानि चेन्द्रियाणि कथं प्राप्यकारीणि दूरवर्तिनि विषये भवेयुः ? आहङ्कारिकाणान्तु तेषां व्यापकत्वाद् विषयाकारपरिणामात्मिका वृत्तिर्वृत्तिमतोमान्या सती सम्भवत्येवेति सुवचं प्राप्यकारित्वम् । अपि च महदणुग्रहणमाहङ्कारिकत्वे तेषां कल्पते न भौतिकत्वे यत्परिमाणं ग्रहणं तत्परिमाणग्राह्यं गृह्णीयात् । अस्ति च गोलकादधिकपरिमाणस्य पटपिठरादेर्ग्रहणं हीनपरिमाणस्य च वटधानादेरतोऽपि न भौतिकानीन्द्रियाणि । भौतिकानामपि दीपादीनां परं प्रकाशयतां स्वात्मप्रकाशकत्वमपि दृष्टम् । एवमिन्द्रियाण्यपि पटादिरुपं प्रकाशयन्ति स्वरुपमपि न प्रकाशयन्तीत्यतोऽपि न भौतिकानि ।

अत्राभिधीयते, यत् तावत् प्राप्यकारित्वं भौतिकत्वपक्षे नावकल्पत नावकल्पत इति जल्पितवानसि, तन्मन्ये त्वया गोलकमेव चक्षुरिति चेतसि गृहीतम्, अन्यथा कथमित्थमकथयिष्यः, स चायम् आयुष्मतो महान् भ्रम । न खलु कृष्णसारं चक्षुस्तदधिकरणन्तु तेजश्चक्षुः, तच्च वेगवद्द्रव्यत्वाद् दूरमपि प्रसरतीति कोऽस्य प्राप्यकारितायां प्रमादः ?

**ननु च** गोलके चिकित्सादिप्रयोगाद् गोलकगुणदोषानुवर्तित्वाच्च विषयोपलब्धेर्गोलकमेव चक्षुः स्यात्, अनुपलभ्यमानञ्च तेजसा वेगवतापि सहसैव विस्फारिते चक्षुषि योजनशतसहस्र-

व्यवहितसितकरतरणितारकादि ग्रहितुं शक्येत । कथं वा तदल्पकं वराकं नायनं तेजः समन्ततः प्रसरता सकलभुवनप्रथितप्रभावेण महियसापि मिहिरमहसा न प्रतिहतगति भवेदध्यक्षमिति भास्करदर्शनमित्थं न सम्पद्येत ? तेजःपक्षे च काचाभ्रकपटलस्फटिकान्तरितपदार्थोपलब्धिः कथं समर्थ्येत ? तत्प्रतिबद्धं हि तेजः कथं प्रतिष्ठेतेति । तद्वरं शक्तिविशेषयुक्तं गोलकमेव साधो ! चक्षुरभ्युपगच्छेति ।

**उच्यते** । न खलु भवदनुशासनेन युक्तिविरुद्धपक्षमभ्युछामः । प्राप्यकारि हि कारकं दृष्टं कृष्णसारपक्षे च कुतः प्राप्यकारित्वम् ? शक्तिरपि कल्प्यमाना निराश्रया न परिकल्पनीयैवेति तदाश्रयचिन्तायां न गोलकमात्रमाश्रयोक्तराश्रयो भवेत् ।

चक्षुषस्तेजः प्रसरणात् प्राप्यकारिता, अनुपलभ्यमानं तेज इति **चेत्,** किं चन्द्रमसः परभाग उपलभ्यते पृथिव्याश्चाधोभागः ? न खलु प्रत्यक्षैकशरणाः पदार्थाः, अनुमानादिभिरेषामुपलम्भः सम्भवत्येव । उक्तश्चानुमानं रुपोपलब्धिकार्येण तैजसमेव चक्षुरनुमीयते, तेजोद्रव्यं हि दीपादि रुपस्य प्रकाशकं दृष्टमिति ।

प्रत्यक्षेण तु नायनं तेजः किमिति नोपलभ्यत इति, तदुच्यते विचित्रा हि द्रव्यगुणानामुद्भवा-भिभवादिवशेन गतयो भवन्ति । तद् यथा सर्वतः प्रसारता धवलबहलेनं शीतस्पर्शाश्रयेण द्रव्येण व्याप्तौ हेमन्तशिशिरौ ऋतू भवतः, निराधारस्य शीतस्पर्शगुणस्यानुपपत्तेः ।

**अथ** सत्यपि तत्र सलिलद्रव्ये तद्गुणस्य शीतस्पर्शस्यैवोपलब्धिर्न शुक्लरुपस्येति । तेजोद्रव्येण च निरर्गलं विजृम्भमाणेन भूयसा ग्रीष्मो भवति । तत्र सत्यपि तेजोद्रव्ये तद्गुणस्योष्णस्पर्शस्यैव ग्रहणं न भास्वररुपस्येति । भास्वरश्च कार्तस्वरादौ तैजसद्रव्ये रुपमुपलभ्यते नोष्णस्पर्शः । उदकान्तर्गते च तेजसि ज्वलनतप्ते जले ज्वलनगुण उष्णस्पर्शोऽनुभूयते, न भास्वरं रुपमिति । एवमिह नयमरश्मौ तैजसे द्रव्ये द्वावपि रुपस्पर्शौ नोपलभ्येते इति कमुपालभेमहि । उक्तञ्च दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः, प्रमाणस्य तत्वविषयत्वात् इति । न च सर्वत्र नयनरश्मेरनुपलम्भः । क्वचिद्धि वृषदंशप्रभृतीनां नक्तञ्चराणां निशि निबिडतमतमःपङ्कपटलावलिप्ते वेश्मनि सञ्चरतां चाक्षुषं तेजोभास्वरं रुपं दूरमपि प्रसरदुपलभ्यत एव । अन्यत्र तु मध्यन्दिनोल्काप्रकाशवदग्रहण-मस्मदादिनयनरश्मेः । अयन्तु विशेषः उल्कारुपस्य दिवा दिवाकरकरविभवाभिभूतत्वादग्रहणं नयनरश्मिरुपस्य त्वनुद्भूतत्वादेवेति ।

**यत्तु** काचाभ्रपटलस्फटिकान्तरितपदार्थोपलम्भनम्, तत्र काचादीनां केषाञ्चिदतिस्वच्छत्वात् केषाञ्चिच्च ससुषिरत्वाच्चाक्षुषतेजः प्रसरनिरोधकौशलं नास्तीति प्राप्यकारित्वं चक्षुषस्तावता भवति ।

यत्तु कुतो नयनरश्मेरियती गतिर्गगनमाक्रम्य यद्गभस्तिमालिनं स्पृशति, न प्रतिहन्यते च सावित्रेण वेगवता तेजसेति, उक्तमत्र दृष्टानुमितानां नियोगप्रतिषेधानुपपत्तिरिति । कार्यसत्तया हि तथाविधं कारणं कल्प्यते यद् दूरमपि प्रसरति प्रसरदपि परेण न च निरुध्यते । दृष्टश्चानिरोधो भर्जनकपालादौ तेजसः पच्यमानद्रव्यपाकसिद्धेः, कलशे च निषिक्तानामपां बहिः शीतस्पर्शग्रहणाद-निरोधः, एवं नयनरश्मेपि भविष्यति, न तु गोलकस्यैव शक्तिकल्पना लध्वीति वक्तव्यम् प्राप्यकारित्वव्याधातादिति । अत एव सर्वेन्द्रियाणां प्राप्यकारित्वं पश्यद्भिः शास्त्रज्ञैरिन्द्रियार्थसन्निकर्षः षट्प्रकारो व्याख्यातः । प्राप्यकारिता च न गोलकस्योपपद्यते तदप्राप्तस्य पर्वतादेग्रहणात् तत्प्राप्यस्य च प्रत्युताञ्जनशलाकादेरग्रहणादगोलकं चक्षुः ।

**चिकित्सादिप्रयोगस्तु गोलके यः प्रवत्तते ।**
**सोऽयमाधारसंस्कार आधेयस्योपकारकः ॥**

अत एव गोलकगुणदोषानुवर्तित्वमपि विषयोपलब्धेर्घटमानम्, आधारद्वारकौ हि तदाधेयस्यैव तौ गुणदोषाविति, तस्मादप्राप्तविषयग्रहणानुपपत्तेर्गोलकचक्षुःपक्षो भिक्षूत्प्रेक्षितः प्रेक्षावतां हृदयेषु न विश्राम्यतीति प्राप्यकारि तेज एव चक्षुरिति स्थितम् ।

### ॥ न्यायसारवृत्ति न्यायतात्पर्यदीपिका ॥

**प्रत्यक्षपरिच्छेदः**

**ननु** घ्राणरसनस्पर्शनानामस्त्वर्थसम्बन्धस्तत्कृतानुग्रहोपघातदर्शनाच्चक्षुःश्रोत्रयोस्तु कथ-मग्न्यादिप्रसङ्गेन दहनादिप्रसङ्गात् । शब्दं प्रत्यगमनाच्च । तथा च प्रयोगः । चक्षुःश्रोत्रे न प्राप्य-कारिणी सान्तरग्रहणात् । प्राप्यकारित्वे हि चक्षुरर्थयोः श्रोत्रशब्दयोश्चान्तरालग्रहणं न स्यात्परशु-वृक्षवदिति युक्तिसद्भावादिति **चेत्** । उच्यते प्रमाणात् तथाहि चक्षुःश्रोत्रे प्राप्यार्थं परिच्छिन्दाते बाह्येन्द्रियत्वात् । त्वगिन्द्रियवदिति । प्राप्त्यभावे सर्वार्थोपलम्भः स्यान्न हि प्राप्तिं विनाऽन्या काचिद्योग्यतास्ति । यया योग्यदेशावस्थितस्यैव ग्रहणं नान्यस्येति । अत्र बहु वक्तव्यं तत्तु नोच्यते । ग्रन्थविस्तरभयात् ॥२५॥

### ॥ पदार्थ रत्नमाला ॥

तेजसं चक्षु रूपग्राहकम् । तदेकस्मिन् शरीरे एकमेव न तु प्रतिगोलकं नाना । गोलकमेव चक्षुरप्राप्यकारी चेति **दिङ्नागः** यदाह-

**सान्तर ग्राहकं न स्यात् प्राप्तौ ज्ञानेऽधिकस्य च ।**
**अधिष्ठानाद् बहिर्नाक्षं चिकित्सादि प्रयोगतः ॥ १ ॥**

**सत्यप्यक्षबहिर्भावे न शक्तिविषयेक्षणे ।**
**यदि च स्यात्तदा पश्येदप्युन्मील्यनिमीलनादिति ॥ २ ॥**

तच्चै**तद्वार्तिके**ऽतिविस्तरेण दूषितम्
व्यवस्थापितं च नयनस्य प्राप्य कारित्वमिति ।

**नच** नयनस्य प्राप्यकारित्वे शाखाचन्द्रमसोस्तुल्यकालग्रहणं न स्यादिति **वाच्यम्** । इष्टापत्तेः । क्रमिकत्वस्यैव **वार्तिके** उक्तत्वात् । शक्यं च तिर्यग्भूतेन चक्षुषा अग्रावच्छेदे तद्वयोः संयोग इत्युक्त्वा यौगपद्यं चापि समर्थयितुम् । युक्ततेजसः संसर्गद्रव्यतया बाह्यालोक चक्षुर्भ्यां तावद् दूरवर्ति नयनारम्भेण यौगपद्योपपादनं तदयुक्तम् । अन्धतमसे खद्योतविद्युतोर्नेदिष्ठदविष्ठयोर्युगपदुपम्भस्यैवमप्य समर्थनात् । मध्ये तेजोन्तराभावात् । नहि ताभ्यामेवारम्भः परस्पराश्रयात् । आरम्भे सति व्यवहितस्य प्राप्तिः सत्यां च प्राप्तावारम्भ इति ।

## ॥ तर्कभाषा भावार्थदीपिका ॥

**नन्विन्द्रियाणीति । सम्बद्धस्य** = स्वेनसह सम्बन्धवतः, **अर्थस्य** = विषयस्य, **ग्राहकाणि** = प्रत्यक्षजनकानीत्यर्थः । अत्रानुमानं प्रमाणमाह – **इन्द्रियाणीत्यादिना** । स्वनिरुपितविषयनिष्ठसंयोग-समवायादिपञ्चसन्निकर्षान्यतमजन्यप्रत्यक्षसामान्यकानीति साध्यार्थः । एतेनाभावेपीन्द्रियस्य विशेषणतारुपप्राप्तिसत्वात् नैयायिकमते सिद्धसाधनम् । तथाऽभावस्थले प्राप्यकरित्वात्सिद्धसाधनं । इन्द्रियविषयत्वावच्छेदेनेन्द्रियस्य प्राप्यकारित्वविवक्षायामभावस्येन्द्रियविषयत्वे सिद्धयसिद्धिव्याधात इति दूषणमपास्तं । छिदाकरणे वाश्यादौ व्यभिचारवारणाय हैतो ज्ञानपदम्,प्रत्यक्षपरम्, तेन नानुमित्यादौकरणे व्यभिचारः । असिद्धिवारणाय विशेष्यं, व्यापारवत्कारणपरम् । आत्ममनोयोगादौ व्यभिचारवारणाय व्यापारवदिति । **आलोकवदिति** । आलोकस्यापि विषयसंयोगद्वारा प्रत्यक्ष-हेतुत्वात् । आत्ममनोयोगशरीरमनोयोगद्वाराप्रत्यक्ष हेतुः । शरीरव्याप्तौव्यभिचार वारणात् । **यद्वेति** । अत्र साध्यं पूर्ववदिन्द्रियत्वादित्येव हेतुः । क्वचिद् बहिरिन्द्रियत्वादिति पाठो नाकारः मनसोऽपि साध्यत्वेन व्यभिचाराभावात् । दृष्टान्तस्य निश्चित्साध्यवत्वं दर्शयति **त्वगादीनामिति** । उभयवादीति । **ननु** त्वगिन्द्रियेण स्पर्शाद्यभावस्य नैयायिकमते ग्रहणात्तादृशसन्निकर्षजन्यस्वजन्य प्रत्यक्षसामान्यकविरुपसाध्याभावात् कथमुक्तमुभयवादि सिद्धमिति **चेत्** । भाव प्रत्यक्षमादाय तथात्वं । अभावप्रत्यक्षवत्वाभावांशे साध्याङ्गत्वात् ।

## ॥ तत्त्व प्रभावली ॥

तेजसो वेगातिशयः क्षणान्तरेशीऽतिसहस्रत्कोशाधिकगतिसम्पादको भवति, अत एवाऽधिष्ठानाऽसम्बद्धार्थग्राहिण्याः प्रदीपादिप्रभायाः साहाय्येन चक्षुषः स्वप्राप्यग्राहित्वम्, तत्र

वस्तत्वन्वितकिरणानि वस्तुप्रतिमासहितानि प्रत्यावृत्त्य नेत्रे बाह्यपटीयकृष्णमण्डलमासाद्य केन्द्रितानि भूत्वाऽन्तः प्रविश्य तत्रत्यरसद्वारा वक्रीभूय तारकामासाद्य तदन्तर्दृक्टोपरि व्युत्क्रान्तप्रतिमां संक्रामयन्ति, तां च समुत्क्रान्तां सन्मुखं चाक्षुषज्ञानतन्तवो मस्तिष्कं प्रापयन्ति, तद्विषयकं मनोमायायोगादात्मनि प्रत्यक्षं भवतीति। येषां तु दुक्काचो ह्रस्वो दीर्घलम्बो वा तेषां किरणानि प्रतिमां दुक्पटे न पातयन्ति अतो बाह्यगोलोपनेत्राणि चाऽपेक्षन्ते, इत्येवं गोलकव्याप्तं नेत्रेन्द्रियं स्वाऽऽगतामेव प्रतिमां गृह्णातीति बोध्यम्॥ ६०॥

## ॥ तर्कभाषा व्याख्या ॥

**वस्त्विति** । सम्बन्धार्थज्ञान जनकानीत्यर्थः मात्रपदप्रवेशाच्च भावस्थलमादाय न सिद्धसाधनमिति ध्येयं। हेतौ ज्ञानपदम् प्रत्यक्षपरम् परमाण्वदौ व्याप्ति ज्ञानादौ चव्यभिचारवारणाय। ननु घटेव्यभिचार इत्यत आह – यद्वेति।

## ॥ तर्कभाषा – सारमञ्जरी टीका ॥

नन्विन्द्रियाणां स्वसम्बद्धत्वमत आह – **नन्विति** । तथाच यदर्थज्ञानकरणत्वं यत्र तत्र तदर्थसम्बद्धत्वमिति व्याप्तिः । अभावासम्बद्धत्वेन् । भावज्ञानकरणत्वाभाव इन्द्रिये सिद्धः । व्यापकाभावे व्याप्याभावावश्यकत्वादित्यर्थः । अत एव भूतलादिसम्बन्धित्वेऽपि न क्षतिः । ननु वहन्यनुमिति करणज्ञाने व्यभिचारः । तस्य वह्न्याद्य सम्बद्धत्वादत आह – **यद्वेति** । नन्वेतवतापि इन्द्रियत्वव्यापकं वास्तुप्राप्यज्ञानकारित्वम् । तच्चाधिकरणादिसम्बन्धेनापि सम्भवति इति इन्द्रियेणाभावग्रहे न बाधकमिति चेन्न । इन्द्रियनिष्ठं यदर्थज्ञानकरणत्व तदर्थसम्बन्धव्याप्यम् । यथा त्वगिन्द्रियनिष्ठज्ञानजनकत्वम् । तथाचाभावज्ञानजनकत्वाभावश्चक्षुः श्रोत्रयोः साध्यः अभावासम्बन्धित्वात् । यदर्थसम्बद्धमिन्द्रियं यत् तत् तदर्थज्ञानाजनकम् । यथा त्वगिन्द्रियम् । यद्वा इन्द्रियजन्यज्ञानविषयत्वमिन्द्रियसम्बन्धव्याप्यम् । अभावे व्यापकाभावेन व्याप्याभाव सिद्धिः ।

• • •

## વ્યક્ત ગણધર ભાસ

ચોથો ગણધર વ્યક્ત તે વંદિઈ, મીઠો જસ ઉપદેશ,
શ્રવણ નક્ષત્રે રે ધનમિત્ર વારૂણી, જાયો કોલાગ સન્નિવેશ. ચોથો૦ ૧

ગૃહિ પર્યાયે રે વરસ પચાસ તે, વલી છઉમત્થો રે બાર;
કેવલી વરસ અઢાર અસી, મિલી સર્વાયુ નિરધાર. ચોથો૦ ૨

ભારદ્વાજ તે ગોત્ર સુહામણું, પણ સય સીસ ઉદાર;
ભૂત સંદેહિં રે વીરે બૂઝવ્યો, હુઓ જગ જન જયકાર. ચોથો૦ ૩

એહવા ગુરુનો તે ગુણનો પ્રેમ તે, બાવન્ન અખ્ખર સાર;
બાવના ચંદન તે હું ગણું, જગ-ચિત્ત-ઠારણહાર. ચોથો૦ ૪

જ્વર છ માસનો રે તે જગિ અગહરઈ, એહ તો જનમનો રોગ;
બાવના ચંદનથી પણિ તે ભણી, અધિકો સુગુરુ સંયોગ. ચોથો૦ ૫

નહિ જગ ઉપમા રે સદ્ગુરુ ગુણ તણી, જે વ્રત શીલ અભંગ;
વાચક **જસ** કહે તિહાં મુઝ મન રમઈ, જિમ માલતીવન ભૃંગ. ચોથો૦ ૬



## विभाग-७

## ।। प्रकरण पञ्चिका ।।

**केचिदाहुः** । इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति । इन्द्रियस्यार्थेन सन्निकर्षाद्यदुत्पद्यते ज्ञानं तत्प्रत्यक्षम् । सच सन्निकर्षः षोढा भिद्यते । संयोगः, संयुक्तसंमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, संयुक्तविशेषणता चेति । तत्र संयोगात् पार्थिवाप्यतैजसानां द्रव्याणां चक्षुःस्पर्शनाभ्यां ग्रहणम् । प्राप्यकारिचक्षुर्बहिरिन्द्रियत्वात् । तैजसं च तद् रूपप्रतीतिहेतुत्वात् दीपवत् । तस्य रश्मयः प्रसरन्तो द्रव्येण संयुज्यन्ते । ते च पृथ्वग्रा इति पृथून्यपि द्रव्याणि व्यश्नुवते । **नन्वेवं** सान्तरग्रहणं न स्यात् प्राप्यकारित्वात् स्पर्शनवत् । किञ्च संयोगस्य गतिनिबन्धनत्वाद् गतिमतां च क्रमेणासन्नदूरगमनात् समकालमासेदुषां दवीयसां च पदार्थानां दर्शनं नोपपद्यते । **उच्यते** । भोगायतनापेक्षिततया सान्तरग्रहणं तावदुपपन्नम् । समसमय-संवेदने तु **केचित्** परिहारमेवं वर्णयन्ति । सकलानर्थान् व्याप्य युगपदवस्थितेन बाह्येन तेजसा सहैकीभूतास्ते चाक्षुषा रश्मयो युगपद्ग्रहणहेतव इति । तत्र**ापरे** दूषयन्ति । इत्थं प्रासावभ्युपगम्यमानायामतिदूरव्यवहितानामप्यर्थानां ग्रहणं दुर्निवारमिति । **अन्ये** त्वाहुः क्षेपीयस्तया तेषां रश्मीनां कालभेदानवग्रहाद्यौगपद्याभिमान इति । तदप्यन्ये नानुमन्यन्ते । अतिसन्निकृष्टेषु वस्तुषु गतिकालभेदः पद्मपत्रशतव्यतिभेदवन्मा नामावसायि । अनेकयोजनसहस्रान्तरितेषु भूमिष्ठेष्वर्थेषु ध्रुवे च कालभेदानध्यवसायो न बुद्धिमनुरञ्जयतीति । **वयं तु** वदामः । अदृष्टसापेक्षत्वाददोषः । नयनरश्मिभिरेकीभूतेऽपि बाह्ये तेजसि यावानेव तस्य भागोऽदृष्टवशेनोपलब्धिहेतुतयोपात्तस्तावानेवोपलब्धये प्रभवति न सर्व इति न सर्वोपलम्भो युगपच्च भौमध्रुवादिदर्शनसिद्धिः । **ननु** प्राप्यकारिणि नयनतेजसि काचाभ्रमपटलान्तरितेषु कथमुपलब्धिः ? तैर्नयनरश्मीनामप्रतिघातात् । ये पुनरप्राप्यकारि चक्षुराहुस्तेषां व्यवहितविप्रकृष्टार्थग्रहणं दुर्निवारं । सन्निधान इव विप्रकृष्टेऽपि स्फुटतर-मणीयांसोऽप्यर्था गृह्येरन् । प्राप्यग्रहणे तु तेजसोऽवयवानामप्रचुरतया युक्तमस्फुटदर्शनं दवीयसां क्षोदिष्ठानां चादर्शनम् ।

### ।। न्यायरत्नाकराख्यव्याख्या सहितं श्लोक वार्तिकम् ।।

**'ततश्चाऽप्राप्यकारित्वाद् यद् बौद्धैः श्रोत्रचक्षुषोः ।**
**लक्षणव्याप्तिसिद्ध्यर्थं संयोगो नेति कीर्त्यते ।।४०।।**

प्राप्यग्रहणपक्षेऽपि सान्तराऽग्रहणं किल ।
अधिष्ठानाऽधिकश्चार्थो न गृह्येत त्वगादिवत् ॥४१॥

व्यापारमात्रवाचित्वादविरुद्धं तदत्र नः' ।
यदि वाऽर्थार्जवस्थानं संप्रयोगोऽत्र वर्ण्यते ॥४२॥

योग्यतालक्षणो वाच्यः संयोगः कार्यलक्षितः ।
सांख्यादीन् वा विनिर्जित्य प्राप्तपक्षोऽत्र दूष्यताम् ॥४३॥

तयोश्च प्राप्यकारित्वमिन्द्रियत्वात् त्वगादिवत् ।
के चित्तयोः शरीराच्च बहिर्वृत्ति प्रचक्षते ॥४४॥

चिकित्सादिप्रयोगश्च यो ऽधिष्ठाने प्रयुज्यते ।
सोऽपि तस्यैव संस्कार आधेयस्योपकारकः ॥४५॥

तद्देशश्चापि संस्कारः सर्वव्याप्त्यर्थ उच्यते ।
चक्षुराद्युपकारश्च पादादावपि दृश्यते ॥४६॥

तस्मान्नैकान्ततः शक्यं संस्कारात्तत्र वर्तनम् ।
'बहिर्वृत्तिस्तयोश्चेष्टा पृथ्वग्रा सन्तताऽपि च ॥४७॥

अधिष्ठानाधिकं तेन गृह्यते यत्र यादृशम् ।
पार्थवं वृत्ति भागे स्याद्' दूरे ऽपि ग्रहणं तथा ॥४८॥

दीपप्रभा यथा तस्मिन् विनश्यति विनश्यति ।
तथा बहिर्गताऽप्येषा मूलच्छेदा द्विनश्यति ॥४९॥

अधिष्ठानपिधाने तु सत्यप्युच्छिन्नयत्नया ।
तयाऽर्थो ऽनुपनीतत्वादात्मना नाऽनुभूयते ॥५०॥

विच्छिन्न इति बुद्धिः स्यादधिष्ठानमपेक्ष्य च ।
शब्देत्वाधिक्यविच्छेदौ भ्रान्त्यैवोक्तावसंभवात् ॥५१॥

यदपि बौद्धैः प्राप्तिवचनं संप्रयोगशब्दं मत्वा श्रोत्रचक्षुषोरप्राप्यकारित्वादव्यापकं लक्षणं, प्राप्यकारित्वे हि तयोर्यदिदं सान्तरग्रहणं दूरे शब्दो दूरेऽर्थ इति, तत्र स्यात् प्राप्तौ दूरत्वाऽसंभवात्, न चात्मापेक्षयादूरत्वं, तस्य विभुत्वेनाऽभ्युपगमात्, तथा ऽधिष्ठानाऽधिकपरिमाणानां महीमहीधरादीनां ग्रहणं न स्यात्, न ह्यल्पेन महतां प्राप्तिः संभवतीत्युक्तं सान्तरग्रहणं न स्यात्, प्राप्तौ स्थानाधिकस्य वेति, तथा निरन्तरग्रहणं न स्यादित्युक्तं, तदपि व्यापारमात्रवाचित्वात्संप्रयोगशब्दस्य प्राप्तिवचनत्वा-

ऽभावात्परिहृतमित्याह **ततश्चे**ति सार्द्धद्वयेन। अर्थाऽऽर्जवेनाऽवस्थानं वा संप्रयोग इत्याह **यदि वेति**। शक्तिलक्षणो वा संबन्धः कार्यगम्यः शब्दार्थयोरिवेन्द्रियाऽर्थयोः संप्रयोग इत्याह **योग्यतेति**।

भवतु वा साङ्ख्यादिसिद्धान्तेन प्राप्यकारित्वमेव श्रोत्रचक्षुषोरित्याह **साङ्ख्येति**। न च ते शक्यन्ते निर्जेतुमित्यभिप्राय इति। किं पुनः प्राप्यकारित्वे प्रमाणमत आह **तयोरिति**।

**ननु** प्रत्यक्षविरुद्धमेवेदमनुमानं कर्णशष्कुल्याश्चक्षुर्गोलकस्य च शरीरएवोपलम्भादत आह **केचि**दिति। साङ्ख्यास्तावदाहङ्कारिकयोः श्रोत्रचक्षुषोर्वृत्तिः शरीराद्विनिर्गत्याऽर्थं गृह्णाति इति मन्यन्ते, सा चाऽदृश्येति न प्रत्यक्षविरोध इति। **नन्व**धिष्ठानमेवेन्द्रियं, तत्र चिकित्सादिप्रयोगादत आह **चिकित्सेति**। अधिष्ठानाधारा वृत्तिस्तेन चिकित्सादिप्रयोगो ऽधिष्ठानसंस्कारोऽपि तत्राऽऽधेयस्योपकरोतीति। **नन्व**धिष्ठानगतस्यैवोपकर्तुं शक्नोति, कथं बहिर्गतस्योपकरोत्यत आह **तद्देश** इति। अपरित्यक्ताऽधिष्ठानैव वृत्तिरर्थदेशं प्राप्नोति दीपप्रभावत्, अतोऽधिष्ठानगतोऽपि संस्कारो बहिर्गताया अप्युपकरोतीति। दृष्टं च देशान्तरगतस्याऽपि संस्कारस्य देशान्तरेऽपि उपकारकत्वं, यथा पादादिगतस्य चक्षुरादाविति। तदाह **चक्षुरादीति**। एतदेवोपसंहरति **तस्मादिति**।

निरन्तरग्रहणमधिकग्रहणं चोपपादयति **बहिरि**ति सपादेन। दीपप्रभैवाऽत्र दृष्टान्तः। तेन यत्र यादृशं पार्थवं पृथुत्वं तत्र तावदधिकं गृह्यत इति। **न च** वाच्यं यदि वृत्तिर्गत्वाऽर्थं प्रकाशयति, किमति दूरं न गच्छतीति, कार्यगम्या हि तद्गतिः, अतो यथा कार्यमवतिष्ठत इति नातिदूरगमनं, तत्रापि दीपप्रभैव निदर्शनं, प्रत्युताऽप्राप्यकारित्ववादिनामेवाऽति-दूरव्यवहिताऽर्थग्रहणप्रसङ्ग इत्यभिप्रायेणाह **दूरेऽपीति**।

**नन्वर्थ**गता वृत्तिरधिष्ठाननाशे ऽपि किमित्यर्थं न प्रकाशयति, अत आह **दीपप्रभेति**। यद्यपि वाचि नाशस्तथाप्यात्मप्रयत्नाऽनुगृहीता साऽर्थमात्मनउपनयति समर्पयति, नष्टे ऽप्यधिष्ठाने पिहितेऽपि वा उच्छिन्नयत्नया तया ऽर्थो ऽनुपनीतत्वा न्नात्मन्यात्मनाऽनुभूयतइत्याह **अधिष्ठानेति**।

सान्तरग्रहणमुपपादयति **विच्छिन्न** इति। यथा सर्वगतमप्यात्मानं शरीरान्तर्गतमेव प्रतिपत्तारो मन्वते तथेन्द्रियमपि गोलकमेव, अतः शरीराऽपेक्षया गोलकाऽपेक्षया वा विच्छिन्ने विच्छेदबुद्धिः, शब्दे ऽप्ययमेव न्यायः सांख्यानामिति।

## ॥ मीमांसा श्लोकवार्त्तिकतात्पर्यटीका ॥

ततश्च यदप्राप्यकारित्वाच्चक्षुश्श्रोत्रयोरव्यापकत्वं नाम दूषणमुक्तम् अप्राप्यकारित्वं च सान्तराधिष्ठानार्थाधिकार्थग्रहणेन; न हि निरन्तरदेशे गन्धस्पर्शादौ सान्तरा प्रतिपत्तिरधिकार्थग्रहणं चेति, तदस्मद्व्याख्याने न भविष्यति; यतो न संप्रयोगशब्देन संयोग इत्युच्यते, अपि तु व्यापारमात्रमित्याह **ततश्चे**ति सार्द्धश्लोकद्वयेन।

कः पुनरसौ व्यापारः ? अर्थस्य वा ऋजुदेशत्वेनावस्थानमिन्द्रियस्य वा योग्यतां कार्यलक्षितां संप्रयोगशब्दो ब्रवीतीत्याह-**यदि वेति** ।

इदानीं संयोगमेव संप्रयोगशब्दस्यार्थमभ्युपगम्य साङ्ख्यमतेन परिहरति**साङ्ख्यादीन् वेति** । अयं प्रयोगार्थ:प्राप्यकारिणी चक्षुःश्रोत्रे, इन्द्रियत्वात् त्वगादिवदिति ।

कथं पुनः प्राप्यकारित्वमित्याशङ्क्याह**केचिदित्यर्द्धेन** । केचिद्ग्रहणं श्रोत्रविषयम् । केचिदाहुः-श्रोत्रवृत्तिरेव शब्दसमीपं गच्छतीति । अपरेषां तु दर्शनम् संयोगविभागादुत्पन्नः शब्दः शब्दान्तरारम्भ-क्रमेण श्रोत्रदेशं गच्छतीति ॥

यत्पुनरिदमुक्तम्-अधिष्ठानदेश एवेन्द्रियम्, तत्र चिकित्सादिप्रयोगादिति; तत्राह **चिकित्सादीति** । अधिष्ठानसंस्कार एवासाविन्द्रियमुपकरोतीत्यर्थः ॥

एवं तर्हि तत्स्थाया एवेन्द्रियवृत्तेरुपकारकोऽसौ, बहिर्वृत्तेर्न प्राप्नोतीत्याशङ्क्याह**तद्देशेश्चेत्यर्द्धेन** । दृष्टं चैतदन्यत्र संस्कारोऽन्यत्र चोपकार इत्याह-**चक्षुरादीत्यर्द्धेन** ॥

तस्मादनैकान्तिको हेतुः । अधिष्ठानसमानदेश एवेन्द्रियम्, तत्र चिकित्सादिप्रयोगादित्याह-**तस्मान्नेत्यर्द्धेन** ।

यत्पुनरिदमुक्तम्-अधिष्ठानाधिकस्य ग्रहणं न प्राप्नोतीति, तत्राप्याह-**बहिर्वृत्तिरिति** सार्द्धेन ॥

नन्वेवं तर्हि बहिर्जातायां वृत्तौ यदाधिष्ठानविनाशः तदापि ग्रहणं प्राप्नोतीत्याशङ्क्याह**दीपप्रभेति** ॥

अधिष्ठानपिधाने तर्हि अविनष्टत्वान्मूलस्यार्थग्रहणं प्राप्नोतीत्याशङ्क्याह-**अधिष्ठानपिधाने चेति** ॥

अधिष्ठानापेक्षया च सान्तराप्रतिपत्तिरित्याह-**विच्छिन्न** इत्यर्द्धेन ।

### ॥ मानमेयोदयः ॥

अत्र चक्षुःश्रोत्रयोः प्राप्यकारित्वे विवादोऽस्तीति तयोरपि बहिरिन्द्रियत्वात् त्वगादिवत् प्राप्य-कारित्वं साधनीयम् । ततश्च चक्षुषः पृथुतरपृथिवीधरादिदर्शनात् पृथ्वग्रत्वमपि तेजःस्वभाव-सिद्धमाश्रयणीयम् । तथा उन्मीलनक्षण एव दूरतरशनैश्चरादिदर्शनात् व्याप्यावस्थितेन बाह्यतेजसा निर्गमनसमय एवैकीभावः कल्पनीयः । **न च** बाह्यतेजसः सकलव्यापित्वात् केरलेभ्योऽपि गङ्गादर्शन**प्रसङ्गः**, अदृष्टोपगृहीतेनैवालोकभागेनैकीभावात् । तार्किकास्तु तदिदं दूरदर्शनं वेगातिशया-त्साधयन्ति । तदनन्तयोजनान्तरितेष्वपि शनैश्चरादिषु झटितिदर्शनं वेगमात्रादसंभाव्यमिति उपेक्षितमस्माभिः । एतानि च चक्षुःरादीनि अनुद्भूतरूपस्पर्शत्वात् प्रत्यक्षेण न गृह्यन्ते इति ।

● ● ●

## સુધર્માસ્વામી ભાસ

*આવો આવો ધરમના મિત્તાજી ! નિરમલ ચિત્ત ધારી;*
*ગુરુગુણ ગાઓ ઈક ચિત્તાજી ! નિરમલ ચિત્ત ધારી.*
*જિણે તાર્યા નર નેં નારી જી, નિરમલ૦*
*તે સદ્ગુરુની બલિહારીજી. નિરમલ૦ ૧*

*પંચમ ગણધર ભવિ ! વંદોજી, નિરમલ૦*
*સોહમ મુખિ પુનિમચંદોજી. નિરમલ૦*
*ધમ્મિલ ભદ્દિલા જાયોજી, નિરમલ૦*
*ઉત્તરફગ્ગુણિઈં સુહાયોજી. નિરમલ૦ ૨*

*પંચાસ આઠ બાયાલોજી, નિરમલ૦*
*ગૃહ કેવલી છઉમત્થોનો કોલોજી; નિરમલ૦*
*સરવાયુ વરસ શત જાણોજી, નિરમલ૦*
*પણ સય તસ સીસ વખાણોજી. નિરમલ૦ ૩*

*અંગિ વેસાયણ ગોત્ર નામોજી, નિરમલ૦*
*કોલ્લાગ સન્નિવેશ ગામોજી; નિરમલ૦*
*તારિ સંશય જિન મેટઈજી, નિરમલ૦*
*તબ પ્રભુપદ ભાવિ ભેટઈજી. નિરમલ૦ ૪*

*સદ્ગુરુ તે નાવ અછિદ્દાજી, નિરમલ૦*
*તારઈ ભવજલધિ અનિદ્દાજી; નિરમલ૦*
*જે કુગુરુ તે કાણી નાવાજી, નિરમલ૦*
*ન સકે ભવતીરેં જાવાજી. નિરમલ૦ ૫*

*નવિ વીસારું ગુરુ પ્યારાજી, નિરમલ૦*
*જેહના મુઝ બહુ ઉપગારાજી; નિરમલ૦*
*ગુણ પ્રાણપણઈં લિઈં સંતોજી, નિરમલ૦*
*નવિ લીઈં ખલ કોડીઈં તંતોજી. નિરમલ૦ ૬*

*ગુરુ સમતારસ ભરીઓજી, નિરમલ૦*
*ચિર પ્રતપો ગુણમણિ ભરીઓજી; નિરમલ૦*
*ગુરુશ્રી નયવિજય સુસીસોજી, નિરમલ૦*
*ઈમ નિતિ નિતિ દિઈં આસીસોજી. નિરમલ૦ ૭*



## विभाग-८

# ॥ पाणिनीयव्याकरणे प्रमाणसमीक्षा ॥

इन्द्रियाणां प्राप्यकारित्वाप्राप्यकारित्वविमर्शः

**अत्र शाब्दिकसिद्धान्तः**

अथैतस्मिन् प्रत्यक्षे इन्द्रियस्य विषयेण सह संयोगो हेतुतयोक्तः । तत्रेन्द्रियं विषयदेशं गत्वा विषयेण संयुज्य तं प्रकाशयति, अथवा विषयस्यैवेन्द्रियदेशे आगमने सति तेन संयुज्य तं प्रकाशयतीति जिज्ञासायां प्रोच्यते चक्षुरिन्द्रियं विषयदेशं गत्वैव विषयेण संयुज्य तं प्रकाशयति । उक्तं च भाष्यकृता **अपक्रामति तत्तस्माद्दर्शनमिति** । अत्र प्रदीपः–"**दर्शनं चक्षुरिन्द्रियं तेजोरूपं प्राप्य विषयग्राहित्वात् प्रासाददेशादपक्रम्य विषयं गच्छतीत्यर्थः**" इति । अत्रोद्द्योतः–"**दर्शनं चक्षुरिति करणे ल्युडिति भावः । तेजोरूपमिति अपक्रमणसामर्थ्यमनेन दर्शितम् । विषयग्राहिणो नयनरश्मयः सूर्यरश्मिवत् प्रासाददेशस्थपुरुषनयनादपक्रम्य यावद् विषयदेशं गच्छन्तीत्यर्थः**" इति ।

**चक्षुषः प्राप्यकारित्वे वाक्यपदीयमतम्**

आचार्य**भर्तृहरिणा** वाक्यपदीये ब्रह्मकाण्ड उक्तम्-

**चक्षुषः प्राप्यकारित्वे तेजसा तु द्वयोरपि ।**

**विषयेन्द्रिययोरिष्टः संस्कारः स क्रमो ध्वनेः** ॥ इति ।

अत्र तेजसा दीपादिना चक्षुषः संस्कारे प्राप्यकारित्वं कारणमुक्तम् । यतो हि सन्तमसे स्थितोऽपि पुरुष आलोकानुगृहीतेन चक्षुषा आलोकानुगृहीतं घटादिविषयं पश्यति । यदि चक्षुरिन्द्रियं प्राप्यकारि न स्यात्, तर्हि तस्य दृष्टपुरुषनयनगोलकस्थतया इदानीमालोकानुग्रहाभावात् कथं बाह्यं विषयं पश्येत् ? आलोके स्थितोऽपि पुरुषोऽन्धकारे स्थितं घटादिविषयं न पश्यतीति तेजसा विषयस्यापि संस्कारः ।

**सर्वेन्द्रियाणां प्राप्यकारित्वे श्रीनागेशसम्मतिः**

**श्रीनागेशभट्टेन** सांख्यमतमनुसृत्य आकाशाधिष्ठानक आहङ्कारिको धर्मविशेषः श्रोत्रेन्द्रिय-मित्युक्तम् । तदैकरूप्याय घ्राणादीनीन्द्रियाण्यपि पृथ्वीजलतेजोवाय्वाधिष्ठानकानि आहङ्कारिकाण्येव स्वीकृतानि । अहङ्कारस्यान्तःकरणपरिणामत्वादन्तःकरणस्य चाधुनापि बहुदूरदेशगमनानुभवेन तद्वि-

काराहङ्कारविकाराणां सर्वेषामिन्द्रियाणां तत्सम्भवेन प्राप्यकारित्वाभ्युपगमात् । पृथिव्यादिविकाराणां तावद्दूरदेशगमनं नैव सम्भवति ।

एवं चेदं श्रोत्रमेव चित्तवृत्तिसहकृतं स्ववृत्तिपरम्परया (स्वस्य इन्द्रियस्य वृत्तिः सन्निकर्षस्तस्य परम्परया) शब्ददेशमागत्य शब्दं गृह्णाति । अत एव ग्रामान्तरीयः शब्दो मया श्रुत इत्याद्यनुभवोऽपि सार्वजनीनः सङ्गच्छते ।

**उक्तविषये मतान्तरम्**

अणवः सर्वशक्तयः सर्वं देशं व्याप्नुवन्तीति पृथिव्यादिपरमाणूनां तत्तदिन्द्रियस्य तत्तद्विषय-बोधनकाले विषयदेशपर्यन्तं तत्तदिन्द्रियरूपेण परिणाम इति तत्तद्देशे प्रत्यक्षानुभवः । अथैतस्मिन् मतेऽसन्निकृष्टस्यापि विषयस्य प्रत्यक्षं स्यादिति न शङ्कनीयम्, विषयदेशं यावदेव इन्द्रियरूपेण अणूनां परिणामात् । अस्मिन् मतेऽपि प्राप्यकारित्वमेव सर्वेन्द्रियाणामुपवर्णितं **श्रीनागेशेन** । **"अणवः सर्वशक्तित्वाद् भेदसंसर्गवृत्तयः"** इत्युक्त्या **श्रीहरिस**म्मतोऽप्ययं पक्षः सम्भाव्यते ।

**श्रोत्रेन्द्रियस्याप्राप्यकारित्वे भाष्यमतम्**

श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः, एकं च पुनराकाशमिति **महाभाष्ये** श्रोत्र एवोपलब्धिर्यस्येत्यर्थिकया श्रोत्रोपलब्धिरित्युक्त्या शब्दस्याकाशदेशत्वबोधने हेतुता सूचिता । एवं च दिगादीनां श्रोत्रत्वनिरासपूर्वकं कर्णशष्कुल्यवच्छिन्ननभःप्रदेशविशेषस्यैव श्रोत्रेन्द्रियत्वमभिमतं **भाष्यकृता**मित्यायाति ।

तत्र श्रोत्रेन्द्रियं यद्यसम्बद्धमेव शब्दं गृह्णीयात्, तर्हि काशीस्थोऽपि जनो रामेश्वरादिप्रदेशाऽवच्छिन्नं शब्दं कुतो न गृह्णीयात् ? सम्बद्धशब्दग्रहणेऽपि श्रोत्रस्य शब्दे देशे शब्दस्य च श्रोत्रदेशे निष्क्रियत्वाद् गमनासम्भवेन सम्बन्धो न सम्भवत्येवेति चेत्, अत्रोच्यते श्रोत्रेन्द्रियस्य **भाष्यसम्मत**मप्राप्यकारित्वमेव मन्तव्यं शाब्दिकैः । अनुसृतं च **श्रीकैयटेन** इदमेव मतम् । **श्रीनागेशेनापि लघुमञ्जूषाया** बहुषु स्थलेषु अयमेव पक्षः सिद्धान्तरूपेणानुसृतः कर्णशष्कुल्यवच्छिन्ननभस एव श्रोत्रत्वेन तादृशश्रोत्रं स्वदेशे समुत्पन्नं शब्दं ध्वन्यात्मकं गृह्णातीत्यादिकथनेन । यद्यप्यत्र पक्षे तादृशश्रोत्रस्य नित्यतया नाशासम्भवेन कस्यचिदपि बाधिर्यं न सम्भवतीत्यापद्यते, तथापि धर्मविशेषविशिष्टस्य तादृशाकाशस्य श्रोत्रत्वमिति रोगादिना तस्य धर्मस्याभिभवः, औषधादिना च तस्योद्भव इति स्वीकारेणोक्तदोषो निरस्तो वेदितव्यः । सांख्यशास्त्रानुसारित्वं तु न समीचीनम्, अनन्तश्रोत्रसन्निकर्षकल्पनापत्त्या गौरवात् । आणविकत्वपक्षोऽपि न समीचीनः, अनन्तपरमाणु-परिणामकल्पनायामतिगौरवात् ।

**अत्र शाब्दिकानां सिद्धान्तः**

एवं च चक्षुरिन्द्रियं विहायान्यानि ज्ञानेन्द्रियाणि श्रोत्रवदप्राप्यकारीण्येव । न हि आपणस्थ-मोदकस्य चाक्षुषवद् विशेषतो रासनघ्राणजस्पार्शनप्रत्यक्षाण्यपि दूरतः कर्तुं प्रभवति निपुणोऽपि कश्चिदिति शब्दशास्त्रनिष्कर्षः ।

ग्रामान्तरीयः शब्दो मया श्रुत इत्यनुभवोऽपि अभिव्यक्तिवादे न विरुध्यते । शब्दस्याभिव्यक्तिरेव दूरदेशं व्याप्नोति, नोत्पत्तिरिति स्वीकारेणादोषात् ।

यद्यपि शाब्दिकस्य साङ्ख्यशास्त्रानुसारित्वं **भाष्यकृता** सूचितमस्ति, तथाऽपि **सर्ववेदपारिषदं हीदं शास्त्रमिति** भाष्योक्त्यैव यथाऽवसरं तत्तत्सिद्धान्तानुसरणास्यानुज्ञातत्वेनेदृशाचरणेऽपि न क्षतिरिति भावः । आहङ्कारिकाणि इन्द्रियाणि इति मतेऽपि इत्युक्त्वा तन्मते दोषं परिहरता **श्रीनागेशे**-नेन्द्रियविषये साङ्ख्यमतस्वीकारेऽपि शब्दशास्त्रसिद्धान्ते न क्षतिरित्यपि सूचितम् । अत एव मनसो विषये तेन न्यायमतमनादृत्य योगशास्त्रसम्मतिः स्वीकृता ।

**उक्तविषये मतान्तराणि**

इन्द्रियाणां प्राप्यकारित्वमेव सिद्धान्तितं न्यायदर्शने । तत्र प्राप्य विषयेण संयुज्येन्द्रियेण क्रियते ज्ञानमित्येव तात्पर्यम्, न तु विषयदेशगमने । चक्षुष एव तैजसत्वेन तत्र सामर्थ्यात् । वैशेषिकदर्शनेऽपीयमेव रीतिः समादृताऽस्ति । सांख्यशास्त्रेऽपि प्राप्यकारित्वमेव सम्मानितम्, किन्तु समेषामिन्द्रियाणां विषयदेशं प्राप्य विषयबोधकता प्रतिपादिता ।

योगदर्शनेऽपि सांख्यदर्शनवद् विषयदेशं प्राप्यैव तज्ज्ञापकतेत्येव सिद्धान्तः ।

पूर्वोत्तरमीमांसाभ्यामप्ययं पूर्वोक्त एव सिद्धान्तः स्वायत्तीकृतोऽस्ति । एतेषु सांख्ययोगवेदान्तानां नये मनसोऽपि प्राप्यकारित्वमिति सिद्धान्तः ।

जैनदर्शने तु चक्षुरतिरिक्तानि चत्वारि घ्राणरसनत्वक्श्रोत्राणि बाह्येन्द्रियाणि प्राप्यकारीणि, मनस्त्वप्राप्यकारि इति पक्षः समर्थितः । **आचार्यहेमचन्द्रेण** काचादिव्यवहितस्याऽपि पदार्थस्य चक्षुषोपलब्ध्या अस्य अप्राप्यकारित्वं साधितम् ।

बौद्धदर्शने तु घ्राणरसनस्पर्शनानि त्रीण्येवेन्द्रियाणि प्राप्यकारीणि, चक्षुःश्रोत्रे त्वप्राप्यकारिणी । मनोऽपि अप्राप्यकार्येवेति पन्थाः समाश्रितः ।

**आचार्यदिङ्नागे**नैतन्मतमित्थं समर्थितम् चक्षुःश्रोत्रे यदि विषयं प्राप्य गृह्णीतः, तदा यदिदं दूरे शब्दः, दूरेऽर्थ इति व्यवहितग्रहणं तन्न स्यात्, न स्याच्च अधिकपरिमाणानां पर्वतादीनां ग्रहणम्, प्राप्यकारिषु त्वग्रसनादिषु अस्य नियमस्यादर्शनादिति । व्यवहितस्य अधिकपरिमाणस्य च ग्रहणा-ननुभवात् ।

**चक्षुषोऽप्राप्यकारित्वनिरासे शाब्दिकानां मतम्**

यथा दीपप्रभा दीपरूपस्वाधिष्ठानासम्बद्धस्याऽपि विषयस्य (दूरस्थघटादेः) प्रकाशं करोति । तत्र प्रभाप्रकाशयोः सामानाधिकरण्यमावश्यमावश्यकम् । कार्यकारणयोः सामानाधिकरण्यमन्तरा करणस्य कार्योत्पादनासम्भवादिति दीपप्रभा प्राप्यैव विषयं प्रकाशयति । तथैव गोलकरूपाधिष्ठानेना-

सम्बद्धोऽपि पृथुतरोऽपि विषयो गोलकनिर्गतेन नयनेन पृथ्वग्रतया सङ्कोचविकासशालितया च प्रकाश्यते।

**उक्तविषये न्यायदर्शनसम्मतिः**

**श्रीजयन्तभट्टो** न्यायमञ्जर्यां चक्षुषः प्राप्यकारित्वमित्थं न्यरूपयन् तेजसः प्रसरणात् चक्षुषः प्राप्यकारिता। यद्यपि प्रत्यक्षेण नायनं तेजो नोपलभ्यते, तथापि पदार्था न खलु प्रत्यक्षैकशरणाः, अनुमानादिभिरपि एषामुपलब्धिः सम्भवत्येव। काचादीनां केषाञ्चिदतिस्वच्छतया केषाञ्चिच्च सच्छिद्रत्वात् कर्तुं न शक्यते। यथा भर्जनकपालादौ तेजः प्रसरस्यानिरोधोऽनुभूयते, तद्वत्। अयस्कान्तमणेरपि सामर्थ्यं यावति सन्निकर्षे कार्याय प्रभवति, तावान् सन्निकर्षोऽपेक्ष्यत एव। व्यवहितस्य ग्रहणे कुड्यादिव्यवहितमपि कथं न गृह्यते?

***भौतिकत्ववादेऽपि प्राप्यकारित्वमित्यत्र न्यायशास्त्रम्***

यच्चोच्यते भौतिका (भूतविकाराः) दीपादयः परं प्रकाशयन्त आत्मानमपि प्रकाशयन्ति, न *चैतदिन्द्रियेष्विति* इन्द्रियाणां न भौतिकत्वं भूतत्वं वा, अपि तु आहङ्कारिकत्वमेवेति। तदपि न, भौतिकत्वपक्षेऽपि न हि गोलकमेव चक्षुः, अपि तु तदधिष्ठानकं तेजस्तत्त्वम्। तत्र चास्मदादि-नयनरश्मिसमवेतं रूपमनुद्भूतमिति प्रत्यक्षीकर्तुं न शक्यते। बिडालव्याघ्रसिंहादीनां चाक्षुषं तेजो भास्वररूपं दूरमपि प्रसरत् प्रत्यक्षीक्रियत एव। किञ्च, महदणुग्रहणान्न भौतिकत्वमित्यपि न विचारसहम्, ईदृशकार्यदर्शनेन तत्र सङ्कोचविकासशालित्वस्यानुमानात्।

उक्तं च **महर्षिगौतमेना**ऽपिदृष्टानुमितानां पदार्थानां विधिः प्रतिषेधो वा कर्तुं न शक्यते, तद्विषयकस्य प्रमाणस्य विद्यमानत्वादित्यर्थकेन "**दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः, प्रमाणस्य तत्त्वविषयत्वात्**" इति सूत्रेणेति निःशन्देहं चक्षुषः प्राप्यकारित्वम्।

**चक्षुषः प्राप्यकारित्वे आधुनिकानां शङ्का तत्परिहारश्च**

चक्षुषः प्राप्यकारित्वमते अधुनातना बहवो विद्वासं आक्षिपन्तिसूर्यमण्डलप्रत्यक्षकाले मध्येमार्गं स्थितानां ग्रहादीनामपि चाक्षुषं कुतो न? यदि चक्षुः प्राप्य विषयं गृहणातीति। अत्रोच्यते–अल्पपरिमाणत्वेन दूरत्वदोषेण च तेषां चाक्षुषं न भवति, सूर्यमण्डलस्य तु दूरत्वदोषे सत्यपि परिमाणबाहुल्यात् चाक्षुषं जायत एव। अनुभयते च सर्वैः पञ्चषपदपरिच्छिन्नेऽपि देशे दूरस्थितानां सूच्यादीनामप्रत्यक्षम्, दूरस्थितानामपि घटादीनां प्रत्यक्षम्। तत्र को हेतुः? तद्गतपरिमाणाल्पत्व–महत्त्व एव।

यदि तु तत्रैव स्थितानां सूच्यादीनां स्वल्पपरिमाणानामपि प्रत्यक्षमुपनेत्रोपकृतेन चक्षुषा भवतीति ब्रूषे, तदोपनेत्रविशेषोपकृतेन यन्त्रविशेषोपकृतेन वा चक्षुषाऽन्तरिक्षस्थितानामपि अल्पपरिमाणानां

ग्रहादीनां प्रत्यक्षं भवत्येव । स्पष्टं चेदं परमाराध्यश्रीगुरुचरणैः कृतायां **वाक्यपदीयब्रह्मकाण्डटीकायामम्बाकर्त्र्याम्** ।

**प्राप्यकारित्वमतेऽन्धत्वप्रसक्तिनिरासः**

नन्वस्मिन् प्राप्यकारित्वमते चक्षुषो विषयदेशे गमने सति प्राणिनामन्धत्वं प्रसज्यते, चक्षुषोऽभावादिति चेत्, न, चक्षुषो विषयेण सह यः सन्निकर्षस्तस्य सन्ततत्वमिति **भाष्यसिद्धान्तस्य** पूर्वमुल्लिखितत्वात् । **श्रीवाचस्पतिमिश्रै**रपि अस्यैव सिद्धान्तस्यानुसृतत्वाच्च । तथा चोक्तं **सांख्यतत्त्वकौमुद्यां टिप्पणे** वृत्तिः सम्बन्धविशेषः, स चानुच्छिन्नमूलो न तूच्छिन्नमूलः, निर्गताऽप्यच्छिन्नमूला चक्षुःसन्ततिः कार्याय समर्था न छिन्नमूला इति । एतेन **"यदि च चक्षुः प्राप्यार्थं गृह्णीयात्तदोन्मील्य निमीलितनयनोऽपिस्त्वं पश्येत्"** इति निराकृतं भवति । अन्धत्वादिप्रसङ्गोऽपि निरस्तो वेदितव्यः ।

परीक्षितं तावद् इन्द्रियाणां विषयसन्निकर्षे विषयाकारवृत्तिरूपा प्रत्यक्षप्रमा । तत्र चक्षुषो विषयदेशे गमनेन प्राप्यकारिता, अन्येषां तत्र गमनाभावेनाप्राप्यकारिता, विषयस्यैव इन्द्रियदेशे प्राप्तौ सत्यां प्राप्यकारिता वेति ।

**॥ व्याकरणमहाभाष्यम् ॥**

इह तावत्प्रासादात्प्रेक्षते शयनात्प्रेक्षते इति, अपक्रामति तत्तस्माद्दर्शनम् । यद्यपक्रामति किं नाऽत्यन्तायाऽपक्रामति ? संततत्वात् अथ वा अन्यप्रादुर्भावात् अन्या चान्या च प्रादुर्भवति ।

**॥ प्रदीपटीका ॥**

दर्शनं चक्षुरिन्द्रियं तेजोरूपं प्राप्य विषयग्राहित्वात्प्रासाददेशादपक्रम्य विषयं गच्छतीत्यर्थः । क्षणिकपक्षावष्टम्भेन भेदमाश्रित्याह-**अथ वाऽन्यान्यप्रादुर्भावादिति** । अन्यस्याऽन्यस्य तेजोरूपस्येन्द्रियस्योत्पादादित्यर्थः । भाष्यकारवचनप्रामाण्यादन्यान्यशब्दस्य साधुत्वं दृष्टव्यम् ।

**॥ उद्योतटीका ॥**

**दर्शनं चक्षुरिति** । करणे ल्युडिति भावः । **तेजोरूपमिति** । अपक्रमणसामर्थ्यमनेन दर्शितम् । विषयग्राहिणो नयनरश्मयः सूर्यरश्मिवत्प्रासाददेशस्थपुरुषनयनादपक्रम्य यावद्विषयदेशं गच्छन्तीत्यर्थः । एवं च प्रासादात्प्रेक्षते चक्षुः प्रासादादपक्रम्य विषयं जानीते इत्यर्थः । प्रासादस्थपुरुषान्निर्गमनं प्रासादादिति व्यवह्रियते इति बोध्यम् । 'प्रासादमारुह्य भुङ्क्ते' इत्याद्यर्थे प्रासादाद्भुङ्क्त इत्यादीनामनभिधानमिति बोध्यम् । प्रासादस्थपात्रान्निर्गतमन्नं भुङ्क्ते इति भाष्यरीत्यार्थ इत्यन्ये । **प्राप्यविषयग्राहित्वादिति** । 'परावरयोगे **चे**'ति **क्त्वा** । बौद्धो यथाकथंचिद्विभागो बोध्यः । भाष्ये-**अन्याऽचान्या चेति** । दर्शनक्रियेत्यर्थः । 'अपक्रामति तस्माद्दर्शन'मिति दर्शनपदेन

वृत्तिरेवाऽभिमता। कैयटोक्तव्याख्याने तु चक्षुर्व्यक्तिरिति विशेष्यं बोध्यम्। वृत्तिपरत्वेन व्याख्याने चिरं ज्ञानानुभवानापत्तिरिति पूर्वपक्षः। तावत्कालं स्थिरत्वेनाद्यमुत्तरं, द्वितीयं तु स्पष्टमेवेति ध्येयम्।

॥ **प्रदीपोद्योतनम्** ॥

दृश्यतेऽनेनेति दर्शनं चक्षुः तत्तेजसं विषय पर्यन्तं व्याप्नोति इन्द्रियाणां प्राप्यकारित्व नियमाद् अतः अपादाने इत्येव पञ्चमी सिद्धेत्याह **दर्शनमिति**।

॥ **वाक्यपदीयः** ॥

**चक्षुषः प्राप्यकारित्वे तेजसा तु द्वयोरपि।**
**विषयेन्द्रिययोरिष्टः संस्कारः स क्रमो ध्वनेः॥**

॥ **हरिवृषभकृत-टीका-** ॥

इहालोकानुगृहीतं घटादिविषयं सन्तमसेऽवस्थितोऽयं प्रतिपद्यते। तत्र येषामप्राप्यकारि चक्षुस्तेषामालोकेन विषयः प्रायेणानुगृह्यते। प्राप्यकारित्वे तु चक्षुषस्तुल्यजातीयेन तेजसा नयन-रश्म्यनुग्रहः क्रियते॥

॥ **अम्बाकर्त्रीव्याख्या** ॥

**चक्षुषः प्राप्यकारित्व इति।**

चक्षुषः प्राप्यकारित्वे चक्षुर्विषयदेशं गत्वा विषयेण संयुज्य विषयं गृह्णातीति पक्षे। "**कृभ्वस्तयः क्रियासामान्यवचना**" इति सिद्धान्तेनात्र कृधातोर्ग्रहणेऽर्थे प्रयोगः। तेजसा तु सौराद्यालोकेनेन्द्रियविषययोर्द्वयोरप्यनुग्रहविशेषरूपः संस्कार इष्टः। स एव क्रमः, सैव रीतिः शब्दश्रोत्रयोर्ध्वनिभिः संस्कारेऽवगन्तव्येत्यर्थः।

अयं भावः-सन्तमसेऽवस्थितोऽपि लोको बहिरालोकानुगृहीतं घटादिविषयं प्रतिपद्यते। तत्रालोकेन विषयानुग्रहे विप्रतिपत्तिरेव नास्ति, घटादेरालोकानुग्रहानुग्रहयोरुपलब्ध्यनुपलब्धिदर्शनात्। आलोकेन चक्षुषोऽनुग्रहे परं विप्रतिपत्तिः पक्षभेदेन।

तथा हि-चक्षुस्तैजसमिति सर्वेषां मतम्, किन्तु तस्य तैजसत्वेऽपि स्वरूपविषये द्वे दर्शने। केषाञ्चिद् बुद्बुदमानं चक्षुरिति दर्शनम्। बुद्बुदो मानमुपमानं यस्येति तदर्थः। बुद्बुदसदृश-मित्यर्थः। यद्वा बुद्बुदपरिमाणमित्यर्थः। तथा चैतन्मते खद्योतादितेजोवत् चक्षुरपि स्वगोलक-स्थितमेव बहिरवस्थितं घटादिकमप्राप्यैव गृह्णाति, चक्षुषः सूर्यादिमण्डलग्रहे तत्प्राप्तिकल्पनायां गौरवादननुभवाच्च। मध्यस्थितानां ग्रहान्तराणामपि मध्येमार्गं चक्षुः सङ्गतानां ग्रहणप्रसङ्गाच्चेति चक्षुषोऽप्राप्यकारित्ववादिनो **बौद्धाः**।

चक्षुषः प्राप्यकारित्ववादिनो **नैयायिकादयस्तु** रश्मिमात्रं चक्षुरिति। तत्र यदा सन्तमसेऽवस्थितो लोक आलोकवति बहिर्देशे स्थितं द्रव्यमुपलभते, तदा नयनरश्मयः सूक्ष्मा नयनात् सन्ततं निर्गत्य तेजःपरमाणूनां व्यापित्वेन सर्वत्र सुलभत्वाद् अन्तरालवर्तिभिस्तेजःपरमाणुभिः सम्बध्यमानाः सूक्ष्मतरं रश्मिद्रव्यान्तरं पृथ्वग्रमारभमाणस्तावद् गच्छन्ति यावदालोकः। तत आलोकेन तेषां चक्षुः स्वरूपभूतानां रश्मीनां संस्कार इति कल्प्यते।

**यत्तु** चक्षुषः प्राप्यकारित्वे सूर्यमण्डलग्रहकाले मध्येमार्गं स्थितानां ग्रहान्तराणामपि चाक्षुषत्व-प्रसङ्ग इत्यापादनम्, **तन्न,** परिमाणाल्पत्वेन दूरत्वदोषेण च तदग्रहात्। अस्ति च दूरत्वदोषे सत्यपि सूर्यमण्डलग्रहे परिमाणभेदस्तच्चाक्षुषत्वहेतुः। दृश्यते च पञ्चषपदपरिच्छिन्नेऽपि देशेऽदूरस्थितानां पुत्तिकादीनामग्रहणं दूरस्थितानां घटादीनाञ्च ग्रहणं परिमाणभेदेन। दृश्यते च तत्रैव स्थितानां पुत्तिकादीनामुपनेत्रोपकृतेन चक्षुषां ग्रहणम्। एवं सूर्यमण्डलग्रहकाले मध्येमार्गं स्थितानामल्प-परिमाणानामपि ग्रहाणामुपनेत्रविशेषोपकृतेन यन्त्रविशेषोपकृतेन वा चक्षुषां ग्रहणं भवत्येव।

इदं त्ववधेयम्–रात्रौ गव्यूत्यादिव्यवहितानामपि प्रदीपप्रकाशानां सुदूरस्थितानामपि च नक्षत्रादीनां चक्षुषा ग्रहणं भवति, मध्येमार्गं स्थितानां तु तत्तत्पदार्थानां तमसावृतानां ग्रहणं न भवति। तेन ज्ञायते नयनरश्मीनामालोकानुग्रहतदभावावेव तत्तत्पदार्थानां तत्र ग्रहणाग्रहणहेतू इति।

एवं चेदमायातम् येषामप्राप्यकारि चक्षुस्तेषामालोकेन विषय एव प्रायेणानुगृह्यते। प्राप्यकारित्वे तु चक्षुषस्तुल्यजातीयेन आलोकतेजसा नयनरश्मीनामनुग्रहः क्रियते। आलोकस्य विषया–नुग्राहकत्वे तु न कस्यापि विप्रतिपत्तिरिति॥

## ॥ वैयाकरणसिद्धान्तलघुमञ्जुषा रत्नप्रभा टीप्पणम् ॥

अत्र बौद्धाःगोलकमेव चक्षुः, अप्राप्यप्रकाशकारित्वात्। चक्षुषः प्राप्यप्रकाशकारित्वे स्वतो-ऽधिकपरिमाणवद्ग्रहणासम्भवः। न खलु नखरञ्जनिका परशुच्छेद्यं छिनत्ति, शाखाचन्द्रमसोस्तुल्य-कालग्रहणानुपपत्तिश्चेति, तन्न, अधिष्ठानासम्बद्धग्राहिण्या दीपप्रभाया इव चक्षुषोऽपि प्राप्यकारित्वे सम्भवात्, गोलकनिर्गतस्य महतश्चक्षुषः पृथ्वग्रत्वेन प्रदीपप्रभाया इव पृथुतरग्रहणस्य चोपपत्तेः। तस्मात्प्राप्यप्रकाशकारित्वाद् गोलकातिरिक्तमेव चक्षुः। तच्च न भौतिकं किन्त्वाहङ्कारिकमिति साङ्ख्याः। एतच्च भूतविकारत्वबोधिकाभिः **"आदित्यश्चक्षुर्भूत्वा अक्षिणी प्राविशत्"** (एत० उप० २।४) इत्यादिश्रुतिभिः विरुद्धम्। तस्मात्तैजसमेव चक्षुः। अचिन्त्यो हि तेजसो लाघवातिशयेन वेगातिशय इति शाखाचन्द–मसोर्भिन्नकालग्रहणेऽपि तुल्यकालप्रतितिर्नानुपपन्ना। नाप्यणुत्वं तेषाम्, शरीरव्यापिशैत्योपलम्भात्। नापि विभुत्वम्, सर्वेषां युगपद्ग्रहणप्रसङ्गात्। एवञ्च मध्यमपरिमाणमेव तेषां स्वीकार्य्यम्। अणुत्वेऽपि तन्निर्गतस्य पृथ्वग्रत्वान्न दोष इत्यन्ये।

●●●



विभाग-९

## ॥ साङ्ख्यप्रवचनभाष्यम् ॥

अत्रेयं प्रक्रिया । इन्द्रियप्रणालिकयार्थसन्निकर्षेण लिङ्गज्ञानादिना वादौ बुद्धेरर्थाकारा वृत्तिर्जायते। तत्र चेन्द्रियसन्निकर्षजा प्रत्यक्षा वृत्तिरिन्द्रियविशिष्टबुद्ध्याश्रिता नयनादिगतपित्तादिदोषैः पित्ताद्याकारवृत्त्युदयादिति विशेषः

### ॥ साङ्ख्यतत्त्व कौमुदी ॥

वृत्तिश्च-सन्निकर्षः । अर्थसन्निकृष्टमिन्द्रियमित्यर्थः । तस्मिन्नध्यवसायः - तदाश्रित इत्यर्थः । अध्यवसायश्च-बुद्धिव्यापारो ज्ञानम् । उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां वुद्धेस्तमोऽभिभवे सति यः सत्त्वसमुद्रेकः सोऽध्यवसायः

### ॥ साङ्ख्यतत्त्व विभाकर ॥

वृत्तिश्चेति । विषयाकारवृत्तिरूपपरिणामविशेषः, न तु संयोग इत्यर्थः । तदाश्रित इति । न च तादृशेन्द्रियेणाऽध्यवसाय इति कुतो नोक्तम् । एतन्मते नानाच्छिद्रघटान्तर्वर्त्तिप्रदिपप्रकाशवत् बुद्धिवृत्तिरुपाध्यवसायस्येन्द्रियाजन्यत्वात् । किन्तु तदाकारस्यैवेन्द्रियजन्यत्वाभ्युपगमात् । एतेन 'प्रतिविषयः नियतविषयोऽध्यवसीयते-श्रीयतेऽनेनेति प्रतिविषयाध्यवसायमिन्द्रियम्' इति परास्तम् । बुद्धिव्यापारः=बुद्धिपरिणामः । नन्वेवमयोग्यविषयसन्निकृष्टेन्द्रियवृत्तिबुद्धिवृत्तिरुपं ज्ञानमपि दृष्टप्रमाणं स्यादत आह । उपात्तेति । उपात्तविषयाणं - स्वस्वयोग्यविषयाणाम् । तथा च योग्यविषये एव तत्तदिन्द्रियसन्निकर्षो न तु परमतवत् प्रत्यक्षायोग्पेऽपीस्यर्थः । वृत्तौ सत्याम् - परिणामरुपसन्निकर्षे सति । बुद्धेस्तमोऽभिभवे सतीति । बृद्धेः- त्रिगुणात्मकस्य बुद्धिसत्त्वस्य । न च तमसः प्रतिबन्धकत्वे मानाभाव इति वाच्यम् । सर्वदा सत्त्वकार्यापत्त्या तत्कल्पनात् । तदभिभवश्चक्वचिदिन्द्रियसन्निकर्षेण, क्वचिच्च योगिनां धर्मेण, अञ्जनसंयोगे नयनमालिन्यवत् । तथा च रजस्तमसोर्गुणत्वेन सहकारित्वे सतीति तात्पर्यार्थः । अत एव वक्ष्यति-अन्योन्या-भिभवेत्यादि। सत्त्वसमुद्रेकः- परिणाम विशेषः । तस्य सज्ज्ञान्तरमाह । सोऽध्यवसाय इत्यादिना ।

●●●



## विभाग-१०

# ॥ विवरण प्रमेयसंग्रहः ॥

**यत्तु** तान्यप्राप्यकारीणीति सुगताः कल्पयन्ति । **तदयुक्तम्** । तत्र किं चक्षुःश्रोत्रयोरेवाप्राप्यकारित्वम् उतेतरेषामपि। न तावदितरेषाम् । दूरत एव स्पर्शरसगन्धोपलब्धिप्रसङ्गात् । नापि प्रथमः । विमते चक्षुःश्रोत्रे प्राप्यकारिणी बाह्येन्द्रियत्वाद् घ्राणादिवत् । तेजसस्त्वतिदूरशीघ्रगमनदर्शनादुन्मीलनमात्रे चक्षुषो ध्रुवादिप्राप्तिरविरुद्धा ।

### ॥ सिद्धान्तबिन्दुः ॥

शब्दस्पर्शरूपरसगन्धग्राहकाणि श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि । त्वक्चक्षुषी स्वग्राह्यगुणाश्रयं द्रव्यमपि गृह्णीतः । श्रोत्रमपि चक्षुर्वद् गत्वा शब्दग्राहकम् ।

### ॥ बिन्दुप्रपातव्याख्या ॥

**त्वक्चक्षुषी इति** । श्रोत्रजिह्वाघ्राणाख्यानि त्रीणीन्द्रियाणि तत्तद्गुणमात्रं गृह्णन्ति । त्वगिन्द्रियं तु स्पर्शं तदाश्रयं च गृह्णाति । तथा चक्षू रूपं तदाश्रयं च गृह्णाति । ननु प्रत्यक्षज्ञाने विषयेन्द्रियसन्निकर्षोपेक्ष्यते । तथा च दुरस्थपर्वतादेः कथं चक्षुषा ज्ञानमिति चेदुच्यते । चक्षुरिन्द्रियं स्वयं लम्बीभवत्पर्वत समीपं गत्वा पर्वतं व्याप्नोति किरणद्वारा वा ।

• • •

# સંદર્ભ ગ્રન્થસૂચિ

## અપ્રાપ્યકારીતાવાદી - વિભાગ - ૧ - ૨ - ૩ - ૪

### વિભાગ-૧ મહો.યશોવિ.મ.સા.ના ગ્રન્થો


| ક્રમ | ગ્રન્થ નામ |
| --- | --- |
| ૧) | સ્યાદ્વાદરહસ્ય મધ્યમ |
| ૨) | સ્યાદ્વાદરહસ્ય બૃહદ્ |
| ૩) | ન્યાયાલોક |
| ૪) | જ્ઞાનાર્ણવ સ્વોપજ્ઞટીકા |
| ૫) | સ્યાદ્વાદ કલ્પલતા |
| ૬) | જૈન તર્કભાષા |
| ૭) | અનેકાન્ત વ્યવસ્થા |
| ૮) | આત્મખ્યાતિ |
| ૯) | જ્ઞાનબિન્દુ |
| ૧૦) | તત્ત્વાર્થટીકા |
| ૧૧) | અષ્ટસહસ્ત્રી |
| ૧૨) | પ્રમેયમાલા |


### વિભાગ-૨ જૈન શ્વેતામ્બર [illegible] ગ્રન્થો


| ક્રમ | ગ્રન્થ નામ | કર્તા |
| --- | --- | --- |
| ૧૩) | શ્રી પ્રજ્ઞાપના સૂત્ર(મલયગિરિવૃત્તિ) | પ.પૂ. મલયગિરીજી મહારાજા |
| ૧૪) | શ્રી નંદીસૂત્ર હારીભદ્રીયાવૃત્તિ | પ.પૂ. હરિભદ્ર સૂરિ મહારાજા |
| ૧૫) | શ્રી નંદીસૂત્ર મલયગિરિવૃત્તિ | પ.પૂ. મલયગિરિજી મહારાજા |
| ૧૬) | નંદિસૂત્ર અવચૂરિ | અજ્ઞાત કર્તૃક |
| ૧૭) | શ્રી આવશ્યક સૂત્ર હારીભદ્રીયાવૃત્તિ | પ.પૂ. હરીભદ્રસૂરિ મહારાજા |
| ૧૮) | શ્રી આવશ્યક સૂત્ર મલયગિરિવૃત્તિ | પ.પૂ. મલયગિરિજી મહારાજા |
| ૧૯) | શ્રી વિશેષાવશ્યકસૂત્ર બૃહદ્વૃત્તિ | પ.પૂ. મલધારીહેમચન્દ્રસૂરિજી મહારાજા |
| ૨૦) | શ્રી વિશેષાવશ્યકસૂત્ર કોટ્યાચાર્યવૃત્તિઃ | પ.પૂ. કોટ્યાચાર્યજી મહારાજા |
| ૨૧) | શ્રી તત્વાર્થસૂત્ર હારીભદ્રીયાવૃત્તિઃ | પ.પૂ. હરિભદ્રસૂરિજી મહારાજા |
| ૨૨) | શ્રી તત્વાર્થસૂત્ર સિદ્ધસેનીયાવૃત્તિઃ | પ.પૂ. સિદ્ધસેનસૂરિજી મહારાજા |
| ૨૩) | પ્રવચનસારોદ્ધાર ટીકા | પ.પૂ. સિદ્ધસેનસૂરિજી મહારાજા |

| | | |
|---|---|---|
| ૨૪) | સ્યાદ્વાદરત્નાકર | પ.પૂ. વાદિદેવસૂરિજી મહારાજા |
| ૨૫) | રત્નાકરાવતારિકા | પ.પૂ. રત્નપ્રભસૂરિજી મહારાજા |
| ૨૬) | સમ્મતિ તર્ક પ્રકરણમ્ વાદમહાર્ણવ તત્વબોધવિધાયિનીવૃત્તિ | પ.પૂ. અભયદેવસૂરિજી મહારાજા |
| ૨૭) | સમ્મતિતર્ક મહાર્ણવ | પ.પૂ. દર્શનસૂરિ મહારાજા |
| ૨૮) | પ્રમાણમીમાંસા | પ.પૂ. હેમચન્દ્રસૂરિજી મહારાજા |
| ૨૯) | પ્રથમકર્મગ્રન્થઃ | પ.પૂ. દેવેન્દ્રસૂરિજી મહારાજા |
| ૩૦) | પ્રાચીન કર્મગ્રન્થ ટીકા | પ.પૂ. પરમાનન્દસૂરિજી મહારાજા |
| ૩૧) | લોકપ્રકાશ | ઉપાધ્યાય વિનયવિજયજી ગણિ મ.સા. |
| ૩૨) | સ્યાદ્વાદ મુક્તાવલી | પ.પૂ. યશશ્વત્સાગરજી મહારાજા |
| ૩૩) | યુક્તિપ્રકાશ | પ.પૂ.પદ્મસાગરસૂરિજી મહારાજા |
| ૩૪) | માર્ગણાદ્વાર વિવરણમ્ | પ.પૂ. પ્રેમસૂરિજી મહારાજા |

## વિભાગ-૩ દિગમ્બર સમ્પ્રદાયના ગ્રન્થો

| ક્રમ | ગ્રન્થ નામ | |
|---|---|---|
| ૩૫) | પ્રમેય કમલમાર્તણ્ડ | પ્રભાચન્દ્ર |
| ૩૬) | તત્વાર્થ રાજવાર્તિક | ભટ્ટ અકલંક |
| ૩૭) | તત્વાર્થ શ્લોકવાર્તિક | વિદ્યાનન્દસ્વામી |
| ૩૮) | તત્વાર્થ સર્વાર્થસિદ્ધિઃ | ભટ્ટ અકલંક |
| ૩૯) | ન્યાય કુમુદચન્દ્ર | |
| ૪૦) | ધવલા ષટ્ખંડાગમટીકા | વીરસેનાચાર્ય |
| ૪૧) | ન્યાયદિપિકા | ધર્મભૂષણયતિ |

## વિભાગ-૪ બૌદ્ધદર્શનના ગ્રન્થો

| ક્રમ | ગ્રન્થ નામ | |
|---|---|---|
| ૪૨) | તત્વસંગ્રહ મુળ | શાન્તિરક્ષિત |
| ૪૩) | તત્ત્વસંગ્રહ પંજિકા | કમલસેન |
| ૪૪) | પ્રમાણસમુચ્ચય | દિઙ્નાગ |
| ૪૫) | સ્વોપજ્ઞટીકા સમેત અભિધમ્મકોષઃ | |
| ૪૬) | સ્ફૂટાર્થાટીકા સમેત અભિધમ્મકોષ | |
| ૪૭) | ચન્દ્રકીર્તિવૃત્તિઃ સહિત ચતુઃશતકમ્ | |

## પ્રાપ્યકારીતાવાદી દર્શનો

### વિભાગ-૫ વૈશેષિક દર્શનના ગ્રન્થો

| ક્રમ | ગ્રન્થ નામ | કર્તા |
|---|---|---|
| ૪૮) | વ્યોમવતી | વ્યોમશીવાચાર્ય |
| ૪૯) | ન્યાયલીલાવતી | શ્રી વલ્ભાચાર્ય |
| ૫૦) | ન્યાયલીલાવતી કણ્ઠાભરણાવૃત્તિ | શંકરમિશ્ર |
| ૫૧) | ન્યાયલીલાવતી પ્રકાશ | પં. વર્ધમાનોપાધ્યાય |
| ૫૨) | ન્યાયલીલાવતી પ્રકાશ વિવૃત્તિઃ | ભગીરથ ઠક્કુર |
| ૫૩) | કિરણાવલી | ઉદયનાચાર્ય |
| ૫૪) | કિરણાવલી પ્રકાશ | વર્ધમાનાચાર્ય |
| ૫૫) | કિરણાવલી પ્રકાશ ટીકા | વર્ધમાનેન્દુ |
| ૫૬) | દ્રવ્યકિરણાવલીટીકા | ભટ્ટવાદીન્દ્ર |
| ૫૭) | દ્રવ્ય કિરણાવલી વૃત્તિઃ | દિવાકર |
| ૫૮) | કિરણાવલી ભાસ્કર | પદ્મનાભમિશ્ર |
| ૫૯) | પદાર્થદીપિકા | કૌણ્ડભટ્ટ |
| ૬૦) | ન્યાયકન્દલી | શ્રીધર |
| ૬૧) | ન્યાયકન્દલી ટીપ્પણ | પ.પૂ. નરચન્દ્રસૂરિજી મહારાજા |
| ૬૨) | ન્યાયકન્દલી પંજિકા | પ.પૂ. રાજશેખરસૂરિજી મહારાજા |
| ૬૩) | ન્યાયકન્દલી કુસુમોદ્ગમોદયવ્યાખ્યા | |
| ૬૪) | પદાર્થમાલા | જયરામ ભટ્ટાચાર્ય |
| ૬૫) | પદાર્થમાલા પ્રકાશ | લૌગાક્ષિભાસ્કર |
| ૬૬) | તર્કભાષા | કેશવમિશ્ર |
| ૬૭) | તર્કભાષા ટીકા | ગોવર્ધન મિશ્ર |
| ૬૮) | તર્ક તરંગિણી | પ.પૂ. ગુણરત્નવિજયજી ગણિ |

### વિભાગ-૬ ન્યાયદર્શનના ગ્રન્થો

| ક્રમ | ગ્રન્થ નામ | કર્તા |
|---|---|---|
| ૬૯) | ન્યાયવાર્તિક (૧) | પં. ઉદ્યોતકારાચાર્ય |
| ૭૦) | ન્યાયવાર્તિક તાત્પર્ય ટીકા | પં. વાચસ્પતિ મિશ્ર |
| ૭૧) | ન્યાયસૂત્ર | અક્ષપાદ (ગૌતમ) |
| ૭૨) | ન્યાયભાષ્ય | વાત્સ્યાયન |

| | | |
|---|---|---|
| ૭૩) | ન્યાયવાર્તિક (૨) | પં. ઉદ્યોતકરાચાર્ય |
| ૭૪) | ન્યાયસૂત્ર દીપા ટીકા | રાધામોહન ગોસ્વામી ભટ્ટાચાર્ય |
| ૭૫) | ન્યાય રહસ્ય (ન્યાય સૂત્ર વ્યાખ્યા) | રામભદ્ર |
| ૭૬) | ન્યાયસૂત્ર વિશ્વનાથવૃત્તિઃ | વિશ્વનાથ |
| ૭૭) | ન્યાયસિદ્ધાન્ત મુક્તાવલી પ્રભા | પં.નૃસિંહ |
| ૭૮) | ન્યાયસિદ્ધાન્ત મુક્તાવલી દીનકરી | પં. દીનકર ભટ્ટ |
| ૭૯) | ન્યાયસિદ્ધાન્ત મુક્તાવલી રામરુદ્રી | |
| ૮૦) | ન્યાયસાર ભૂષણટીકા સ્વોપજ્ઞ | ભાસર્વજ્ઞ |
| ૮૧) | ન્યાયસિદ્ધાન્ત મંજરી | શ્રી કણ્ઠશર્મા |
| ૮૨) | ન્યાયાલંકાર | શ્રી અભયતિલક ઉપાધ્યાય |
| ૮૩) | ન્યાયમંજરી | જયન્તભટ્ટ |
| ૮૪) | ન્યાયસાર (ન્યાયતાત્પર્ય દીપિકા ટીકા) | પ.પૂ. જયસિંહસૂરિજી |
| ૮૫) | પદાર્થરત્નમાલા | પં.તાર્કિક શિરોમણી રઘુનાથ |
| ૮૬) | તર્કભાષા ભાવાર્થ દીપિકા | પં. ગૌરીકાન્ત |
| ૮૭) | તત્ત્વપ્રભાવલી | પં. કૃષ્ણવલ્લભાચાર્ય |
| ૮૮) | તર્કભાષા | મુરારી ભટ્ટ |
| ૮૯) | તર્કભાષા સાર મંજરી ટીકા | પં. શ્રી માધવદેવ |

## વિભાગ-૭ મિમાંસાદર્શનના ગ્રન્થો

| ક્રમ | ગ્રન્થ નામ | કર્તા |
|---|---|---|
| ૯૦) | પ્રકરણ પંજિકા | શાલિકનાથ |
| ૯૧) | શ્લોકવાર્તિક (ન્યાયરત્નાકર વ્યાખ્યાસહિત) | પાર્થસારથી |
| ૯૨) | શ્લોકવાર્તિક તાત્પર્યવૃત્તિઃ | ભટ્ટોમ્બે |
| ૯૩) | માનમેયોદય | નારાયણકૃત |
| ૯૪) | શ્લોકવાર્તિક | કુમારિલભટ્ટ |

## વિભાગ-૮ વ્યાકરણ દર્શનનાં ગ્રન્થો

| ક્રમ | ગ્રન્થ નામ | કર્તા |
|---|---|---|
| ૯૫) | પાણિનીય વ્યાકરણે પ્રમાણસમીક્ષા | રામપ્રસાદ ત્રિપાઠી |
| ૯૬) | પાણિનીય વ્યાકરણ મહાભાષ્ય | પતઞ્જલી |

| | |
|---|---|
| ૯૭) પાણિનીય વ્યાકરણ મહાભાષ્ય પ્રદીપ | કૈયટ |
| ૯૮) પાણિનીય વ્યાકરણ મહાભાષ્ય ઉદ્યોત | નાગેશ |
| ૯૯) પાણિનીય વ્યાકરણ મહાભાષ્ય ઉદ્યોતન | અન્નંભટ્ટ |
| ૧૦૦) વાક્યપદીય | ભર્તૃહરી |
| ૧૦૧) વાક્યપદીય હરિવૃષભીયાવૃત્તિઃ | હરિવૃષભ |
| ૧૦૨) વાક્યપદીય અંબાકર્ત્રીવૃત્તિ | રઘુનાથશર્મા |
| ૧૦૩) વૈયાકરણ સિદ્ધાન્ત લઘુમઞ્જૂષા રત્નપ્રભાટીકા | સભાપતિ શર્મા |

## વિભાગ-૯ સાંખ્યદર્શનના ગ્રન્થો

| ક્રમ ગ્રન્થ નામ | કર્તા |
|---|---|
| ૧૦૪) સાંખ્યપ્રવચનભાષ્ય | વિજ્ઞાનભિક્ષુ |
| ૧૦૫) સાંખ્યતત્વ કૌમુદિ | |
| ૧૦૬) સાંખ્યતત્વ વિભાકર | પં. બંસીધર |

## વિભાગ-૧૦ વેદાન્તદર્શનના ગ્રન્થો

| ક્રમ ગ્રન્થ નામ | |
|---|---|
| ૧૦૭) વિવરણ પ્રમેય સંગ્રહ | વિદ્યારણ્યમુનિ |
| ૧૦૮) સિદ્ધાન્ત બિન્દુ | |
| ૧૦૯) સિદ્ધાન્ત બિન્દ-બિન્દુ પ્રપાતવ્યાખ્યા | |

• • •

....દીક્ષાયુગપ્રવર્તક...શાસન શિરતાજ-સૂરિરામચન્દ્ર....

100 Years

વિ.સં.૧૯૬૯-૨૦૬૯, પોષ સુદ ૧૩

દીક્ષાશતાબ્દી

પાર્શ્વાભ્યુદય પ્રકાશન
અમદાવાદ

KIRIT GRAPHICS
09898490091